# kauTilIya arthashAstraM

# કૌટિલીય અર્થશાસ્ત્રમ્

## Document Information

Text title : kauTilIya arthashAstraM

File name : artha.itx

Category : samAjashAstra, sociology_astrology

Location : doc_z_misc_sociology_astrology

Latest update : October 1, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 5, 2025

*sanskritdocuments.org*

kauTilIya arthashAstraM

# કૌટિલીય અર્થશાસ્ત્રમ્

01.1.01 પૃથિવ્યા લાભે પાલને ચ યાવન્ત્યર્થશાસ્ત્રાણિ પૂર્વાચાર્યૈઃ પ્રસ્તાવિતાનિ પ્રાયશસ્તાનિ સંહૃત્યકમિદમર્થશાસ્ત્રં કૃતમ્

01.1.02 તસ્યાયં પ્રકરણાધિકરણસમુદ્દેશઃ

01.1.03a વિદ્યાસમુદ્દેશઃ, વૃદ્ધસમુદ્દેશઃ, ઇન્દ્રિયજયઃ, અમાત્ય ઉત્પત્તિઃ, મન્ત્રિપુરોહિત ઉત્પત્તિઃ, ઉપધાભિઃ શૌચાશૌચજ્ઞાનં અમાત્યાનાં, -

01.1.03b ગૂઢપુરુષપ્રણિધિઃ, સ્વવિષયે કૃત્યાકૃત્યપક્ષરક્ષણં, પરવિષયે કૃત્યાકૃત્યપક્ષ ઉપગ્રહઃ,

01.1.03ch મન્ત્રાધિકારઃ, દૂતપ્રણિધિઃ, રાજપુત્રરક્ષણં, અપરુદ્ધવૃત્તં, અપરુદ્ધે વૃત્તિઃ, રાજપ્રણિધિઃ, નિશાન્તપ્રણિધિઃ, આત્મરક્ષિતકં, , ઇતિ વિનયાધિકારિકં પ્રથમં અધિકરણમ્

01.1.04a જનપદનિવેશઃ, ભૂમિચ્છિદ્રાપિધાનં, દુર્ગવિધાનં, દુર્ગનિવેશઃ, સન્નિધાતૃનિચયકર્મ, સમાહર્તૃસમુદયપ્રસ્થાપનં, અક્ષપટલે ગાણનિક્યાધિકારઃ,

01.1.04b સમુદયસ્ય યુક્તાપહૃતસ્ય પ્રત્યાનયનં, ઉપયુક્તપરીક્ષા, શાસનાધિકારઃ, કોશપ્રવેશ્યરત્નપરીક્ષા, આકરકર્માન્તપ્રવર્તનં, અક્ષશાલાયાં સુવર્ણાધ્યક્ષઃ

01.1.04ch વિશિખાયાં સૌવર્ણિકપ્રચારઃ, કોષ્ઠાગારાધ્યક્ષઃ, પણ્યાધ્યક્ષઃ, કુપ્યાધ્યક્ષઃ, આયુધાધ્યક્ષઃ, તુલામાનપૌતવં,

01.1.04d દેશકાલમાનં, શુલ્કાધ્યક્ષઃ, સૂત્રાધ્યક્ષઃ, સીતાધ્યક્ષઃ, સુરાડધ્યક્ષઃ, સૂનાધ્યક્ષઃ, ગણિકાડધ્યક્ષઃ,

01.1.04e નાવ્ડધ્યક્ષઃ, ગોડધ્યક્ષઃ, અશ્વાધ્યક્ષઃ, હસ્ત્ય્ડધ્યક્ષઃ, રથાધ્યક્ષઃ, પત્ત્ય્ડધ્યક્ષઃ, સેનાપતિપ્રચારઃ, મુદ્રાડધ્યક્ષઃ, વિવીતાધ્યક્ષઃ, સમાહર્તૃપ્રચારઃ,

01.1.04f ગૃહપતિકવૈદેહકતાપસવ્યઞ્જનાઃ પ્રણિધયઃ, નાગરિકપ્રણિધિઃ ઇત્યધ્યક્ષપ્રચારો દ્વિતીયં અધિકરણમ્

01.1.05a વ્યવહારસ્થાપના, વિવાદપદનિબન્ધઃ, વિવાહસમ્યુક્તં, દાયવિભાગઃ, વાસ્તુકં, સમયસ્ય અનપાકર્મ, ઋણાદાનં, ઔપનિધિકં, દાસકર્મકરકલ્પઃ,

01.1.05b સમ્ભૂય સમુત્થાનં, વિક્રીતક્રીતાનુશયઃ, દત્તસ્ય અનપાકર્મ, અસ્વામિવિક્રયઃ, સ્વસ્વામિસમ્બન્ધઃ, સાહસં, વાક્પારુષ્યં, દણ્ડપારુષ્યં, દ્યૂતસમાહ્વયં, પ્રકીર્ણકં - ઇતિ, ધર્મસ્થીયં તૃતીયં અધિકરણમ્

01.1.06a કારુકરક્ષણં, વૈદેહકરક્ષણં, ઉપનિપાતપ્રતીકારઃ, ગૂઢાજીવિનાં રક્ષા, સિદ્ધવ્યઞ્જનૈર્માણવપ્રકાશનં, શઙ્કારૂપકર્માભિગ્રહઃ,

01.1.06b આશુમૃતકપરીક્ષા, વાક્યકર્માનુયોગઃ, સર્વાધિકરણરક્ષણં

01.1.06ch એકાઙ્ગવધનિષ્ક્રયઃ, શુદ્ધશ્ચિત્રશ્ચ દણ્ડ કલ્પઃ, કન્યાપ્રકર્મ, અતિચારદણ્ડાઃ - ઇતિ કણ્ટકશોધનં ચતુર્થં અધિકરણમ્

01.1.07 દાણ્ડકર્મિકં, કોશાભિસંહરણં, ભૃત્યભરણીયં, અનુજીવિવૃત્તં, સમયાચારિકં, રાજ્યપ્રતિસન્ધાનં, એકાઇશ્વર્યં - ઇતિ યોગવૃત્તં પઞ્ચમં અધિકરણમ્

01.1.08 પ્રકૃતિસમ્પદઃ, શમવ્યાયામિકં - ઇતિ મણ્ડલયોનિઃ ષષ્ઠં અધિકરણમ્

01.1.09a ષાડ્ગુણ્યસમુદ્દેશઃ, ક્ષયસ્થાનવૃદ્ધિનિશ્ચયઃ, સંશ્રયવૃત્તિઃ, સમહીનજ્યાયસાં ગુણાભિનિવેશઃ, હીનસન્ધયઃ, વિગૃહ્ય આસનં, સન્ધાય આસનં, વિગૃહ્ય યાનં, સન્ધાય યાનં,

01.1.09b સમ્ભૂય પ્રયાણં, યાતવ્યામિત્રયોરભિગ્રહચિન્તા, ક્ષયલોભવિરાગહેતવઃ પ્રકૃતીનાં, સામવાયિકવિપરિમર્શઃ,

01.1.09ch સંહિત પ્રયાણિકં, પરિપણિતાપરિપણિતાપસૃતાઃ સન્ધયઃ, દ્વૈધીભાવિકાઃ સન્ધિવિક્રમાઃ, યાતવ્યવૃત્તિઃ, અનુગ્રાહ્યમિત્રવિશેષાઃ,

01.1.09d મિત્રહિરણ્યભૂમિકર્મસન્ધયઃ, પાર્ષ્ણિગ્રાહચિન્તા, હીનશક્તિપૂરણં, બલવતા વિગૃહ્ય ઉપરોધહેતવઃ, દણ્ડ ઉપનતવૃત્તં,

01.1.09e દણ્ડ ઉપનાયિવૃત્તં, સન્ધિકર્મ, સમાધિમોક્ષઃ, મધ્યમચરિતં, ઉદાસીનચરિતં, મણ્ડલચરિતં - ઇતિ ષાડ્ગુણ્યં સપ્તમં અધિકરણમ્

01.1.10 પ્રકૃતિવ્યસનવર્ગઃ, રાજરાજ્યયોર્વ્યસનચિન્તા, પુરુષવ્યસનવર્ગઃ, પીડનવર્ગઃ, સ્તમ્ભવર્ગઃ, કોશસઙ્ગવર્ગઃ, મિત્રવ્યસનવર્ગઃ - ઇતિ વ્યસનાધિકારિકં અષ્ટમં અધિકરણમ્

01.1.11a શક્તિદેશકાલબલાબલજ્ઞાનં, યાત્રાકાલાઃ, બલ ઉપાદાનકાલાઃ, સન્નાહગુણાઃ, પ્રતિબલકર્મ, પશ્ચાત્ કોપચિન્તા, બાહ્યાભ્યન્તરપ્રકૃતિકોપપ્રતીકારાઃ

01.1.11b ક્ષયવ્યયલાભવિપરિમર્શઃ, બાહ્યાભ્યન્તરાશ્ચાપદઃ, દુષ્યશત્રુસમ્યુક્તાઃ, અર્થાનર્થસંશયયુક્તાઃ, તાસાં ઉપાયવિકલ્પજાઃ સિદ્ધયઃ - ઇત્યભિયાસ્યત્ કર્મ નવમં અધિકરણમ્

01.1.12 સ્કન્ધાવારનિવેશઃ, સ્કન્ધાવારપ્રયાણં, બલવ્યસનાવસ્કન્દકાલરક્ષણં, કૂટયુદ્ધવિકલ્પાઃ, સ્વસૈન્ય ઉત્સાહનં, સ્વબલાન્યબલવ્યાયોગઃ, યુદ્ધભૂમયઃ, પત્ત્યશ્વરથહસ્તિકર્માણિ, પક્ષકક્ષ ઉરસ્યાનાં બલાગ્રતો વ્યૂહવિભાગઃ, સારફલ્ગુબલવિભાગઃ, પત્ત્યશ્વરથહસ્તિયુદ્ધાનિ, દણ્ડભોગમણ્ડલાસંહતવ્યૂહવ્યૂહનં, તસ્ય પ્રતિવ્યૂહસ્થાપનં - ઇતિ સાઙ્ગ્રામિકં દશમં અધિકરણમ્

01.1.13 ભેદ ઉપાદાનાનિ, ઉપાંશુદણ્ડાઃ - ઇતિ સઙ્ઘવૃત્તં એકાદશં અધિકરણમ્

01.1.14 દૂતકર્મ, મન્ત્રયુદ્ધં, સેનામુખ્યવધઃ, મણ્ડલપ્રોત્સાહનં, શસ્ત્રાગ્નિરસપ્રણિધયઃ, વીવધાસારપ્રસારવધઃ, યોગાતિસન્ધાનં, દણ્ડાતિસન્ધાનં, એકવિજયઃ - ઇત્યાબલીયસં દ્વાદશં અધિકરણમ્

01.1.15 ઉપજાપઃ, યોગવામનં, અપસર્પપ્રણિધિઃ, પર્યુપાસનકર્મ, અવમર્દઃ, લબ્ધપ્રશમનં - ઇતિ દુર્ગલમ્ભ ઉપાયઃ ત્રયોદશં અધિકરણમ્

01.1.16 પરબલઘાતપ્રયોગઃ, પ્રલમ્ભનં, સ્વબલ ઉપઘાતપ્રતીકારઃ - ઇત્યૌપનિષદિકં ચતુર્દશં અધિકરણમ્

01.1.17 તન્ત્રયુક્તયઃ - ઇતિ તન્ત્રયુક્તિઃ પઞ્ચદશં અધિકરણમ્

01.1.18 શાસ્ત્રસમુદ્દેશઃ પઞ્ચદશાધિકરણાનિ સ-અશીતિપ્રકરણશતં સ-પઞ્ચાશદ્ડધ્યાયશતં ષટ્શ્લોકસહસ્રાણિ ઇતિ

01.1.19ab સુખગ્રહણવિજ્ઞેયં તત્ત્વાર્થપદનિશ્ચિતમ્ ।

01.1.19chd કૌટિલ્યેન કૃતં શાસ્ત્રં વિમુક્તગ્રન્થવિસ્તરમ્ (ઇતિ)

Chapt . Section.1: Enumeration of the sciences

i) Establishing (the necessity of) philosophy

01.2.01 આન્વીક્ષિકી ત્રયી વાર્ત્તા દણ્ડનીતિશ્ચ ઇતિ વિદ્યાઃ

01.2.02 ત્રયી વાર્ત્તા દણ્ડ નીતિશ્ચ ઇતિ માનવાઃ

01.2.03 ત્રયી વિશેષો હ્યાન્વીક્ષિકી ઇતિ

01.2.04 વાર્ત્તા દણ્ડનીતિશ્ચ ઇતિ બાર્હસ્પત્યાઃ

01.2.05 સંવરણમાત્રં હિ ત્રયી લોકયાત્રાવિદ ઇતિ

01.2.06 દણ્ડનીતિરેકા વિદ્યા ઇત્યૌશનસાઃ

01.2.07 તસ્યાં હિ સર્વવિદ્યાઽઽરમ્ભાઃ પ્રતિબદ્ધા ઇતિ

01.2.08 ચતસ્ર એવ વિદ્યા ઇતિ કૌટિલ્યઃ

01.2.09 તાભિર્ધર્માર્થૌ યદ્ વિદ્યાત્ તદ્ વિદ્યાનાં વિદ્યાત્વમ્

01.2.10 સાઙ્ખ્યં યોગો લોકાયતં ચ ઇત્યાન્વીક્ષિકી

01.2.11 ધર્માધર્મૌ ત્રય્યાં અર્થાનર્થૌ વાર્ત્તાયાં નયાનયૌ દણ્ડનીત્યાં બલાબલે ચ એતાસાં હેતુભિરન્વીક્ષમાણા લોકસ્ય ઉપકરોતિ વ્યસનેઽભ્યુદયે ચ બુદ્ધિં અવસ્થાપયતિ પ્રજ્ઞાવાક્યક્રિયાવૈશારદ્યં ચ કરોતિ

01.2.12ab પ્રદીપઃ સર્વવિદ્યાનાં ઉપાયઃ સર્વકર્મણામ્ ।

01.2.12chd આશ્રયઃ સર્વધર્માણાં શશ્વદ્ આન્વીક્ષિકી મતા (ઇતિ)

Chapt . Section.1, (I) Establishing (the necessity of) the Vedic Lore

01.3.01 સામ।ઋગ્યજુર્વેદાઃ ત્રયઃ ત્રયી

01.3.02 અથર્વવેદ ઇતિહાસવેદૌ ચ વેદાઃ

01.3.03 શિક્ષા કલ્પો વ્યાકરણં નિરુક્તં છન્દોવિચિતિર્જ્યોતિષં ઇતિ ચાઙ્ગાનિ

01.3.04 એષ ત્રયીધર્મશ્ચતુર્ણાં વર્ણાનાં આશ્રમાણાં ચ સ્વધર્મસ્થાપનાદ્ ઔપકારિકઃ

01.3.05 સ્વધર્મો બ્રાહ્મણસ્ય અધ્યયનં અધ્યાપનં યજનં યાજનં દાનં પ્રતિગ્રહશ્ચ

01.3.06 ક્ષત્રિયસ્યાધ્યયનં યજનં દાનં શસ્ત્રાજીવો ભૂતરક્ષણં ચ

01.3.07 વૈશ્યસ્યાધ્યયનં યજનં દાનં કૃષિપાશુપાલ્યે વણિજ્યા ચ

01.3.08 શૂદ્રસ્ય દ્વિજાતિશુશ્રૂષા વાર્ત્તા કારુકુશીલવકર્મ ચ

01.3.09 ગૃહસ્થસ્ય સ્વધર્માજીવઃ તુલ્યૈરસમાન।ઋષિભિર્વૈવાહ્યં ઋતુગામિત્વં દેવપિત્ર્ઽતિથિપૂજા ભૃત્યેષુ ત્યાગઃ શેષભોજનં ચ

01.3.10 બ્રહ્મચારિણઃ સ્વાધ્યાયો અગ્નિકાર્યાભિષેકૌ ભૈક્ષવ્રતિત્વં આચાર્યે પ્રાણાન્તિકી વૃત્તિઃ તદ્ઽભાવે ગુરુપુત્રે સ-બ્રહ્મચારિણિ વા

01.3.11 વાનપ્રસ્થસ્ય બ્રહ્મચર્યં ભૂમૌ શય્યા જટાઽજિનધારણં અગ્નિહોત્રાભિષેકૌ દેવતાપિત્ઽતિથિપૂજા વન્યશ્ચાહારઃ

01.3.12 પરિવ્રાજકસ્ય જિત ઇન્દ્રિયત્વં અનારમ્ભો નિષ્કિઞ્ચનત્વં સઙ્ગત્યાગો ભૈક્ષવ્રતં અનેકત્રારણ્યે ચ વાસો બાહ્યાભ્યન્તરં ચ શૌચમ્

01.3.13 સર્વેષાં અહિંસા સત્યં શૌચં અનસૂય આનૃશંસ્યં ક્ષમા ચ

01.3.14 સ્વધર્મઃ સ્વર્ગાયાનન્ત્યાય ચ

01.3.15 તસ્યાતિક્રમે લોકઃ સઙ્કરાદ્ ઉચ્છિદ્યેત

01.3.16ab તસ્માત્ સ્વધર્મં ભૂતાનાં રાજા ન વ્યભિચારયેત્ ।

01.3.16chd સ્વધર્મં સન્દધાનો હિ પ્રેત્ય ચ ઇહ ચ નન્દતિ

01.3.17ab વ્યવસ્થિતાર્યમર્યાદઃ કૃતવર્ણાશ્રમસ્થિતિઃ ।

01.3.17chd ત્રય્યાઽભિરક્ષિતો લોકઃ પ્રસીદતિ ન સીદતિ (ઇતિ)

Chapt . Ii) Establishing (the necessity of) Economics, and (iv) the Science of Politics

01.4.01 કૃષિપાશુપાલ્યે વણિજ્યા ચ વાર્તા, ધાન્યપશુહિરણ્યકુપ્યવિષ્ટિપ્રદાનાદ્ ઔપકારિકી

01.4.02 તયા સ્વપક્ષં પરપક્ષં ચ વશીકરોતિ કોશદણ્ડાભ્યામ્

01.4.03 આન્વીક્ષિકી ત્રયી વાર્ત્તાનાં યોગક્ષેમસાધનો દણ્ડઃ, તસ્ય નીતિર્દણ્ડ નીતિઃ, અલબ્ધલાભાર્થા લબ્ધપરિરક્ષણી રક્ષિતવિવર્ધની વૃદ્ધસ્ય તીર્થે પ્રતિપાદની ચ

01.4.04 તસ્યાં આયત્તા લોકયાત્રા

01.4.05 તસ્માલ્લોકયાત્રાઽર્થી નિત્યં ઉદ્યતદણ્ડઃ સ્યાત્

01.4.06 ન હ્યેવંવિધં વશ ઉપનયનં અસ્તિ ભૂતાનાં યથા દણ્ડઃ । ઇત્યાચાર્યાઃ

01.4.07 ન ઇતિ કૌટિલ્યઃ

01.4.08 તીક્ષ્ણદણ્ડો હિ ભૂતાનાં ઉદ્વેજનીયો ભવતિ

01.4.09 મૃદુદણ્ડઃ પરિભૂયતે

01.4.10 યથાઽર્હદણ્ડઃ પૂજ્યતે

01.4.11 સુવિજ્ઞાતપ્રણીતો હિ દણ્ડઃ પ્રજા ધર્માર્થકામૈર્યોજયતિ

01.4.12 દુષ્પ્રણીતઃ કામક્રોધાભ્યાં અવજ્ઞાનાદ્ વા વાનપ્રસ્થપરિવ્રાજકાન્ અપિ કોપયતિ, કિંઽઙ્ગ પુનર્ગૃહસ્થાન્

01.4.13 અપ્રણીતઃ તુ માત્સ્યન્યાયં ઉદ્ભાવયતિ

01.4.14 બલીયાન્ અબલં હિ ગ્રસતે દણ્ડધરાભાવે

01.4.15 સ તેન ગુપ્તઃ પ્રભવતિ ઇતિ

01.4.16ab ચતુર્વર્ણાશ્રમો લોકો રાજ્ઞા દણ્ડેન પાલિતઃ ।

01.4.16chd સ્વધર્મકર્માભિરતો વર્તતે સ્વેષુ વર્ત્મસુ (ઇતિ)

Chapt . Section.2: Association with elders

01.5.01 તસ્માદ્ દણ્ડમૂલાઃ તિસ્રો વિદ્યાઃ

01.5.02 વિનયમૂલો દણ્ડઃ પ્રાણભૃતાં યોગક્ષેમાવહઃ

01.5.03 કૃતકઃ સ્વાભાવિકશ્ચ વિનયઃ

01.5.04 ક્રિયા હિ દ્રવ્યં વિનયતિ નાદ્રવ્યમ્

01.5.05 શુશ્રૂષા શ્રવણગ્રહણધારણવિજ્ઞાન ઊહાપોહતત્ત્વાભિનિવિષ્ટબુદ્ધિં વિદ્યા વિનયતિ ન ઇતરમ્

01.5.06 વિદ્યાનાં તુ યથાસ્વં આચાર્યપ્રામાણ્યાદ્ વિનયો નિયમશ્ચ

01.5.07 વૃત્તચૌલકર્મા લિપિં સઙ્ખ્યાનં ચ ઉપયુઞ્જીત

01.5.08 વૃત્ત ઉપનયનઃ ત્રયીં આન્વીક્ષિકીં ચ શિષ્ટેભ્યો વાર્ત્તાં અધ્યક્ષેભ્યો દણ્ડનીતિં વક્તૃપ્રયોક્તૃભ્યઃ

01.5.09 બ્રહ્મચર્યં ચ ષોડશાદ્ વર્ષાત્

01.5.10 અતો ગોદાનં દારકર્મ ચાસ્ય

01.5.11 નિત્યશ્ચ વિદ્યાવૃદ્ધસમ્યોગો વિનયવૃદ્ધ્યઽર્થં, તન્મૂલત્વાદ્ વિનયસ્ય

01.5.12 પૂર્વં અહર્ભાગં હસ્ત્યઽશ્વરથપ્રહરણવિદ્યાસુ વિનયં ગચ્છેત્ ।

01.5.13 પશ્ચિમં ઇતિહાસશ્રવણે

01.5.14 પુરાણં ઇતિવૃત્તં આખ્યાયિક ઉદાહરણં ધર્મશાસ્ત્રં અર્થશાસ્ત્રં ચ ઇતિ ઇતિહાસઃ

01.5.15 શેષં અહોરાત્રભાગં અપૂર્વગ્રહણં ગૃહીતપરિચયં ચ કુર્યાત્, અગૃહીતાનાં આભીક્ષ્ણ્યશ્રવણં ચ

01.5.16 શ્રુતાદ્ હિ પ્રજ્ઞા ઉપજાયતે પ્રજ્ઞાયા યોગો યોગાદ્ આત્મવત્તા ઇતિ વિદ્યાનાં સામર્થ્યમ્

01.5.17ab વિદ્યાવિનીતો રાજા હિ પ્રજાનાં વિનયે રતઃ ।

01.5.17chd અનન્યાં પૃથિવીં ભુઙ્ક્તે સર્વભૂતહિતે રતઃ (ઇતિ)

Chapt . Section.3: Control over the senses, (i) Casting out the group of six enemies

01.6.01 વિદ્યા વિનયહેતુરિન્દ્રિયજયઃ કામક્રોધલોભમાનમદહર્ષત્યાગાત્ કાર્યઃ

01.6.02 કર્ણત્વગ્ઽક્ષિજિહ્વાઘ્રાણ ઇન્દ્રિયાણાં શબ્દસ્પર્શરૂપરસગન્ધેષ્વવિપ્રતિપત્તિરિન્દ્રિયજયઃ, શાસ્ત્રાનુષ્ઠાનં વા

01.6.03 કૃત્સ્નં હિ શાસ્ત્રં ઇદં ઇન્દ્રિયજયઃ

01.6.04 તદ્ વિરુદ્ધવૃત્તિરવશ્ય ઇન્દ્રિયશ્ચાતુરન્તો અપિ રાજા સદ્યો વિનશ્યતિ

01.6.05 યથા દાણ્ડક્યો નામ ભોજઃ કામાદ્ બ્રાહ્મણકન્યાં અભિમન્યમાનઃ સ-બન્ધુરાષ્ટ્રો વિનનાશ, કરાલશ્ચ વૈદેહઃ

01.6.06 કોપાજ્ જનમેજયો બ્રાહ્મણેષુ વિક્રાન્તઃ, તાલજઙ્ઘશ્ચ ભૃગુષુ

01.6.07 લોભાદ્ ઐલશ્ચાતુર્વર્ણ્યં અત્યાહારયમાણઃ, સૌવીરશ્ચાજબિન્દુઃ ।

01.6.08 માનાદ્ રાવણઃ પરદારાન્ અપ્રયચ્છન્, દુર્યોધનો રાજ્યાદ્ અંશં ચ

01.6.09 મદાદ્ દમ્ભોદ્ભવો ભૂતાવમાની, હૈહયશ્ચાર્જુનઃ

01.6.10 હર્ષાદ્ વાતાપિરગસ્ત્યં અત્યાસાદયન્, વૃષ્ણિસઙ્ઘશ્ચ દ્વૈપાયનં ઇતિ

01.6.11ab એતે ચાન્યે ચ બહવઃ શત્રુષડ્વર્ગં આશ્રિતાઃ ।

01.6.11chd સ-બન્ધુરાષ્ટ્રા રાજાનો વિનેશુરજિત ઇન્દ્રિયાઃ

01.6.12ab શત્રુષડ્વર્ગં ઉત્સૃજ્ય જામદગ્ન્યો જિત ઇન્દ્રિયઃ ।

01.6.12chd અમ્બરીષશ્ચ નાભાગો બુભુજાતે ચિરં મહીમ્ (ઇતિ)

Chapt . I) The life of a sage-like king

01.7.01 તસ્માદ્ અરિષડ્વર્ગત્યાગેન ઇન્દ્રિયજયં કુર્વીત, વૃદ્ધસમ્યોગેન પ્રજ્ઞાં, ચારેણ ચક્ષુઃ, ઉત્થાનેન યોગક્ષેમસાધનં, કાર્યાનુશાસનેન સ્વધર્મસ્થાપનં, વિનયં વિદ્યા ઉપદેશેન, લોકપ્રિયત્વં અર્થસમ્યોગેન વૃત્તિમ્

01.7.02 એવં વશ્ય ઇન્દ્રિયઃ પરસ્ત્રીદ્રવ્યહિંસાશ્ચ વર્જયેત્, સ્વપ્નં લૌલ્યં અનૃતં ઉદ્ધતવેષત્વં અનર્થ્યસમ્યોગં અધર્મસમ્યુક્તં અનર્થસમ્યુક્તં ચ વ્યવહારમ્

01.7.03 ધર્માર્થાવિરોધેન કામં સેવેત, ન નિહ્સુખઃ સ્યાત્

01.7.04 સમં વા ત્રિવર્ગં અન્યોન્યાનુબદ્ધમ્

01.7.05 એકો હ્યત્યાસેવિતો ધર્માર્થકામાનાં આત્માનં ઇતરૌ ચ પીડયતિ

01.7.06 અર્થ એવ પ્રધાન ઇતિ કૌટિલ્યઃ

01.7.07 અર્થમૂલૌ હિ ધર્મકામાવિતિ

01.7.08 મર્યાદાં સ્થાપયેદ્ આચાર્યાન્ અમાત્યાન્ વા, ય એનં અપાય સ્થાનેભ્યો વારયેયુઃ, છાયાનાલિકાપ્રતોદેન વા રહસિ પ્રમાદ્યન્તં અભિતુદેયુઃ

01.7.09ab સહાયસાધ્યં રાજત્વં ચક્રં એકં ન વર્તતે ।

01.7.09chd કુર્વીત સચિવાંઃ તસ્માત્ તેષાં ચ શ‌ૃણુયાન્ મતમ્ (ઇતિ)

Chapt . Appointment of ministers

01.8.01 સહાધ્યાયિનો અમાત્યાન્ કુર્વીત, દૃષ્ટશૌચસામર્થ્યત્વાત્ ઇતિ ભારદ્વાજઃ

01.8.02 તે હ્યસ્ય વિશ્વાસ્યા ભવન્તિ ઇતિ

01.8.03 ન ઇતિ વિશાલાક્ષઃ

01.8.04 સહક્રીડિતત્વાત્ પરિભવન્ત્યેનમ્

01.8.05 યે હ્યસ્ય ગુહ્યસધર્માણઃ તાન્ અમાત્યાન્ કુર્વીત, સમાનશીલવ્યસનત્વાત્

01.8.06 તે હ્યસ્ય મર્મજ્ઞભયાન્નાપરાધ્યન્તિ ઇતિ

01.8.07 સાધારણ એષ દોષઃ ઇતિ પારાશરાઃ

01.8.08 તેષાં અપિ મર્મજ્ઞભયાત્ કૃતાકૃતાન્યનુવર્તેત

01.8.09ab યાવદ્ભ્યો ગુહ્યં આચષ્ટે જનેભ્યઃ પુરુષાધિપઃ ।

01.8.09chd અવશઃ કર્મણા તેન વશ્યો ભવતિ તાવતામ્

01.8.10 ય એનં આપત્સુ પ્રાણાબાધયુક્તાસ્વનુગૃહ્ણીયુઃ તાન્ અમાત્યાન્ કુર્વીત, દૃષ્ટાનુરાગત્વાત્ ઇતિ

01.8.11 ન ઇતિ પિશુનઃ

01.8.12 ભક્તિરેષા ન બુદ્ધિગુણઃ

01.8.13 સઙ્ખ્યાતાર્થેષુ કર્મસુ નિયુક્તા યે યથાઽઽદિષ્ટં અર્થં સવિશેષં વા કુર્યુઃ તાન્ અમાત્યાન્ કુર્વીત, દૃષ્ટગુણત્વાત્ ઇતિ

01.8.14 ન ઇતિ કૌણપદન્તઃ

01.8.15 અન્યૈરમાત્યગુણૈરયુક્તા હ્યેતે

01.8.16 પિતૃપૈતામહાન્ અમાત્યાન્ કુર્વીત, દૃષ્ટાવદાનત્વાત્

01.8.17 તે હ્યેનં અપચરન્તં અપિ ન ત્યજન્તિ, સગન્ધત્વાત્

01.8.18 અમાનુષેષ્વપિ ચ એતદ્ દૃશ્યતે

01.8.19 ગાવો હ્યસગન્ધં ગોગણં અતિક્રમ્ય સગન્ધેષ્વેવાવતિષ્ઠન્તે ઇતિ

01.8.20 ન ઇતિ વાતવ્યાધિઃ

01.8.21 તે હ્યસ્ય સર્વં અવગૃહ્ય સ્વામિવત્ પ્રચરન્તિ

01.8.22 તસ્માન્નીતિવિદો નવાન્ અમાત્યાન્ કુર્વીત

01.8.23 નવાઃ તુ યમસ્થાને દણ્ડધરં મન્યમાના નાપરાધ્યન્તિ ઇતિ

01.8.24 ન ઇતિ બાહુદન્તી પુત્રઃ

01.8.25 શાસ્ત્રવિદ્ અદૃષ્ટકર્મા કર્મસુ વિષાદં ગચ્છેત્

01.8.26 તસ્માદ્ અભિજનપ્રજ્ઞાશૌચશૌર્યાનુરાગયુક્તાન્ અમાત્યાન્ કુર્વીત, ગુણપ્રાધાન્યાત્ ઇતિ

01.8.27 સર્વં ઉપપન્નં ઇતિ કૌટિલ્યઃ

01.8.28 કાર્યસામર્થ્યાદ્ હિ પુરુષસામર્થ્યં કલ્પ્યતે

01.8.29ab સામર્થ્યશ્ચ  વિભજ્યામાત્યવિભવં દેશકાલૌ ચ કર્મ ચ ।

01.8.29chd અમાત્યાઃ સર્વ એવ એતે કાર્યાઃ સ્યુર્ન તુ મન્ત્રિણઃ  (ઇતિ)

Chapt .  Appointment of counsellors and chaplain

01.9.01 જાનપદો અભિજાતઃ સ્વવગ્રહઃ કૃતશિલ્પશ્ચક્ષુષ્માન્ પ્રાજ્ઞો ધારયિષ્ણુર્દક્ષો વાગ્મી પ્રગલ્ભઃ પ્રતિપત્તિમાન્ ઉત્સાહપ્રભાવયુક્તઃ ક્લેશસહઃ શુચિર્મૈત્રો દૃઢભક્તિઃ શીલબલારોગ્યસત્ત્વયુક્તઃ સ્તમ્ભચાપલહીનઃ સમ્પ્રિયો વૈરાણાં અકર્તા ઇત્યમાત્યસમ્પત્

01.9.02 અતઃ પાદાર્ધગુણહીનૌ મધ્યમાવરૌ

01.9.03 તેષાં જનપદ્ઽભિજનં અવગ્રહં ચાપ્તતઃ પરીક્ષેત, સમાનવિદ્યેભ્યઃ શિલ્પં શાસ્ત્રચક્ષુષ્મત્તાં ચ, કર્મારમ્ભેષુ પ્રજ્ઞાં ધારયિષ્ણુતાં દાક્ષ્યં ચ, કથાયોગેષુ વાગ્મિત્વં પ્રાગલ્ભ્યં પ્રતિભાનવત્ત્વં ચ, સંવાસિભ્યઃ શીલબલારોગ્યસત્ત્વયોગં અસ્તમ્ભં અચાપલં ચ, પ્રત્યક્ષતઃ સમ્પ્રિયત્વં અવૈરત્વં ચ

01.9.04 પ્રત્યક્ષપરોક્ષાનુમેયા હિ રાજવૃત્તિઃ

01.9.05 સ્વયં દ્રૃષ્ટં પ્રત્યક્ષમ્

01.9.06 પર ઉપદિષ્ટં પરોક્ષમ્

01.9.07 કર્મસુ કૃતેનાકૃતાવેક્ષણં અનુમેયમ્

01.9.08 યૌગપદ્યાત્ તુ કર્મણાં અનેકત્વાદ્ અનેકસ્થત્વાચ્ચ દેશકાલાત્યયો મા ભૂદ્ ઇતિ પરોક્ષં અમાત્યૈઃ કારયેત્ ઇત્યમાત્યકર્મ ।

01.9.09 પુરોહિતં ઉદિત ઉદિતકુલશીલં સ-અઙ્ગે વેદે દૈવે નિમિત્તે દણ્ડનીત્યાં ચાભિવિનીતં આપદાં દૈવમાનુષીણાં અથર્વભિરુપાયૈશ્ચ પ્રતિકર્તારં કુર્વીત

01.9.10 તં આચાર્યં શિષ્યઃ પિતરં પુત્રો ભૃત્યઃ સ્વામિનં ઇવ ચાનુવર્તેત

01.9.11ab બ્રાહ્મણેન એધિતં ક્ષત્રં મન્ત્રિમન્ત્રાભિમન્ત્રિતમ્ ।

01.9.11chd જયત્યજિતં અત્યન્તં શાસ્ત્રાનુગમશસ્ત્રિતમ્ (ઇતિ)

Chapt . Ascertainment of the integrity or the absence of integrity of ministerbymeans of secret tests

01.10.01 મન્ત્રિપુરોહિતસખઃ સામાન્યેષ્વધિકરણેષુ સ્થાપયિત્વાઽમાત્યાન્ ઉપધાભિઃ શોધયેત્

01.10.02 પુરોહિતં અયાજ્યયાજનાધ્યાપને નિયુક્તં અમૃષ્યમાણં રાજાઽવક્ષિપેત્

01.10.03 સ સત્ત્રિભિઃ શપથપૂર્વં એકૈકં અમાત્યં ઉપજાપયેત્ - અધાર્મિકો અયં રાજા, સાધુ ધાર્મિકં અન્યં અસ્ય તત્કુલીનં અપરુદ્ધં કુલ્યં એકપ્રગ્રહં સામન્તં આટવિકં ઔપપાદિકં વા પ્રતિપાદયામઃ, સર્વેષાં એતદ્ રોચતે, કથં વા તવ ઇતિ

01.10.04 પ્રત્યાખ્યાને શુચિઃ । ઇતિ ધર્મ ઉપધા

01.10.05 સેનાપતિરસત્પ્રગ્રહેણાવક્ષિપ્તઃ સત્ત્રિભિરેકૈકં અમાત્યં ઉપજાપયેત્ લોભનીયેનાર્થેન રાજવિનાશાય, સર્વેષાં એતદ્ રોચતે, કથં વા તવ ઇતિ

01.10.06 પ્રત્યાખ્યાને શુચિઃ । ઇત્યર્થ ઉપધા

01.10.07 પરિવ્રાજિકા લબ્ધવિશ્વાસાઽન્તઃપુરે કૃતસત્કારા મહામાત્રં એકૈકં ઉપજપેત્ - રાજમહિષી ત્વાં કામયતે કૃતસમાગમ ઉપાયા, મહાન્ અર્થશ્ચ તે ભવિષ્યતિ ઇતિ

01.10.08 પ્રત્યાખ્યાને શુચિઃ । ઇતિ કામ ઉપધા

01.10.09 પ્રહવણનિમિત્તં એકો અમાત્યઃ સર્વાન્ અમાત્યાન્ આવાહયેત્

01.10.10 તેન ઉદ્વેગેન રાજા તાન્ અવરુન્ધ્યાત્

01.10.11 કાપટિકશ્ચાત્ર પૂર્વાવરુદ્ધઃ તેષાં અર્થમાનાવક્ષિપ્તં એકૈકં અમાત્યં ઉપજપેત્ - અસત્ પ્રવૃત્તો અયં રાજા, સાધ્વેનં હત્વાઽન્યં પ્રતિપાદયામઃ, સર્વેષાં એતદ્ રોચતે, કથં વા તવ ઇતિ

01.10.12 પ્રત્યાખ્યાને શુચિઃ । ઇતિ ભય ઉપધા

01.10.13 તત્ર ધર્મ ઉપધાશુદ્ધાન્ ધર્મસ્થીયકણ્ટકશોધનેષુ કર્મસુ સ્થાપયેત્, અર્થ ઉપધાશુદ્ધાન્ સમાહર્તૃસન્નિધાતૃનિચયકર્મસુ, કામ ઉપધા શુદ્ધાન્ બાહ્યાભ્યન્તરવિહારરક્ષાસુ, ભય ઉપધાશુદ્ધાન્ આસન્નકાર્યેષુ રાજ્ઞઃ

01.10.14 સર્વ ઉપધાશુદ્ધાન્ મન્ત્રિણઃ કુર્યાત્

01.10.15 સર્વત્રાશુચીન્ ખનિદ્રવ્યહસ્તિવનકર્માન્તેષુ ઉપયોજયેત્

01.10.16ab ત્રિવર્ગભયસંશુદ્ધાન્ અમાત્યાન્ સ્વેષુ કર્મસુ ।

01.10.16chd અધિકુર્યાદ્ યથા શૌચં ઇત્યાચાર્યા વ્યવસ્થિતાઃ

01.10.17ab ન ત્વેવ કુર્યાદ્ આત્માનં દેવીં વા લક્ષ્યં ઈશ્વરઃ ।

01.10.17chd શૌચહેતોરમાત્યાનાં એતત્ કૌટિલ્યદર્શનમ્

01.10.18ab ન દૂષણં અદુષ્ટસ્ય વિષેણ ઇવામ્ભસશ્ચરેત્ ।

01.10.18chd કદાચિદ્ હિ પ્રદુષ્ટસ્ય નાધિગમ્યેત ભેષજમ્

01.10.19ab કૃતા ચ કલુષાબુદ્ધિરુપધાભિશ્ચતુર્વિધા ।

01.10.19chd નાગત્વાઽન્તં નિવર્તેત સ્થિતા સત્ત્વવતાં ધૃતૌ

01.10.20ab તસ્માદ્ બાહ્યં અધિષ્ઠાનં કૃત્વા કાર્યે ચતુર્વિધે ।

01.10.20chd શૌચાશૌચં અમાત્યાનાં રાજા માર્ગેત સત્રિભિઃ (ઇતિ)

Chapt . Appointment of persons in secret service

01.11.01 ઉપધાભિઃ શુદ્ધામાત્યવર્ગો ગૂઢપુરુષાન્ ઉત્પાદયેત્ કાપટિક ઉદાસ્થિતગૃહપતિકવૈદેહકતાપસવ્યઞ્જનાન્ સત્રિતીક્ષ્ણરસદભિક્ષુકીશ્ચ

01.11.02 પરમર્મજ્ઞઃ પ્રગલ્ભશ્છાત્રઃ કાપટિકઃ

01.11.03 તં અર્થમાનાભ્યાં પ્રોત્સાહ્ય મન્ત્રી બ્રૂયાત્ - રાજાનં માં ચ પ્રમાણં કૃત્વા યસ્ય યદ્ અકુશલં પશ્યસિ તત્ તદાનીં એવ પ્રત્યાદિશ ઇતિ

01.11.04 પ્રવ્રજ્યા પ્રત્યવસિતઃ પ્રજ્ઞાશૌચયુક્ત ઉદાસ્થિતઃ

01.11.05 સ વાર્ત્તાકર્મપ્રદિષ્ટાયાં ભૂમૌ પ્રભૂતહિરણ્યાન્તેવાસી કર્મ કારયેત્

01.11.06 કર્મફલાચ્ચ સર્વપ્રવ્રજિતાનાં ગ્રાસાચ્છાદનાવસથાન્ પ્રતિવિદધ્યાત્

01.11.07 વૃત્તિકામાંશ્ચ ઉપજપેત્ - એતેન એવ વેષેણ રાજાર્થશ્ચરિતવ્યો ભક્તવેતનકાલે ચ ઉપસ્થાતવ્યમ્ ઇતિ

01.11.08 સર્વપ્રવ્રજિતાશ્ચ સ્વં સ્વં વર્ગં એવં ઉપજપેયુઃ

01.11.09 કર્ષકો વૃત્તિક્ષીણઃ પ્રજ્ઞાશૌચયુક્તો ગૃહપતિકવ્યઞ્જનઃ

01.11.10 સ કૃષિકર્મપ્રદિષ્ટાયાં ભૂમૌ - ઇતિ સમાનં પૂર્વેણ

01.11.11 વાણિજકો વૃત્તિક્ષીણઃ પ્રજ્ઞાશૌચયુક્તો વૈદેહકવ્યઞ્જનઃ

01.11.12 સ વણિક્કર્મપ્રદિષ્ટાયાં ભૂમૌ - ઇતિ સમાનં પૂર્વેણ

01.11.13 મુણ્ડો જટિલો વા વૃત્તિકામઃ તાપસવ્યઞ્જનઃ

01.11.14 સ નગરાભ્યાશે પ્રભૂતમુણ્ડજટિલાન્તેવાસી શાકં યવમુષ્ટિં વા માસદ્વિમાસાન્તરં પ્રકાશં અશ્નીયાત્, ગૂઢં ઇષ્ટં આહારમ્

01.11.15 વૈદેહકાન્તેવાસિનશ્ચ એનં સમિદ્ધયોગૈરર્ચયેયુઃ

01.11.16 શિષ્યાશ્ચાસ્યાવેદયેયુઃ - અસૌ સિદ્ધઃ સામેધિકઃ ઇતિ

01.11.17 સમેધાશાસ્તિભિશ્ચાભિગતાનાં અઙ્ગવિદ્યયા શિષ્યસંજ્ઞાભિશ્ચ કર્માણ્યભિજને અવસિતાન્યાદિશેત્ - અલ્પલાભં અગ્નિદાહં ચોરભયં દૂષ્યવધં તુષ્ટિદાનં વિદેશપ્રવૃત્તિજ્ઞાનં, ઇદં અદ્ય શ્વો વા ભવિષ્યતિ, ઇદં વા રાજા કરિષ્યતિ ઇતિ

01.11.18 તદ્ અસ્ય ગૂઢાઃ સત્રિણશ્ચ સમ્પાદયેયુઃ

01.11.19 સત્ત્વપ્રજ્ઞાવાક્યશક્તિસમ્પન્નાનાં રાજભાગ્યં અનુવ્યાહરેત્, મન્ત્રિસમ્યોગં ચ બ્રૂયાત્

01.11.20 મન્ત્રી ચ એષાં વૃત્તિકર્મભ્યાં વિયતેત

01.11.21 યે ચ કારણાદ્ અભિક્રુદ્ધાઃ તાન્ અર્થમાનાભ્યાં શમયેત્, અકારણક્રુદ્ધાંઃ તૂષ્ણીં દણ્ડેન, રાજદ્વિષ્ટકારિણશ્ચ

01.11.22ab પૂજિતાશ્ચાર્થમાનાભ્યાં રાજ્ઞા રાજ ઉપજીવિનામ્ ।

01.11.22chd જાનીયુઃ શૌચં ઇત્યેતાઃ પઞ્ચસંસ્થાઃ પ્રકીર્તિતાઃ (ઇતિ)

Chapt . Appointment of roving spies Rules for secret servants

01.12.01 યે ચાપ્યસમ્બન્ધિનો અવશ્યભર્તવ્યાઃ તે લક્ષણં અઙ્ગવિદ્યાં જમ્ભકવિદ્યાં માયાગતં આશ્રમધર્મં નિમિત્તં અન્તરચક્રં ઇત્યધીયાનાઃ સત્ત્રિણઃ, સંસર્ગવિદ્યાં ચ

01.12.02 યે જનપદે શૂરાઃ ત્યક્તાત્માનો હસ્તિનં વ્યાલં વા દ્રવ્યહેતોઃ પ્રતિયોધયેયુઃ તે તીક્ષ્ણાઃ

01.12.03 યે બન્ધુષુ નિહ્સ્નેહાઃ ક્રૂરા અલસાશ્ચ તે રસદાઃ

01.12.04 પરિવ્રાજિકા વૃત્તિકામા દરિદ્રા વિધવા પ્રગલ્ભા બ્રાહ્મણ્યન્તઃપુરે કૃતસત્કારા મહામાત્રકુલાન્યભિગચ્છેત્

01.12.05 એતયા મુણ્ડા વૃષલ્યો વ્યાખ્યાતાઃ ઇતિ સઞ્ચારાઃ ।

01.12.06 તાન્ રાજા સ્વવિષયે મન્ત્રિપુરોહિતસેનાપતિયુવરાજદૌવારિકાન્તર્વંશિકપ્રશાસ્તૃ
સમાહર્તૃસન્નિધાતૃપ્રદેષ્ટૃનાયકપૌરવ્યાવહારિકકાર્માન્તિકમન્ત્રિપરિષદ્ઽધ્યક્ષદણ્ડ
દુર્ગાન્તપાલાટવિકેષુ શ્રદ્ધેયદેશવેષશિલ્પભાષાઽભિજનાપદેશાન્ ભક્તિતઃ
સામર્થ્યયોગાચ્ચાપસર્પયેત્

01.12.07 તેષાં બાહ્યં ચારં છત્રભૃઙ્ગારવ્યજનપાદુકાસનયાનવાહન ઉપગ્રાહિણઃ તીક્ષ્ણા વિદ્યુઃ

01.12.08 તં સત્ત્રિણઃ સંસ્થાસ્વર્પયેયુઃ

01.12.09 સૂદારાલિકસ્નાપકસંવાહકાસ્તરકકલ્પકપ્રસાધક ઉદકપરિચારકા રસદાઃ
કુબ્જવામનકિરાતમૂકબધિરજડાન્ધચ્છદ્માનો નટનર્તકગાયનવાદકવાગ્જીવનકુશીલવાઃ
સ્ત્રિયશ્ચાભ્યન્તરં ચારં વિદ્યુઃ

01.12.10 તં ભિક્ષુક્યઃ સંસ્થાસ્વપ્રયેયુઃ

01.12.11 સંસ્થાનાં અન્તેવાસિનઃ સંજ્ઞાલિપિભિશ્ચારસઞ્ચારં કુર્યુઃ

01.12.12 ન ચાન્યોન્યં સંસ્થાઃ તે વા વિદ્યુઃ

01.12.13 ભિક્ષુકીપ્રતિષેધે દ્વાહ્સ્થપરમ્પરા માતાપિતૃવ્યઞ્જનાઃ શિલ્પકારિકાઃ કુશીલવા દાસ્યો વા ગીતપાઠ્યવાદ્યભાણ્ડગૂઢલેખ્યસંજ્ઞાભિર્વા ચારં નિર્હરેયુઃ

01.12.14 દીર્ઘરોગ ઉન્માદાગ્નિરસવિસર્ગેણ વા ગૂઢનિર્ગમનમ્

01.12.15 ત્રયાણાં એકવાક્યે સમ્પ્રત્યયઃ

01.12.16 તેષાં અભીક્ષ્ણવિનિપાતે તૂષ્ણીન્દણ્ડઃ પ્રતિષેધઃ

01.12.17 કણ્ટકશોધન ઉક્તાશ્ચાપસર્પાઃ પરેષુ કૃતવેતના વસેયુરસમ્પાતિનશ્ચારાર્થમ્

01.12.18 ત ઉભયવેતનાઃ

01.12.19ab ગૃહીતપુત્રદારાંશ્ચ કુર્યાદ્ ઉભયવેતનાન્ ।

01.12.19chd તાંશ્ચારિપ્રહિતાન્ વિદ્યાત્ તેષાં શૌચં ચ તદ્વિધૈઃ

01.12.20ab એવં શત્રૌ ચ મિત્રે ચ મધ્યમે ચાવપેચ્ચરાન્ ।
01.12.20chd ઉદાસીને ચ તેષાં ચ તીર્થેષ્વષ્ટાદશસ્વપિ
01.12.21ab અન્તર્ગૃહચરાઃ તેષાં કુબ્જવામનપણ્ડકાઃ ।
01.12.21chd શિલ્પવત્યઃ સ્ત્રિયો મૂકાશ્ચિત્રાશ્ચ મ્લેચ્છજાતયઃ
01.12.22ab દુર્ગેષુ વણિજઃ સંસ્થા દુર્ગાન્તે સિદ્ધતાપસાઃ ।
01.12.22chd કર્ષક ઉદાસ્થિતા રાષ્ટ્રે રાષ્ટ્રાન્તે વ્રજવાસિનઃ
01.12.23ab વને વનચરાઃ કાર્યાઃ શ્રમણાટવિકાદયઃ ।
01.12.23chd પરપ્રવૃત્તિજ્ઞાનાર્થાઃ શીઘ્રાશ્ચારપરમ્પરાઃ
01.12.24ab પરસ્ય ચ એતે બોદ્ધવ્યાઃ તાદૃશૈરેવ તાદૃશાઃ ।
01.12.24chd ચારસઞ્ચારિણઃ સંસ્થા ગૂઢાશ્ચાગૂઢસંજ્ઞિતાઃ
01.12.25ab અકૃત્યાન્ કૃત્યપક્ષીયૈર્દર્શિતાન્ કાર્યહેતુભિઃ ।
01.12.25chd પરાપસર્પજ્ઞાનાર્થં મુખ્યાન્ અન્તેષુ વાસયેત્ (ઇતિ)

Chapt . keeping a watch over the seducible and non-seducible parties in ones own territory

01.13.01 કૃતમહામાત્રાપસર્પઃ પૌરજાનપદાન્ અપસર્પયેત્
01.13.02 સત્રિણો દ્વન્દ્વિનઃ તીર્થસભાપૂગજનસમવાયેષુ વિવાદં કુર્યુઃ
01.13.03 સર્વગુણસમ્પન્નશ્ચાયં રાજા શ્રૂયતે, ન ચાસ્ય કશ્ચિદ્ ગુણો દૃશ્યતે યઃ પૌરજાનપદાન્ દણ્ડકરાભ્યાં પીડયતિ ઇતિ
01.13.04 તત્ર યેઽનુપ્રશંસેયુઃ તાન્ ઇતરઃ તં ચ પ્રતિષેધયેત્
01.13.05 માત્સ્યન્યાયાભિભૂતાઃ પ્રજા મનું વૈવસ્વતં રાજાનં ચક્રિરે
01.13.06 ધાન્યષડ્ભાગં પણ્યદશભાગં હિરણ્યં ચાસ્ય ભાગધેયં પ્રકલ્પયામ્-આસુઃ
01.13.07 તેન ભૃતા રાજાનઃ પ્રજાનાં યોગક્ષેમાવહાઃ
01.13.08 તેષાં કિલ્બિષં અદણ્ડકરા હરન્ત્યયોગક્ષેમાવહાશ્ચ પ્રજાનામ્
01.13.09 તસ્માદ્ ઉઞ્છષડ્ભાગં આરણ્યકાઽપિ નિર્વપન્તિ - તસ્ય એતદ્ ભાગધેયં યોઽસ્માન્ ગોપાયતિ ઇતિ
01.13.10 ઇન્દ્રયમસ્થાનં એતદ્ રાજાનઃ પ્રત્યક્ષહેડપ્રસાદાઃ
01.13.11 તાન્ અવમન્યમાનાન્ દૈવોઽપિ દણ્ડઃ સ્પૃશતિ
01.13.12 તસ્માદ્ રાજાનો નાવમન્તવ્યાઃ
01.13.13 ઇત્યેવં ક્ષુદ્રકાન્ પ્રતિષેધયેત્
01.13.14 કિંવદન્તીં ચ વિદ્યુઃ
01.13.15 યે ચાસ્ય ધાન્યપશુહિરણ્યાન્યાજીવન્તિ, તૈરુપકુર્વન્તિ વ્યસનેઽભ્યુદયે વા, કુપિતં બન્ધું રાષ્ટ્રં વા વ્યાવર્તયન્તિ, અમિત્રં આટવિકં વા પ્રતિષેધયન્તિ, તેષાં મુણ્ડજટિલવ્યઞ્જનાઃ તુષ્ટાતુષ્ટત્વં વિદ્યુઃ
01.13.16 તુષ્ટાન્ ભૂયોઽર્થમાનાભ્યાં પૂજયેત્

01.13.17 અતુષ્ટાંઃ તુષ્ટિહેતોઃ ત્યાગેન સામ્ના ચ પ્રસાદયેત્

01.13.18 પરસ્પરાદ્ વા ભેદયેદ્ એનાન્, સામન્તાટવિકતત્કુલીનાપરુદ્ધેભ્યશ્ચ

01.13.19 તથાઽપ્યતુષ્યતો દણ્ડકરસાધનાધિકારેણ જનપદવિદ્વેષં ગ્રાહયેત્

01.13.20 વિવિષ્ટાન્ ઉપાંશુદણ્ડેન જનપદકોપેન વા સાધયેત્

01.13.21 ગુપ્તપુત્રદારાન્ આકરકર્માન્તેષુ વા વાસયેત્ પરેષાં આસ્પદભયાત્

01.13.22 ક્રુદ્ધલુબ્ધભીતમાનિનઃ તુ પરેષાં કૃત્યાઃ

01.13.23 તેષાં કાર્તાન્તિકનૈમિત્તિકમૌહૂર્તિકવ્યઞ્જનાઃ પરસ્પરાભિસમ્બન્ધં અમિત્રાટવિકસમ્બન્ધં વા વિદ્યુઃ

01.13.24 તુષ્ટાન્ અર્થમાનાભ્યાં પૂજયેત્ ।

01.13.25 અતુષ્ટાન્ સામદાનભેદદણ્ડૈઃ સાધયેત્

01.13.26ab એવં સ્વવિષયે કૃત્યાન્ અકૃત્યાંશ્ચ વિચક્ષણઃ ।

01.13.26chd પર ઉપજાપાત્ સમ્રક્ષેત્ પ્રધાનાન્ ક્ષુદ્રકાન્ અપિ  (ઇતિ)

Chapt .   Winning over the seducible and non-seducible parties in the enemy territory

01.14.01 કૃત્યાકૃત્યપક્ષ ઉપગ્રહઃ સ્વવિષયે વ્યાખ્યાતઃ, પરવિષયે વાચ્યઃ

01.14.02 સંશ્રુત્યાર્થાન્ વિપ્રલબ્ધઃ, તુલ્યકારિણોઃ શિલ્પે વા ઉપકારે વા વિમાનિતઃ, વલ્લભાવરુદ્ધઃ,
સમાહૂય પરાજિતઃ, પ્રવાસ ઉપતપ્તઃ, કૃત્વા વ્યયં અલબ્ધકાર્યઃ, સ્વધર્માદ્ દાયાદ્યાદ્ વા ઉપરુદ્ધઃ,
માનાધિકારાભ્યાં ભ્રષ્ટઃ, કુલ્યૈરન્તર્હિતઃ, પ્રસભાભિમૃષ્ટસ્ત્રીકઃ, કારાભિન્યસ્તઃ,
પર ઉક્તદણ્ડિતઃ, મિથ્યાઽઽચારવારિતઃ, સર્વસ્વં આહારિતઃ, બન્ધનપરિક્લિષ્ટઃ, પ્રવાસિતબન્ધુઃ
ઇતિ ક્રુદ્ધવર્ગઃ

01.14.03 સ્વયં ઉપહતઃ, વિપ્રકૃતઃ, પાપકર્માભિખ્યાતઃ, તુલ્યદોષદણ્ડેન ઉદ્વિગ્નઃ, પર્યાત્તભૂમિઃ, દણ્ડેન ઉપનતઃ, સર્વાધિકરણસ્થઃ, સહસા ઉપચિતાર્થઃ, તત્કુલીન ઉપાશંસુઃ, પ્રદ્વિષ્ટો રાજ્ઞા, રાજદ્વેષી ચ - ઇતિ ભીતવર્ગઃ

01.14.04 પરિક્ષીણઃ, અન્યાત્તસ્વઃ, કદર્યઃ, વ્યસની, અત્યાહિતવ્યવહારશ્ચ - ઇતિ લુબ્ધવર્ગઃ

01.14.05 આત્મસમ્ભાવિતઃ, માનકામઃ, શત્રુપૂજાઽમર્ષિતઃ, નીચૈરુપહિતઃ, તીક્ષ્ણઃ, સાહસિકઃ, ભોગેનાસન્તુષ્ટઃ - ઇતિ માનિવર્ગઃ

01.14.06 તેષાં મુણ્ડજટિલવ્યઞ્જનૈર્યો યદ્ભક્તિઃ કૃત્યપક્ષીયઃ તં તેન ઉપજાપયેત્

01.14.07 યથા મદાન્ધો હસ્તી મત્તેનાધિષ્ઠિતો યદ્ યદ્ આસાદયતિ તત્ સર્વં પ્રમૃદ્નાતિ, એવં અયં અશાસ્ત્રચક્ષુરન્ધો રાજા પૌરજાનપદવધાયાભ્યુત્થિતઃ, શક્યં અસ્ય પ્રતિહસ્તિપ્રોત્સાહનેનાપકર્તું, અમર્ષઃ ક્રિયતામ્ ઇતિ ક્રુદ્ધવર્ગં ઉપજાપયેત્

01.14.08 યથા લીનઃ સર્પો યસ્માદ્ ભયં પશ્યતિ તત્ર વિષં ઉત્સૃજતિ, એવં અયં રાજા જાતદોષાશઙ્કઃ ત્વયિ પુરા ક્રોધવિષં ઉત્સૃજતિ, અન્યત્ર ગમ્યતામ્ ઇતિ ભીતવર્ગં । ઉપજાપયેત્

01.14.09 યથા શ્વગણિનાં ધેનુઃ શ્વભ્યો દુહ્યતે ન બ્રાહ્મણેભ્યઃ, એવં અયં રાજા સત્ત્વપ્રજ્ઞાવાક્યશક્તિહીનેભ્યો દુહ્યતે નાત્મગુણસમ્પન્નેભ્યઃ, અસૌ રાજા પુરુષવિશેષજ્ઞઃ, તત્ર ગમ્યતામ્ ઇતિ લુબ્ધવર્ગં । ઉપજાપયેત્

01.14.10 યથા ચણ્ડાલ ઉદપાનશ્ચણ્ડાલાનાં એવ ઉપભોગ્યો નાન્યેષાં, એવં અયં રાજા નીચો નીચાનાં એવ ઉપભોગ્યો ન ત્વદ્વિધાનાં આર્યાણાં, અસૌ રાજા પુરુષવિશેષજ્ઞઃ, તત્ર ગમ્યતામ્ ઇતિ માનિવર્ગં ઉપજાપયેત્

01.14.11ab તથા ઇતિ પ્રતિપન્નાંઃ તાન્ સંહિતાન્ પણકર્મણા ।

01.14.11chd યોજયેત યથાશક્તિ સ-અપસર્પાન્ સ્વકર્મસુ

01.14.12ab લભેત સામદાનાભ્યાં કૃત્યાંશ્ચ પરભૂમિષુ ।

01.14.12chd અકૃત્યાન્ ભેદદણ્ડાભ્યાં પરદોષાંશ્ચ દર્શયન્ (ઇતિ)

Chapt . The topic of counsel

01.15.01 કૃતસ્વપક્ષપરપક્ષ ઉપગ્રહઃ કાર્યારમ્ભાંશ્ચિન્તયેત્

01.15.02 મન્ત્રપૂર્વાઃ સર્વારમ્ભાઃ

01.15.03 તદ્।ઉદ્દેશઃ સંવૃતઃ કથાનાં અનિહ્શ્રાવી પક્ષિભિરપ્યનાલોક્યઃ સ્યાત્ ।

01.15.04 શ્રૂયતે હિ શુકસારિકાભિર્મન્ત્રો ભિન્નઃ, શ્વભિરપ્યન્યૈશ્ચ તિર્યગ્યોનિભિરિતિ

01.15.05 તસ્માન્ મન્ત્ર ઉદ્દેશં અનાયુક્તો ન ઉપગચ્છેત્

01.15.06 ઉચ્છિદ્યેત મન્ત્રભેદી

01.15.07 મન્ત્રભેદો હિ દૂતામાત્યસ્વામિનાં ઇઙ્ગિતાકારાભ્યામ્

01.15.08 ઇઙ્ગિતં અન્યથાવૃત્તિઃ

01.15.09 આકૃતિગ્રહણં આકારઃ

01.15.10 તસ્ય સંવરણં આયુક્તપુરુષરક્ષણં આકાર્યકાલાદ્ ઇતિ

01.15.11 તેષાં હિ પ્રમાદમદસુપ્તપ્રલાપાઃ, કામાદિરુત્સેકઃ, પ્રચ્છન્નોઽવમતો વા મન્ત્રં ભિનત્તિ

01.15.12 તસ્માદ્ આદ્રક્ષેન્ મન્ત્રમ્

01.15.13 મન્ત્રભેદો હ્યયોગક્ષેમકરો રાજ્ઞઃ તદ્।આયુક્તપુરુષાણાં ચ

01.15.14 તસ્માદ્ ગુહ્યં એકો મન્ત્રયેત ઇતિ ભારદ્વાજઃ

01.15.15 મન્ત્રિણાં અપિ હિ મન્ત્રિણો ભવન્તિ, તેષાં અપ્યન્યે

01.15.16 સા એષા મન્ત્રિપરમ્પરા મન્ત્રં ભિનત્તિ

01.15.17ab તસ્માન્નાસ્ય પરે વિદ્યુઃ કર્મ કિઞ્ચિચ્ચિકીર્ષિતમ્ ।

01.15.17chd આરબ્ધારઃ તુ જાનીયુરારબ્ધં કૃતં એવ વા

01.15.18 ન એકસ્ય મન્ત્રસિદ્ધિરસ્તિ ઇતિ વિશાલાક્ષઃ

01.15.19 પ્રત્યક્ષપરોક્ષાનુમેયા હિ રાજવૃત્તિઃ

01.15.20 અનુપલબ્ધસ્ય જ્ઞાનં ઉપલબ્ધસ્ય નિશ્ચિતબલાધાનં અર્થદ્વૈધસ્ય સંશયચ્છેદનં એકદેશદૃષ્ટસ્ય શેષ ઉપલબ્ધિરિતિ મન્ત્રિસાધ્યં એતત્

01.15.21 તસ્માદ્ બુદ્ધિવૃદ્ધૈઃ સાર્ધં અધ્યાસીત મન્ત્રમ્

01.15.22ab ન કઞ્ચિદ્ અવમન્યેત સર્વસ્ય શ◌ૃણુયાન્ મતમ્ ।

01.15.22chd બાલસ્યાપ્યર્થવદ્વાક્યં ઉપયુઞ્જીત પણ્ડિતઃ ।

01.15.23 એતન્ મન્ત્રજ્ઞાનં, ન એતન્ મન્ત્રરક્ષણમ્ ઇતિ પારાશરાઃ

01.15.24 યદ્ અસ્ય કાર્યં અભિપ્રેતં તત્પ્રતિરૂપકં મન્ત્રિણઃ પૃચ્છેત્ - કાર્યં ઇદં એવં આસીત્, એવં વા યદિ ભવેત્, તત્ કથં કર્તવ્યમ્ ઇતિ

01.15.25 તે યથા બ્રૂયુઃ તત્ કુર્યાત્

01.15.26 એવં મન્ત્ર ઉપલબ્ધિઃ સંવૃતિશ્ચ ભવતિ ઇતિ

01.15.27 ન ઇતિ પિશુનઃ

01.15.28 મન્ત્રિણો હિ વ્યવહિતં અર્થં વૃત્તં અવૃત્તં વા પૃષ્ટા અનાદરેણ બ્રુવન્તિ પ્રકાશયન્તિ વા

01.15.29 સ દોષઃ

01.15.30 તસ્માત્ કર્મસુ યે યેષ્વભિપ્રેતાઃ તૈઃ સહ મન્ત્રયેત

01.15.31 તૈર્મન્ત્રયમાણો હિ મન્ત્રસિદ્ધિં ગુપ્તિં ચ લભતે ઇતિ

01.15.32 ન ઇતિ કૌટિલ્યઃ

01.15.33 અનવસ્થા હ્યેષા

01.15.34 મન્ત્રિભિઃ ત્રિભિશ્ચતુર્ભિર્વા સહ મન્ત્રયેત

01.15.35 મન્ત્રયમાણો હ્યેકેનાર્થકૃચ્છ્રેષુ નિશ્ચયં નાધિગચ્છેત્

01.15.36 એકશ્ચ મન્ત્રી યથા ઇષ્ટં અનવગ્રહશ્ચરતિ

01.15.37 દ્વાભ્યાં મન્ત્રયમાણો દ્વાભ્યાં સંહતાભ્યાં અવગૃહ્યતે, વિગૃહીતાભ્યાં વિનાશ્યતે

01.15.38 તત્ ત્રિષુ ચતુષુ વા કૃચ્છ્રેણ ઉપપદ્યતે

01.15.39 મહાદોષં ઉપપન્નં તુ ભવતિ

01.15.40 તતઃ પરેષુ કૃચ્છ્રેણાર્થનિશ્ચયો ગમ્યતે, મન્ત્રો વા રક્ષ્યતે

01.15.41 દેશકાલકાર્યવશેન ત્વેકેન સહ દ્વાભ્યાં એકો વા યથાસામર્થ્યં મન્ત્રયેત alterNative views approved

01.15.42 કર્મણાં આરમ્ભ ઉપાયઃ પુરુષદ્રવ્યસમ્પદ્ દેશકાલવિભાગો વિનિપાતપ્રતીકારઃ કાર્યસિદ્ધિરિતિ પઞ્ચાઙ્ગો મન્ત્રઃ

01.15.43 તાન્ એકૈકશઃ પૃચ્છેત્ સમસ્તાંશ્ચ

01.15.44 હેતુભિશ્ચ એષાં મતિપ્રવિવેકાન્ વિદ્યાત્

01.15.45 અવાપ્તાર્થઃ કાલં નાતિક્રામયેત્

01.15.46 ન દીર્ઘકાલં મન્ત્રયેત, ન તેષાં પક્ષીયૈર્યેષાં અપકુર્યાત્

01.15.47 મન્ત્રિપરિષદં દ્વાદશામાત્યાન્ કુર્વીત ઇતિ માનવાઃ

01.15.48 ષોડશ ઇતિ બાર્હસ્પત્યાઃ

01.15.49 વિંશતિમ્ ઇત્યૌશનસાઃ

01.15.50 યથાસામર્થ્યં ઇતિ કૌટિલ્યઃ

01.15.51 તે હ્યસ્ય સ્વપક્ષં પરપક્ષં ચ ચિન્તયેયુઃ

01.15.52 અકૃતારમ્ભં આરબ્ધાનુષ્ઠાનં અનુષ્ઠિતવિશેષં નિયોગસમ્પદં ચ કર્મણાં કુર્યુઃ

01.15.53 આસન્નૈઃ સહ કર્માણિ પશ્યેત્

01.15.54 અનાસન્નૈઃ સહ પત્રસમ્પ્રેષણેન મન્ત્રયેત

01.15.55 ઇન્દ્રસ્ય હિ મન્ત્રિપરિષદ્ । ઋષીણાં સહસ્રમ્

01.15.56 સ તચ્ચક્ષુઃ

01.15.57 તસ્માદ્ ઇમં દ્વ્યક્ષં સહસ્રાક્ષં આહુઃ

01.15.58 આત્યયિકે કાર્યે મન્ત્રિણો મન્ત્રિપરિષદં ચાહૂય બ્રૂયાત્

01.15.59 તત્ર યદ્ભૂયિષ્ઠા બ્રૂયુઃ કાર્યસિદ્ધિકરં વા તત્ કુર્યાત્

01.15.60 કુર્વતશ્ચ

01.15.60ab નાસ્ય ગુહ્યં પરે વિદ્યુશ્છિદ્રં વિદ્યાત્ પરસ્ય ચ ।

01.15.60chd ગૂહેત્ કૂર્મ ઇવાઙ્ગાનિ યત્ સ્યાદ્ વિવૃતં આત્મનઃ

01.15.61ab યથા હ્યશ્રોત્રિયઃ શ્રાદ્ધં ન સતાં ભોક્તું અર્હતિ ।

01.15.61chd એવં અશ્રુતશાસ્ત્રાર્થો ન મન્ત્રં શ્રોતું અર્હતિ (ઇતિ)

Chapt . Rules for the envoy

01.16.01 ઉદ્ધૃતમન્ત્રો દૂતપ્રણિધિઃ

01.16.02 અમાત્યસમ્પદા ઉપેતો નિસૃષ્ટાર્થઃ

01.16.03 પાદગુણહીનઃ પરિમિતાર્થઃ

01.16.04 અર્ધગુણહીનઃ શાસનહરઃ

01.16.05 સુપ્રતિવિહિતયાનવાહનપુરુષપરિવાપઃ પ્રતિષ્ઠેત

01.16.06 શાસનં એવં વાચ્યઃ પરઃ, સ વક્ષ્યત્યેવં, તસ્ય ઇદં પ્રતિવાક્યં, એવં અતિસન્ધાતવ્યં, ઇત્યધીયાનો ગચ્છેત્

01.16.07 અટવ્યન્તપાલપુરરાષ્ટ્રમુખ્યૈશ્ચ પ્રતિસંસર્ગં ગચ્છેત્

01.16.08 અનીકસ્થાનયુદ્ધપ્રતિગ્રહાપસારભૂમીરાત્મનઃ પરસ્ય ચાવેક્ષેત

01.16.09 દુર્ગરાષ્ટ્રપ્રમાણં સારવૃત્તિગુપ્તિચ્છિદ્રાણિ ચ ઉપલભેત

01.16.10 પરાધિષ્ઠાનં અનુજ્ઞાતઃ પ્રવિશેત્

01.16.11 શાસનં ચ યથા ઉક્તં બ્રૂયાત્, પ્રાણાબાધેઽપિ દૃષ્ટે

01.16.12 પરસ્ય વાચિ વક્ત્રે દૃષ્ટ્યાં ચ પ્રસાદં વાક્યપૂજનં ઇષ્ટપરિપ્રશ્નં ગુણકથાસઙ્ગં આસન્નં આસનં સત્કારં ઇષ્ટેષુ સ્મરણં વિશ્વાસગમનં ચ લક્ષયેત્ તુષ્ટસ્ય, વિપરીતં અતુષ્ટસ્ય

01.16.13 તં બ્રૂયાત્ - દૂતમુખા હિ રાજાનઃ, ત્વં ચાન્યે ચ

01.16.14 તસ્માદ્ ઉદ્યતેષ્વપિ શસ્ત્રેષુ યથા ઉક્તં વક્તારો દૂતાઃ

01.16.15 તેષાં અન્તાવસાયિનોઽપ્યવધ્યાઃ, કિં અઙ્ગ પુનર્બ્રાહ્મણાઃ

01.16.16 પરસ્ય એતદ્ વાક્યમ્

01.16.17 એષ દૂતધર્મઃ ઇતિ

01.16.18 વસેદ્ અવિસૃષ્ટઃ પૂજયા ન ઉત્સિક્તઃ

01.16.19 પરેષુ બલિત્વં ન મન્યેત

01.16.20 વાક્યં અનિષ્ટં સહેત

01.16.21 સ્ત્રિયઃ પાનં ચ વર્જયેત્

01.16.22 એકઃ શયીત

01.16.23 સુપ્તમત્તયોર્હિ ભાવજ્ઞાનં દૃષ્ટમ્

01.16.24 કૃત્યપક્ષ ઉપજાપં અકૃત્યપક્ષે ગૂઢપ્રણિધાનં રાગાપરાગૌ ભર્તરિ રન્ધ્રં ચ પ્રકૃતીનાં તાપસવૈદેહકવ્યઞ્જનાભ્યાં ઉપલભેત, તયોરન્તેવાસિભિશ્ચિકિત્સકપાષણ્ડવ્યઞ્જન ઉભયવેતનૈર્વા

01.16.25 તેષાં અસમ્ભાષાયાં યાચકમત્ત ઉન્મત્તસુપ્તપ્રલાપૈઃ પુણ્યસ્થાનદેવગૃહચિત્રલેખ્યસંજ્ઞાભિર્વા ચારં ઉપલભેત

01.16.26 ઉપલબ્ધસ્ય ઉપજાપં ઉપેયાત્

01.16.27 પરેણ ચ ઉક્તઃ સ્વાસાં પ્રકૃતીનાં પ્રમાણં નાચક્ષીત

01.16.28 સર્વં વેદ ભવાન્ ઇતિ બ્રૂયાત્, કાર્યસિદ્ધિકરં વા

01.16.29 કાર્યસ્યાસિદ્ધાવુપરુધ્યમાનઃ તર્કયેત્ - કિં ભર્તુર્મે વ્યસનં આસન્નં પશ્યન્, સ્વં વા વ્યસનં પ્રતિકર્તુકામઃ, પાર્ષ્ણિગ્રાહં આસારં અન્તઃકોપં આટવિકં વા સમુત્થાપયિતુકામઃ, મિત્રં આક્રન્દં વા વ્યાઘાતયિતુકામઃ, સ્વં વા પરતો વિગ્રહં અન્તઃકોપં આટવિકં વા પ્રતિકર્તુકામઃ, સંસિદ્ધં વા મે ભર્તુર્યાત્રાકાલં અભિહન્તુકામઃ, સસ્યપણ્યકુપ્યસઙ્ગ્રહં દુર્ગકર્મ બલસમુદ્દાનં વા કર્તુકામઃ, સ્વસૈન્યાનાં વા વ્યાયામસ્ય દેશકાલાવાકાङ્ક્ષમાણઃ, પરિભવપ્રમાદાભ્યાં વા, સંસર્ગાનુબન્ધાર્થી વા, માં ઉપરુણદ્ધિ ઇતિ

01.16.30 જ્ઞાત્વા વસેદ્ અપસરેદ્ વા

01.16.31 પ્રયોજનં ઇષ્ટં અવેક્ષેત વા

01.16.32 શાસનં અનિષ્ટં ઉક્ત્વા બન્ધવધભયાદ્ અવિસૃષ્ટોઽપ્યપગચ્છેત્, અન્યથા નિયમ્યેત

01.16.33ab પ્રેષણં સન્ધિપાલત્વં પ્રતાપો મિત્રસઙ્ગ્રહઃ ।

01.16.33chd ઉપજાપઃ સુહૃદ્ભેદો ગૂઢદણ્ડાતિસારણમ્

01.16.34ab બન્ધુરત્નાપહરણં ચારજ્ઞાનં પરાક્રમઃ ।

01.16.34chd સમાધિમોક્ષો દૂતસ્ય કર્મ યોગસ્ય ચાશ્રયઃ

01.16.35ab સ્વદૂતૈઃ કારયેદ્ એતત્ પરદૂતાંશ્ચ રક્ષયેત્ ।

01.16.35chd પ્રતિદૂતાપસર્પાભ્યાં દૃશ્યાદૃશ્યૈશ્ચ રક્ષિભિઃ (ઇતિ)

Chapt . Guarding against princes

01.17.01 રક્ષિતો રાજા રાજ્યં રક્ષત્યાસન્નેભ્યઃ પરેભ્યશ્ચ, પૂર્વં દારેભ્યઃ પુત્રેભ્યશ્ચ

01.17.02 દારરક્ષણં નિશાન્તપ્રણિધૌ વક્ષ્યામઃ

01.17.03 પુત્રરક્ષણં તુ

01.17.04 જન્મપ્રભૃતિ રાજપુત્રાન્ રક્ષેત્

01.17.05 કર્કટકસધર્માણો હિ જનકભક્ષા રાજપુત્રાઃ

01.17.06 તેષાં અજાતસ્નેહે પિતર્યુપાંશુદણ્ડઃ શ્રેયાન્ ઇતિ ભારદ્વાજઃ

01.17.07 નૃશંસં અદુષ્ટવધઃ ક્ષત્રબીજવિનાશશ્ચ ઇતિ વિશાલાક્ષઃ

01.17.08 તસ્માદ્ એકસ્થાનાવરોધઃ શ્રેયાન્ ઇતિ

01.17.09 અહિભયં એતદ્ ઇતિ પારાશરાઃ

01.17.10 કુમારો હિ વિક્રમભયાન્ માં પિતાઽવરુણદ્ધિ ઇતિ જ્ઞાત્વા તં એવાઙ્કે કુર્યાત્

01.17.11 તસ્માદ્ અન્તપાલદુર્ગે વાસઃ શ્રેયાન્ ઇતિ

01.17.12 ઔરભ્રં ભયં એતદ્ ઇતિ પિશુનઃ

01.17.13 પ્રત્યાપત્તેર્હિ તદ્ એવ કારણં જ્ઞાત્વાઽન્તપાલસખઃ સ્યાત્

01.17.14 તસ્માત્ સ્વવિષયાદ્ અપકૃષ્ટે સામન્તદુર્ગે વાસઃ શ્રેયાન્ ઇતિ

01.17.15 વત્સસ્થાનં એતદ્ ઇતિ કૌણપદન્તઃ

01.17.16 વત્સેન ઇવ હિ ધેનું પિતરં અસ્ય સામન્તો દુહ્યાત્

01.17.17 તસ્માન્ માતૃબન્ધુષુ વાસઃ શ્રેયાન્ ઇતિ

01.17.18 ધ્વજસ્થાનં એતદ્ ઇતિ વાતવ્યાધિઃ

01.17.19 તેન હિ ધ્વજેનાદિતિકૌશિકવદ્ અસ્ય માતૃબાન્ધવા ભિક્ષેરન્

01.17.20 તસ્માદ્ ગ્રામ્ય સુખેષ્વેનં અવસૃજેત્

01.17.21 સુખ ઉપરુદ્ધા હિ પુત્રાઃ પિતરં નાભિદ્રુહ્યન્તિ ઇતિ

01.17.22 જીવન્મરણં એતદ્ ઇતિ કૌટિલ્યઃ

01.17.23 કાષ્ઠં ઇવ ઘુણજગ્ધં રાજકુલં અવિનીતપુત્રં અભિયુક્તમાત્રં ભજ્યેત

01.17.24 તસ્માદ્ ઋતુમત્યાં મહિષ્યાં ઋત્વિજશ્ચરું ઐન્દ્રાબાર્હસ્પત્યં નિર્વપેયુઃ

01.17.25 આપન્નસત્ત્વાયાઃ કૌમારભૃત્યો ગર્ભભર્મણિ પ્રસવે ચ વિયતેત

01.17.26 પ્રજાતાયાઃ પુત્રસંસ્કારં પુરોહિતઃ કુર્યાત્

01.17.27 સમર્થં તદ્વિદો વિનયેયુઃ

01.17.28 સત્રિણાં એકશ્ચ એનં મૃગયાદ્યૂતમદ્યસ્ત્રીભિઃ પ્રલોભયેત્ પિતરિ વિક્રમ્ય રાજ્યં ગૃહાણ ઇતિ

01.17.29 તં અન્યઃ સત્રી પ્રતિષેધયેત્ ઇત્યામ્ભીયાઃ

01.17.30 મહાદોષં અબુદ્ધબોધનં ઇત્ કૌટિલ્યઃ

01.17.31 નવં હિ દ્રવ્યં યેન યેનાર્થજાતેન ઉપદિહ્યતે તત્ તદ્ આચૂષતિ

01.17.32 એવં અયં નવબુદ્ધિર્યદ્ યદ્ ઉચ્યતે તત્ તત્શાસ્ત્ર ઉપદેશં ઇવાભિજાનાતિ

01.17.33 તસ્માદ્ ધર્મ્યં અર્થ્યં ચાસ્ય ઉપદિશેન્નાધર્મ્યં અનર્થ્યં ચ

01.17.34 સત્રિણઃ ત્વેનં તવ સ્મઃ ઇતિ વદન્તઃ પાલયેયુઃ

01.17.35 યૌવન ઉત્સેકાત્ પરસ્ત્રીષુ મનઃ કુર્વાણં આર્યાવ્યઞ્જનાભિઃ સ્ત્રીભિરમેધ્યાભિઃ શૂન્યાગારેષુ રાત્રાવુદ્વેજયેયુઃ

01.17.36 મદ્યકામં યોગપાનેન ઉદ્વેજયેયુઃ

01.17.37 ધૂતકામં કાપટિકૈરુદ્વેજયેયુઃ

01.17.38 મૃગયાકામં પ્રતિરોધકવ્યઞ્જનૈઃ ત્રાસયેયુઃ

01.17.39 પિતરિ વિક્રમબુદ્ધિં તથા ઇત્યનુપ્રવિશ્ય ભેદયેયુઃ - અપ્રાર્થનીયો રાજા, વિપન્ને ઘાતઃ, સમ્પન્ને નરકપાતઃ, સઙ્ક્રોશઃ, પ્રજાભિરેકલોષ્ટવધશ્ચ ઇતિ

01.17.40 વિરાગં વેદયેયુઃ

01.17.41 પ્રિયં એકપુત્રં બધ્નીયાત્

01.17.42 બહુપુત્રઃ પ્રત્યન્તં અન્યવિષયં વા પ્રેષયેદ્ યત્ર ગર્ભઃ પણ્યં ડિમ્બો વા ન ભવેત્

01.17.43 આત્મસમ્પન્નં સૈનાપત્યે યૌવરાજ્યે વા સ્થાપયેત્

01.17.44 બુદ્ધિમાન્ । આહાર્યબુદ્ધિર્દુર્બુદ્ધિરિતિ પુત્રવિશેષાઃ

01.17.45 શિષ્યમાણો ધર્માર્થાવુપલભતે ચાનુતિષ્ઠતિ ચ બુદ્ધિમાન્

01.17.46 ઉપલભમાનો નાનુતિષ્ઠત્યાહાર્યબુદ્ધિઃ

01.17.47 અપાયનિત્યો ધર્માર્થદ્વેષી ચ ઇતિ દુર્બુદ્ધિઃ

01.17.48 સ યદ્યેકપુત્રઃ પુત્ર ઉત્પત્તાવસ્ય પ્રયતેત

01.17.49 પુત્રિકાપુત્રાન્ ઉત્પાદયેદ્ વા

01.17.50 વૃદ્ધઃ તુ વ્યાધિતો વા રાજા માતૃબન્ધુકુલ્યગુણવત્સામન્તાનાં અન્યતમેન ક્ષેત્રે બીજં ઉત્પાદયેત્

01.17.51 ન ચ એકપુત્રં અવિનીતં રાજ્યે સ્થાપયેત્

01.17.52ab બહૂનાં એકસમ્રોધઃ પિતા પુત્રહિતો ભવેત્ ।

01.17.52chd અન્યત્રાપદ ઐશ્વર્યં જ્યેષ્ઠભાગિ તુ પૂજ્યતે

01.17.53ab કુલસ્ય વા ભવેદ્ રાજ્યં કુલસઙ્ઘો હિ દુર્જયઃ ।

01.17.53chd અરાજવ્યસનાબાધઃ શશ્વદ્ આવસતિ ક્ષિતિમ્ (ઇતિ)

Chapt . The conduct of a prince in disfavour

Behaviour towards a prince in disfavour

01.18.01 વિનીતો રાજપુત્રઃ કૃચ્છ્રવૃત્તિરસદૃશે કર્મણિ નિયુક્તઃ પિતરં અનુવર્તેત, અન્યત્ર પ્રાણાબાધકપ્રકૃતિકોપકપાતકેભ્યઃ

01.18.02 પુણ્યે કર્મણિ નિયુક્તઃ પુરુષં અધિષ્ઠાતારં યાચેત્

01.18.03 પુરુષાધિષ્ઠિતશ્ચ સવિશેષં આદેશં અનુતિષ્ઠેત્

01.18.04 અભિરૂપં ચ કર્મફલં ઔપાયનિકં ચ લાભં પિતુરુપનાયયેત્

01.18.05 તથાઽપ્યતુષ્યન્તં અન્યસ્મિન્ પુત્રે દારેષુ વા સ્નિહ્યન્તં અરણ્યાયાપૃચ્છેત

01.18.06 બન્ધવધભયાદ્ વા યઃ સામન્તો ન્યાયવૃત્તિર્ધાર્મિકઃ સત્યવાગ્ઽવિસંવાદકઃ પ્રતિગ્રહીતા માનયિતા ચાભિપન્નાનાં તં આશ્રયેત

01.18.07 તત્રસ્થઃ કોશદણ્ડસમ્પન્નઃ પ્રવીરપુરુષકન્યાસમ્બન્ધં અટવીસમ્બન્ધં કૃત્યપક્ષ ઉપગ્રહં ચ કુર્યાત્

01.18.08 એકચરઃ સુવર્ણપાકમણિરાગહેમરૂપ્યપણ્યાકરકર્માન્તાન્ આજીવેત્

01.18.09 પાષણ્ડસઙ્ઘદ્રવ્યં અશ્રોત્રિય ઉપભોગ્યં વા દેવદ્રવ્યં આઢ્યવિધવાદ્રવ્યં વા ગૂઢં અનુપ્રવિશ્ય સાર્થયાનપાત્રાણિ ચ મદનરસયોગેનાતિસન્ધાયાપહરેત્

01.18.10 પારગ્રામિકં વા યોગં આતિષ્ઠેત્

01.18.11 માતુઃ પરિજન ઉપગ્રહેણ વા ચેષ્ટેત

01.18.12 કારુશિલ્પિકુશીલવચિકિત્સકવાગ્જીવનપાષણ્ડચ્છદ્મભિર્
વા નષ્ટરૂપઃ તદ્વ્યઞ્જનસખશ્છિદ્રેષુ પ્રવિશ્ય રાજ્ઞઃ શસ્ત્રરસાભ્યાં
પ્રહૃત્ય બ્રૂયાત્ - અહં અસૌ કુમારઃ, સહભોગ્યં ઇદં રાજ્યં, એકો
નાર્હતિ ભોક્તું, યે કામયન્તે માં ભર્તું તાન્ અહં દ્વિગુણેન
ભક્તવેતનેન ઉપસ્થાસ્યામિ ઇતિ  ઇત્યપરુદ્ધવૃત્તમ્ ।

01.18.13 અપરુદ્ધં તુ મુખ્યપુત્રાપસર્પાઃ પ્રતિપાદ્યાનયેયુઃ, માતા વા પ્રતિગૃહીતા

01.18.14 ત્યક્તં ગૂઢપુરુષાઃ શસ્ત્રરસાભ્યાં હન્યુઃ

01.18.15 અત્યક્તં તુલ્યશીલાભિઃ સ્ત્રીભિઃ પાનેન મૃગયયા વા પ્રસઞ્જયિત્વા રાત્રાવુપગૃહ્યાનયેયુઃ

01.18.16ab ઉપસ્થિતં ચ રાજ્યેન મદ્। ઊર્ધ્વં ઇતિ સાન્ત્વયેત્ ।

01.18.16chd એકસ્થં અથ સમ્રુન્ધ્યાત્ પુત્રવાંઃ તુ પ્રવાસયેત્  (ઇતિ)

Chapt .   Rules for the king

01.19.01 રાજાનં ઉત્થિતં અનૂત્તિષ્ઠન્તે ભૃત્યાઃ

01.19.02 પ્રમાદ્યન્તં અનુપ્રમાદ્યન્તિ

01.19.03 કર્માણિ ચાસ્ય ભક્ષયન્તિ

01.19.04 દ્વિષદ્ભિશ્ચાતિસન્ધીયતે ।

01.19.05 તસ્માદ્ ઉત્થાનં આત્મનઃ કુર્વીત

01.19.06 નાલિકાભિરહરષ્ટધા રાત્રિં ચ વિભજેત્, છાયાપ્રમાણેન વા

01.19.07 ત્રિપૌરુષી પૌરુષી ચતુરઙ્ગુલા નષ્ટચ્છાયો મધ્યાહ્ન ઇતિ ચત્વારઃ પૂર્વે દિવસસ્યાષ્ટભાગાઃ

01.19.08 તૈઃ પશ્ચિમા વ્યાખ્યાતાઃ

01.19.09 તત્ર પૂર્વે દિવસસ્યાષ્ટભાગે રક્ષાવિધાનં આયવ્યયૌ ચ શ◌ૃણુયાત્

01.19.10 દ્વિતીયે પૌરજાનપદાનાં કાર્યાણિ પશ્યેત્

01.19.11 તૃતીયે સ્નાનભોજનં સેવેત, સ્વાધ્યાયં ચ કુર્વીત

01.19.12 ચતુર્થે હિરણ્યપ્રતિગ્રહં અધ્યક્ષાંશ્ચ કુર્વીત

01.19.13 પઞ્ચમે મન્ત્રિપરિષદા પત્રસમ્પ્રેષણેન મન્ત્રયેત, ચારગુહ્યબોધનીયાનિ ચ બુધ્યેત

01.19.14 ષષ્ઠે સ્વૈરવિહારં મન્ત્રં વા સેવેત

01.19.15 સપ્તમે હસ્ત્યશ્વરથાયુધીયાન્ પશ્યેત્

01.19.16 અષ્ટમે સેનાપતિસખો વિક્રમં ચિન્તયેત્

01.19.17 પ્રતિષ્ઠિતેઽહનિ સન્ધ્યાં ઉપાસીત

01.19.18 પ્રથમે રાત્રિભાગે ગૂઢપુરુષાન્ પશ્યેત્
01.19.19 દ્વિતીયે સ્નાનભોજનં કુર્વીત, સ્વાધ્યાયં ચ
01.19.20 તૃતીયે તૂર્યઘોષેણ સંવિષ્ટશ્ચતુર્થપઞ્ચમૌ શયીત
01.19.21 ષષ્ઠે તૂર્યઘોષેણ પ્રતિબુદ્ધઃ શાસ્ત્રં ઇતિકર્તવ્યતાં ચ ચિન્તયેત્
01.19.22 સપ્તમે મન્ત્રં અધ્યાસીત, ગૂઢપુરુષાંશ્ચ પ્રેષયેત્
01.19.23 અષ્ટમે ઋત્વિગ્।આચાર્યપુરોહિતસ્વસ્ત્યયનાનિ પ્રતિગૃહ્ણીયાત્, ચિકિત્સકમાહાનસિકમૌહૂર્તિકાંશ્ચ પશ્યેત્
01.19.24 સવત્સાં ધેનું વૃષભં ચ પ્રદક્ષિણીકૃત્ય ઉપસ્થાનં ગચ્છેત્
01.19.25 આત્મબલાનુકૂલ્યેન વા નિશાઽહર્ભાગાન્ પ્રવિભજ્ય કાર્યાણિ સેવેત
01.19.26 ઉપસ્થાનગતઃ કાર્યાર્થિનાં અદ્વારાસઙ્ગં કારયેત્
01.19.27 દુર્દર્શો હિ રાજા કાર્યાકાર્યવિપર્યાસં આસન્નૈઃ કાર્યતે
01.19.28 તેન પ્રકૃતિકોપં અરિવશં વા ગચ્છેત્
01.19.29 તસ્માદ્ દેવતાઽઽશ્રમપાષણ્ડશ્રોત્રિયપશુપુણ્યસ્થાનાનાં બાલવૃદ્ધવ્યાધિતવ્યસન્યઽનાથાનાં સ્ત્રીણાં ચ ક્રમેણ કાર્યાણિ પશ્યેત્, કાર્યગૌરવાદ્ આત્યયિકવશેન વા
01.19.30ab સર્વં આત્યયિકં કાર્યં શૃણુયાન્નાતિપાતયેત્ ।
01.19.30chd કૃચ્છ્રસાધ્યં અતિક્રાન્તં અસાધ્યં વાઽપિ જાયતે
01.19.31ab અગ્ન્યઽગારગતઃ કાર્યં પશ્યેદ્ વૈદ્યતપસ્વિનામ્ ।
01.19.31chd પુરોહિતાચાર્યસખઃ પ્રત્યુત્થાયાભિવાદ્ય ચ
01.19.32ab તપસ્વિનાં તુ કાર્યાણિ ત્રૈવિદ્યૈઃ સહ કારયેત્ ।
01.19.32chd માયાયોગવિદાં ચૈવ ન સ્વયં કોપકારણાત્
01.19.33ab રાજ્ઞો હિ વ્રતં ઉત્થાનં યજ્ઞઃ કાર્યાનુશાસનમ્ ।
01.19.33chd દક્ષિણા વૃત્તિસામ્યં તુ દીક્ષા તસ્યાભિષેચનમ્
01.19.34ab પ્રજાસુખે સુખં રાજ્ઞઃ પ્રજાનાં ચ હિતે હિતમ્ ।
01.19.34chd નાત્મપ્રિયં હિતં રાજ્ઞઃ પ્રજાનાં તુ પ્રિયં હિતમ્
01.19.35ab તસ્માન્નિત્ય ઉત્થિતો રાજા કુર્યાદ્ અર્થાનુશાસનમ્ ।
01.19.35chd અર્થસ્ય મૂલં ઉત્થાનં અનર્થસ્ય વિપર્યયઃ
01.19.36ab અનુત્થાને ધ્રુવો નાશઃ પ્રાપ્તસ્યાનાગતસ્ય ચ ।
01.19.36chd પ્રાપ્યતે ફલં ઉત્થાનાલ્લભતે ચાર્થસમ્પદમ્ (ઇતિ)

Chapt . Regulation for the royal residence

01.20.01 વાસ્તુકપ્રશસ્તે દેશે સપ્રાકારપરિખાદ્વારં અનેકકક્ષ્યાપરિગતં અન્તઃપુરં કારયેત્

01.20.02 કોશગૃહવિધાનેન મધ્યે વાસગૃહં, ગૂઢભિત્તિસઞ્ચારં મોહનગૃહં તન્મધ્યે વા વાસગૃહં, ભૂમિગૃહં વાઽઽસન્નચૈત્યકાષ્ઠદેવતાઽપિધાનદ્વારં અનેકસુરુઙ્ગાસઞ્ચારં તસ્ય ઉપરિ પ્રાસાદં ગૂઢભિત્તિસોપાનં સુષિરસ્તમ્ભપ્રવેશાપસારં વા વાસગૃહં યન્ત્રબદ્ધતલાવપાતં કારયેત્, આપત્પ્રતીકારાર્થં આપદિ વા

01.20.03 અતોઽન્યથા વા વિકલ્પયેત્, સહાધ્યાયિભયાત્

01.20.04 માનુષેણાગ્નિના ત્રિરપસવ્યં પરિગતં અન્તઃપુરં અગ્નિરન્યો ન દહતિ, ન ચાત્રાન્યોઽગ્નિર્જ્વલતિ, વૈદ્યુતેન ભસ્મના મૃત્સમ્યુક્તેન કરકવારિણાઽવલિપ્તં ચ

01.20.05 જીવન્તીશ્વેતામુષ્કકપુષ્પવન્દાકાભિરક્ષીવે જાતસ્યાશ્વત્થસ્ય પ્રતાનેન ગુપ્તં સર્પા વિષાણિ વા ન પ્રભવન્તિ

01.20.06 મયૂરનકુલપૃષત ઉત્સર્ગઃ સર્પાન્ ભક્ષયતિ

01.20.07 શુકઃ સારિકા ભૃઙ્ગરાજો વા સર્પવિષશઙ્કાયાં ક્રોશતિ

01.20.08 ક્રૌઞ્ચો વિષાભ્યાશે માદ્યતિ, ગ્લાયતિ જીવઞ્જીવકઃ, મ્રિયતે મત્તકોકિલઃ, ચકોરસ્યાક્ષિણી વિરજ્યેતે

01.20.09 ઇત્યેવં અગ્નિવિષસર્પેભ્યઃ પ્રતિકુર્વીત

01.20.10 પૃષ્ઠતઃ કક્ષ્યાવિભાગે સ્ત્રીનિવેશો ગર્ભવ્યાધિસંસ્થા વૃક્ષ ઉદકસ્થાનં ચ

01.20.11 બહિઃ કન્યાકુમારપુરમ્

01.20.12 પુરસ્તાદ્ અલઙ્કારભૂમિર્મન્ત્રભૂમિરુપસ્થાનં કુમારાધ્યક્ષસ્થાનં ચ

01.20.13 કક્ષ્યાન્તરેષ્વન્તર્વંશિકસૈન્યં તિષ્ઠેત્

01.20.14 અન્તર્ગૃહગતઃ સ્થવિરસ્ત્રીપરિશુદ્ધાં દેવીં પશ્યેત્

01.20.15 દેવીગૃહે લીનો હિ ભ્રાતા ભદ્રસેનં જઘાન, માતુઃ શય્યાઽન્તર્ગતશ્ચ પુત્રઃ કારૂષમ્

01.20.16 લાજાન્ મધુના ઇતિ વિષેણ પર્યસ્ય દેવી કાશિરાજં, વિષદિગ્ધેન નૂપ્રેણ વૈરન્ત્યં, મેખલામણિના સૌવીરં, જાલૂથં આદર્શેન, વેણ્યાં ગૂઢં શસ્ત્રં કૃત્વા દેવી વિદૂરથં જઘાન

01.20.17 તસ્માદ્ એતાન્યાસ્પદાનિ પરિહરેત્

01.20.18 મુણ્ડજટિલકુહકપ્રતિસંસર્ગં બાહ્યાભિશ્ચ દાસીભિઃ પ્રતિષેધયેત્

01.20.19 ન ચ એનાઃ કુલ્યાઃ પશ્યેયુઃ, અન્યત્ર ગર્ભવ્યાધિસંસ્થાભ્યઃ

01.20.20 રૂપાજીવાઃ સ્નાનપ્રઘર્ષશુદ્ધશરીરાઃ પરિવર્તિતવસ્ત્રાલઙ્કારાઃ પશ્યેયુઃ

01.20.21 અશીતિકાઃ પુરુષાઃ પઞ્ચાશત્કાઃ સ્ત્રિયો વા માતાપિતૃવ્યઞ્જનાઃ સ્થવિરવર્ષધરાભ્યાગારિકાશ્ચાવરોધાનાં શૌચાશૌચં વિદ્યુઃ, સ્થાપયેયુશ્ચ સ્વામિહિતે,

01.20.22ab સ્વભૂમૌ ચ વસેત્ સર્વઃ પરભૂમૌ ન સઞ્ચરેત્ ।

01.20.22chd ન ચ બાહ્યેન સંસર્ગં કશ્ચિદ્ આભ્યન્તરો વ્રજેત્

01.20.23ab સર્વં ચાવેક્ષિતં દ્રવ્યં નિબદ્ધાગમનિર્ગમમ્ ।

01.20.23chd નિર્ગચ્છેદ્ અભિગચ્છેદ્ વા મુદ્રાસઙ્ક્રાન્તભૂમિકમ્ (ઇતિ)

Chapt . Concerning the protection of (the kings) own person

01.21.01 શયનાદ્ ઉત્થિતઃ સ્ત્રીગણૈર્ધન્વિભિઃ પરિગૃહ્યતે, દ્વિતીયસ્યાં કક્ષ્યાયાં કઞ્ચુક ઉષ્ણીષિભિર્વર્ષધરાભ્યાગારિકૈઃ, તૃતીયસ્યાં કુબ્જવામનકિરાતૈઃ, ચતુર્થ્યાં મન્ત્રિભિઃ સમ્બન્ધિભિર્દૌવારિકૈશ્ચ પ્રાસપાણિભિઃ

01.21.02 પિતૃપૈતામહં સમ્બન્ધાનુબદ્ધં શિક્ષિતં અનુરક્તં કૃતકર્માણં ચ જનં આસન્નં કુર્વીત, નાન્યતોદેશીયં અકૃતાર્થમાનં સ્વદેશીયં વાઽપ્યપકૃત્ય ઉપગૃહીતમ્

01.21.03 અન્તર્વંશિકસૈન્યં રાજાનં અન્તઃપુરં ચ રક્ષેત્

01.21.04 ગુપ્તે દેશે માહાનસિકઃ સર્વં આસ્વાદબાહુલ્યેન કર્મ કારયેત્

01.21.05 તદ્ રજા તથૈવ પ્રતિભુઞ્જીત પૂર્વં અગ્નયે વયોભ્યશ્ચ બલિં કૃત્વા

01.21.06 અગ્નેર્જ્વાલાધૂમનીલતા શબ્દસ્ફોટનં ચ વિષયુક્તસ્ય, વયસાં વિપત્તિશ્ચ

01.21.07a અન્નસ્ય ઊષ્મા મયૂરગ્રીવાભઃ શૈત્યં આશુ ક્લિષ્ટસ્ય ઇવ વૈવર્ણ્યં સ-ઉદકત્વં અક્લિન્નત્વં ચ

01.21.07b વ્યઞ્જનાનાં આશુ શુષ્કત્વં ચ ક્વાથધ્યામફેનપટલવિચ્છિન્નભાવો ગન્ધસ્પર્શરસવધશ્ચ

01.21.07ch દ્રવેષુ હીનાતિરિક્તચ્છાયાદર્શનં ફેનપટલસીમન્ત ઊર્ધ્વરાજીદર્શનં ચ

01.21.07d રસસ્ય મધ્યે નીલા રાજી, પયસઃ તામ્રા, મદ્યતોયયોઃ કાલી, દધ્નઃ શ્યામા, મધુનઃ શ્વેતા, દ્રવ્યાણાં આર્દ્રાણાં આશુ પ્રમ્લાનત્વં ઉત્પક્વભાવઃ ક્વાથનીલશ્યાવતા ચ

01.21.07e શુષ્કાણાં આશુ શાતનં વૈવર્ણ્યં ચ,

01.21.07f કઠિનાનાં મૃદુત્વં મૃદૂનાં ચ કઠિનત્વં, તદ્ઽભ્યાશે ક્ષુદ્રસત્ત્વવધશ્ચ,

01.21.07g આસ્તરણપ્રવરણાનાં ધ્યામમણ્ડલતા તન્તુરોમપક્ષ્મશાતનં ચ,

01.21.07h લોહમણિમયાનાં પઙ્કમલોપદેહતા સ્નેહરાગગૌરવપ્રભાવવર્ણસ્પર્શવધશ્ચ - ઇતિ વિષયુક્તસ્ય લિઙ્ગાનિ

01.21.08 વિષપ્રદસ્ય તુ શુષ્કશ્યાવવક્ત્રતા વાક્સઙ્ગઃ સ્વેદો વિજૃમ્ભણં ચાતિમાત્રં વેપથુઃ પ્રસ્ખલનં વાક્યવિપ્રેક્ષણં આવેગઃ કર્મણિ સ્વભૂમૌ ચાનવસ્થાનં ઇતિ

01.21.09 તસ્માદ્ અસ્ય જાઙ્ગુલીવિદો ભિષજશ્ચાસન્નાઃ સ્યુઃ

01.21.10 ભિષગ્ભૈષજ્યાગારાદ્ આસ્વાદવિશુદ્ધં ઔષધં ગૃહીત્વા પાચકપેષકાભ્યાં આત્મના ચ પ્રતિસ્વાદ્ય રાજ્ઞે પ્રયચ્છેત્

01.21.11 પાનં પાનીયં ચાઉષધેન વ્યાખ્યાતમ્

01.21.12 કલ્પકપ્રસાધકાઃ સ્નાનશુદ્ધવસ્ત્રહસ્તાઃ સમુદ્રં ઉપકરણં અન્તર્વંશિકહસ્તાદ્ આદાય પરિચરેયુઃ

01.21.13 સ્નાપકસંવાહકાસ્તરકરજકમાલાકારકર્મ દાસ્યઃ પ્રસિદ્ધશૌચાઃ કુર્યુઃ, તાભિરધિષ્ઠિતા વા શિલ્પિનઃ

01.21.14 આત્મચક્ષુષિ નિવેશ્ય વસ્ત્રમાલ્યં દદ્યુઃ, સ્નાનાનુલેપનપ્રઘર્ષચૂર્ણવાસસ્નાનીયાનિ ચ સ્વવક્ષોબાહુષુ ચ

01.21.15 એતેન પરસ્માદ્ આગતકં વ્યાખ્યાતમ્

01.21.16 કુશીલવાઃ શસ્ત્રાગ્નિરસક્રીડાવર્જં નર્મયેયુઃ

01.21.17 આતોદ્યાનિ ચ એષાં અન્તઃ તિષ્ઠેયુઃ, અશ્વરથદ્વિપાલઙ્કારાશ્ચ

01.21.18 આપ્તપુરુષાધિષ્ઠિતં યાનવાહનં આરોહેત્, નાવં ચાપ્તનાવિકાધિષ્ઠિતમ્

01.21.19 અન્યનૌપ્રતિબદ્ધાં વાતવેગવશાં ચ ન ઉપેયાત્

01.21.20 ઉદકાન્તે સૈન્યં આસીત

01.21.21 મત્સ્યગ્રાહવિશુદ્ધં ઉદકં અવગાહેત

01.21.22 વ્યાલગ્રાહવિશુદ્ધં ઉદ્યાનં ગચ્છેત્

01.21.23 લુબ્ધકશ્વગણિભિરપાસ્તસ્તેનવ્યાલપરાબાધભયં ચલલક્ષ્યપરિચયાર્થં મૃગારણ્યં ગચ્છેત્

01.21.24 આપ્તશસ્ત્રગ્રાહાધિષ્ઠિતઃ સિદ્ધતાપસં પશ્યેત્, મન્ત્રિપરિષદા સહ સામન્તદૂતમ્

01.21.25 સમ્નદ્ધોઽશ્વં હસ્તિનં વાઽઽરૂઢઃ સમ્નદ્ધં અનીકં પશ્યેત્

01.21.26 નિર્યાણેઽભિયાને ચ રાજમાર્ગં ઉભયતઃ કૃતારક્ષં શસ્ત્રિભિર્દણ્ડિભિશ્ચાપાસ્તશસ્ત્રહસ્તપ્રવ્રજિતવ્યઙ્ગં ગચ્છેત્

01.21.27 ન પુરુષસમ્બાધં અવગાહેત

01.21.28 યાત્રાસમાજ ઉત્સવપ્રહવણાનિ ચ દશવર્ગિકાધિષ્ઠિતાનિ ગચ્છેત્

01.21.29ab યથા ચ યોગપુરુષૈરન્યાન્ રાજાઽધિતિષ્ઠતિ ।

01.21.30chd તથાઽયં અન્યાબાધેભ્યો રક્ષેદ્ આત્માનં આત્મવાન્ (ઇતિ)

Book . The activityof the head of departments

Chapt . Sec, 19: Settlement of the countryside

02.01.01 ભૂતપૂર્વં અભૂતપૂર્વં વા જનપદં પરદેશાપવાહનેન સ્વદેશાભિષ્યન્દવમનેન વા નિવેશયેત્

02.01.02 શૂદ્રકર્ષકપ્રાયં કુલશતાવરં પઞ્ચકુલશતપરં ગ્રામં ક્રોશદ્વિક્રોશસીમાનં અન્યોન્યારક્ષં નિવેશયેત્

02.01.03 નલીશૈલવનભૃષ્ટિદરીસેતુબન્ધશમીશાલ્મલીક્ષીરવૃક્ષાન્ અન્તેષુ સીમ્નાં સ્થાપયેત્

02.01.04 અષ્ટશતગ્રામ્યા મધ્યે સ્થાનીયં, ચતુહ્શતગ્રામ્યા દ્રોણમુખં, દ્વિશતગ્રામ્યાઃ કાર્વટિકં, દશગ્રામીસઙ્ગ્રહેણ સઙ્ગ્રહં સ્થાપયેત્

02.01.05 અન્તેષ્વન્તપાલદુર્ગાણિ જનપદદ્વારાણ્યન્તપાલાધિષ્ઠિતાનિ સ્થાપયેત્

02.01.06 તેષાં અન્તરાણિ વાગુરિકશબરપુલિન્દચણ્ડાલારણ્યચરા રક્ષેયુઃ

02.01.07a ઋત્વિગ્।આચાર્યપુરોહિતશ્રોત્રિયેભ્યો બ્રહ્મદેયાન્યદણ્ડકરાણ્યભિરૂપદાયાદકાનિ પ્રયચ્છેત્

02.01.07b અધ્યક્ષસઙ્ખ્યાયકાદિભ્યો ગોપસ્થાનિકાનીકસ્થચિકિત્સકાશ્વદમકજઙ્ઘાકારિકેભ્યશ્ચ વિક્રયાધાનવર્જાનિ

02.01.08 કરદેભ્યઃ કૃતક્ષેત્રાણ્યૈકપુરુષિકાણિ પ્રયચ્છેત્

02.01.09 અકૃતાનિ કર્તૃભ્યો નાદેયાનિ

02.01.10 અકૃષતાં આછિદ્યાન્યેભ્યઃ પ્રયચ્છેત્

02.01.11 ગ્રામભૃતકવૈદેહકા વા કૃષેયુઃ

02.01.12 અકૃષન્તો વાઽવહીનં દદ્યુઃ

02.01.13 ધાન્યપશુહિરણ્યૈશ્ચ એતાન્ અનુગૃહ્ણીયાત્

02.01.14 તાન્યનુ સુખેન દદ્યુઃ

02.01.15 અનુગ્રહપરિહારૌ ચ એતેભ્ભ્યઃ કોશવૃદ્ધિકરૌ દદ્યાત્, કોશ ઉપઘાતકૌ વર્જયેત્

02.01.16 અલ્પકોશો હિ રાજા પૌરજાનપદાન્ એવ ગ્રસતે

02.01.17 નિવેશસમકાલં યથાઽઽગતકં વા પરિહારં દદ્યાત્

02.01.18 નિવૃત્તપરિહારાન્ પિતા ઇવાનુગૃહ્ણીયાત્

02.01.19 આકરકર્માન્તદ્રવ્યહસ્તિવનવ્રજવણિક્પથપ્રચારાન્ વારિસ્થલપથપણ્યપત્તનાનિ ચ નિવેશયેત્

02.01.20 સહ ઉદકં આહાર્યં ઉદકં વા સેતું બન્ધયેત્

02.01.21 અન્યેષાં વા બધ્નતાં ભૂમિમાર્ગવૃક્ષ ઉપકરણાનુગ્રહં કુર્યાત્, પુણ્યસ્થાનારામાણાં ચ

02.01.22 સમ્ભૂયસેતુબન્ધાદ્ અપક્રામતઃ કર્મકરબલીવર્દાઃ કર્મ કુર્યુઃ

02.01.23 વ્યયકર્મણિ ચ ભાગી સ્યાત્, ન ચાંશં લભેત

02.01.24 મત્સ્યપ્લવહરિતપણ્યાનાં સેતુષુ રાજા સ્વામ્યં ગચ્છેત્

02.01.25 દાસાહિતકબન્ધૂન્ અશ◌ૃણ્વતો રાજા વિનયં ગ્રાહયેત્

02.01.26 બાલવૃદ્ધવ્યસન્ય્ઽનાથાંશ્ચ રાજા બિભૃયાત્, સ્ત્રિયં અપ્રજાતાં પ્રજાતાયશ્ચ પુત્રાન્

02.01.27 બાલદ્રવ્યં ગ્રામવૃદ્ધા વર્ધયેયુરા વ્યવહારપ્રાપણાત્, દેવદ્રવ્યં ચ

02.01.28 અપત્યદારં માતાપિતરૌ ભ્રાતૄન્ અપ્રાપ્તવ્યવહારાન્ ભગિનીઃ કન્યા વિધવાશ્ચાબિભ્રતઃ શક્તિમતો દ્વાદશપણો દણ્ડઃ, અન્યત્ર પતિતેભ્યઃ, અન્યત્ર માતુઃ

02.01.29 પુત્રદારં અપ્રતિવિધાય પ્રવ્રજતઃ પૂર્વઃ સાહસદણ્ડઃ, સ્ત્રિયં ચ પ્રવ્રાજયતઃ

02.01.30 લુપ્તવ્યાયામઃ પ્રવ્રજેદ્ આપૃચ્છ્ય ધર્મસ્થાન્

02.01.31 અન્યથા નિયમ્યેત

02.01.32 વાનપ્રસ્થાદ્ અન્યઃ પ્રવ્રજિતભાવઃ, સજાતાદ્ અન્યઃ સઙ્ઘઃ, સામુત્થાયિકાદ્ અન્યઃ સમયાનુબન્ધો વા નાસ્ય જનપદં ઉપનિવિશેત

02.01.33 ન ચ તત્રારામા વિહારાર્થા વા શાલાઃ સ્યુઃ

02.01.34 નટનર્તકગાયનવાદકવાગ્જીવનકુશીલવા ન કર્મવિઘ્નં કુર્યુઃ

02.01.35 નિરાશ્રયત્વાદ્ ગ્રામાણાં ક્ષેત્રાભિરતત્વાચ્ચ પુરુષાણાં કોશવિષ્ટિદ્રવ્યધાન્યરસવૃદ્ધિર્ભવતિ

02.01.36ab પરચક્રાટવીગ્રસ્તં વ્યાધિદુર્ભિક્ષપીડિતમ્ ।

02.01.36chd દેશં પરિહરેદ્ રાજા વ્યયક્રીડાશ્ચ વારયેત્

02.01.37ab દણ્ડવિષ્ટિકરાબાધૈ રક્ષેદ્ ઉપહતાં કૃષિમ્ ।

02.01.37chd સ્તેનવ્યાલવિષગ્રાહૈર્વ્યાધિભિશ્ચ પશુવ્રજાન્

02.01.38ab વલ્લભૈઃ કાર્મિકૈઃ સ્તેનૈરન્તપાલૈશ્ચ પીડિતમ્ ।

02.01.38chd શોધયેત્ પશુસઙ્ઘૈશ્ચ ક્ષીયમાણં વણિક્પથમ્

02.01.39ab એવં દ્રવ્યદ્વિપવનં સેતુબન્ધં અથાકરાન્ ।

02.01.39chd રક્ષેત્ પૂર્વકૃતાન્ રાજા નવાંશ્ચાભિપ્રવર્તયેત્ (ઇતિ)

Chapt . Disposal of non-agricultural land

02.2.01 અકૃષ્યાયાં ભૂમૌ પશુભ્યો વિવીતાનિ પ્રયચ્છેત્

02.2.02 પ્રદિષ્ટાભયસ્થાવરજઙ્ગમાનિ ચ બ્રહ્મસોમારણ્યાનિ તપસ્વિભ્યો ગોરુતપરાણિ પ્રયચ્છેત્

02.2.03 તાવન્માત્રં એકદ્વારં ખાતગુપ્તં સ્વાદુફલગુલ્મગુચ્છં અકણ્ટકિદ્રુમં ઉત્તાનતોયાશયં દાન્તમૃગચતુષ્પદં ભગ્નનખદંષ્ટ્રવ્યાલં માર્ગયુકહસ્તિહસ્તિનીકલભં મૃગવનં વિહારાર્થં રાજ્ઞઃ કારયેત્
02.2.04 સર્વાતિથિમૃગં પ્રત્યન્તે ચાન્યન્મૃગવનં ભૂમિવશેન વા નિવેશયેત્
02.2.05 કુપ્યપ્રદિષ્ટાનાં ચ દ્રવ્યાણાં એક એકશો વનાનિ નિવેશયેત્, દ્રવ્યવનકર્માન્તાન્ અટવીશ્ચ દ્રવ્યવનાપાશ્રયાઃ
02.2.06 પ્રત્યન્તે હસ્તિવનં અટવ્ય્ ।આરક્ષં નિવેશયેત્
02.2.07 નાગવનાધ્યક્ષઃ પાર્વતં નાદેયં સારસમાનૂપં ચ નાગવનં વિદિતપર્યન્તપ્રવેશનિષ્કાસં નાગવનપાલૈઃ પાલયેત્
02.2.08 હસ્તિઘાતિનં હન્યુઃ
02.2.09 દન્તયુગં સ્વયંમૃતસ્યાહરતઃ સપાદચતુષ્પણો લાભઃ
02.2.10 નાગવનપાલા હસ્તિપકપાદપાશિકસૈમિકવનચરકપારિકર્મિકસખા હસ્તિમૂત્રપુરીષચ્છન્નગન્ધા ભલ્લાતકીશાખાપ્રચ્છન્નાઃ પઞ્ચભિઃ સપ્તભિર્વા હસ્તિબન્ધકીભિઃ સહ ચરન્તઃ શય્યાસ્થાનપદ્યાલેણ્ડકૂલઘાત ઉદ્દેશેન હસ્તિકુલપર્યગ્રં વિદ્યુઃ
02.2.11 યૂથચરં એકચરં નિર્યૂથં યૂથપતિં હસ્તિનં વ્યાલં મત્તં પોતં બન્ધમુક્તં ચ નિબન્ધેન વિદ્યુઃ
02.2.12 અનીકસ્થપ્રમાણૈઃ પ્રશસ્તવ્યઞ્જનાચારાન્ હસ્તિનો ગૃહ્ણીયુઃ
02.2.13 હસ્તિપ્રધાનં વિજયો રાજ્ઞઃ
02.2.14 પરાનીકવ્યૂહદુર્ગસ્કન્ધાવારપ્રમર્દના હ્યતિપ્રમાણશરીરાઃ પ્રાણહરકર્માણો હસ્તિનઃ
02.2.15ab કાલિઙ્ગાઙ્ગરજાઃ શ્રેષ્ઠાઃ પ્રાચ્યાશ્ચેદિકરૂષજાઃ ।
02.2.15chd દાશાર્ણાશ્ચાપરાન્તાશ્ચ દ્વિપાનાં મધ્યમા મતાઃ
02.2.16ab સૌરાષ્ટ્રિકાઃ પાઞ્ચનદાઃ તેષાં પ્રત્યવરાઃ સ્મૃતાઃ ।
02.2.16chd સર્વેષાં કર્મણા વીર્યં જવઃ તેજશ્ચ વર્ધતે (ઇતિ)

Chapt . Construction of forts

02.3.01 ચતુર્દિશં જનપદાન્તે સામ્પરાયિકં દૈવકૃતં દુર્ગં કારયેત્, અન્તર્દ્વીપં સ્થલં વા નિમ્નાવરુદ્ધં ઔદકં, પ્રાસ્તરં ગુહાં વા પાર્વતં, નિરુદકસ્તમ્બં ઇરિણં વા ધાન્વનં, ખઞ્જન ઉદકં સ્તમ્બગહનં વા વનદુર્ગમ્
02.3.02 તેષાં નદીપર્વતદુર્ગં જનપદારક્ષસ્થાનં, ધાન્વનવનદુર્ગં અટવીસ્થાનં આપદ્યપસારો વા
02.3.03 જનપદમધ્યે સમુદયસ્થાનં સ્થાનીયં નિવેશયેત્, વાસ્તુકપ્રશસ્તે દેશે નદીસઙ્ગમે હ્રદસ્યાવિશોષસ્યાઙ્કે સરસઃ તટાકસ્ય વા, વૃત્તં દીર્ઘં ચતુરશ્રં વા વાસ્તુવશેન વા પ્રદક્ષિણ ઉદકં પણ્યપુટભેદનં અંસપથવારિપથાભ્યાં ઉપેતમ્
02.3.04 તસ્ય પરિખાઃ તિસ્રો દણ્ડાન્તરાઃ કારયેત્ ચતુર્દશ દ્વાદશ દશ ઇતિ દણ્ડાન્ વિસ્તીર્ણાઃ, વિસ્તારાદ્ અવગાઢાઃ પાદ ઊનં અર્ધં વા, ત્રિભાગમૂલાઃ, મૂલચતુરશ્રા વા, પાષાણ ઉપહિતાઃ પાષાણ ઇષ્ટકાબદ્ધપાર્શ્વા વા, તોયાન્તિકીરાગન્તુતોયપૂર્ણા વા સપરિવાહાઃ પદ્મગ્રાહવતીશ્ચ
02.3.05 ચતુર્દણ્ડાપકૃષ્ટે પરિખાયાઃ ષડ્દણ્ડ ઉચ્છ્રિતં અવરુદ્ધં તદ્વિગુણવિષ્કમ્ભં ખાતાદ્ વપ્રં કારયેદ્ ઊર્ધ્વચયં મઞ્ચપૃષ્ઠં કુમ્ભકુક્ષિકં વા હસ્તિભિર્ગોભિશ્ચ ક્ષુણ્ણં કણ્ટકિગુલ્મવિષવલ્લીપ્રતાનવન્તમ્
02.3.06 પાંસુશેષેણ વાસ્તુચ્છિદ્રં રાજભવનં વા પૂરયેત્

02.3.07a વપ્રસ્ય ઉપરિ પ્રાકારં વિષ્કમ્ભદ્વિગુણ ઉત્સેધં ઐષ્ટકં દ્વાદશહસ્તાદ્ ઊર્ધ્વં ઓજં યુગ્મં વા આ ચતુર્વિંશતિહસ્તાદ્ ઇતિ કારયેત્

02.3.07b રથચર્યાસઞ્ચારં તાલમૂલં મુરજકૈઃ કપિશીર્ષકૈશ્ચાચિતાગ્રમ્

02.3.08 પૃથુશિલાસંહતં વા શૈલં કારયેત્, ન ત્વેવ કાષ્ટમયમ્

02.3.09 અગ્નિરવહિતો હિ તસ્મિન્ વસતિ

02.3.10 વિષ્કમ્ભચતુરશ્રં અટ્ટાલકં ઉત્સેધસમાવક્ષેપસોપાનં કારયેત્ ત્રિંશદ્દણ્ડાન્તરં ચ

02.3.11 દ્વયોરટ્ટાલકયોર્મધ્યે સહર્મ્યદ્વિતલાં અધ્યર્ધાયાયામાં પ્રતોલીં કારયેત્

02.3.12 અટ્ટાલકપ્રતોલીમધ્યે ત્રિધાનુષ્કાધિષ્ઠાનં સ-અપિધાનચ્છિદ્રફલકસંહતં ઇન્દ્રકોશં કારયેત્

02.3.13 અન્તરેષુ દ્વિહસ્તવિષ્કમ્ભં પાર્શ્વે ચતુર્ગુણાયામં દેવપથં કારયેત્

02.3.14 દણ્ડાન્તરા દ્વિદણ્ડાન્તરા વા ચર્યાઃ કારયેત્, અગ્રાહ્યે દેશે પ્રધાવનિકાં નિષ્કિરદ્વારં ચ

02.3.15 બહિર્જાનુભઞ્જનીશૂલપ્રકરકૂપકૂટાવપાતકણ્ટકપ્રતિસરાહિપૃષ્ઠતાલપત્ત્રશ◌ૃઙ્ગાટકશ્વદંષ્ટ્રાર્ગલ ઉપસ્કન્દનપાદુકામ્બરીષ ઉદપાનકૈઃ પ્રતિચ્છન્નં છન્નપથં કારયેત્

02.3.16 પ્રાકારં ઉભયતો મેણ્ઢકં અધ્યર્ધદણ્ડં કૃત્વા પ્રતોલીષટ્તુલાઽન્તરં દ્વારં નિવેશયેત્ પઞ્ચદણ્ડાદ્ એક ઉત્તરં આઽષ્ટદણ્ડાદ્ ઇતિ ચતુરશ્રં ષડ્ભાગં આયામાદ્ઽધિકં અષ્ટભાગં વા

02.3.17 પઞ્ચદશહસ્તાદ્ એક ઉત્તરં આઽષ્ટાદશહસ્તાદ્ ઇતિ તલ ઉત્સેધઃ

02.3.18 સ્તમ્ભસ્ય પરિક્ષેપઃ ષડ્। આયામો, દ્વિગુણો નિખાતઃ, ચૂલિકાયાશ્ચતુર્ભાગઃ

02.3.19 આદિતલસ્ય પઞ્ચભાગાઃ શાલા વાપી સીમાગૃહં ચ

02.3.20 દશભાગિકૌ દ્વૌ પ્રતિમઞ્ચૌ, અન્તરં આણીહર્મ્યં ચ

02.3.21 સમુચ્છ્રયાદ્ અર્ધતલે સ્થૂણાબન્ધશ્ચ

02.3.22 અર્ધવાસ્તુકં ઉત્તમાગારં, ત્રિભાગાન્તરં વા, ઇષ્ટકાઽવબદ્ધપાર્શ્વં, વામતઃ પ્રદક્ષિણસોપાનં ગૂઢભિત્તિસોપાનં ઇતરતઃ

02.3.23 દ્વિહસ્તં તોરણશિરઃ

02.3.24 ત્રિપઞ્ચભાગિકૌ દ્વૌ કપાટયોગૌ

02.3.25 દ્વૌ પરિઘૌ

02.3.26 અરત્નિરિન્દ્રકીલઃ

02.3.27 પઞ્ચહસ્તં આણિદ્વારમ્

02.3.28 ચત્વારો હસ્તિપરિઘાઃ

02.3.29 નિવેશાર્ધં હસ્તિનખમ્

02.3.30 મુખસમઃ સઙ્ક્રમઃ સંહાર્યો ભૂમિમયો વા નિરુદકે

02.3.31 પ્રાકારસમં મુખં અવસ્થાપ્ય ત્રિભાગગોધામુખં ગોપુરં કારયેત્

02.3.32 પ્રાકારમધ્યે વાપીં કૃત્વા પુષ્કરિણીદ્વારં, ચતુઃશાલં અધ્યર્ધાન્તરં સાણિકં કુમારીપુરં, મુણ્ડહર્મ્યદ્વિતલં મુણ્ડકદ્વારં, ભૂમિદ્રવ્યવશેન વા નિવેશયેત્

02.3.33 ત્રિભાગાધિકાયામા ભાણ્ડવાહિનીઃ કુલ્યાઃ કારયેત્

02.3.34ab તાસુ પાષાણકુદ્દાલાઃ કુઠારીકાણ્ડકલ્પનાઃ ।

02.3.34chd મુષુણ્ઢીમુદ્ગરા દણ્ડાશ્ચક્રયન્ત્રશતઘ્નયઃ

02.3.35ab કાર્યાઃ કાર્માારિકાઃ શૂલા વેધનાગ્રાશ્ચ વેણવઃ ।

02.3.35chd ઉષ્ટ્રગ્રીવ્યોઽગ્નિસમ્યોગાઃ કુપ્યકલ્પે ચ યો વિધિઃ (ઇતિ)

Chapt . Lay-out of the fortified city

02.4.01 ત્રયઃ પ્રાચીના રાજમાર્ગાઃ ત્રય ઉદીચીના ઇતિ વાસ્તુવિભાગઃ

02.4.02 સ દ્વાદશદ્વારો યુક્ત ઉદકભ્રમચ્છન્નપથઃ

02.4.03 ચતુર્દણ્ડાન્તરા રથ્યાઃ

02.4.04 રાજમાર્ગદ્રોણમુખસ્થાનીયરાષ્ટ્રવિવીતપથાઃ સમ્યાનીયવ્યૂહશ્મશાનગ્રામપથાશ્ચાષ્ટદણ્ડાઃ

02.4.05 ચતુર્દણ્ડઃ સેતુવનપથઃ, દ્વિદણ્ડો હસ્તિક્ષેત્રપથઃ, પઞ્ચારત્નયો રથપથઃ, ચત્વારઃ પશુપથઃ, દ્વૌ ક્ષુદ્રપશુમનુષ્યપથઃ

02.4.06 પ્રવીરે વાસ્તુનિ રાજનિવેશશ્ચાતુર્વર્ણ્યસમાજીવે

02.4.07 વાસ્તુહૃદયાદ્ ઉત્તરે નવભાગે યથા ઉક્તવિધાનં અન્તઃપુરં પ્રાન્મુખં ઉદન્મુખં વા કારયેત્

02.4.08 તસ્ય પૂર્વ ઉત્તરં ભાગં આચાર્યપુરોહિત ઇજ્યાતોયસ્થાનં મન્ત્રિણશ્ચાવસેયુઃ, પૂર્વદક્ષિણં ભાગ્ં મહાનસં હસ્તિશાલા કોષ્ઠાગારં ચ

02.4.09 તતઃ પરં ગન્ધમાલ્યરસપણ્યાઃ પ્રસાધનકારવઃ ક્ષત્રિયાશ્ચ પૂર્વાં દિશં અધિવસેયુઃ

02.4.10 દક્ષિણપૂર્વં ભાગં ભાણ્ડાગારં અક્ષપટલં કર્મનિષધાશ્ચ, દક્ષિણપશ્ચિમં ભાગં કુપ્યગૃહં આયુધાગારં ચ

02.4.11 તતઃ પરં નગરધાન્યવ્યાવહારિકકાર્માન્તિકબલાધ્યક્ષાઃ પક્વાન્નસુરામાંસપણ્યા રૂપાજીવાઃ તાલાવચરા વૈશ્યાશ્ચ દક્ષિણાં દિશં અધિવસેયુઃ

02.4.12 પશ્ચિમદક્ષિણં ભાગં ખર ઉષ્ટ્રગુપ્તિસ્થાનં કર્મગૃહં ચ, પશ્ચિમ ઉત્તરં ભાગં યાનરથશાલાઃ

02.4.13 તતઃ પરં ઊર્ણાસૂત્રવેણુચર્મવર્મશસ્ત્રાવરણકારવઃ શૂદ્રાશ્ચ પશ્ચિમાં દિશં અધિવસેયુઃ

02.4.14 ઉત્તરપશ્ચિમં ભાગં પણ્યભૈષજ્યગૃહં, ઉત્તરપૂર્વં ભાગં કોશો ગવાશ્વં ચ

02.4.15 તતઃ પરં નગરરાજદેવતાલોહમણિકારવો બ્રાહ્મણાશ્ચ ઉત્તરાં દિશં અધિવસેયુઃ

02.4.16 વાસ્તુચ્છિદ્રાનુશાલેષુ શ્રેણીપ્રપણિનિકાયા આવસેયુઃ

02.4.17 અપરાજિતાપ્રતિહતજયન્તવૈજયન્તકોષ્ઠાન્ શિવવૈશ્રવણાશ્વિશ્રીમદિરાગૃહાણિ ચ પુરમધ્યે કારયેત્

02.4.18 યથા ઉદ્દેશં વાસ્તુદેવતાઃ સ્થાપયેત્

02.4.19 બ્રાહ્મઇન્દ્રયામ્યસૈનાપત્યાનિ દ્વારાણિ

02.4.20 બહિઃ પરિખાયા ધનુઃશતાપકૃષ્ટાશ્ચૈત્યપુણ્યસ્થાનવનસેતુબન્ધાઃ કાર્યાઃ, યથાદિશં ચ દિગ્દેવતાઃ

02.4.21 ઉત્તરઃ પૂર્વો વા શ્મશાનભાગો વર્ણ ઉત્તમાનાં, દક્ષિણેન શ્મશાનં વર્ણાવરાણામ્

02.4.22 તસ્યાતિક્રમે પૂર્વઃ સાહસદણ્ડઃ

02.4.23 પાષણ્ડચણ્ડાલાનાં શ્મશાનાન્તે વાસઃ

02.4.24 કર્માન્તક્ષેત્રવશેન કુટુમ્બિનાં સીમાનં સ્થાપયેત્

02.4.25 તેષુ પુષ્પફલવાટાન્ ધાન્યપણ્યનિચયાંશ્ચાનુજ્ઞાતાઃ કુર્યુઃ

02.4.26 દશકુલીવાટં કૂપસ્થાનમ્

02.4.27 સર્વસ્નેહધાન્યક્ષારલવણગન્ધભૈષજ્યશુષ્કશાકયવસવલ્લૂરતૃણકાષ્ઠલોહચર્માઙ્ગારસ્નાયુવિષવિષાણવેણુવલ્કલસાર અનેકવર્ષ ઉપભોગસહાન્ કારયેત્

02.4.28 નવેનાનવં શોધયેત્

02.4.29 હસ્તિઽશ્વરથપાદાતં અનેકમુખ્યં અવસ્થાપયેત્

02.4.30 અનેકમુખ્યં હિ પરસ્પરભયાત્ પર ઉપજાપં ન ઉપૈતિ

02.4.31 એતેનાન્તપાલદુર્ગસંસ્કારા વ્યાખ્યાતાઃ

02.4.32ab ન ચ બાહિરિકાન્ કુર્યાત્ પુરે રાષ્ટ્ર ઉપઘાતકાન્ ।

02.4.32chd ક્ષિપેજ્ જનપદે ચ એતાન્ સર્વાન્ વા દાપયેત્ કરાન્ (ઇતિ)

Chapt . The work of store-keeping by the director of stories

02.5.01 સન્નિધાતા કોશગૃહં પણ્યગૃહં કોષ્ઠાગારં કુપ્યગૃહં આયુધાગારં બન્ધનાગારં ચ કારયેત્

02.5.02 ચતુર્ઽશ્રાં વાપીં અન્-ઉદક ઉપસ્નેહાં ખાનયિત્વા પૃથુશિલાભિરુભયતઃ પાર્શ્વં મૂલં ચ પ્રચિત્ય સારદારુપઞ્જરં ભૂમિસમં ત્રિતલં અનેકવિધાનં કુટ્ટિમદેશસ્થાનતલં એકદ્વારં યન્ત્રયુક્તસોપાનં ભૂમિગૃહં કારયેત્

02.5.03 તસ્ય ઉપરિ ઉભયતોનિષેધં સ-પ્રગ્રીવં ઐષ્ટકં ભાણ્ડવાહિનીપરિક્ષિપ્તં કોશગૃહં કારયેત્, પ્રાસાદં વા

02.5.04 જનપદાન્તે ધ્રુવનિધિં આપદ્ઽર્થં અભિત્યક્તૈઃ કારયેત્

02.5.05a પક્વ ઇષ્ટકાસ્તમ્ભં ચતુઃશાલં એકદ્વારં અનેકસ્થાનતલં વિવૃતસ્તમ્ભાપસારં ઉભયતઃ પણ્યગૃહં કોષ્ઠાગારં ચ

02.5.05b દીર્ઘબહુશાલં કક્ષ્યાવૃતકુડ્યં અન્તઃ કુપ્યગૃહં, તદ્ એવ ભૂમિગૃહયુક્તં આયુધાગારં

02.5.05ch પૃથગ્ધર્મસ્થીયં મહામાત્રીયં વિભક્તસ્ત્રીપુરુષસ્થાનં અપસારતઃ સુગુપ્તકક્ષ્યં બન્ધનાગારં કારયેત્

02.5.06 સર્વેષાં શાલાઃ ખાત ઉદપાનવર્ચસ્નાનગૃહાગ્નિવિષત્રાણમાર્જારનકુલારક્ષાસ્વદૈવતપૂજનયુક્તાઃ કારયેત્

02.5.07 કોષ્ઠાગારે વર્ષમાનં અરત્નિમુખં કુણ્ડં સ્થાપયેત્

02.5.08 તજ્જાતકરણાધિષ્ઠિતઃ પુરાણં નવં ચ રત્નં સારં ફલ્ગુ કુપ્યં વા પ્રતિગૃહ્ણીયાત્

02.5.09 તત્ર રત્ન ઉપધાવુત્તમો દણ્ડઃ કર્તુઃ કારયિતુશ્ચ સાર ઉપધૌ મધ્યમઃ, ફલ્ગુકુપ્ય ઉપધૌ તત્ ચ તાવત્ ચ દણ્ડઃ

02.5.10 રૂપદર્શકવિશુદ્ધં હિરણ્યં પ્રતિગૃહ્ણીયાત્

02.5.11 અશુદ્ધં છેદયેત્

02.5.12 આહર્તુઃ પૂર્વઃ સાહસદણ્ડઃ

02.5.13 શુદ્ધં પૂર્ણં અભિનવં ચ ધાન્યં પ્રતિગૃહ્ણીયાત્

02.5.14 વિપર્યયે મૂલ્યદ્વિગુણો દણ્ડઃ

02.5.15 તેન પણ્યં કુપ્યં આયુધં ચ વ્યાખ્યાતમ્

02.5.16 સર્વાધિકરણેષુ યુક્ત ઉપયુક્તતત્પુરુષાણાં પણાદિચતુષ્પણપરમાપહારેષુ પૂર્વમધ્યમ ઉત્તમવધા દણ્ડાઃ

02.5.17 કોશાધિષ્ઠિતસ્ય કોશાવચ્છેદે ઘાતઃ

02.5.18 તદ્વૈયાવૃત્યકરાણાં અર્ધદણ્ડાઃ

02.5.19 પરિભાષણં અવિજ્ઞાતે

02.5.20 ચોરાણાં અભિપ્રધર્ષણે ચિત્રો ઘાતઃ

02.5.21 તસ્માદ્ આપ્તપુરુષાધિષ્ઠિતઃ સન્નિધાતા નિચયાન્ અનુતિષ્ઠેત્

02.5.22a બાહ્યં અભ્યન્તરં ચાયં વિદ્યાદ્ વર્ષશતાદ્ અપિ ।

02.5.22b યથા પૃષ્ટો ન સજ્જેત વ્યયે શેષે ચ સઞ્ચયે (ઇતિ)

Chapt . chapter 24 The setting up of revenue by the administration

02.6.01 સમાહર્તા દુર્ગં રાષ્ટ્રં ખનિં સેતું વનં વ્રજં વણિક્પથં ચાવેક્ષેત

02.6.02 શુલ્કં દણ્ડઃ પૌતવં નાગરિકો લક્ષણાધ્યક્ષો મુદ્રાઽધ્યક્ષઃ સુરા સૂના સૂત્રં તૈલં ઘૃતં ક્ષારઃ સૌવર્ણિકઃ પણ્યસંસ્થા વેશ્યા દ્યૂતં વાસ્તુકં કારુશિલ્પિગણો દેવતાઽધ્યક્ષો દ્વારબહિરિકાઽઽદેયં ચ દુર્ગમ્

02.6.03 સીતા ભાગો બલિઃ કરો વણિક્ નદીપાલઃ તરો નાવઃ પત્તનં વિવિચિતં વર્તની રજ્જુશ્ચોરરજ્જુશ્ચ રાષ્ટ્રમ્

02.6.04 સુવર્ણરજતવજ્રમણિમુક્તાપ્રવાલશઙ્ખલોહલવણભૂમિપ્રસ્તરરસધાતવઃ ખનિઃ

02.6.05 પુષ્પફલવાટષણ્ડકેદારમૂલવાપાઃ સેતુઃ

02.6.06 પશુમૃગદ્રવ્યહસ્તિવનપરિગ્રહો વનમ્

02.6.07 ગોમહિષં અજાવિકં ખર ઉષ્ટ્રં અશ્વાશ્વતરં ચ વ્રજઃ

02.6.08 સ્થલપથો વારિપથશ્ચ વણિક્પથઃ

02.6.09 ઇત્યાયશરીરમ્

02.6.10 મૂલ્યં ભાગો વ્યાજી પરિઘઃ કૢપ્તમ્ રૂપિકં અત્યયશ્ચાયમુખમ્

02.6.11 દેવપિતૃપૂજાદાનાર્થં, સ્વસ્તિવાચનં, અન્તઃપુરં, મહાનસં, દૂતપ્રાવર્તિમં, કોષ્ઠાગારં, આયુધાગારં, પણ્યગૃહં, કુપ્યગૃહં, કર્માન્તો, વિષ્ટિઃ, પત્તિઽશ્વરથદ્વિપપરિગ્રહો, ગોમણ્ડલં, પશુમૃગપક્ષિવ્યાલવાટાઃ, કાષ્ઠતૃણવાટાશ્ચ ઇતિ વ્યયશરીરમ્

02.6.12 રાજવર્ષં માસઃ પક્ષો દિવસશ્ચ વ્યુષ્ટં, વર્ષાહેમન્તગ્રીષ્માણાં તૃતીયસપ્તમા દિવસ ઊનાઃ પક્ષાઃ શેષાઃ પૂર્ણાઃ, પૃથગ્ઽધિમાસકઃ, ઇતિ કાલઃ

02.6.13 કરણીયં સિદ્ધં શેષં આયવ્યયૌ નીવી ચ

02.6.14 સંસ્થાનં પ્રચારઃ શરીરાવસ્થાપનં આદાનં સર્વસમુદયપિણ્ડઃ સઞ્જાતં - એતત્ કરણીયમ્

02.6.15 કોશાર્પિતં રાજહારઃ પુરવ્યયશ્ચ પ્રવિષ્ટં પરમસંવત્સરાનુવૃત્તં શાસનમુક્તં મુખાજ્ઞપ્તં ચાપાતનીયં - એતત્ સિદ્ધમ્

02.6.16 સિદ્ધિકર્મયોગઃ દણ્ડશેષં આહરણીયં બલાત્કૃતપ્રતિષ્ટબ્ધં અવમૃષ્ટં ચ પ્રશોધ્યં - એતત્શેષં, અસારં અલ્પસારં ચ

02.6.17 વર્તમાનઃ પર્યુષિતોઽન્યજાતશ્ચાયઃ

02.6.18 દિવસાનુવૃત્તો વર્તમાનઃ

02.6.19 પરમસાંવત્સરિકઃ પરપ્રચારસઙ્ક્રાન્તો વા પર્યુષિતઃ

02.6.20 નષ્ટપ્રસ્મૃતં આયુક્તદણ્ડઃ પાર્શ્વં પારિહીણિકં ઔપાયનિકં ડમરગતકસ્વં અપુત્રકં નિધિશ્ચાન્યજાતઃ

02.6.21 વિક્ષેપવ્યાધિતાન્તરારમ્ભશેષં ચ વ્યયપ્રત્યાયઃ

02.6.22 વિક્રિયે પણ્યાનાં અર્ઘવૃદ્ધિરુપજા, માન ઉન્માનવિશેષો વ્યાજી, ક્રયસઙ્ઘર્ષે વાર્ધવૃદ્ધિઃ - ઇત્યાયઃ

02.6.23 નિત્યો નિત્ય ઉત્પાદિકો લાભો લાભ ઉત્પાદિક ઇતિ વ્યયઃ

02.6.24 દિવસાનુવૃત્તો નિત્યઃ

02.6.25 પક્ષમાસસંવત્સરલાભો લાભઃ

02.6.26 તયોરુત્પન્નો નિત્ય ઉત્પાદિકો લાભ ઉત્પાદિક ઇતિ વ્યયઃ

02.6.27 સઞ્જાતાદ્ આયવ્યયવિશુદ્ધા નીવી, પ્રાપ્ના ચાનુવૃત્તા ચ

02.6.28ab એવં કુર્યાત્ સમુદયં વૃદ્ધિં ચાયસ્ય દર્શયેત્ ।

02.6.28chd હ્રાસં વ્યયસ્ય ચ પ્રાજ્ઞઃ સાધયેચ્ચ વિપર્યયમ્ (ઇતિ)

Chapt . The topic of accounts in the records and audit office

02.7.01 અક્ષપટલં અધ્યક્ષઃ પ્રાન્મુખં ઉદન્મુખં વા વિભક્ત ઉપસ્થાનં નિબન્ધપુસ્તકસ્થાનં કારયેત્

02.7.02 તત્રાધિકરણાનાં સઙ્ખ્યાપ્રચારસઞ્જાતાગ્રં, કર્માન્તાનાં દ્રવ્યપ્રયોગવૃદ્ધિક્ષયવ્યયપ્રયામવ્યાજીયોગસ્થાનવેતનવિષ્ટિપ્રમા રત્નસારફલ્ગુકુપ્યાનાં અર્ઘપ્રતિવર્ણકમાનપ્રતિમાન ઉન્માનાવમાનભાણ્ડં, દેશગ્રામજાતિકુલસઙ્ઘાનાં ધર્મવ્યવહારચરિત્રસંસ્થાનં, રાજ ઉપજીવિનાં પ્રગ્રહપ્રદેશભોગપરિહારભક્તવેતનલાભં, રાજ્ઞશ્ચ પત્નીપુત્રાણાં રત્નભૂમિલાભં નિર્દેશ ઉત્પાતિકપ્રતીકારલાભં, મિત્રામિત્રાણાં ચ સન્ધિવિગ્રહપ્રદાનાદાનં નિબન્ધપુસ્તકસ્થં કારયેત્

02.7.03 તતઃ સર્વાધિકરણાનાં કરણીયં સિદ્ધં શેષં આયવ્યયૌ નીવીં ઉપસ્થાનં પ્રચારં ચરિત્રં સંસ્થાનં ચ નિબન્ધેન પ્રયચ્છેત્

02.7.04 ઉત્તમમધ્યમાવરેષુ ચ કર્મસુ તજ્જાતિકં અધ્યક્ષં કુર્યાત્, સામુદયિકેષ્વવક્લૃપ્તિકમ્(અવક્લૃપ્તિકમ્) યં ઉપહત્ય રાજા નાનુતપ્યેત

02.7.05 સહગ્રાહિણઃ પ્રતિભુવઃ કર્મ ઉપજીવિનઃ પુત્રા ભ્રાતરો ભાર્યા દુહિતરો ભૃત્યાશ્ચાસ્ય કર્મચ્છેદં વહેયુઃ

02.7.06 ત્રિશતં ચતુઃપઞ્ચાશત્ ચાહોરાત્રાણાં કર્મસંવત્સરઃ

02.7.07 તં આષાઢીપર્યવસાનં ઊનં પૂર્ણં વા દદ્યાત્

02.7.08 કરણાધિષ્ઠિતં અધિમાસકં કુર્યાત્

02.7.09 અપસર્પાધિષ્ઠિતઞ્ચ પ્રચારમ્

02.7.10 પ્રચારચરિત્રસંસ્થાનાન્યનુપલભમાનો હિ પ્રકૃતઃ સમુદયં અજ્ઞાનેન પરિહાપયતિ, ઉત્થાનક્લેશાસહત્વાદ્ આલસ્યેન, શબ્દાદિષ્વિન્દ્રિયાર્થેષુ પ્રસક્તઃ પ્રમાદેન, સઙ્ક્રોશાધર્માનર્થભીરુભાયેન, કાર્યાર્થિષ્વનુગ્રહબુદ્ધિઃ કામેન, હિંસાબુદ્ધિઃ કોપેન, વિદ્યાદ્રવ્યવલ્લભાપાશ્રયાદ્ દર્પેણ, તુલામાનતર્કગણિતાન્તર ઉપધાનાત્ લોભેન

02.7.11 તેષાં આનુપૂર્વ્યા યાવાન્ અર્થ ઉપઘાતઃ તાવાન્ એક ઉત્તરો દણ્ડઃ ઇતિ માનવાઃ

02.7.12 સર્વત્રાષ્ટગુણઃ ઇતિ પારાશરાઃ

02.7.13 દશગુણઃ ઇતિ બાર્હસ્પત્યાઃ

02.7.14 વિંશતિગુણઃ ઇત્યૌશનસાઃ

02.7.15 યથાऽપરાધં ઇતિ કૌટિલ્યઃ

02.7.16 ગાણનિક્યાનિ આષાઢીં આગચ્છેયુઃ

02.7.17 આગતાનાં સમુદ્રપુસ્તકભાણ્ડનીવીકાનાં એકત્રાસમ્ભાષાऽવરોધં કારયેત્

02.7.18 આયવ્યયનીવીનાં અગ્રાણિ શ્રુત્વા નીવીં અવહારયેત્

02.7.19 યચ્ચાગ્રાદ્ આયસ્યાન્તરપર્ણે નીવ્યાં વર્ધેત વ્યયસ્ય વા યત્ પરિહાપયેત્, તદ્ અષ્ટગુણં અધ્યક્ષં દાપયેત્

02.7.20 વિપર્યયે તં એવ પ્રતિ સ્યાત્

02.7.21 યથાકાલં અનાગતાનાં અપુસ્તકભાણ્ડનીવીકાનાં વા દેયદશબન્ધો દણ્ડઃ

02.7.22 કાર્મિકે ચ ઉપસ્થિતે કારણિકસ્યાપ્રતિબધ્નતઃ પૂર્વઃ સાહસદણ્ડઃ

02.7.23 વિપર્યયે કાર્મિકસ્ય દ્વિગુણઃ

02.7.24 પ્રચારસમં મહામાત્રાઃ સમગ્રાઃ શ્રાવયેયુરવિષમમન્ત્રાઃ

02.7.25 પૃથગ્ભૂતો મિથ્યાવાદી ચ એષાં ઉત્તમં દણ્ડં દદ્યાત્

02.7.26 અકૃતાહોરૂપહરં માસં આકાङ્ક્ષેત

02.7.27 માસાદ્ ઊર્ધ્વં માસદ્વિશત ઉત્તરં દણ્ડં દદ્યાત્

02.7.28 અલ્પશેસલેખ્યનીવીકં પઞ્ચરાત્રં આકાङ્ક્ષેત

02.7.29 તતઃ પરં કોશપૂર્વં અહોરૂપહરં ધર્મવ્યવહારચરિત્રસંસ્થાનસङ્કલનનિર્વર્તનાનુમાનચારપ્રયોગૈરવેક્ષેત

02.7.30 દિવસપઞ્ચરાત્રપક્ષમાસચાતુર્માસ્યસંવત્સરૈશ્ચ પ્રતિસમાનયેત્

02.7.31 વ્યુષ્ટદેશકાલમુખ ઉત્પત્તિऽનુવૃત્તિપ્રમાણદાયકદાપકનિબન્ધકપ્રતિગ્રાહકૈશ્ચાયં સમાનયેત્

02.7.32 વ્યુષ્ટદેશકાલમુખલાભકારણદેયયોગપ્રમાણાજ્ઞાપક ઉદ્ધારકવિધાતૃકપ્રતિગ્રાહકૈશ્ચ વ્યયં સમાનયેત્

02.7.33 વ્યુષ્ટદેશકાલમુખાનુવર્તનરૂપલક્ષણપ્રમાણનિક્ષેપભાજનગોપાયકૈશ્ચ નીવીં સમાનયેત્

02.7.34 રાજાર્થે કારણિકસ્યાપ્રતિબધ્નતઃ પ્રતિષેધયતો વાऽऽજ્ઞાં નિબન્ધાદ્ આયવ્યયં અન્યથા નીવીં અવલિખતો દ્વિગુણઃ

02.7.35 ક્રમાવહીનં ઉત્ક્રમં અવિજ્ઞાતં પુનર્। ઉક્તં વા વસ્તુકં અવલિખતો દ્વાદશપણો દણ્ડઃ

02.7.36 નીવીં અવલિખતો દ્વિગુણઃ

02.7.37 ભક્ષયતોऽષ્ટગુણઃ

02.7.38 નાશયતઃ પઞ્ચબન્ધઃ પ્રતિદાનં ચ

02.7.39 મિથ્યાવાદે સ્તેયદણ્ડઃ

02.7.40 પશ્ચાત્પ્રતિજ્ઞાતે દ્વિગુણઃ, પ્રસ્મૃત ઉત્પન્ને ચ

02.7.41ab અપરાધં સહેતાલ્પં તુષ્યેદ્ અલ્પેऽપિ ચ ઉદયે ।

02.7.41chd મહા ઉપકારં ચાધ્યક્ષં પ્રગ્રહેણાભિપૂજયેત્ (ઇતિ)

Chapt . Recovery of revenue misappropriated by state employees

02.8.01 કોશપૂર્વાઃ સર્વારમ્ભાઃ

02.8.02 તસ્માત્ પૂર્વં કોશં અવેક્ષેત

02.8.03 પ્રચારસમૃદ્ધિશ્ચરિત્રાનુગ્રહશ્ચોરનિગ્રહો યુક્તપ્રતિષેધઃ સસ્યસમ્પત્ પણ્યબાહુલ્યં ઉપસર્ગપ્રમોક્ષઃ પરિહારક્ષયો હિરણ્ય ઉપાયનં ઇતિ કોશવૃદ્ધિઃ

02.8.04 પ્રતિબન્ધઃ પ્રયોગો વ્યવહારોઽવસ્તારઃ પરિહાપણં ઉપભોગઃ પરિવર્તનં અપહારશ્ચ ઇતિ કોશક્ષયઃ

02.8.05 સિદ્ધીનાં અસાધનં અનવતારણં અપ્રવેશનં વા પ્રતિબન્ધઃ

02.8.06 તત્ર દશબન્ધો દણ્ડઃ

02.8.07 કોશદ્રવ્યાણાં વૃદ્ધિપ્રયોગાઃ પ્રયોગઃ

02.8.08 પણ્યવ્યવહારો વ્યવહારઃ

02.8.09 તત્ર ફલદ્વિગુણો દણ્ડઃ

02.8.10 સિદ્ધં કાલં અપ્રાપ્તં કરોતિ અપ્રાપ્તં પ્રાપ્તં વા ઇત્યવસ્તારઃ

02.8.11 તત્ર પઞ્ચબન્ધો દણ્ડઃ

02.8.12 ક્લૃપ્તમ્(ક્લૢપ્તમ્) આયં પરિહાપયતિ વ્યયં વા વિવર્ધયતિ ઇતિ પરિહાપણમ્

02.8.13 તત્ર હીનચતુર્ગુણો દણ્ડઃ

02.8.14 સ્વયં અન્યૈર્વા રાજદ્રવ્યાણાં ઉપભોજનં ઉપભોગઃ

02.8.15 તત્ર રત્ન ઉપભોગે ઘાતઃ, સાર ઉપભોગે મધ્યમઃ સાહસદણ્ડઃ, ફલ્ગુકુપ્ય ઉપભોગે તચ્ચ તાવત્ ચ દણ્ડઃ

02.8.16 રાજદ્રવ્યાણાં અન્યદ્રવ્યેનાદાનં પરિવર્તનમ્

02.8.17 તદ્ ઉપભોગેન વ્યાખ્યાતમ્

02.8.18 સિદ્ધં આયં ન પ્રવેશયતિ, નિબદ્ધં વ્યયં ન પ્રયચ્છતિ, પ્રાપ્તાં નીવીં વિપ્રતિજાનીત ઇત્યપહારઃ

02.8.19 તત્ર દ્વાદશગુણો દણ્ડઃ

02.8.20 તેષાં હરણ ઉપાયાશ્ચત્વારિંશત્

02.8.21a પૂર્વં સિદ્ધં પશ્ચાદ્ અવતારિતં, પશ્ચાત્ સિદ્ધં પૂર્વં અવતારિતં, સાધ્યં ન સિદ્ધં, અસાધ્યં સિદ્ધં, સિદ્ધં અસિદ્ધં કૃતં, અસિદ્ધં સિદ્ધં કૃતં, અલ્પસિદ્ધં બહુ કૃતં, બહુસિદ્ધં અલ્પં કૃતં, અન્યત્ સિદ્ધં અન્યત્ કૃતં, અન્યતઃ સિદ્ધં અન્યતઃ કૃતં,

02.8.21b દેયં ન દત્તં, અદેયં દત્તં, કાલે ન દત્તં, અકાલે દત્તં, અલ્પં દત્તં બહુ કૃતં, બહુ દત્તં અલ્પં કૃતં, અન્યદ્ દત્તં અન્યત્ કૃતં, અન્યતો દત્તં અન્યતઃ કૃતં,

02.8.21ch પ્રવિષ્ટં અપ્રવિષ્ટં કૃતં, અપ્રવિષ્ટં પ્રવિષ્ટં કૃતં, કુપ્યં અદત્તમૂલ્યં પ્રવિષ્ટં, દત્તમૂલ્યં ન પ્રવિષ્ટં

02.8.21d સઙ્ક્ષેપો વિક્ષેપઃ કૃતઃ, વિક્ષેપઃ સઙ્ક્ષેપો વા, મહાઽર્ઘં અલ્પાર્ઘેણ પરિવર્તિતં, અલ્પાર્ઘં મહાઽર્ઘેણ વા

02.8.21e સમારોપિતોઽર્ઘઃ, પ્રત્યવરોપિતો વા, સંવત્સરો માસવિષમઃ કૃતઃ, માસો દિવસવિષમો વા, સમાગમવિષમઃ, મુખવિષમઃ, કાર્મિકવિષમઃ

02.8.21f નિર્વર્તનવિષમઃ, પિણ્ડવિષમઃ, વર્ણવિષમઃ, અર્ઘવિષમઃ, માનવિષમઃ, માપનવિષમઃ, ભાજનવિષમઃ - ઇતિ હરણ ઉપાયાઃ

02.8.22 તત્ર ઉપયુક્તનિધાયકનિબન્ધકપ્રતિગ્રાહકદાયકદાપકમન્ત્રિવૈયાવૃત્યકરાન્ એક એકશોઽનુયુઞ્જીત

02.8.23 મિથ્યાવાદે ચ એષાં યુક્તસમો દણ્ડઃ

02.8.24 પ્રચારે ચાવઘોષયેત્ અમુના પ્રકૃતેન ઉપહતાઃ પ્રજ્ઞાપયન્તુ ઇતિ

02.8.25 પ્રજ્ઞાપયતો યથા ઉપઘાતં દાપયેત્

02.8.26 અનેકેષુ ચાભિયોગેષ્વપવ્યયમાનઃ સકૃદ્ એવ પર ઉક્તઃ સર્વં ભજેત

02.8.27 વૈષમ્યે સર્વત્રાનુયોગં દદ્યાત્

02.8.28 મહત્યર્થાપહારે ચાલ્પેનાપિ સિદ્ધઃ સર્વં ભજેત

02.8.29 કૃતપ્રતિઘાતાવસ્થઃ સૂચકો નિષ્પન્નાર્થઃ ષષ્ઠં અંશં લભેત, દ્વાદશં અંશં ભૃતકઃ

02.8.30 પ્રભૂતાભિયોગાદ્ અલ્પનિષ્પત્તૌ નિષ્પન્નસ્યાંશં લભેત

02.8.31 અનિષ્પન્ને શારીરં હૈરણ્યં વા દણ્ડં લભેત, ન ચાનુગ્રાહ્યઃ

02.8.32ab નિષ્પત્તૌ નિક્ષિપેદ્ વાદં આત્માનં વાઽપવાહયેત્ ।

02.8.32chd અભિયુક્ત ઉપજાપાત્ તુ સૂચકો વધં આપ્નુયાત્ (ઇતિ)

Chapt . Inspection of the Rork of officers

02.9.01 અમાત્યસમ્પદા ઉપેતાઃ સર્વાધ્યક્ષાઃ શક્તિતઃ કર્મસુ નિયોજ્યાઃ

02.9.02 કર્મસુ ચ એષાં નિત્યં પરીક્ષાં કારયેત્, ચિત્તાનિત્યત્વાત્ મનુષ્યાનામ્

02.9.03 અશ્વસધર્માણો હિ મનુષ્યા નિયુક્તાઃ કર્મસુ વિકુર્વતે

02.9.04 તસ્માત્ કર્તારં કરણં દેશં કાલં કાર્યં પ્રક્ષેપં ઉદયં ચ એષુ વિદ્યાત્

02.9.05 તે યથાસન્દેશં અસંહતા અવિગૃહીતાઃ કર્માણિ કુર્યુઃ

02.9.06 સંહતા ભક્ષયેયુઃ, વિગૃહીતા વિનાશયેયુઃ

02.9.07 ન ચાનિવેદ્ય ભર્તુઃ કશ્ચિદ્ આરમ્ભં કુર્યુઃ, અન્યત્રાપત્પ્રતીકારેભ્યઃ

02.9.08 પ્રમાદસ્થાનેષુ ચ એષાં અત્યયં સ્થાપયેદ્ દિવસવેતનવ્યયદ્વિગુણમ્

02.9.09 યશ્ચ એષાં યથાઽઽદિષ્ટં અર્થં સવિશેષં વા કરોતિ સ સ્થાનમાનૌ લભેત

02.9.10 અલ્પાયતિશ્ચેત્ મહાવ્યયો ભક્ષયતિ

02.9.11 વિપર્યયે યથાઽઽયતિવ્યયશ્ચ ન ભક્ષયતિ ઇત્યાચાર્યાઃ

02.9.12 અપસર્પેણ એવ ઉપલભ્યેત ઇતિ કૌટિલ્યઃ

02.9.13 યઃ સમુદયં પરિહાપયતિ સ રાજાર્થં ભક્ષયતિ

02.9.14 સ ચેદ્ અજ્ઞાનાદિભિઃ પરિહાપયતિ તદ્ એનં યથાગુણં દાપયેત્

02.9.15 યઃ સમુદયં દ્વિગુણં ઉદ્ભાવયતિ સ જનપદં ભક્ષયતિ

02.9.16 સ ચેદ્ રાજાર્થં ઉપનયત્યલ્પાપરાધે વારયિતવ્યઃ, મહતિ યથાઽપરાધં દણ્ડયિતવ્યઃ

02.9.17 યઃ સમુદયં વ્યયં ઉપનયતિ સ પુરુષકર્માણિ ભક્ષયતિ

02.9.18 સ કર્મદિવસદ્રવ્યમૂલ્યપુરુષવેતનાપહારેષુ યથાઽપરાધં દણ્ડયિતવ્યઃ

02.9.19 તસ્માદ્ અસ્ય યો યસ્મિન્ન્ અધિકરણે શાસનસ્થઃ સ તસ્ય કર્મણો યાથાતથ્યં આયવ્યયૌ ચ વ્યાસસમાસાભ્યાં આચક્ષીત

02.9.20 મૂલહરતાદાત્વિકકદર્યાંશ્ચ પ્રતિષેધયેત્

02.9.21 યઃ પિતૃપૈતામહં અર્થં અન્યાયેન ભક્ષયતિ સ મૂલહરઃ

02.9.22 યો યદ્ યદ્ ઉત્પદ્યતે તત્ તદ્ ભક્ષયતિ સ તાદાત્વિકઃ

02.9.23 યો ભૃત્યાત્મપીડાભ્યાં ઉપચિનોત્યર્થં સ કદર્યઃ

02.9.24 સ પક્ષવાંશ્ચેદ્ અનાદેયઃ, વિપર્યયે પર્યાદાતવ્યઃ

02.9.25 યો મહત્યર્થસમુદયે સ્થિતઃ કદર્યઃ સન્નિધત્તેઽવનિધત્તેઽવસ્રાવયતિ વા - સન્નિધત્તે સ્વવેશ્મનિ, અવનિધત્તે પૌરજાનપદેષુ, અવસ્રાવયતિ પરવિષયે - તસ્ય સત્ત્રી મન્ત્રિમિત્રભૃત્યબન્ધુપક્ષં આગતિં ગતિં ચ દ્રવ્યાણાં ઉપલભેત

02.9.26 યશ્ચાસ્ય પરવિષયે સઞ્ચારં કુર્યાત્ તં અનુપ્રવિશ્ય મન્ત્રં વિદ્યાત્

02.9.27 સુવિદિતે શત્રુશાસનાપદેશેન એનં ઘાતયેત્

02.9.28 તસ્માદ્ અસ્યાધ્યક્ષાઃ સઙ્ખ્યાયકલેખકરૂપદર્શકનીવીગ્રાહક ઉત્તરાધ્યક્ષસખાઃ કર્મણિ કુર્યુઃ

02.9.29 ઉત્તરાધ્યક્ષા હસ્તિઽશ્વરથારોહાઃ

02.9.30 તેષાં અન્તેવાસિનઃ શિલ્પશૌચયુક્તાઃ સઙ્ખ્યાયકાદીનાં અપસર્પાઃ

02.9.31 બહુમુખ્યં અનિત્યં ચાધિકરણં સ્થાપયેત્

02.9.32ab યથા હ્યનાસ્વાદયિતું ન શક્યં  જિહ્વાતલસ્થં મધુ૭ વા વિષં વા ।

02.9.32chd અર્થઃ તથા હ્યર્થચરેણ રાજ્ઞઃ  સ્વલ્પોઽપ્યનાસ્વાદયિતું ન શક્યઃ

02.9.33ab મત્સ્યા યથાઽન્તઃ સલિલે ચરન્તો  જ્ઞાતું ન શક્યાઃ સલિલં પિબન્તઃ ।

02.9.33chd યુક્તાઃ તથા કાર્યવિધૌ નિયુક્તા જ્ઞાતું ન શક્યા ધનં આદદાનાઃ

02.9.34ab અપિ શક્યા ગતિર્જ્ઞાતું પતતાં ખે પતત્રિણામ્ ।

02.9.34chd ન તુ પ્રચ્છન્નભાવાનાં યુક્તાનાં ચરતાં ગતિઃ

02.9.35ab આસ્રાવયેચ્ચ ઉપચિતાન્ વિપર્યસ્યેચ્ચ કર્મસુ ।

02.9.35chd યથા ન ભક્ષયન્ત્યર્થં ભક્ષિતં નિર્વમન્તિ વા

02.9.36ab ન ભક્ષયન્તિ યે ત્વર્થાન્ન્યાયતો વર્ધયન્તિ ચ ।

02.9.36chd નિત્યાધિકારાઃ કાર્યાઃ તે રાજ્ઞઃ પ્રિયહિતે રતાઃ  (ઇતિ)

Chapt .   On edicts

02.10.01 શાસને શાસનં ઇત્યાચક્ષતે

02.10.02 શાસનપ્રધાના હિ રાજાનઃ, તન્મૂલત્વાત્ સન્ધિવિગ્રહયોઃ

02.10.03 તસ્માદ્ અમાત્યસમ્પદા ઉપેતઃ સર્વસમયવિદ્ આશુગ્રન્થશ્ચારુઽક્ષરો લેખનવાચનસમર્થો લેખકઃ સ્યાત્

02.10.04 સોઽવ્યગ્રમના રાજ્ઞઃ સન્દેશં શ્રુત્વા નિશ્ચિતાર્થં લેખં વિદધ્યાત્ દેશાઇશ્વર્યવંશનામધેય ઉપચારં ઈશ્વરસ્ય, દેશનામધેય ઉપચારં અનીશ્વરસ્ય

02.10.05ab જાતિં કુલં સ્થાનવયઃશ્રુતાનિ કર્મ। ઋદ્ધિશીલાન્યથ દેશકાલૌ ।

02.10.05chd યૌનાનુબન્ધં ચ સમીક્ષ્ય કાર્યે લેખં વિદધ્યાત્ પુરુષાનુરૂપમ્

02.10.06 અર્થક્રમઃ સમ્બન્ધઃ પરિપૂર્ણતા માધુર્યં ઔદાર્યં સ્પષ્ટત્વં ઇતિ લેખસમ્પત્

02.10.07 તત્ર યથાવદ્ અનુપૂર્વક્રિયા પ્રધાનસ્યાર્થસ્ય પૂર્વં અભિનિવેશ ઇત્યર્થક્રમઃ

02.10.08 પ્રસ્તુતસ્યાર્થસ્યાનુપરોધાદ્ ઉત્તરસ્ય વિધાનં આસમાપ્તેરિતિ સમ્બન્ધઃ

02.10.09 અર્થપદાક્ષરાણાં અન્યૂનાતિરિક્તતા હેતુ।ઉદાહરણદૃષ્ટાન્તૈરર્થ ઉપવર્ણનાઽશ્રાન્તપદતા ઇતિ પરિપૂર્ણતા

02.10.10 સુખ ઉપનીતચારુઽર્થશબ્દાભિધાનં માધુર્યમ્

02.10.11 અગ્રામ્યશબ્દાભિધાનં ઔદાર્યમ્

02.10.12 પ્રતીતશબ્દપ્રયોગઃ સ્પષ્ટત્વં ઇતિ

02.10.13 અકારાદયો વર્ણાઃ ત્રિષષ્ટિઃ

02.10.14 વર્ણસઙ્ઘાતઃ પદમ્

02.10.15 તચ્ચતુર્વિધં નામાખ્યાત ઉપસર્ગનિપાતાશ્ચ ઇતિ

02.10.16 તત્ર નામ સત્ત્વાભિધાયિ

02.10.17 અવિશિષ્ટલિઙ્ગં આખ્યાતં ક્રિયાવાચિ

02.10.18 ક્રિયાવિશેષકાઃ પ્રાદય ઉપસર્ગાઃ

02.10.19 અવ્યયાશ્ચાદયો નિપાતાઃ

02.10.20 પદસમૂહો વાક્યં અર્થપરિસમાપ્તૌ

02.10.21 એકપદાવરઃ ત્રિપદપરઃ પરપદાર્થાનુપરોધેન વર્ગઃ કાર્યઃ

02.10.22 લેખપરિસંહરણાર્થ ઇતિશબ્દો વાચિકં અસ્ય ઇતિ ચ

02.10.23ab નિન્દા પ્રશંસા પૃચ્છા ચ તથાઽઽખ્યાનં અથાર્થના ।

02.10.23chd પ્રત્યાખ્યાનં ઉપાલમ્ભઃ પ્રતિષેધોઽથ ચોદના

02.10.24ab સાન્ત્વં અભ્યુપપત્તિશ્ચ ભર્ત્સનાનુનયૌ તથા ।

02.10.24chd એતેષ્વર્થાઃ પ્રવર્તન્તે ત્રયોદશસુ લેખજાઃ

02.10.25 તત્રાભિજનશરીરકર્મણાં દોષવચનં નિન્દા

02.10.26 ગુણવચનં એતેષાં એવ પ્રશંસા

02.10.27 કથં એતદ્ ઇતિ પૃચ્છા

02.10.28 એવમ્ ઇત્યાખ્યાનમ્

02.10.29 દેહિ ઇત્યર્થના

02.10.30 ન પ્રયચ્છામિ ઇતિ પ્રત્યાખ્યાનમ્

02.10.31 અનનુરૂપં ભવતઃ ઇત્યુપાલમ્ભઃ

02.10.32 મા કાર્ષીઃ ઇતિ પ્રતિષેધઃ

02.10.33 ઇદં ક્રિયતામ્ ઇતિ ચોદના

02.10.34 યોઽહં સ ભવાન્, યન્ મમ દ્રવ્યં તદ્ ભવતઃ ઇત્યુપગ્રહઃ સાન્ત્વમ્

02.10.35 વ્યસનસાહાય્યં અભ્યુપપત્તિઃ

02.10.36 સદોષં આયતિપ્રદર્શનં અભિભર્ત્સનમ્
02.10.37 અનુનયઃ ત્રિવિધોઽર્થકૃતાવતિક્રમે પુરુષાદિવ્યસને ચ ઇતિ
02.10.38ab પ્રજ્ઞાપનાજ્ઞાપરિદાનલેખાઃ તથા પરીહારનિસૃષ્ટિલેખૌ ।
02.10.38chd પ્રાવૃત્તિકશ્ચ પ્રતિલેખ એવ સર્વત્રગશ્ચ ઇતિ હિ શાસનાનિ
02.10.39ab અનેન વિજ્ઞાપિતં એવં આહ તદ્ દીયતાં ચેદ્ યદિ તત્ત્વં અસ્તિ ।
02.10.39chd રાજ્ઞઃ સમીપે વરકારં આહ પ્રજ્ઞાપના એષા વિવિધા ઉપદિષ્ટા
02.10.40ab ભર્તુરાજ્ઞા ભવેદ્ યત્ર નિગ્રહાનુગ્રહૌ પ્રતિ ।
02.10.40chd વિશેષેણ તુ ભૃત્યેષુ તદ્।આજ્ઞાલેખલક્ષણમ્
02.10.41ab યથાઽર્હગુણસમ્યુક્તા પૂજા યત્ર ઉપલક્ષ્યતે ।
02.10.41chd અપ્યાધૌ પરિદાને વા ભવતઃ તાવુપગ્રહૌ
02.10.42ab જાતેર્વિશેષેષુ પરેષુ ચૈવ ગ્રામેષુ દેશેષુ ચ તેષુ તેષુ ।
02.10.42chd અનુગ્રહો યો નૃપતેર્નિદેશાત્ તજ્જ્ઞઃ પરીહાર ઇતિ વ્યવસ્યેત્
02.10.43ab નિસૃષ્ટિસ્થાઽઽપના કાર્યકરણે વચને તથા ।
02.10.43chd એષ વાચિકલેખઃ સ્યાદ્ ભવેન્નૈસૃષ્ટિકોઽપિ વા
02.10.44ab વિવિધાં દૈવસમ્યુક્તાં તત્ત્વજાં ચૈવ માનુષીમ્ ।
02.10.44chd દ્વિવિધાં તાં વ્યવસ્યન્તિ પ્રવૃત્તિં શાસનં પ્રતિ
02.10.45ab દૃષ્ટ્વા લેખં યથાતત્ત્વં તતઃ પ્રત્યનુભાષ્ય ચ ।
02.10.45chd પ્રતિલેખો ભવેત્ કાર્યો યથા રાજવચઃ તથા
02.10.46ab યત્ર ઈશ્વરાંશ્ચાધિકૃતાંશ્ચ રાજા રક્ષા ઉપકારૌ પથિકાર્થં આહ ।
02.10.46chd સર્વત્રગો નામ ભવેત્ સ માર્ગે દેશે ચ સર્વત્ર ચ વેદિતવ્યઃ
02.10.47 ઉપાયાઃ સામ ઉપપ્રદાનભેદદણ્ડાઃ
02.10.48 તત્ર સામ પઞ્ચવિધં - ગુણસઙ્કીર્તનં, સમ્બન્ધ ઉપાખ્યાનં, પરસ્પર ઉપકારસન્દર્શનં, આયતિપ્રદર્શનં, આત્મ ઉપનિધાનં ઇતિ
02.10.49 તત્રાભિજનશરીરકર્મપ્રકૃતિશ્રુતદ્રવ્યાદીનાં ગુણગ્રહણં પ્રશંસા સ્તુતિર્ગુણસઙ્કીર્તનમ્
02.10.50 જ્ઞાતિયૌનમૌખસ્રૌવકુલહૃદયમિત્રસઙ્કીર્તનં સમ્બન્ધ ઉપાખ્યાનમ્
02.10.51 સ્વપક્ષપરપક્ષયોરન્યોન્ય ઉપકારસઙ્કીર્તનં પરસ્પર ઉપકારસન્દર્શનમ્
02.10.52 અસ્મિન્ન્ એવં કૃત ઇદં આવયોર્ભવતિ ઇત્યાશાજનનં આયતિપ્રદર્શનમ્
02.10.53 યોઽહં સ ભવાન્, યન્ મમ દ્રવ્યં તદ્ ભવતા સ્વકૃત્યેષુ પ્રયોજ્યતામ્ ઇત્યાત્મ ઉપનિધાનમ્ । ઇતિ
02.10.54 ઉપપ્રદાનં અર્થ ઉપકારઃ
02.10.55 શઙ્કાજનનં નિર્ભર્ત્સનં ચ ભેદઃ
02.10.56 વધઃ પરિક્લેશોઽર્થહરણં દણ્ડઃ । ઇતિ
02.10.57 અકાન્તિર્વ્યાઘાતઃ પુનર્।ઉક્તં અપશબ્દઃ સમ્પ્લવ ઇતિ લેખદોષઃ

02.10.58 તત્ર કાલપત્રકં અચારુવિષં અવિરાગાક્ષરત્વં અકાન્તિઃ

02.10.59 પૂર્વેણ પશ્ચિમસ્યાનુપપત્તિર્વ્યાઘાતઃ

02.10.60 ઉક્તસ્યાવિશેષેણ દ્વિતીયં ઉચ્ચારણં પુનર્। ઉક્તમ્

02.10.61 લિઙ્ગવચનકાલકારકાણાં અન્યથાપ્રયોગોઽપશબ્દઃ

02.10.62 અવર્ગે વર્ગકરણં ચાવર્ગક્રિયા ગુણવિપર્યાસઃ સમ્પ્લવઃ । ઇતિ

02.10.63ab સર્વશાસ્ત્રાણ્યનુક્રમ્ય પ્રયોગં ઉપલભ્ય ચ ।

02.10.63chd કૌટિલ્યેન નર ઇન્દ્રાર્થે શાસનસ્ય વિધિઃ કૃતઃ (ઇતિ)

Chapt . Examination of the precious articles to be received into the treasury

02.11.01 કોશાધ્યક્ષઃ કોશપ્રવેશ્યં રત્નં સારં ફલ્ગું કુપ્યં વા તજ્જાતકરણાધિષ્ઠિતઃ પ્રતિગૃહ્ણીયાત્

02.11.02 તામ્રપર્ણિકં પાણ્ડ્યકવાટકં પાશિક્યં કૌલેયં ચૌર્ણેયં માહેન્દ્રં કાર્દમિકં સ્રૌતસીયં હ્રાદીયં હૈમવતં ચ મૌક્તિકમ્

02.11.03 શુક્તિઃ શઙ્ખઃ પ્રકીર્ણકં ચ યોનયઃ

02.11.04 મસૂરકં ત્રિપુટકં કૂર્મકં અર્ધચન્દ્રકં કઞ્ચુકિતં યમકં કર્તકં ખરકં સિક્તકં કામણ્ડલુકં શ્યાવં નીલં દુર્વિદ્ધં ચાપ્રશસ્તમ્

02.11.05 સ્થૂલં વૃત્તં નિસ્તલં ભ્રાજિષ્ણુ શ્વેતં ગુરુ સ્નિગ્ધં દેશવિદ્ધં ચ પ્રશસ્તમ્

02.11.06 શીર્ષકં ઉપશીર્ષકં પ્રકાણ્ડકં અવઘાટકં તરલપ્રતિબદ્ધં ચ ઇતિ યષ્ટિપ્રભેદાઃ

02.11.07 યષ્ટીનાં અષ્ટસહસ્રં ઇન્દ્રચ્છન્દઃ

02.11.08 તતોઽર્ધં વિજયચ્છન્દઃ

02.11.09 ચતુષ્ષષ્ટિરર્ધહારઃ

02.11.10 ચતુષ્પઞ્ચાશદ્ રશ્મિકલાપઃ

02.11.11 દ્વાત્રિંશદ્ ગુચ્છઃ

02.11.12 સપ્તવિંશતિર્નક્ષત્રમાલા

02.11.13 ચતુર્વિંશતિરર્ધગુચ્છઃ

02.11.14 વિંશતિર્માણવકઃ

02.11.15 તતોઽર્ધં અર્ધમાણવકઃ

02.11.16 એત એવ મણિમધ્યાઃ તન્માણવકા ભવન્તિ

02.11.17 એકશીર્ષકઃ શુદ્ધો હારઃ

02.11.18 તદ્વચ્છેષાઃ

02.11.19 મણિમધ્યોઽર્ધમાણવકઃ

02.11.20 ત્રિફલકઃ ફલકહારઃ, પઞ્ચફલકો વા

02.11.21 સૂત્રં એકાવલી શુદ્ધા

02.11.22 સા એવ મણિમધ્યા યષ્ટિઃ

02.11.23 હેમમણિચિત્રા રત્નાવલી

02.11.24 હેમમણિમુક્તાઽન્તરોઽપવર્તકઃ

02.11.25 સુવર્ણસૂત્રાન્તરં સોપાનકમ્

02.11.26 મણિમધ્યં વા મણિસોપાનકમ્

02.11.27 તેન શિરોહસ્તપાદકટીકલાપજાલકવિકલ્પા વ્યાખ્યાતાઃ

02.11.28 મણિઃ કૌટોમાલેયકઃ પારસમુદ્રકશ્ચ

02.11.29 સૌગન્ધિકઃ પદ્મરાગોઽનવદ્યરાગઃ પારિજાતપુષ્પકો બાલસૂર્યકઃ

02.11.30 વૈડૂર્ય ઉત્પલવર્ણઃ શિરીષપુષ્પક ઉદકવર્ણો વંશરાગઃ શુકપત્રવર્ણઃ પુષ્યરાગો ગોમૂત્રકો ગોમેદકઃ

02.11.31 ઇન્દ્રનીલો નીલાવલીયઃ કલાયપુષ્પકો મહાનીલો જમ્બ્વ્।આભો જીમૂતપ્રભો નન્દકઃ સ્રવન્મધ્યઃ

02.11.32 શુદ્ધસ્ફટિકો મૂલાટવર્ણઃ શીતવૃષ્ટિઃ સૂર્યકાન્તશ્ચ । ઇતિ મણયઃ

02.11.33 ષડ્ડશ્રશ્ચતુર્ડશ્રો વૃત્તો વા તીવ્રરાગઃ સંસ્થાનવાન્ અછઃ સ્નિગ્ધો ગુરુરર્ચિષ્માન્ અન્તર્ગતપ્રભઃ પ્રભાઽનુલેપી ચ ઇતિ મણિગુણાઃ

02.11.34 મન્દરાગપ્રભઃ સ-શર્કરઃ પુષ્પચ્છિદ્રઃ ખણ્ડો દુર્વિદ્ધો લેખાકીર્ણ ઇતિ દોષાઃ

02.11.35 વિમલકઃ સસ્યકોઽઞ્જનમૂલકઃ પિત્તકઃ સુલભકો લોહિતાક્ષો મૃગાશ્મકો જ્યોતીરસકો માલેયકોઽહિચ્છત્રકઃ કૂર્પઃ પ્રતિકૂર્પઃ સુગન્ધિકૂર્પઃ ક્ષીરવકઃ શ્શુક્તિચૂર્ણકઃ શિલાપ્રવાલકઃ પુલકઃ શુક્લપુલક ઇત્યન્તરજાતયઃ

02.11.36 શેષાઃ કાચમણયઃ

02.11.37 સભારાષ્ટ્રકં તજ્જમારાષ્ટ્રકં કાસ્તીરરાષ્ટ્રકં શ્રીકટનકં મણિમન્તકં ઇન્દ્રવાનકં ચ વજ્રમ્

02.11.38 ખનિઃ સ્રોતઃ પ્રકીર્ણકં ચ યોનયઃ

02.11.39 માર્જારાક્ષકં શિરીષપુષ્પકં ગોમૂત્રકં ગોમેદકં શુદ્ધસ્ફટિકં મૂલાટીવર્ણં મણિવર્ણાનાં અન્યતમવર્ણં ઇતિ વજ્રવર્ણાઃ

02.11.40 સ્થૂલં ગુરુ પ્રહારસહં સમકોટિકં ભાજનલેખિ તર્કુભ્રામિ ભ્રાજિષ્ણુ ચ પ્રશસ્તમ્

02.11.41 નષ્ટકોણં નિરાશ્રિ પાર્શ્વાપવૃત્તં ચાપ્રશસ્તમ્

02.11.42 પ્રવાલકં આલકન્દકં વૈવર્ણિકં ચ, રક્તં પદ્મરાગં ચ કરટગર્ભિણિકાવર્જં ઇતિ

02.11.43 ચન્દનં સાતનં રક્તં ભૂમિગન્ધિ

02.11.44 ગોશીર્ષકં કાલતામ્રં મત્સ્યગન્ધિ

02.11.45 હરિચન્દનં શુકપત્રવર્ણં આમ્રગન્ધિ, તાર્ણસં ચ

02.11.46 ગ્રામેરુકં રક્તં રક્તકાલં વા બસ્તમૂત્રગન્ધિ

02.11.47 દૈવસભેયં રક્તં પદ્મગન્ધિ, જાપકં ચ

02.11.48 જોઙ્ગકં રક્તં રક્તકાલં વા સ્નિગ્ધં, તૌરૂપં ચ

02.11.49 માલેયકં પાણ્ડુરક્તમ્

02.11.50 કુચન્દનં રૂક્ષં અગુરુકાલં રક્તં રક્તકાલં વા

02.11.51 કાલપર્વતકં રક્તકાલં અનવદ્યવર્ણં વા

02.11.52 કોશાગારપર્વતકં કાલં કાલચિત્રં વા

02.11.53 શીત ઉદકીયં પદ્માભં કાલસ્નિગ્ધં વા

02.11.54 નાગપર્વતકં રૂક્ષં શૈવલવર્ણં વા

02.11.55 શાકલં કપિલમ્ । ઇતિ

02.11.56 લઘુ સ્નિગ્ધં અશ્યાનં સર્પિઃસ્નેહલેપિ ગન્ધસુખં ત્વગ્ડનુસાર્યનુલ્બણં અવિરાગ્યુષ્ણસહં દાહગ્રાહિ સુખસ્પર્શનં ઇતિ ચન્દનગુણાઃ

02.11.57 અગુરુ જોઙ્ગકં કાલં કાલચિત્રં મણ્ડલચિત્રં વા

02.11.58 શ્યામં દોઙ્ગકમ્

02.11.59 પારસમુદ્રકં ચિત્રરૂપં ઉશીરગન્ધિ નવમાલિકાગન્ધિ વા । ઇતિ

02.11.60 ગુરુ સ્નિગ્ધં પેશલગન્ધિ નિર્હાર્યગ્નિસહં અસમ્પ્લુતધૂમં વિમર્દસહં ઇત્યગુરુગુણાઃ

02.11.61 તૈલપર્ણિકં અશોકગ્રામિકં માંસવર્ણં પદ્મગન્ધિ

02.11.62 જોઙ્ગકં રક્તપીતકં ઉત્પલગન્ધિ ગોમૂત્રગન્ધિ વા

02.11.63 ગ્રામેરુકં સ્નિગ્ધં ગોમૂત્રગન્ધિ

02.11.64 સૌવર્ણકુડ્યકં રક્તપીતં માતુલુઙ્ગગન્ધિ

02.11.65 પૂર્ણકદ્વીપકં પદ્મગન્ધિ નવનીતગન્ધિ વા

02.11.66 ભદ્રશ્રિયં પારલૌહિત્યકં જાતીવર્ણમ્

02.11.67 આન્તરવત્યં ઉશીરવર્ણમ્

02.11.68 ઉભયં કુષ્ઠગન્ધિ ચ । ઇતિ

02.11.69 કાલેયકઃ સ્વર્ણભૂમિજઃ સ્નિગ્ધપીતકઃ

02.11.70 ઔત્તરપર્વતકો રક્તપીતકઃ ઇતિ સારાઃ ।

02.11.71 પિણ્ડક્વાથધૂમસહં અવિરાગિ યોગાનુવિધાયિ ચ

02.11.72 ચન્દનાગુરુવચ્ચ તેષાં ગુણાઃ

02.11.73 કાન્તનાવકં પ્રૈયકં ચ ઉત્તરપર્વતકં ચર્મ

02.11.74 કાન્તનાવકં મયૂરગ્રીવાભમ્

02.11.75 પ્રૈયકં નીલપીતશ્વેતલેખાબિન્દુચિત્રમ્

02.11.76 તદ્।ઉભયં અષ્ટાઙ્ગુલાયામમ્

02.11.77 બિસી મહાબિસી ચ દ્વાદશગ્રામીયે

02.11.78 અવ્યક્તરૂપા દુહિલિતિકા ચિત્રા વા બિસી

02.11.79 પરુષા શ્વેતપ્રાયા મહાબિસી

02.11.80 દ્વાદશાઙ્ગુલાયામં ઉભયમ્

02.11.81 શ્યામિકા કાલિકા કદલી ચન્દ્ર ઉત્તરા શાકુલા ચારોહજાઃ

02.11.82 કપિલા બિન્દુચિત્રા વા શ્યામિકા

02.11.83 કાલિકા કપિલા કપોતવર્ણા વા

02.11.84 તદ્ ઉભયં અષ્ટાઙ્ગુલાયામમ્

02.11.85 પરુષા કદલી હસ્તાયતા

02.11.86 સા એવ ચન્દ્રચિત્રા ચન્દ્ર ઉત્તરા

02.11.87 કદલીત્રિભાગા શાકુલા કોઠમણ્ડલચિત્રા કૃતકર્ણિકાડજિનચિત્રા વા । ઇતિ

02.11.88 સામૂરં ચીનસી સામૂલી ચ બાહ્લવેયાઃ

02.11.89 ષટ્ત્રિંશદ્ડઙ્ગુલં અઞ્જનવર્ણં સામૂરમ્

02.11.90 ચીનસી રક્તકાલી પાણ્ડુકાલી વા

02.11.91 સામૂલી ગોધૂમવર્ણા । ઇતિ

02.11.92 સાન્તિના નલતૂલા વૃત્તપૃચ્છા ચૌદ્રાઃ

02.11.93 સાતિના કૃષ્ણા

02.11.94 નલતૂલા નલતૂલવર્ણા

02.11.95 કપિલા વૃત્તપુચ્છા ચ ઇતિ ચર્મજાતયઃ ।

02.11.96 ચર્મણાં મૃદુ સ્નિગ્ધં બહુલરોમ ચ શ્રેષ્ઠમ્

02.11.97 શુદ્ધં શુદ્ધરક્તં પક્ષરક્તં ચાવિકં, ખચિતં વાનચિત્રં ખણ્ડસઙ્ઘાત્યં તન્તુવિચ્છિન્નં ચ

02.11.98 કમ્બલઃ કૌચપકઃ કુલમિતિકા સૌમિતિકા તુરગાસ્તરણં વર્ણકં તલિચ્છકં વારવાણઃ પરિસ્તોમઃ સમન્તભદ્રકં ચાવિકમ્

02.11.99 પિચ્છિલં આર્દ્રં ઇવ ચ સૂક્ષ્મં મૃદુ ચ શ્રેષ્ઠમ્

02.11.100 અષ્ટપ્રોતિસઙ્ઘાત્યા કૃષ્ણા ભિઙ્ગિસી વર્ષવારણં અપસારક ઇતિ નૈપાલકમ્

02.11.101 સમ્પુટિકા ચતુર્ડશ્રિકા લમ્બરા કટવાનકં પ્રાવરકઃ સત્તલિકા ઇતિ મૃગરોમ

02.11.102 વાઙ્ગકં શ્વેતં સ્નિગ્ધં દુકૂલમ્

02.11.103 પૌણ્ડ્રકં શ્યામં મણિસ્નિગ્ધમ્

02.11.104 સૌવર્ણકુડ્યકં સૂર્યવર્ણં મણિસ્નિગ્ધ ઉદકવાનં ચતુર્ડશ્રવાનં વ્યામિશ્રવાનં ચ

02.11.105 એતેષાં એકાંશુકં અધ્યર્ધદ્વિત્રિચતુર્ડંશુકં ઇતિ

02.11.106 તેન કાશિકં પૌણ્ડ્રકં ચ ક્ષૌમં વ્યાખ્યાતમ્

02.11.107 માગધિકા પૌણ્ડ્રિકા સૌવર્ણકુડ્યકા ચ પત્ત્ર ઊર્ણા

02.11.108 નાગવૃક્ષો લિકુચો બકુલો વટશ્ચ યોનયઃ

02.11.109 પીતિકા નાગવૃક્ષિકા

02.11.110 ગોધૂમવર્ણા લૈકુચી

02.11.111 શ્વેતા બાકુલી

02.11.112 શેષા નવનીતવર્ણા

02.11.113 તાસાં સૌવર્ણકુડ્યકા શ્રેષ્ઠા

02.11.114 તયા કૌશેયં ચીનપટ્ટાશ્ચ ચીનભૂમિજા વ્યાખ્યાતાઃ

02.11.115 માધુરં આપરાન્તકં કાલિઙ્ગં કાશિકં વાઙ્ગકં વાત્સકં માહિષકં ચ કાર્પાસિકં શ્રેષ્ઠમ્ । ઇતિ

02.11.116 અતઃ પરેષાં રત્નાનાં પ્રમાણં મૂલ્યલક્ષણમ્ ।

02.11.117 જાતિં રૂપં ચ જાનીયાન્નિધાનં નવકર્મ ચ

02.11.118 પુરાણપ્રતિસંસ્કારં કર્મ ગુહ્યં ઉપસ્કરાન્ ।

02.11.119 દેશકાલપરીભોગં હિંસ્રાણાં ચ પ્રતિક્રિયામ્ (ઇતિ)

Chapt . Starting ore mines and factories

02.12.01 આકરાધ્યક્ષઃ શુલ્બધાતુશાસ્ત્રરસપાકમણિરાગજ્ઞઃ તજ્જ્ઞસખો વા તજ્જાતકર્મકર ઉપકરણસમ્પન્નઃ કિટ્ટમૂષાઙ્ગારભસ્મલિઙ્ગં વાડડકરં ભૂતપૂર્વં અભુતપૂર્વં વા ભૂમિપ્રસ્તરરસધાતું અત્યર્થવર્ણગૌરવં ઉગ્રગન્ધરસં પરીક્ષેત

02.12.02 પર્વતાનાં અભિજ્ઞાત ઉદ્દેશાનાં બિલગુહ ઉપત્યકાલયનગૂઢખાતેષ્વન્તઃ પ્રસ્યન્દિનો જમ્બૂચૂતતાલફલપક્વહરિદ્રાભેદ સવર્ણ ઉદકોષધિપર્યન્તાશ્ચિક્કણા વિશદા ભારિકાશ્ચ રસાઃ કાઞ્ચનિકાઃ

02.12.03 અપ્સુ નિષ્ઠ્યૂતાઃ તૈલવદ્વિસર્પિણઃ ષઙ્મલગ્રાહિણશ્ચ તામ્રરૂપ્યયોઃ શતાદ્ ઉપરિ વેદ્ધારઃ

02.12.04 તત્પ્રતિરૂપકં ઉગ્રગન્ધરસં શિલાજતુ વિદ્યાત્

02.12.05 પીતકાસ્તામ્રકાઃ તામ્રપીતકા વા ભૂમિપ્રસ્તરધાતવો ભિન્ના નીલરાજીવન્તો મુદ્ગમાષકૃસરવર્ણા વા દધિબિન્દુપિણ્ડચિત્રા હરિદ્રાહરીતકીપદ્મપત્રશૈવલયકૃત્પ્લીહાનવદ્યવર્ણા ભિન્નાશ્ચુઞ્ચુવાલુકાલેખાબિન્દુસ્વસ્તિકવન્તઃ સુગુલિકા અર્ચિષ્મન્તઃ તાપ્યમાના ન ભિદ્યન્તે બહુફેનધૂમાશ્ચ સુવર્ણધાતવઃ પ્રતીવાપાર્થાઃ તામ્રરૂપ્યવેધનાઃ

02.12.06 શઙ્ખકર્પૂરસ્ફટિકનવનીતકપોતપારાવતવિમલકમયૂરગ્રીવાવર્ણાઃ સસ્યકગોમેદકગુડમત્સ્યણ્ડિકાવર્ણાઃ કોવિદારપદ્મપાટલીકલાયક્ષૌમાતસીપુષ્પવર્ણાઃ સ-સીસાઃ સાઞ્જના વિસ્રા ભિન્નાઃ શ્વેતાભાઃ કૃષ્ણાઃ કૃષ્ણાભાઃ શ્વેતાઃ સર્વે વા લેખાબિન્દુચિત્રા મૃદવો ધ્માયમાના ન સ્ફુટન્તિ બહુફેનધૂમાશ્ચ રૂપ્યધાતવઃ

02.12.07 સર્વધાતૂનાં ગૌરવવૃદ્ધૌ સત્ત્વવૃદ્ધિઃ

02.12.08 તેષાં અશુદ્ધા મૂઢગર્ભા વા તીક્ષ્ણમૂત્રક્ષરભાવિતા રાજવૃક્ષવટપીલુગોપિત્તરોચનામહિષખરકરભમૂત્રલેણ્ડપિણ્ડબદ્ધા તત્પ્રતીવાપાઃ તદ્ડવલેપા વા વિશુદ્ધાઃ સ્રવન્તિ

02.12.09 યવમાષતિલપલાશપીલુક્ષારૈર્ગોક્ષીરાજક્ષીરૈર્વા કદલીવજ્રકન્દપ્રતીવપો માર્દવકરઃ

02.12.10ab મધુમધુકં અજાપયઃ સ-તૈલં ઘૃતગુડકિણ્વયુતં સ-કન્દલીકમ્ ।

02.12.10chd યદ્ અપિ શતસહસ્રધા વિભિન્નં ભવતિ મૃદુ ત્રિભિરેવ તન્નિષેકૈઃ

02.12.11 ગોદન્તશ◌ૃઙ્ગપ્રતીવાપો મૃદુસ્તમ્ભનઃ

02.12.12 ભારિકઃ સ્નિગ્ધો મૃદુશ્ચ પ્રસ્તરધાતુર્ભૂમિભાગો વા પિઙ્ગલો હરિતઃ પાટલો લોહિતો વા તામ્રધાતુઃ

02.12.13 કાકમોચકઃ કપોતરોચનાવર્ણઃ શ્વેતરાજિનદ્ધો વા વિસ્રઃ સીસધાતુઃ

02.12.14 ઊષરકર્બુરઃ પક્વલોષ્ઠવર્ણો વા ત્રપુધાતુઃ

02.12.15 ખરુમ્બઃ પાણ્ડુરોહિતઃ સિન્દુવારપુષ્પવર્ણો વા તીક્ષ્ણધાતુઃ

02.12.16 કાકાણ્ડભુજપત્રવર્ણો વા વૈકૃન્તકધાતુઃ

02.12.17 અચ્છઃ સ્નિગ્ધઃ સ-પ્રભો ઘોષવાન્ શીતઃ તીવ્રઃ તનુરાગશ્ચ મણિધાતુઃ

02.12.18 ધાતુસમુત્થં તજ્જાતકર્માન્તેષુ પ્રયોજયેત્

02.12.19 કૃતભાણ્ડવ્યવહારં એકમુખં, અત્યયં ચાન્યત્ર કર્તૃક્રેતૃવિક્રેતૃણાં સ્થાપયેત્

02.12.20 આકરિકં અપહરન્તં અષ્ટગુણં દાપયેદ્ અન્યત્ર રત્નેભ્યઃ

02.12.21 સ્તેનં અનિસૃષ્ટ ઉપજીવિનં ચ બદ્ધં કર્મ કારયેત્, દણ્ડ ઉપકારિણં ચ

02.12.22 વ્યયક્રિયાભારિકં આકરં ભાગેન પ્રક્રયેણ વા દદ્યાત્, લાઘવિકં આત્મના કારયેત્

02.12.23 લોહાધ્યક્ષઃ તામ્રસીસત્રપુવૈકૃન્તકારકૂટવૃત્તકંસતાલલોહકર્માન્તાન્ કારયેત્, લોહભાણ્ડવ્યવહારં ચ

02.12.24 લક્ષણાધ્યક્ષશ્ચતુર્ભાગતામ્રં રૂપ્યરૂપં તીક્ષ્ણત્રપુસીસાઞ્જનાનાં અન્યતમમાષબીજયુક્તં કારયેત્ - પણં અર્ધપણં પાદં, અષ્ટભાગં ઇતિ, પાદાજીવં તામ્રરૂપં - માષકં અર્ધમાષકં કાકણીં અર્ધકાકણીં ઇતિ

02.12.25 રૂપદર્શકઃ પણયાત્રાં વ્યાવહારિકીં કોશપ્રવેશ્યાં ચ સ્થાપયેત્

02.12.26 રૂપિકં અષ્ટકં શતં, પઞ્ચકં શતં વ્યાજીં, પારીક્ષિકં અષ્ટભાગિકં, શતં, પઞ્ચવિંશતિપણં અત્યયં ચ અન્યત્રકર્તૃક્રેતૃવિક્રેતૃપરીક્ષિતૃભ્યઃ

02.12.27 ખન્યધ્યક્ષઃ શઙ્ખવજ્રમણિમુક્તાપ્રવાલક્ષારકર્માન્તાન્ કારયેત્, પણનવ્યવહારં ચ

02.12.28 લવણાધ્યક્ષઃ પાકમુક્તં લવણભાગં પ્રક્રયં ચ યથાકાલં સઙ્ગૃહ્ણીયાદ્, વિક્રયાચ્ચ મૂલ્યં રૂપં વ્યાજીં ચ

02.12.29 આગન્તુલવણં ષડ્ભાગં દદ્યાત્

02.12.30 દત્તભાગવિભાગસ્ય વિક્રયઃ, પઞ્ચકં શતં વ્યાજીં રૂપં રૂપિકં ચ

02.12.31 ક્રેતા શુલ્કં રાજપણ્યચ્છેદાનુરૂપં ચ વૈધરણં દદ્યાત્, અન્યત્ર ક્રેતા ષટ્છતં અત્યયં ચ

02.12.32 વિલવણં ઉત્તમં દણ્ડં દદ્યાદ્, અનિષૃષ્ટ ઉપજીવી ચાન્યત્ર વાનપ્રસ્થેભ્યઃ

02.12.33 શ્રોત્રિયાઃ તપસ્વિનો વિષ્ટયશ્ચ ભક્તલવણં હરેયુઃ

02.12.34 અતોઽન્યો લવણક્ષારવર્ગઃ શુલ્કં દદ્યાત્

02.12.35ab એવં મૂલ્યં ચ ભાગં ચ વ્યાજીં પરિઘં અત્યયમ્ ।

02.12.35chd શુલ્કં વૈધરણં દણ્ડં રૂપં રૂપિકં એવ ચ

02.12.36ab ખનિભ્યો દ્વાદશવિધં ધાતું પણ્યં ચ સંહરેત્ ।

02.12.36chd એવં સર્વેષુ પણ્યેષુ સ્થાપયેન્ મુખસઙ્ગ્રહમ્

02.12.37ab આકરપ્રભઃ કોશઃ કોશાદ્ દણ્ડઃ પ્રજાયતે ।

02.12.37chd પૃથિવી કોશદણ્ડાભ્યાં પ્રાપ્યતે કોશભૂષણા (ઇતિ)

Chapt . Superintendent of gold in the RorkShop

02.13.01 સુવર્ણાધ્યક્ષઃ સુવર્ણરજતકર્માન્તાનાં અસમ્બન્ધાવેશનચતુઃશાલાં એકદ્વારાં અક્ષશાલાં કારયેત્

02.13.02 વિશિખામધ્યે સૌવર્ણિકં શિલ્પવન્તં અભિજાતં પ્રાત્યયિકં ચ સ્થાપયેત્

02.13.03 જામ્બૂનદં શાતકુમ્ભં હાટકં વૈણવં શ‌ૃઙ્ગશુક્તિજં જાતરૂપં રસવિદ્ધં આકર ઉદ્ગતં ચ સુવર્ણમ્

02.13.04 કિઞ્જલ્કવર્ણં મૃદુ સ્નિગ્ધં અનાદિ ભ્રાજિષ્ણુ ચ શ્રેષ્ઠં, રક્તપીતકં મધ્યમં, રક્તં અવરમ્

02.13.05 શ્રેષ્ઠાનાં પાણ્ડુ શ્વેતં ચાપ્રાપ્તકમ્

02.13.06 તદ્ યેનાપ્રાપ્તકં તચ્ચતુર્ગુણેન સીસેન શોધયેત્

02.13.07 સીસાન્વયેન ભિદ્યમાનં શુષ્કપટલૈર્ધ્માપયેત્

02.13.08 રૂક્ષત્વાદ્ ભિદ્યમાનં તૈલગોમયે નિષેચયેત્

02.13.09 આકર ઉદ્ગતં સીસાન્વયેન ભિદ્યમાનં પાકપત્ત્રાણિ કૃત્વા ગણ્ડિકાસુ કુટ્ટયેત્, કદલીવજ્રકન્દકલ્કે વા નિષેચયેત્

02.13.10 તુત્થ ઉદ્ગતં ગૌડિકં કામ્બુકં ચાક્રવાલિકં ચ રૂપ્યમ્

02.13.11 શ્વેતં સ્નિગ્ધં મૃદુ ચ શ્રેષ્ઠમ્

02.13.12 વિપર્યયે સ્ફોટનં ચ દુષ્ટમ્

02.13.13 તત્સીસચતુર્ભાગેન શોધયેત્

02.13.14 ઉદ્ગતચૂલિકં અચ્છં ભ્રાજિષ્ણુ દધિવર્ણં ચ શુદ્ધમ્

02.13.15 શુદ્ધસ્ય એકો હારિદ્રસ્ય સુવર્ણો વર્ણકઃ

02.13.16 તતઃ શુલ્બકાકણ્ય્। ઉત્તરાપસારિતા આચતુઃસીમાન્તાદ્ ઇતિ ષોડશ વર્ણકાઃ

02.13.17 સુવર્ણં પૂર્વં નિકષ્ય પશ્ચાદ્ વર્ણિકાં નિકષયેત્

02.13.18 સમરાગલેખં અનિમ્ન ઉન્નતે દેશે નિકષિતં, પરિમૃદિતં પરિલીઢં નખાન્તરાદ્ વા ગૈરિકેણાવચૂર્ણિતં ઉપધિં વિદ્યાત્

02.13.19 જાતિહિઙ્ગુલુકેન પુષ્પકાસીસેન વા ગોમૂત્રભાવિતેન દિગ્ધેનાગ્રહસ્તેન સંસ્પૃષ્ટં સુવર્ણં શ્વેતીભવતિ

02.13.20 સ-કેસરઃ સ્નિગ્ધો મૃદુર્ભાજિષ્ણુશ્ચ નિકષરાગઃ શ્રેષ્ઠઃ

02.13.21 કાલિઙ્ગકઃ તાપીપાષાણો વા મુદ્ગવર્ણો નિકષઃ શ્રેષ્ઠઃ

02.13.22 સમરાગી વિક્રયક્રયહિતઃ

02.13.23 હસ્તિચ્છવિકઃ સહરિતઃ પ્રતિરાગી વિક્રયહિતઃ

02.13.24 સ્થિરઃ પરુષો વિષમવર્ણશ્ચાપ્રતિરાગી ક્રયહિતઃ

02.13.25 છેદશ્ચિક્કણઃ સમવર્ણઃ શ્લક્ષ્ણો મૃદુર્ભાજિષ્ણુશ્ચ શ્રેષ્ઠઃ

02.13.26 તાપો બહિર્ઽન્તશ્ચ સમઃ કિઞ્જલ્કવર્ણઃ કુરણ્ડકપુષ્પવર્ણો વા શ્રેષ્ઠઃ

02.13.27 શ્યાવો નીલશ્ચાપ્રાપ્તકઃ

02.13.28 તુલાપ્રતિમાનં પૌતવાધ્યક્ષે વક્ષ્યામઃ

02.13.29 તેન ઉપદેશેન રૂપ્યસુવર્ણં દદ્યાદ્ આદદીત ચ

02.13.30 અક્ષશાલાં અનાયુક્તો ન ઉપગચ્છેત્

02.13.31 અભિગચ્છન્ન્ ઉચ્છેદ્યઃ

02.13.32 આયુક્તો વા સરૂપ્યસુવર્ણઃ તેન એવ જીયેત

02.13.33 વિચિતવસ્ત્રહસ્તગુહ્યાઃ કાઞ્ચનપૃષતત્વષ્ટતપનીયકારવો ધ્માયકચરકપાંસુધાવકાઃ પ્રવિશેયુર્નિષ્કસેયુશ્ચ

02.13.34 સર્વં ચ એષાં ઉપકરણં અનિષ્ઠિતાશ્ચ પ્રયોગાઃ તત્ર એવાવતિષ્ઠેરન્

02.13.35 ગૃહીતં સુવર્ણં ધૃતં ચ પ્રયોગં કરણમધ્યે દદ્યાત્

02.13.36 સાયં પ્રાતશ્ચ લક્ષિતં કર્તૃકારયિતૃમુદ્રાભ્યાં નિદધ્યાત્

02.13.37 ક્ષેપણો ગુણઃ ક્ષુદ્રકં ઇતિ કર્માણિ

02.13.38 ક્ષેપણઃ કાચાર્પણાદીનિ

02.13.39 ગુણઃ સૂત્રવાનાદીનિ

02.13.40 ઘનં સુષિરં પૃષતાદિયુક્તં ક્ષુદ્રકં ઇતિ

02.13.41 અર્પયેત્ કાચકર્મણઃ પઞ્ચભાગં કાઞ્ચનં દશભાગં કટુમાનમ્

02.13.42 તામ્રપાદયુક્તં રૂપ્યં રૂપ્યપાદયુક્તં વા સુવર્ણં સંસ્કૃતકં, તસ્માદ્ રક્ષેત્

02.13.43 પૃષતકાચકર્મણઃ ત્રયો હિ ભાગાઃ પરિભાણ્ડં દ્વૌ વાસ્તુકં, ચત્વારો વા વાસ્તુકં ત્રયઃ પરિભાણ્ડમ્

02.13.44 ત્વષ્ટૃકર્મણઃ શુલ્બભાણ્ડં સમસુવર્ણેન સમ્યૂહયેત્

02.13.45 રૂપ્યભાણ્ડં ઘનં સુષિરં વા સુવર્ણાર્ધેનાવલેપયેત્

02.13.46 ચતુર્ભાગસુવર્ણં વા વાલુકાહિઙ્ગુલુકસ્ય રસેન ચૂર્ણેન વા વાસયેત્ ।

02.13.47 તપનીયં જ્યેષ્ઠં સુવર્ણં સુરાગં સમસીસાતિક્રાન્તં પાકપત્ત્રપક્વં સૈન્ધવિકયા ઉજ્જ્વાલિતં નીલપીતશ્વેતહરિતશુકપત્ત્રવર્ણાનાં પ્રકૃતિર્ભવતિ

02.13.48 તીક્ષ્ણં ચાસ્ય મયૂરગ્રીવાભં શ્વેતભઙ્ગં ચિમિચિમાયિતં પીતચૂર્ણિતં કાકણિકઃ સુવર્ણરાગઃ

02.13.49 તારં ઉપશુદ્ધં વા - અસ્થિતુત્થે ચતુઃ સમસીસે ચતુઃ શુષ્કતુત્થે ચતુઃ કપાલે ત્રિર્ગોમયે દ્વિરેવં સપ્તદશતુત્થાતિક્રાન્તં સૈન્ધવિકયા ઉજ્જ્વાલિતમ્

02.13.50 એતસ્માત્ કાકણ્ય્। ઉત્તરમાદ્ વિમાષાદ્ ઇતિ સુવર્ણે દેયં, પશ્ચાદ્ રાગયોગઃ, શ્વેતતારં ભવતિ ।

02.13.51 ત્રયોઽંશાઃ તપનીયસ્ય દ્વાત્રિંશદ્ભાગશ્વેતતારં ઊર્ચ્છિતાઃ તત્ શ્વેતલોહિતકં ભવતિ

02.13.52 તામ્રં પીતકં કરોતિ

02.13.53 તપનીયં ઉજ્જ્વાલ્ય રાગત્રિભાગં દદ્યાત્, પીતરાગં ભવતિ

02.13.54 શ્વેતતારભાગૌ દ્વાવેકઃ તપનીયસ્ય મુદ્ગવર્ણં કરોતિ

02.13.55 કાલાયસસ્યાર્ધભાગાભ્યક્તં કૃષ્ણં ભવતિ

02.13.56 પ્રતિલેપિના રસેન દ્વિગુણાભ્યક્તં તપનીયં શુકપત્ત્રવર્ણં ભવતિ

02.13.57 તસ્યારમ્ભે રાગવિશેષેષુ પ્રતિવર્ણિકાં ગૃહ્ણીયાત્

02.13.58 તીક્ષ્ણતામ્રસંસ્કારં ચ બુધ્યેત

02.13.59 તસ્માદ્ વજ્રમણિમુક્તાપ્રવાલરૂપાણાં અપનેયિમાનં ચ રૂપ્યસુવર્ણભાણ્ડબન્ધપ્રમાણાનિ ચ

02.13.60ab સમરાગં સમદ્વન્દ્વં અસક્તપૃષતં સ્થિરમ્ ।

02.13.60chd સુપ્રમૃષ્ટં અસમ્પીતં વિભક્તં ધારણે સુખમ્

02.13.61ab અભિનીતં પ્રભાયુક્તં સંસ્થાનં અધુરં સમમ્ ।

02.13.61chd મનોનેત્રાભિરામં ચ તપનીયગુણાઃ સ્મૃતાઃ (ઇતિ)

Chapt . Activity of the goldsmitH in the market-highRay

02.14.01 સૌવર્ણિકઃ પૌરજાનપદાનાં રૂપ્યસુવર્ણં આવેશનિભિઃ કારયેત્

02.14.02 નિર્દિષ્ટકાલકાર્યં ચ કર્મ કુર્યુઃ, અનિર્દિષ્ટકાલં કાર્યાપદેશમ્

02.14.03 કાર્યસ્યાન્યથાકરણે વેતનનાશઃ, તદ્દ્વિગુણશ્ચ દણ્ડઃ

02.14.04 કાલાતિપાતને પાદહીનં વેતનં તદ્દ્વિગુણશ્ચ દણ્ડઃ

02.14.05 યથાવર્ણપ્રમાણં નિક્ષેપં ગૃહ્ણીયુઃ તથાવિધં એવાર્પયેયુઃ

02.14.06 કાલાન્તરાદ્ અપિ ચ તથાવિધં એવ પ્રતિગૃહ્ણીયુઃ, અન્યત્ર ક્ષીણપરિશીર્ણાભ્યામ્

02.14.07 આવેશનિભિઃ સુવર્ણપુદ્ગલલક્ષણપ્રયોગેષુ તત્તજ્ જાનીયાત્

02.14.08 તપ્તકલધૌતકયોઃ કાકણિકઃ સુવર્ણે ક્ષયો દેયઃ

02.14.09 તીક્ષ્ણકાકણી - રૂપ્યદ્વિગુણઃ - રાગપ્રક્ષેપઃ, તસ્ય ષડ્ભાગઃ ક્ષયઃ

02.14.10 વર્ણહીને માષાવરે પૂર્વઃ સાહસદણ્ડઃ, પ્રમાણહીને મધ્યમઃ, તુલાપ્રતિમાન ઉપધાવુત્તમઃ, કૃતભાણ્ડ ઉપધૌ ચ

02.14.11 સૌવર્ણિકેનાદૃષ્ટં અન્યત્ર વા પ્રયોગં કારયતો દ્વાદશપણો દણ્ડઃ

02.14.12 કર્તુર્દ્વિગુણઃ સ-અપસારશ્ચેત્

02.14.13 અનપસારઃ કણ્ટકશોધનાય નીયેત

02.14.14 કર્તુશ્ચ દ્વિશતો દણ્ડઃ પણચ્છેદનં વા

02.14.15 તુલાપ્રતિમાનભાણ્ડં પૌતવહસ્તાત્ ક્રીણીયુઃ

02.14.16 અન્યથા દ્વાદશપણો દણ્ડઃ

02.14.17 ઘનં સુષિરં સમ્યૂહ્યં અવલેપ્યં સઙ્ઘાત્યં વાસિતકં ચ કારુકર્મ

02.14.18 તુલાવિષમં અપસારણં વિસ્રાવણં પેટકઃ પિઙ્કશ્ચ ઇતિ હરણ ઉપાયાઃ

02.14.19 સન્નામિન્યુત્કીર્ણિકા ભિન્નમસ્તક ઉપકણ્ઠી કુશિક્યા સકટુકક્ષ્યા પરિવેલ્યાડયસ્કાન્તા ચ દુષ્ટતુલાઃ

02.14.20 રૂપ્યસ્ય દ્વૌ ભાગાવેકઃ શુલ્બસ્ય ત્રિપુટકમ્

02.14.21 તેનાકરોદ્ ગતં અપસાર્યતે તત્ત્રિપુટકાપસારિતમ્

02.14.22 શુલ્બેન શુલ્બાપસારિતં, વેલ્લકેન વેલ્લકાપસારિતં, શુલ્બાર્ધસારેણ હેમ્ના હેમાપસારિતમ્

02.14.23 મૂકમૂષા પૂતિકિટ્ટઃ કરટુકમુખં નાલી સન્દંશો જોઙ્ગની સુવર્ચિકાલવણં તદ્ એવ સુવર્ણં ઇત્યપસારણમાર્ગાઃ

02.14.24 પૂર્વપ્રણિહિતા વા પિણ્ડવાલુકા મૂષાભેદાદ્ અગ્નિષ્ઠાદ્ ઉદ્ધ્રિયન્તે

02.14.25 પશ્ચાદ્ બન્ધને આચિતકપત્ત્રપરીક્ષાયાં વા રૂપ્યરૂપેણ પરિવર્તનં વિસ્રાવણં, પિણ્ડવાલુકાનાં લોહપિણ્ડવાલુકાભિર્વા

02.14.26 ગાઢશ્ચાભ્યુદ્ધાર્યશ્ચ પેટકઃ સમ્યૂહ્યાવલેપ્યસઙ્ઘાત્યેષુ ક્રિયતે

02.14.27 સીસરૂપં સુવર્ણપત્ત્રેણાવલિપ્તં અભ્યન્તરં અષ્ટકેન બદ્ધં ગાઢપેટકઃ

02.14.28 સ એવ પટલસમ્પુટેષ્વભ્યુદ્ધાર્યઃ

02.14.29 પત્ત્રં આશ્લિષ્ટં યમકપત્ત્રં વાડવલેપ્યેષુ ક્રિયતે

02.14.30 શુલ્બં તારં વા ગર્ભઃ પત્રાણાં સઙ્ઘાત્યેષુ ક્રિયતે

02.14.31 શુલ્બરૂપં સુવર્ણપત્રસંહતં પ્રમૃષ્ટં સુપાર્શ્વં, તદ્ એવ યમકપત્રસંહતં પ્રમૃષ્ટં તામ્રતારરુપં ચ ઉત્તરવર્ણકઃ

02.14.32 તદ્ ઉભયં તાપનિકષાભ્યાં નિહ્શબ્દ ઉલ્લેખનાભ્યાં વા વિદ્યાત્

02.14.33 અભ્યુદ્ધાર્યં બદરામ્લે લવણ ઉદકે વા સાદયન્તિ ઇતિ પેટકઃ

02.14.34 ઘને સુષિરે વા રૂપે સુવર્ણમૃન્માલુકાહિઙ્ગુલુકકલ્પો વા તપ્તોઽવતિષ્ઠતે

02.14.35 દૃઢવાસ્તુકે વા રૂપે વાલુકામિશ્રં જતુ ગાન્ધારપઙ્કો વા તપ્તોઽવતિષ્ઠતે

02.14.36 તયોઃ તાપનં અવધ્વંસનં વા શુદ્ધિઃ

02.14.37 સ-પરિભાણ્ડે વા રૂપે લવણં ઉલ્કયા કટુશર્કરયા તપ્તં અવતિષ્ઠતે

02.14.38 તસ્ય ક્વાથનં શુદ્ધિઃ

02.14.39 અભ્રપટલં અષ્ટકેન દ્વિગુણવાસ્તુકે વા રૂપે બધ્યતે

02.14.40 તસ્યાપિહિતકાચકસ્ય ઉદકે નિમજ્જત એકદેશઃ સીદતિ, પટલાન્તરેષુ વા સૂચ્યા ભિદ્યતે

02.14.41 મણયો રૂપ્યં સુવર્ણં વા ઘનસુષિરાણાં પિઙ્ગઃ

02.14.42 તસ્ય તાપનં અવધ્વંસનં વા શુદ્ધિઃ । ઇતિ પિઙ્ગઃ

02.14.43 તસ્માદ્ વજ્રમણિમુક્તાપ્રવાલરૂપાણાં જાતિરૂપવર્ણપ્રમાણપુદ્ગલલક્ષણાન્યુપલભેત

02.14.44 કૃતભાણ્ડપરીક્ષાયાં પુરાણભાણ્ડપ્રતિસંસ્કારે વા ચત્વારો હરણ ઉપાયાઃ - પરિકુટ્ટનં અવચ્છેદનં ઉલ્લેખનં પરિમર્દનં વા

02.14.45 પેટકાપદેશેન પૃષતં ગુણં પિટકાં વા યત્ પરિશાતયન્તિ તત્પરિકુટ્ટનમ્

02.14.46 યદ્દ્વિગુણવાસ્તુકાનાં વા રૂપે સીસરૂપં પ્રક્ષિપ્યાભ્યન્તરં અવચ્છિન્દન્તિ તદ્ અવચ્છેદનમ્

02.14.47 યદ્ ઘનાનાં તીક્ષ્ણેન ઉલ્લિખન્તિ તદ્ ઉલ્લેખનમ્

02.14.48 હરિતાલમનઃશિલાહિઙ્ગુલુકચૂર્ણાનાં અન્યતમેન કુરુવિન્દચૂર્ણેન વા વસ્ત્રં સમ્યૂહ્ય યત્ પરિમૃદ્નન્તિ તત્ પરિમર્દનમ્

02.14.49 તેન સૌવર્ણરાજતાનિ ભાણ્ડાનિ ક્ષીયન્તે, ન ચ એષાં કિઞ્ચિદ્ અવરુગ્ણં ભવતિ

02.14.50 ભગ્નખણ્ડઘૃષ્ટાનાં સમ્યૂહ્યાનાં સદૃશેનાનુમાનં કુર્યાત્

02.14.51 અવલેપ્યાનાં યાવદ્ ઉત્પાટિતં તાવદ્ ઉત્પાટ્યાનુમાનં કુર્યાત્

02.14.52 વિરૂપાણાં વા તાપનં ઉદકપેષણં ચ બહુશઃ કુર્યાત્

02.14.53 અવક્ષેપઃ પ્રતિમાનં અગ્નિર્ગણ્ડિકા ભણ્ડિકાધિકરણી પિઞ્છઃ સૂત્રં ચેલ્લં બોલ્લનં શિર ઉત્સઙ્ગો મક્ષિકા સ્વકાય ઈક્ષા દૃતિરુદકશરાવં અગ્નિષ્ઠં ઇતિ કાચં વિદ્યાત્

02.14.54 રાજતાનાં વિસ્રં મલગ્રાહિ પરુષં પ્રસ્તીનં વિવર્ણં વા દુષ્ટં ઇતિ વિદ્યાત્

02.14.55ab એવં નવં ચ જીર્ણં ચ વિરૂપં ચાપિ ભાણ્ડકમ્ ।

02.14.55chd પરીક્ષેતાત્યયં ચ એષાં યથા ઉદ્દિષ્ટં પ્રકલ્પયેત્ (ઇતિ)

Chapt . Superintendent of the magashin

02.15.01 કોષ્ઠાગારાધ્યક્ષઃ સીતારાષ્ટ્રક્રયિમપરિવર્તકપ્રામિત્યકાપમિત્યકસંહનિકાન્યજાતવ્યયપ્રત્યાય ઉપસ્થાનાન્યુપલભેત્

02.15.02 સીતાઽધ્યક્ષ ઉપનીતઃ સસ્યવર્ણકઃ સીતા

02.15.03 પિણ્ડકરઃ ષડ્ભાગઃ સેનાભક્તં બલિઃ કર ઉત્સઙ્ગઃ પાર્શ્વં પારિહીણિકં ઔપાયનિકં કૌષ્ઠેયકં ચ રાષ્ટ્રમ્

02.15.04 ધાન્યમૂલ્યં કોશનિર્હારઃ પ્રયોગપ્રત્યાદાનં ચ ક્રયિમમ્

02.15.05 સસ્યવર્ણાનાં અર્ઘાન્તરેણ વિનિમયઃ પરિવર્તકઃ

02.15.06 સસ્યયાચનં અન્યતઃ પ્રામિત્યકમ્

02.15.07 તદ્ એવ પ્રતિદાનાર્થં આપમિત્યકમ્

02.15.08 કુટ્ટકરોચકસક્તુશુક્તપિષ્ટકર્મ તજ્જીવનેષુ તૈલપીડનમૌદ્રચાક્રિકેષ્વિક્ષૂણાં ચ ક્ષારકર્મ સંહનિકા

02.15.09 નષ્ટપ્રસ્મૃતાદિરન્યજાતઃ

02.15.10 વિક્ષેપવ્યાધિતાન્તરારમ્ભશેષં ચ વ્યયપ્રત્યાયઃ

02.15.11 તુલામાનાન્તરં હસ્તપૂરણં ઉત્કરો વ્યાજી પર્યુષિતં પ્રાર્જિતં ચ ઉપસ્થાનમ્ । ઇતિ

02.15.12 ધાન્યસ્નેહક્ષારલવણાનાં ધાન્યકલ્પં સીતાઽધ્યક્ષે વક્ષ્યામઃ

02.15.13 સર્પિસ્તૈલવસામજ્જાનઃ સ્નેહાઃ

02.15.14 ફાણિતગુડમત્સ્યણ્ડિકાખણ્ડશર્કરાઃ ક્ષારવર્ગઃ

02.15.15 સૈન્ધવસામુદ્રબિડયવક્ષારસૌવર્ચલ ઉદ્ભેદજા લવણવર્ગઃ

02.15.16 ક્ષૌદ્રં માર્દ્વીકં ચ મધુ

02.15.17 ઇક્ષુરસગુડમધુફાણિતજામ્બવપનસાનાં અન્યતમો મેષશ◌ૃઙ્ગીપિપ્પલીક્વાથાભિષુતો માસિકઃ ષાણ્માસિકઃ સાંવત્સરિકો વા ચિદ્ભિટોર્વારુક ઇક્ષુકાણ્ડામ્રફલામલકાવસુતઃ શુદ્ધો વા શુક્તવર્ગઃ

02.15.18 વૃક્ષામ્લકરમર્દામ્રવિદલામલકમાતુલુઙ્ગકોલબદરસૌવીરકપરૂષકાદિઃ ફલામ્લવર્ગઃ

02.15.19 દધિધાન્યામ્લાદિર્દ્રવામ્લવર્ગઃ

02.15.20 પિપ્પલીમરિચશ◌ૃઙ્ગિબેરાઽજાજીકિરાતતિક્તગૌરસર્ષપકુસ્તુમ્બુરુચોરકદમનકમરુવકશિગ્રુકાણ્ડાદિઃ કટુકવર્ગઃ

02.15.21 શુષ્કમત્સ્યમાંસકન્દમૂલફલશાકાદિ ચ શાકવર્ગઃ

02.15.22 તતોઽર્ધં આપદ્ઽર્થં જાનપદાનાં સ્થાપયેદ્, અર્ધં ઉપયુઞ્જીત

02.15.23 નવેન ચાનવં શોધયેત્

02.15.24 ક્ષુણ્ણઘૃષ્ટપિષ્ટભૃષ્ટાનાં આર્દ્રશુષ્કસિદ્ધાનાં ચ ધાન્યાનાં વૃદ્ધિક્ષયપ્રમાણાનિ પ્રત્યક્ષીકુર્વીત

02.15.25 કોદ્રવવ્રીહીણાં અર્ધં સારઃ, શાલીનાં અર્ધભાગ ઊનઃ, ત્રિભાગ ઊનો વરકાણામ્

02.15.26 પ્રિયઙ્ગૂણાં અર્ધં સારો નવભાગવૃદ્ધિશ્ચ

02.15.27 ઉદારકઃ તુલ્યઃ, યવા ગોધૂમાશ્ચ ક્ષુણ્ણાઃ, તિલા યવા મુદ્ગમાષાશ્ચ ઘૃષ્ટાઃ

02.15.28 પઞ્ચભાગવૃદ્ધિર્ગોધૂમઃ, સક્તવશ્ચ

02.15.29 પાદ ઊના કલાયચમસી

02.15.30 મુદ્ગમાષાણાં અર્ધપાદ ઊના

02.15.31 શૌમ્બ્યાનાં અર્ધં સારઃ, ત્રિભાગ ઊનો મસૂરાણામ્

02.15.32 પિષ્ટં આમં કુલ્માષાશ્ચાધ્યર્ધગુણાઃ

02.15.33 દ્વિગુણો યાવકઃ, પુલાકઃ, પિષ્ટં ચ સિદ્ધમ્

02.15.34 કોદ્રવવરક ઉદારકપ્રિયઙ્ગૂણાં ત્રિગુણં અન્નં, ચતુર્ગુણં વ્રીહીણાં, પઞ્ચગુણં શાલીનામ્

02.15.35 તિમિતં અપરાન્નં દ્વિગુણં, અર્ધાધિકં વિરૂઢાનામ્

02.15.36 પઞ્ચભાગવૃદ્ધિર્ભૃષ્ટાનામ્

02.15.37 કલાયો દ્વિગુણઃ, લાજા ભરુજાશ્ચ

02.15.38 ષટ્કં તૈલં અતસીનામ્

02.15.39 નિમ્બકુશામ્રકપિત્થાદીનાં પઞ્ચભાગઃ

02.15.40 ચતુર્ભાગિકાઃ તિલકુસુમ્ભમધૂક ઇઙ્ગુદીસ્નેહાઃ

02.15.41 કાર્પાસક્ષૌમાણાં પઞ્ચપલે પલં સૂત્રમ્

02.15.42 પઞ્ચદ્રોણે શાલીનાં દ્વાદશાઢકં તણ્ડુલાનાં કલભભોજનં, એકાદશકં વ્યાલાનાં, દશકં ઔપવાહ્યાનાં નવકં સાન્નાહ્યાનાં, અષ્ટકં પત્તીનાં, સપ્તકં મુખ્યાનાં, ષટ્કં દેવીકુમારાણાં, પઞ્ચકં રાજ્ઞાં, અખણ્ડપરિશુદ્ધાનાં વા તુઅણ્ડુલાનાં પ્રસ્થઃ

02.15.43 તણ્ડુલાનાં પ્રસ્થઃ ચતુર્ભાગઃ સૂપઃ સૂપષોડશો લવણસ્યાંશઃ ચતુર્ભાગઃ સર્પિષઃ તૈલસ્ય વા એકં આર્યભક્તં પુંસઃ

02.15.44 ષડ્ભાગઃ સૂપઃ અર્ધસ્નેહં અવરાણામ્

02.15.45 પાદ ઊનં સ્ત્રીણામ્

02.15.46 અર્ધં બાલાનામ્

02.15.47 માંસપલવિંશત્યા સ્નેહાર્ધકુડુબઃ પલિકો લવણસ્યાંશઃ ક્ષારપલયોગો દ્વિધરણિકઃ કટુકયોગો દધ્નશ્ચાર્ધપ્રસ્થઃ

02.15.48 તેન ઉત્તરં વ્યાખ્યાતમ્

02.15.49 શાકાનાં અધ્યર્ધગુણઃ, શુષ્કાણાં દ્વિગુણઃ, સ ચૈવ યોગઃ

02.15.50 હસ્ત્યઽશ્વયોઃ તદ્ઽધ્યક્ષે વિધાપ્રમાણં વક્ષ્યામઃ

02.15.51 બલીવર્દાનાં માષદ્રોણં યવાનાં વા પુલાકઃ, શેષં અશ્વવિધાનમ્

02.15.52 વિશેષો ઘાણપિણ્યાકતુલા, કણકુણ્ડકં દશાઢકં વા

02.15.53 દ્વિગુણં મહિષ ઉષ્ટ્રાણામ્

02.15.54 અર્ધદ્રોણં ખરપૃષતરોહિતાનામ્

02.15.55 આઢકં એણકુરઙ્ગાણામ્

02.15.56 અર્ધાઢકં અજ એડકવરાહાણાં, દ્વિગુણં વા કણકુણ્ડકમ્

02.15.57 પ્રસ્થોદનઃ શુનામ્

02.15.58 હંસક્રૌઞ્ચમયૂરાણાં અર્ધપ્રસ્થઃ

02.15.59 શેષાણાં અતો મૃગપશુપક્ષિવ્યાલાનાં એકભક્તાદ્ અનુમાનં ગ્રાહયેત્

02.15.60 અઙ્ગારાંઃ તુષાન્ લોહકર્માન્તભિત્તિલેપ્યાનાં હારયેત્

02.15.61 કણિકા દાસકર્મકરસૂપકારાણાં, અતોઽન્યદ્ ઔદનિકાપૂપિકેભ્યઃ પ્રયચ્છેત્

02.15.62 તુલામાનભાણ્ડં રોચનીદૃષન્મુસલ ઉલૂખલકુટ્ટકરોચકયન્ત્રપત્રકશૂર્પચાલનિકાકણ્ડોલીપિટકસમ્માર્જન્યશ્ચ ઉપકરણાનિ

02.15.63 માર્જકરક્ષકધરકમાયકમાપકદાયકદાપકશલાકાપ્રતિગ્રાહકદાસકર્મકરવર્ગશ્ચ વિષ્ટિઃ

02.15.64ab ઉચ્ચૈર્ધાન્યસ્ય નિક્ષેપો મૂતાઃ ક્ષારસ્ય સંહતાઃ ।

02.15.64chd મૃત્કાષ્ઠકોષ્ઠાઃ સ્નેહસ્ય પૃથિવી લવણસ્ય ચ (ઇતિ)

Chapt . Director of trade

02.16.01 પણ્યાધ્યક્ષઃ સ્થલજલજાનાં નાનાવિધાનાં પણ્યાનાં સ્થલપથવારિપથ ઉપયાતાનાં સારફલ્ગ્વ્ઽર્ઘાન્તરં પ્રિયાપ્રિયતાં ચ વિદ્યાત્, તથા વિક્ષેપસઙ્ક્ષેપક્રયવિક્રયપ્રયોગકાલાન્

02.16.02 યચ્ચ પણ્યં પ્રચુરં સ્યાત્ તદ્ એકીકૃત્યાર્ઘં આરોપયેત્

02.16.03 પ્રાપ્તેઽર્ઘે વાઽર્ઘાન્તરં કારયેત્

02.16.04 સ્વભૂમિજાનાં રાજપણ્યાનાં એકમુખં વ્યવહારં સ્થાપયેત્, પરભૂમિજાનાં અનેકમુખમ્

02.16.05 ઉભયં ચ પ્રજાનાં અનુગ્રહેણ વિક્રાપયેત્

02.16.06 સ્થૂલં અપિ ચ લાભં પ્રજાનાં ઔપઘાતિકં વારયેત્

02.16.07 અજસ્રપણ્યાનાં કાલ ઉપરોધં સઙ્કુલદોષં વા ન ઉત્પાદયેત્

02.16.08 બહુમુખં વા રાજપણ્યં વૈદેહકાઃ કૃતાર્ઘં વિક્રીણીરન્

02.16.09 છેદાનુરૂપં ચ વૈધરણં દદ્યુઃ

02.16.10 ષોડશભાગો માનવ્યાજી, વિંશતિભાગઃ તુલામાનં, ગણ્યપણ્યાનાં એકાદશભાગઃ

02.16.11 પરભૂમિજં પણ્યં અનુગ્રહેણાવાહયેત્

02.16.12 નાવિકસાર્થવાહેભ્યશ્ચ પરિહારં આયતિક્ષમં દદ્યાત્

02.16.13 અનભિયોગશ્ચાર્થેષ્વાગન્તૂનાં, અન્યત્ર સભ્યા ઉપકારિભ્યઃ

02.16.14 પણ્યાધિષ્ઠાતારઃ પણ્યમૂલ્યં એકમુખં કાષ્ઠદ્રોણ્યાં એકચ્છિદ્રાપિધાનાયાં નિદધ્યુઃ

02.16.15 અહ્નશ્ચાષ્ટમે ભાગે પણ્યાધ્યક્ષસ્યાર્પયેયુઃ - ઇદં વિક્રીતં, ઇદં શેષમ્ ઇતિ

02.16.16 તુલામાનભાણ્ડં ચાર્પયેયુઃ

02.16.17 ઇતિ સ્વવિષયે વ્યાખ્યાતમ્

02.16.18 પરવિષયે તુ - પણ્યપ્રતિપણ્યયોરર્ઘં મૂલ્યં ચાગમય્ય શુલ્કવર્તન્યાઽઽતિવાહિકગુલ્મતરદેયભક્તભાગવ્યયશુદ્ધં ઉદયં પશ્યેત્

02.16.19 અસત્યુદયે ભાણ્ડનિર્વહણેન પણ્યપ્રતિપણ્યાનયનેન વા લાભં પશ્યેત્

02.16.20 તતઃ સારપાદેન સ્થલવ્યવહારં અધ્વના ક્ષેમેણ પ્રયોજયેત્

02.16.21 અટવ્ય્ઽન્તપાલપુરરાષ્ટ્રમુખ્યૈશ્ચ પ્રતિસંસર્ગં ગચ્છેદ્ અનુગ્રહાર્થમ્

02.16.22 આપદિ સારં આત્માનં વા મોક્ષયેત્

02.16.23 આત્મનો વા ભૂમિં પ્રાપ્તઃ સર્વદેયવિશુદ્ધં વ્યવહરેત

02.16.24 વારિપથે વા યાનભાગકપથ્ય્ઽદનપણ્યપ્રતિપણ્યાર્ઘપ્રમાણયાત્રાકાલભયપ્રતીકારપણ્યપત્તનચારિત્રાણ્યુપલભેત

02.16.25ab નદીપથે ચ વિજ્ઞાય વ્યવહારં ચરિત્રતઃ ।

02.16.25chd યતો લાભઃ તતો ગચ્છેદ્ અલાભં પરિવર્જયેત્ (ઇતિ)

Chapt . Director of forest produce

02.17.01 કુપ્યાધ્યક્ષો દ્રવ્યવનપાલૈઃ કુપ્યં આનાયયેત્

02.17.02 દ્રવ્યવનકર્માન્તાંશ્ચ પ્રયોજયેત્

02.17.03 દ્રવ્યવનચ્છિદ્રાં ચ દેયં અત્યયં ચ સ્થાપયેદ્ અન્યત્રાપદ્ભ્યઃ

02.17.04 કુપ્યવર્ગઃ - શાકતિનિશધન્વનાર્જુનમધૂકતિલકસાલશિંશપાઽરિમેદરાજાદનશિરીષખદિરસરલતાલસર્જાશ્વકર્ણસોમવ

સારદારુવર્ગઃ

02.17.05 ઉટજચિમિયચાપવેણુવંશસાતિનકણ્ટકભાલ્લૂકાદિર્વેણુવર્ગઃ

02.17.06 વેત્રશીકવલ્લીવાશીશ્યામલતાનાગલતાઽઽદિર્વલ્લીવર્ગઃ

02.17.07 માલતીમૂર્વાઽર્કશણગવેધુકાઽતસ્ય્।આદિર્વલ્કવર્ગઃ

02.17.08 મુઞ્જબલ્બજાદિ રજ્જુભાણ્ડમ્

02.17.09 તાલીતાલભૂર્જાનાં પત્ત્રમ્

02.17.10 કિંશુકકુસુમ્ભકુઙ્કુમાનાં પુષ્પમ્

02.17.11 કન્દમૂલફલાદિરૌષધવર્ગઃ

02.17.12 કાલકૂટવત્સનાભહાલાહલમેષશ◌ૃઙ્ગમુસ્તાકુષ્ઠમહાવિષવેલ્લિતકગૌરાર્દ્રબાલકમાર્કટહૈમવતકાલિઙ્ગકદારદકાઙ્કોલ

ઉષ્ટ્રકાદીનિ વિષાણિ, સર્પાઃ કીટાશ્ચ ત એવ કુમ્ભગતાઃ વિષવર્ગઃ

02.17.13 ગોધાસેરકદ્વીપ્ય્।ઋક્ષશિંશુમારસિંહવ્યાઘ્રહસ્તિમહિષચમરસૃમરખઙ્ગગોમૃગગવયાનાં

ચર્માસ્થિપિત્તસ્નાય્વ્ઽક્ષિદન્તશ◌ૃઙ્ગખુરપુચ્છાનિ, અન્યેષાં વાઽપિ મૃગપશુપક્ષિવ્યાલાનામ્

02.17.14 કાલાયસતામ્રવૃત્તકંસસીસત્રપુવૈકૃન્તકારકૂટાનિ લોહાનિ

02.17.15 વિદલમૃત્તિકામયં ભાણ્ડમ્

02.17.16 અઙ્ગારતુષભસ્માનિ, મૃગપશુપક્ષિવ્યાલવાટાઃ કાષ્ઠતૃણવાટાશ્ચ । ઇતિ

02.17.17ab બહિરન્તશ્ચ કર્માન્તા વિભક્તાઃ સાર્વભાણ્ડિકાઃ ।

02.17.17chd આજીવપુરરક્ષાઽર્થાઃ કાર્યાઃ કુપ્ય ઉપજીવિના (ઇતિ)

Chapt . Superintendent of the armoury

02.18.01 આયુધાગારાધ્યક્ષઃ સાઙ્ગ્રામિકં દૌર્ગકર્મિકં પરપુરાભિઘાતિકં ચ યન્ત્રં આયુધં આવરણં ઉપકરણં ચ તજ્જાતકારુશિલ્પિભિઃ કૃતકર્મપ્રમાણકાલવેતનફલનિષ્પત્તિભિઃ કારયેત્, સ્વભૂમિષુ ચ સ્થાપયેત્

02.18.02 સ્થાનપરિવર્તનં આતપપ્રવાતપ્રદાનં ચ બહુશઃ કુર્યાત્

02.18.03 ઊષ્મ ઉપસ્નેહક્રિમિભિરુપહન્યમાનં અન્યથા સ્થાપયેત્

02.18.04 જાતિરૂપલક્ષણપ્રમાણાગમમૂલ્યનિક્ષેપૈશ્ચ ઉપલભેત

02.18.05 સર્વતોભદ્રજામદગ્ન્યબહુમુખવિશ્વાસઘાતિસઙ્ઘાટીયાનકપર્જન્યકબાહુ। ઊર્ધ્વબાહ્વ્ડર્ધબાહૂનિ સ્થિતયન્ત્રાણિ

02.18.06 પાઞ્ચાલિકદેવદણ્ડસૂકરિકામુસલયષ્ટિહસ્તિવારકતાલવૃન્તમુદ્ગરગદાસ્પૃક્તલાકુદ્દાલાસ્ફાટિમ ઉત્પાટિમ ઉદ્ઘાટિમશતઘ્નિત્રિશૂલચક્રાણિ ચલયન્ત્રાણિ

02.18.07 શક્તિપ્રાસકુન્તહાટકભિણ્ડિપાલશૂલતોમરવરાહકર્ણકણયકર્પણત્રાસિકાદીનિ ચ હુલમુખાનિ

02.18.08 તાલચાપદારવશાર્ઙ્ગાણિ કાર્મુકકોદણ્ડદ્રૂણા ધનૂંષિ

02.18.09 મૂર્વાઽર્કશનગવેધુવેણુસ્નાયૂનિ જ્યાઃ

02.18.10 વેણુશરશલાકાદણ્ડાસનનારાચાશ્ચ ઇષવઃ

02.18.11 તેષાં મુખાનિ છેદનભેદનતાડનાન્યાયસાસ્થિદારવાણિ

02.18.12 નિસ્ત્રિંશમણ્ડલાગ્રાસિયષ્ટયઃ ખડ્ગાઃ

02.18.13 ખડ્ગમહિષવારણવિષાણદારુવેણુમૂલાનિ ત્સરવઃ

02.18.14 પરશુકુઠારપટ્ટસખનિત્રકુદ્દાલક્રકચકાણ્ડચ્છેદનાઃ ક્ષુરકલ્પાઃ

02.18.15 યન્ત્રગોષ્પણમુષ્ટિપાષાણરોચનીદૃષદશ્ચાશ્માયુધાનિ

02.18.16 લોહજાલિકાપટ્ટકવચસૂત્રકઙ્કટશિંશુમારકખડ્ગિધેનુકહસ્તિગોચર્મખુરશ◌ૃઙ્ગસઙ્ઘાતં વર્માણિ

02.18.17 શિરસ્ત્રાણકણ્ઠત્રાણકૂર્પાસકઞ્ચુકવારવાણપટ્ટનાગ ઉદરિકાઃ પેટીચર્મહસ્તિકર્ણતાલમૂલધમનિકાકપાટકિટિકાઽપ્રતિ

02.18.18 હસ્તિરથવાજિનાં યોગ્યાભાણ્ડં આલઙ્કારિકં સન્નાહકલ્પનાશ્ચ ઉપકરણાનિ

02.18.19 ઐન્દ્રજાલિકં ઔપનિષદિકં ચ કર્મ

02.18.20ab કર્માન્તાનાં ચ - ઇચ્છાં આરમ્ભનિષ્પત્તિં પ્રયોગં વ્યાજં ઉદ્દયમ્ ।

02.18.20chd ક્ષયવ્યયૌ ચ જાનીયાત્ કુપ્યાનાં આયુધ ઈશ્વરઃ (ઇતિ)

Chapt . Standardization of Rights and measures

02.19.01 પૌતવાધ્યક્ષઃ પૌતવકર્માન્તાન્ કારયેત્

02.19.02 ધાન્યમાષા દશ સુવર્ણમાષકઃ, પઞ્ચ વા ગુઞ્જાઃ

02.19.03 તે ષોડશ સુવર્ણઃ કર્ષો વા

02.19.04 ચતુષ્કર્ષં પલમ્

02.19.05 અષ્ટાશીતિર્ગૌરસર્ષપા રૂપ્યમાષકઃ

02.19.06 તે ષોડશ ધરણં, શૌમ્બ્યાનિ વા વિંશતિઃ

02.19.07 વિંશતિતણ્ડુલં વજ્રધરણમ્

02.19.08 અર્ધમાષકઃ માષકઃ દ્વૌ ચત્વારઃ અષ્ટૌ માષકાઃ સુવર્ણો દ્વૌ ચત્વારઃ, અષ્ટૌ સુવર્ણાઃ દશ વિંશતિઃ ત્રિંશત્ ચત્વારિંશત્ શતં ઇતિ

02.19.09 તેન ધરણાનિ વ્યાખ્યાતાનિ

02.19.10 પ્રતિમાનાન્યયોમયાનિ માગધમેકલશૈલમયાનિ યાનિ વા ન ઉદકપ્રદેહાભ્યાં વૃદ્ધિં ગચ્છેયુરુષ્ણેન વા હ્રાસમ્

02.19.11 ષડઙ્ગુલાદ્ ઊર્ધ્વં અષ્ટાઙ્ગુલ ઉત્તરા દશ તુલાઃ કારયેત્ લોહપલાદ્ ઊર્ધ્વં એકપલ ઉત્તરાઃ, યન્ત્રં ઉભયતઃશિક્યં વા

02.19.12 પઞ્ચત્રિંશત્પલલોહાં દ્વિસપ્તત્યઙ્ગુલાયામાં સમવૃત્તાં કારયેત્

02.19.13 તસ્યાઃ પઞ્ચપલિકં મણ્ડલં બદ્ધ્વા સમકરણં કારયેત્

02.19.14 તતઃ કર્ષ ઉત્તરં પલં પલ ઉત્તરં દશપલં દ્વાદશ પઞ્ચદશ વિંશતિરિતિ પદાનિ કારયેત્

02.19.15 તત આશતાદ્ દશ ઉત્તરં કારયેત્

02.19.16 અક્ષેષુ નાન્દીપિનદ્ધં કારયેત્

02.19.17 દ્વિગુણલોહાં તુલાં અતઃ ષણ્ણવત્યઙ્ગુલાયામાં પરિમાણીં કારયેત્

02.19.18 તસ્યાઃ શતપદાદ્ ઊર્ધ્વં વિંશતિઃ પઞ્ચાશત્ શતં ઇતિ પદાનિ કારયેત્

02.19.19 વિંશતિતૌલિકો ભારઃ

02.19.20 દશધારણિકં પલમ્

02.19.21 તત્પલશતં આયમાની

02.19.22 પઞ્ચપલાવરા વ્યાવહારિકી ભાજન્યન્તઃપુરભાજની ચ

02.19.23 તાસાં અર્ધધરણાવરં પલં, દ્વિપલાવરં ઉત્તરલોહં, ષડઙ્ગુલાવરાશ્ચાયામાઃ

02.19.24 પૂર્વયોઃ પઞ્ચપલિકઃ પ્રયામો માંસલોહલવણમણિવર્જમ્

02.19.25 કાષ્ઠતુલા અષ્ટહસ્તા પદવતી પ્રતિમાનવતી મયૂરપદાધિષ્ઠિતા

02.19.26 કાષ્ઠપઞ્ચવિંશતિપલં તણ્ડુલપ્રસ્થસાધનમ્

02.19.27 એષ પ્રદેશો બહ્વલ્પયોઃ

02.19.28 ઇતિ તુલાપ્રતિમાનં વ્યાખ્યાતમ્

02.19.29 અથ ધાન્યમાષદ્વિપલશતં દ્રોણં આયમાનં, સપ્તાશીતિપલશતં અર્ધપલં ચ વ્યાવહારિકં, પઞ્ચસપ્તતિપલશતં ભાજનીયં, દ્વિષષ્ટિપલશતં અર્ધપલં ચાન્તઃપુરભાજનીયમ્

02.19.30 તેષાં આઢકપ્રસ્થકુડુબાશ્ચતુર્ભાગાવરાઃ

02.19.31 ષોડશદ્રોણા ખારી

02.19.32 વિંશતિદ્રોણિકઃ કુમ્ભઃ

02.19.33 કુમ્ભૈર્દશભિર્વહઃ

02.19.34 શુષ્કસારદારુમયં સમં ચતુર્ભાગશિખં માનં કારયેત્, અન્તઃશિખં વા

02.19.35 રસસ્ય તુ સુરાયાઃ પુષ્પફલયોઃ તુષાઙ્ગારાણાં સુધાયાશ્ચ શિખામાનં દ્વિગુણ ઉત્તરા વૃદ્ધિઃ

02.19.36 સ-પાદપણો દ્રોણમૂલ્યં આઢકસ્ય પાદ ઊનઃ, ષણ્માષકાઃ પ્રસ્થસ્ય, માષકઃ કુડુબસ્ય

02.19.37 દ્વિગુણં રસાદીનાં માનમૂલ્યમ્

02.19.38 વિંશતિપણાઃ પ્રતિમાનસ્ય

02.19.39 તુલામૂલ્યં ત્રિભાગઃ

02.19.40 ચતુર્માસિકં પ્રાતિવેધનિકં કારયેત્

02.19.41 અપ્રતિવિદ્ધસ્યાત્યયઃ સ-પાદઃ સપ્તવિંશતિપણઃ

02.19.42 પ્રાતિવેધનિકં કાકણીકં અહરહઃ પૌતવાધ્યક્ષાય દદ્યુઃ

02.19.43 દ્વાત્રિંશદ્ભાગઃ તપ્તવ્યાજી સર્પિષઃ, ચતુઃષષ્ટિભાગઃ તૈલસ્ય

02.19.44 પઞ્ચાશદ્ ભાગો માનસ્રાવો દ્રવાણામ્

02.19.45 કુડુબાર્ધચતુર્ડષ્ટભાગાનિ માનાનિ કારયેત્

02.19.46 કુડુબાશ્ચતુર્ડશીતિર્વારકઃ સર્પિષો મતઃ

02.19.47 ચતુઃષષ્ટિઃ તુ તૈલસ્ય પાદશ્ચ ઘટિકાડનયોઃ

Chapt . Measures of space and time

02.20.01 માનાધ્યક્ષ્યો દેશકાલમાનં વિદ્યાત્

02.20.02 અષ્ટૌ પરમાણવો રથચક્રવિપ્રુટ્

02.20.03 તા અષ્ટૌ લિક્ષા

02.20.04 તા અષ્તૌ યૂકા

02.20.05 તા અષ્ટૌ યવમધ્યઃ

02.20.06 અષ્ટૌ યવમધ્યા અઙ્ગુલમ્

02.20.07 મધ્યમસ્ય પુરુષસ્ય મધ્યમાયા અનુગુલ્યા મધ્યપ્રકર્ષો વાડઙ્ગુલમ્

02.20.08 ચતુર્ડઙ્ગુલો ધનુર્ગ્રહઃ

02.20.09 અષ્ટાઙ્ગુલા ધનુર્મુષ્ટિઃ

02.20.10 દ્વાદશાઙ્ગુલા વિતસ્તિઃ, છાયાપૌરુષં ચ

02.20.11 ચતુર્દશાઙ્ગુલં શમઃ શલઃ પરીરયઃ પદં ચ

02.20.12 દ્વિવિતસ્તિરરત્નિઃ પ્રાજાપત્યો હસ્તઃ

02.20.13 સ-ધનુર્ગ્રહઃ પૌતવવિવીતમાનમ્

02.20.14 સ-ધનુર્મુષ્ટિઃ કુષ્કુઃ કંસો વા

02.20.15 દ્વિચત્વારિંશદ્ડઙ્ગુલઃ તક્ષ્ણઃ ક્રાકચનિકકિષ્કુઃ સ્કન્ધાવારદુર્ગરાજપરિગ્રહમાનમ્

02.20.16 ચતુષ્પઞ્ચાશદ્ડઙ્ગુલઃ કૂપ્યવનહસ્તઃ

02.20.17 ચતુર્ડશીત્ય્ડઙ્ગુલો વ્યામો રજ્જુમાનં ખાતપૌરુષં ચ

02.20.18 ચતુર્ડરત્નિર્દણ્ડો ધનુર્નાલિકા પૌરુષં ચ ગાર્હપત્યમ્

02.20.19 અષ્ટશતાઙ્ગુલં ધનુઃ પથિપ્રાકારમાનં પૌરુષં ચાગ્નિચિત્યાનામ્

02.20.20 ષટ્કંસો દણ્ડો બ્રહ્મદેયાતિથ્યમાનમ્

02.20.21 દશદણ્ડો રજ્જુઃ

02.20.22 દ્વિરજ્જુકઃ પરિદેશઃ

02.20.23 ત્રિરજ્જુકં નિવર્તનં એકતઃ

02.20.24 દ્વિદણ્ડાધિકો બાહુઃ

02.20.25 દ્વિધનુઃસહસ્રં ગોરુતમ્

02.20.26 ચતુર્ગોરુતં યોજનમ્

02.20.27 ઇતિ દેશમાનમ્

02.20.28 કાલમાનં અત ઊર્ધ્વમ્

02.20.29 તુટો લવો નિમેષઃ કાષ્ઠા કલ્લા નાલિકા મુહૂર્તઃ પૂર્વાપરભાગૌ દિવસો રાત્રિઃ પક્ષો માસ ઋતુરયનં સંવત્સરો યુગં ઇતિ કાલાઃ

02.20.30 દ્વૌ તુટૌ લવઃ

02.20.31 દ્વૌ લવૌ નિમેષઃ

02.20.32 પઞ્ચનિમેષાઃ કાષ્ઠાઃ

02.20.33 ત્રિંશત્કાષ્ઠાઃ કલાઃ

02.20.34 ચત્વારિંશત્કલાઃ નાલિકા

02.20.35 સુવર્ણમાષકાશ્ચત્વારશ્ચતુરઙ્ગુલાયામાઃ કુમ્ભચ્છિદ્રં આઢકં અમ્ભસો વા નાલિકા

02.20.36 દ્વિનાલિકો મુહૂર્તઃ

02.20.37 પઞ્ચદશમુહૂર્તો દિવસો રાત્રિશ્ચ ચૈત્રે ચાશ્વયુજે ચ માસિ ભવતઃ

02.20.38 તતઃ પરં ત્રિભિર્મુહૂર્તૈરન્યતરઃ ષણ્માસં વર્ધતે હ્રસતે ચ ઇતિ

02.20.39 છાયાયાં અષ્ટપૌરુષ્યાં અષ્ટાદશભાગશ્છેદઃ, ષટ્પૌરુષ્યાં ચતુર્દશભાગઃ, ત્રિપૌરુષ્યાં અષ્ટભાગઃ, દ્વિપૌરુષ્યાં ષડ્ભાગઃ, પૌરુષ્યાં ચતુર્ભાગઃ, અષ્ટાઙ્ગુલાયાં ત્રયો દશભાગાઃ, ચતુરઙ્ગુલાયાં ત્રયોઽષ્ટભાગાઃ, અચ્છાયો મધ્યાહ્ન ઇતિ

02.20.40 પરાવૃત્તે દિવસે શેષં એવં વિદ્યાત્

02.20.41 આષાઢે માસિ નષ્ટચ્છાયો મધ્યાહ્નો ભવતિ

02.20.42 અતઃ પરં શ્રાવણાદીનાં ષણ્માસાનાં દ્વ્યઙ્ગુલ ઉત્તરા માઘાદીનાં દ્વ્યઙ્ગુલાવરા છાયા ઇતિ

02.20.43 પઞ્ચદશાહોરાત્રાઃ પક્ષઃ

02.20.44 સોમાપ્યાયનઃ શુક્લઃ

02.20.45 સોમાવચ્છેદનો બહુલઃ

02.20.46 દ્વિપક્ષો માસઃ

02.20.47 ત્રિંશદ્ઽહોરાત્રઃ કર્મમાસઃ

02.20.48 સ-અર્ધઃ સૌરઃ

02.20.49 અર્ધન્યૂનશ્ચાન્દ્રમાસઃ

02.20.50 સપ્તવિંશતિર્નાક્ષત્રમાસઃ

02.20.51 દ્વાત્રિંશદ્ બલમાસઃ

02.20.52 પઞ્ચત્રિંશદ્ અશ્વવાહાયાઃ

02.20.53 ચત્વારિંશદ્ધસ્તિવાહાયાઃ

02.20.54 દ્વૌ માસાવૃતુઃ

02.20.55 શ્રાવણઃ પ્રૌષ્ઠપદશ્ચ વર્ષાઃ

02.20.56 આશ્વયુજઃ કાર્ત્તિકશ્ચ શરત્

02.20.57 માર્ગશીર્ષઃ પૌષશ્ચ હેમન્તઃ

02.20.58 માઘઃ ફાલ્ગુનશ્ચ શિશિરઃ

02.20.59 ચૈત્રો વૈશાખશ્ચ વસન્તઃ

02.20.60 જ્યેષ્ઠામૂલીય આષાઢશ્ચ ગ્રીષ્મઃ

02.20.61 શિશિરાદ્યુત્તરાયણમ્

02.20.62 વર્ષાદિ દક્ષિણાયનમ્

02.20.63 દ્વ્યયનઃ સંવત્સરઃ

02.20.64 પઞ્ચસંવત્સરો યુગમ્ । ઇતિ

02.20.65ab દિવસસ્ય હરત્યર્કઃ ષષ્ટિભાગં ઋતૌ તતઃ ।

02.20.65chd કરોત્યેકં અહશ્છેદં તથા એવ એકં ચ ચન્દ્રમાઃ

02.20.66ab એવં અર્ધતૃતીયાનાં અબ્દાનાં અધિમાસકમ્ ।

02.20.66chd ગ્રીષ્મે જનયતઃ પૂર્વં પઞ્ચાબ્દાન્તે ચ પશ્ચિમમ્ (ઇતિ)

Chapt . Collector of chostums and tolls

02.21.01 શુલ્કાધ્યક્ષઃ શુલ્કશાલાં ધ્વજં ચ પ્રાન્મુખં ઉદન્મુખં વા મહાદ્વારાભ્યાશે નિવેશયેત્

02.21.02 શુલ્કાદાયિનશ્ચત્વારઃ પઞ્ચ વા સાર્થ ઉપયાતાન્ વણિજો લિખેયુઃ - કે કુતસ્ત્યાઃ કિયત્પણ્યાઃ ક્વ ચાભિજ્ઞાનં મુદ્રા વા કૃતા ઇતિ

02.21.03 અમુદ્રાણાં અત્યયો દેયદ્વિગુણઃ

02.21.04 કૂટમુદ્રાણાં શુલ્કાષ્ટગુણો દણ્ડઃ

02.21.05 ભિન્નમુદ્રાણાં અત્યયો ઘટિકાસ્થાને સ્થાનમ્

02.21.06 રાજમુદ્રાપરિવર્તને નામકૃતે વા સ-પાદપણિકં વહનં દાપયેત્

02.21.07 ધ્વજમૂલ ઉપસ્થિતસ્ય પ્રમાણં અર્ઘં ચ વૈદેહિકાઃ પણ્યસ્ય બ્રૂયુઃ એતત્પ્રમાણેનાર્ઘેણ પણ્યં ઇદં કઃ ક્રેતા ઇતિ

02.21.08 ત્રિરુદ્ઘુ ઉષિતં અર્થિભ્યો દદ્યાત્

02.21.09 ક્રેતૃસઙ્ઘર્ષે મૂલ્યવૃદ્ધિઃ સ-શુલ્કા કોશં ગચ્છેત્

02.21.10 શુલ્કભયાત્ પણ્યપ્રમાણ મૂલ્યં વા હીનં બ્રુવતઃ તદ્ અતિરિક્તં રાજા હરેત્

02.21.11 શુલ્કં અષ્ટગુણં વા દદ્યાત્

02.21.12 તદ્ એવ નિવિષ્ટપણ્યસ્ય ભાણ્ડસ્ય હીનપ્રતિવર્ણકેનાર્ઘાપકર્ષણે સારભાણ્ડસ્ય ફલ્ગુભાણ્ડેન પ્રતિચ્છાદને ચ કુર્યાત્

02.21.13 પ્રતિક્રેતૃભયાદ્ વા પણ્યમૂલ્યાદ્ ઉપરિ મૂલ્યં વર્ધયતો મૂલ્યવૃદ્ધિં રાજા હરેત્, દ્વિગુણં વા શુલ્કં કુર્યાત્

02.21.14 તદ્ એવાષ્ટગુણં અધ્યક્ષસ્યચ્ । છાદયતઃ

02.21.15 તસ્માદ્ વિક્રયઃ પણ્યાનાં ધૃતો મિતો ગણિતો વા કાર્યઃ, તર્કઃ ફલ્ગુભાણ્ડાનાં આનુગ્રાહિકાણાં ચ

02.21.16 ધ્વજમૂલં અતિક્રાન્તાનાં ચાકૃતશુલ્કાનાં શુલ્કાદ્ અષ્ટગુણો દણ્ડઃ

02.21.17 પથિક ઉત્પથિકાઃ તદ્ વિદ્યુઃ

02.21.18 વૈવાહિકં અન્વાયનં ઔપાયિકં યજ્ઞકૃત્યપ્રસવનૈમિત્તિકં દેવ ઇજ્યાચૌલ ઉપનયનગોદાનવ્રતદીક્ષાઽઽદિષુ ક્રિયાવિશેષેષુ ભાણ્ડં ઉચ્છુલ્કં ગચ્છેત્

02.21.19 અન્યથાવાદિનઃ સ્તેયદણ્ડઃ

02.21.20 કૃતશુલ્કેનાકૃતશુલ્કં નિર્વાહયતો દ્વિતીયં એકમુદ્રયા ભિત્ત્વા પણ્યપુટં અપહરતો વૈદેહકસ્ય તચ્ચ તાવચ્ચ દણ્ડઃ

02.21.21 શુલ્કસ્થાનાદ્ ગોમયપલાલં પ્રમાણં કૃત્વાઽપહરત ઉત્તમઃ સાહસદણ્ડઃ

02.21.22 શસ્ત્રવર્મકવચલોહરથરત્નધાન્યપશૂનાં અન્યતમં અનિર્વાહ્યં નિર્વાહયતો યથાઽવઘુષિતો દણ્ડઃ પણ્યનાશશ્ચ

02.21.23 તેષાં અન્યતમસ્યાનયને બહિરેવ ઉચ્છુલ્કો વિક્રયઃ

02.21.24 અન્તપાલઃ સ-પાદપણિકાં વર્તનીં ગૃહ્ણીયાત્ પણ્યવહનસ્ય, પણિકાં એકખુરસ્ય, પશૂનાં અર્ધપણિકાં ક્ષુદ્રપશૂનાં પાદિકાં, અંસભારસ્ય માષિકામ્

02.21.25 નષ્ટાપહૃતં ચ પ્રતિવિદધ્યાત્

02.21.26 વૈદેશ્યં સાર્થં કૃતસારફલ્ગુભાણ્ડવિચયનં અભિજ્ઞાનં મુદ્રાં ચ દત્ત્વા પ્રેષયેદ્ અધ્યક્ષસ્ય

02.21.27 વૈદેહકવ્યઞ્જનો વા સાર્થપ્રમાણં રાજ્ઞઃ પ્રેષયેત્

02.21.28 તેન પ્રદેશેન રાજા શુલ્કાધ્યક્ષસ્ય સાર્થપ્રમાણં ઉપદિશેત્ સર્વજ્ઞખ્યાપનાર્થમ્

02.21.29 તતઃ સાર્થં અધ્યક્ષોઽભિગમ્ય બ્રૂયાત્ ઇદં અમુષ્યાં ઉષ્ય ચ સારભાણ્ડં ફલ્ગુભાણ્ડં ચ, ન નિહૂહિતવ્યં, એષ રાજ્ઞઃ પ્રભાવઃ ઇતિ

02.21.30 નિહૂહતઃ ફલ્ગુભાણ્ડં શુલ્કાષ્ટગુણો દણ્ડઃ, સારભાણ્ડં સર્વાપહારઃ

02.21.31ab રાષ્ટ્રપીડાકરં ભાણ્ડં ઉચ્છિન્દ્યાદ્ અફલં ચ યત્ ।

02.21.31chd મહા ઉપકારં ઉચ્છુલ્કં કુર્યાદ્ બીજં ચ દુર્લભમ્ (ઇતિ)

Chapt . Tariff of duties and tolls

02.22.01 બાહ્યં આભ્યન્તરં ચાતિથ્યમ્

02.22.02 નિષ્ક્રામ્યં પ્રવેશ્યં ચ શુલ્કમ્

02.22.03 પ્રવેશ્યાનાં મૂલ્યપઞ્ચભાગઃ

02.22.04 પુષ્પફલશાકમૂલકન્દવાલ્લિક્યબીજશુષ્કમત્સ્યમાંસાનાં ષડ્ભાગં ગૃહ્ણીયાત્

02.22.05 શઙ્ખવજ્રમણિમુક્તાપ્રવાલહારાણાં તજ્જાતપુરુષૈઃ કારયેત્ કૃતકર્મપ્રમાણકાલવેતનફલનિષ્પત્તિભિઃ

02.22.06 ક્ષૌમદુકૂલક્રિમિતાનકઙ્કટહરિતાલમનઃશિલાઽઞ્જનહિઙ્ગુલુકલોહવર્ણધાતૂનાં ચન્દનાગુરુકટુકકિણ્વાવરાણાં ચર્મદન્તાસ્તરણપ્રાવરણક્રિમિજાતાનાં આજ એડકસ્ય ચ દશભાગઃ પઞ્ચદશભાગો વા

02.22.07 વસ્ત્રચતુષ્પદદ્વિપદસૂત્રકાર્પાસગન્ધભૈષજ્યકાષ્ઠવેણુવલ્કલચર્મમૃદ્ભાણ્ડાનાં ધાન્યસ્નેહક્ષારલવણમદ્યપક્વાન્નાદીનાં ચ વિંશતિભાગઃ પઞ્ચવિંશતિભાગો વા

02.22.08 દ્વારાદેયં શુલ્કં પઞ્ચભાગઃ આનુગ્રાહિકં વા યથાદેશ ઉપકારં સ્થાપયેત્

02.22.09 જાતિભૂમિષુ ચ પણ્યાનાં વિક્રયઃ

02.22.10 ખનિભ્યો ધાતુપણ્યાદાને ષટ્છતં અત્યયઃ

02.22.11 પુષ્પફલવાટેભ્યઃ પુષ્પફલાદાને ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ

02.22.12 ષણ્ડેભ્યઃ શાકમૂલકન્દાદાને પાદ ઊનં દ્વિપઞ્ચાશત્પણો દણ્ડઃ

02.22.13 ક્ષેત્રેભ્યઃ સર્વસસ્યાદાને ત્રિપઞ્ચાશત્પણઃ

02.22.14 પણોઽધ્યર્ધપણશ્ચ સીતાઽત્યયઃ

02.22.15ab અતો નવપુરાણાં દેશજાતિચરિત્રતઃ ।

02.22.15chd પણ્યાનાં સ્થાપયેચ્છુલ્કં અત્યયં ચાપકારતઃ (ઇતિ)

Chapt . Superintendent of yarns (and textiles)

02.23.01 સૂત્રાધ્યક્ષઃ સૂત્રવર્મવસ્ત્રરજ્જુવ્યવહારં તજ્જાતપુરુષૈઃ કારયેત્

02.23.02 ઊર્ણાવલ્કકાર્પાસતૂલશણક્ષૌમાણિ ચ વિધવાન્યઙ્ગાકન્યાપ્રવ્રજિતાદણ્ડપ્રતિકારિણીભી રૂપાજીવામાતૃકાભિર્વૃદ્ધરાજદાસીભિર્વ્યુપરત ઉપસ્થાનદેવદાસીભિશ્ચ કર્તયેત્

02.23.03 શ્લક્ષ્ણસ્થૂલમધ્યતાં ચ સૂત્રસ્ય વિદિત્વા વેતનં કલ્પયેત્, બહ્વલ્પતાં ચ

02.23.04 સૂત્રપ્રમાણ જ્ઞાત્વા તૈલામલક ઉદ્વર્તનૈરેતા અનુગૃહ્ણીયાત્

02.23.05 તિથિષુ પ્રતિમાનદાનૈશ્ચ કર્મ કારયિતવ્યાઃ

02.23.06 સૂત્રહ્રાસે વેતનહ્રાસો દ્રવ્યસારાત્

02.23.07 કૃતકર્મપ્રમાણકાલવેતનફલનિષ્પત્તિભિઃ કારુભિશ્ચ કર્મ કારયેત્, પ્રતિસંસર્ગં ચ ગચ્છેત્

02.23.08 ક્ષૌમદુકૂલક્રિમિતાનરાઙ્કવકાર્પાસસૂત્રવાનકર્માન્તાંશ્ચ પ્રયુઞ્જાનો ગન્ધમાલ્યદાનૈરન્યૈશ્ચાઉપગ્રાહિકૈરારાધયેત્

02.23.09 વસ્ત્રાસ્તરણપ્રાવરણવિકલ્પાન્ ઉત્થાપયેત્

02.23.10 કઙ્કટકર્માન્તાંશ્ચ તજ્જાતકારુશિલ્પિભિઃ કારયેત્

02.23.11 યાશ્ચાનિષ્કાસિન્યઃ પ્રોષિતા વિધવા ન્યઙ્ગાઃ કન્યકા વાઽઽત્માનં બિભૃયુઃ તાઃ સ્વદાસીભિરનુસાર્ય સ-ઉપગ્રહં કર્મ કારયિતવ્યાઃ

02.23.12 સ્વયં આગચ્છન્તીનાં વા સૂત્રશાલાં પ્રત્યુષસિ ભાણ્ડવેતનવિનિમયં કારયેત્

02.23.13 સૂત્રપરીક્ષાઽર્થમાત્રઃ પ્રદીપઃ

02.23.14 સ્ત્રિયા મુખસન્દર્શનેઽન્યકાર્યસમ્ભાષાયાં વા પૂર્વઃ સાહસદણ્ડઃ, વેતનકાલાતિપાતને મધ્યમઃ, અકૃતકર્મવેતનપ્રદાને ચ

02.23.15 ગૃહીત્વા વેતનં કર્માકુર્વત્યા અઙ્ગુષ્ઠસન્દંશં દાપયેત્, ભક્ષિતાપહૃતાવસ્કન્દિતાનાં ચ

02.23.16 વેતનેષુ ચ કર્મકરાણાં અપરાધતો દણ્ડઃ

02.23.17 રજ્જુવર્તકૈર્વર્મકારૈશ્ચ સ્વયં સંસૃજ્યેત

02.23.18 ભાણ્ડાનિ ચ વરત્રાદીનિ વર્તયેત્

02.23.19ab સૂત્રવલ્કમયી રજ્જુર્વરત્રા વૈત્રવૈણવીઃ ।

02.23.19chd સાન્નાહ્યા બન્ધનીયાશ્ચ યાનયુગ્યસ્ય કરયેત્ (ઇતિ)

Chapt . Director of agriculture

02.24.01 સીતાઽધ્યક્ષઃ કૃષિતન્ત્રશુલ્બવૃક્ષાયુર્વેદજ્ઞઃ તજ્જ્ઞસખો વા સર્વધાન્યપુષ્પફલશાકકન્દમૂલવાલ્લિક્યક્ષૌમકાર્પાસબીજાનિ યથાકાલં ગૃહ્ણીયાત્

02.24.02 બહુહલપરિકૃષ્ટાયાં સ્વભૂમૌ દાસકર્મકરદણ્ડપ્રતિકર્તૃભિર્વાપયેત્

02.24.03 કર્ષણયન્ત્ર ઉપકરણબલીવર્દૈશ્ચ એષાં અસઙ્ગં કારયેત્, કારુભિશ્ચ કર્મારકુટ્ટાકમેદકરજ્જુવર્તકસર્પગ્રાહાદિભિશ્ચ

02.24.04 તેષાં કર્મફલવિનિપાતે તત્ફલહાનં દણ્ડઃ

02.24.05 ષોડશદ્રોણં જાઙ્ગલાનાં વર્ષપ્રમાણં, અધ્યર્ધં આનૂપાનાં દેશવાપાનાં, અર્ધત્રયોદશાશ્મકાનાં, ત્રયોવિંશતિરવન્તીનાં, અમિતં અપરાન્તાનાં હૈમન્યાનાં ચ, કુલ્યાઽઽવાપાનાં ચ કાલતઃ

02.24.06 વર્ષત્રિભાગઃ પૂર્વપશ્ચિમમાસયોઃ, દ્વૌ ત્રિભાગૌ મધ્યમયોઃ - સુષમારૂપમ્

02.24.07 તસ્ય ઉપલબ્ધિર્બૃહસ્પતેઃ સ્થાનગમનગર્ભાધાનેભ્યઃ શુક્ર ઉદયાસ્તમયચારેભ્યઃ સૂર્યસ્ય પ્રકૃતિવૈકૃતાચ્ચ

02.24.08 સૂર્યાદ્ બીજસિદ્ધિઃ, બૃહસ્પતેઃ સસ્યાનાં સ્તમ્બકારિતા, શુક્રાદ્ વૃષ્ટિઃ । ઇતિ

02.24.09ab ત્રયઃ સપ્તાહિકા મેઘા અશીતિઃ કણશીકરાઃ ।

02.24.09chd ષષ્ટિરાતપમેઘાનાં એષા વૃષ્ટિઃ સમા હિતા

02.24.10ab વાતં આતપયોગં ચ વિભજન્ યત્ર વર્ષતિ ।

02.24.10chd ત્રીન્ કરીષાંશ્ચ જનયંઃ તત્ર સસ્યાગમો ધ્રુવઃ

02.24.11 તતઃ પ્રભૂત ઉદકં અલ્પ ઉદકં વા સસ્યં વાપયેત્

02.24.12 શાલિવ્રીહિકોદ્રવતિલપ્રિયઙ્ગુ।ઉદારકવરકાઃ પૂર્વવાપાઃ

02.24.13 મુદ્ગમાષશૈમ્બ્યા મધ્યવાપાઃ

02.24.14 કુસુમ્ભમસૂરકુલત્થયવગોધૂમકલાયાતસીસર્ષપાઃ પશ્ચાદ્વાપાઃ

02.24.15 યથા।ઋતુવશેન વા બીજવાપાઃ

02.24.16 વાપાતિરિક્તં અર્ધસીતિકાઃ કુર્યુઃ, સ્વવીર્ય ઉપજીવિનો વા ચતુર્થપઞ્ચભાગિકાઃ

U2.24.17 યથા ઇષ્ટં અનવસિતભાગં દદ્યુઃ, અન્યત્ર કૃચ્છ્રેભ્યઃ

U2.24.18 સ્વસેતુભ્યો હસ્તપ્રાવર્તિમં ઉદકભાગં પઞ્ચમં દદ્યુઃ, સ્કન્ધપ્રાવર્તિમં ચતુર્થં, સ્રોતોયન્ત્રપ્રાવર્તિમં ચ તૃતીયં, ચતુર્થં નદીસરસ્તટાકકૂપ ઉદ્ઘાટમ્

U2.24.19 કર્મ ઉદકપ્રમાણેન કૈદારં હૈમનં ગ્રૈષ્મિકં વા સસ્યં સ્થાપયેત્

U2.24.20 શાલ્ય્।આદિ જ્યેષ્ઠં, ષણ્ડો મધ્યમઃ, ઇક્ષુઃ પ્રત્યવરઃ

02.24.21 ઇક્ષવો હિ બહ્વ્-આબાધા વ્યયગ્રાહિણશ્ચ

02.24.22 ફેનાઘાતો વલ્લીફલાનાં, પરીવાહાન્તાઃ પિપ્પલીમૃદ્વીક ઇક્ષૂણાં, કૂપપર્યન્તાઃ શાકમૂલાનાં, હરણીપર્યન્તા હરિતકાનાં, પાલ્યો લવાનાં ગન્ધભૈષજ્ય ઉશીરહ્રીબેરપિણ્ડાલુકાદીનામ્

02.24.23 યથાસ્વં ભૂમિષુ ચ સ્થાલ્યાશ્ચાનૂપ્યાશ્ચોષધીઃ સ્થાપયેત્

02.24.24 તુષારપાયનમુષ્ણશોષણં ચાસપ્તરાત્રાદ્ ઇતિ ધાન્યબીજાનાં, ત્રિરાત્રં વા પઞ્ચરાત્રં વા કોશીધાન્યાનાં, મધુઘૃતસૂકરવસાભિઃ શકૃદ્યુક્તાભિઃ કાણ્ડબીજાનાં છેદલેપો, મધુઘૃતેન કન્દાનાં, અસ્થિબીજાનાં શકૃદ્-આલેપઃ, શાખિનાં ગર્તદાહો ગોઽસ્થિશકૃદ્ભિઃ કાલે દૌહ્ર્દં ચ

02.24.25 પ્રરૂઢાંશ્ચાશુષ્કકટુમત્સ્યાંશ્ચ સ્નુહિક્ષીરેણ પાયયેત્

02.24.26ab કાર્પાસસારં નિર્મોકં સર્પસ્ય ચ સમાહરેત્ ।

02.24.26chd ન સર્પાઃ તત્ર તિષ્ઠન્તિ ધૂમો યત્ર એષ તિષ્ઠતિ

02.24.27 સર્વજીજાનાં તુ પ્રથમવાપે સુવર્ણ ઉદકસમ્પ્લુતાં પૂર્વમુષ્ટિં વાપયેદ્, અમું ચ મન્ત્રં બ્રૂયાત્ - પ્રજાપતયે કાશ્યપાય દેવાય ચ નમઃ સદા । સીતા મે ઋધ્યતાં દેવી બીજેષુ ચ ધનેષુ ચ

02.24.28 ષણ્ડવાટગોપાલકદાસકર્મકરેભ્યો યથાપુરુષપરિવાપં ભક્તં કુર્યાત્, સ-પાદપણિકં ચ માસં દદ્યાત્

02.24.29 કર્માનુરૂપં કારુભ્યો ભક્તવેતનમ્

02.24.30 પ્રશીર્ણં ચ પુષ્પફલં દેવકાર્યાર્થં વ્રીહિયવં આગ્રયણાર્થં શ્રોત્રિયાઃ તપસ્વિનશ્ચાહરેયુઃ, રાશિમૂલં ઉઞ્છવૃત્તયઃ

02.24.31ab યથાકાલં ચ સસ્યાદિ જાતં જાતં પ્રવેશયેત્ ।

02.24.31chd ન ક્ષેત્રે સ્થાપયેત્ કિઞ્ચિત્ પલાલં અપિ પણ્ડિતઃ

02.24.32ab પ્રાકારાણાં સમુચ્છ્રયાન્ વલભીર્વા તથાવિધાઃ ।

02.24.32chd ન સંહતાનિ કુર્વીત ન તુચ્છાનિ શિરાંસિ ચ

02.24.33ab ખલસ્ય પ્રકરાન્ કુર્યાન્ મણ્ડલાન્તે સમાશ્રિતાન્ ।

02.24.33chd અનગ્નિકાઃ સ-ઉદકાશ્ચ ખલે સ્યુઃ પરિકર્મિણઃ (ઇતિ)

Chapt . Controller of spiritual liquors

02.25.01 સુરાઽધ્યક્ષઃ સુરાકિણ્વવ્યવહારાન્ દુર્ગે જનપદે સ્કન્ધાવારે વા તજ્જાતસુરાકિણ્વવ્યવહારિભિઃ કારયેદ્, એકમુખં અનેકમુખં વા વિક્રયક્રયવશેન વા

02.25.02 ષટ્શતં અત્યયં અન્યત્ર કર્તૃક્રેતૃવિક્રેતૄણાં સ્થાપયેત્

02.25.03 ગ્રામાદ્ અનિર્ણયણં અસમ્પાતં ચ સુરાયાઃ, પ્રમાદભયાત્ કર્મસુ ઞ્જિર્દિષ્ટાનાં, મર્યાદાતિક્રમભયાદ્ આર્યાણાં, ઉત્સાહભયાચ્ચ તીક્ષ્ણાનામ્

02.25.04 લક્ષિતં અલ્પં વા ચતુર્ભાગં અર્ધકુડુબં કુડુબં અર્ધપ્રસ્થં પ્રસ્થં વા ઇતિ જ્ઞાતશૌચા નિર્હરેયુઃ

02.25.05 પાનાગારેષુ વા પિબેયુરસઞ્ચારિણઃ

02.25.06 નિક્ષેપ ઉપનિધિપ્રયોગાપહૃતાનાં અનિષ્ટ ઉપગતાનાં ચ દ્રવ્યાણાં જ્ઞાનાર્થં અસ્વામિકં કુપ્યં હિરણ્યં ચ ઉપલભ્ય નિક્ષેપ્તારં અન્યત્ર વ્યપદેશેન ગ્રાહયેદ્, અતિવ્યયકર્તારં અનાયતિવ્યયં ચ

02.25.07 ન ચાનર્ઘેણ કાલિકાં વા સુરાં દદ્યાદ્, અન્યત્ર દુષ્ટસુરાયાઃ

02.25.08 તાં અન્યત્ર વિક્રાપયેત્

02.25.09 દાસકર્મકરેભ્યો વા વેતનં દદ્યાત્

02.25.10 વાહનપ્રતિપાનં સૂકરપોષણં વા દદ્યાત્

02.25.11 પાનાગારાણ્ય્ઽનેકકક્ષ્યાણિ વિભક્તશયનાસનવન્તિ પાન ઉદ્દેશાનિ ગન્ધમાલ્ય ઉદકવન્તિ ઋતુસુખાનિ કારયેત્

02.25.12 તત્રસ્થાઃ પ્રકૃત્ય્ઽઉત્પત્તિકૌ વ્યયૌ ગૂઢા વિદ્યુઃ, આગન્તૂંશ્ચ

02.25.13 ક્રેતૃણાં મત્તસુપ્તાનાં અલઙ્કારાત્છાદનહિરણ્યાનિ ચ વિદ્યુઃ

02.25.14 તન્નાશે વણિજઃ તચ્ચ તાવચ્ચ દણ્ડં દદ્યુઃ

02.25.15 વણિજશ્ઃ તુ સંવૃતેષુ કક્ષ્યાવિભાગેષુ સ્વદાસીભિઃ પેશલરૂપાભિરાગન્તૂનાં વાસ્તવ્યાનાં ચાર્યરૂપાણાં મત્તસુપ્તાનાં ભાવં વિદ્યુઃ

02.25.16 મેદકપ્રસન્નાસવારિષ્ટમૈરેયમધૂનામ્

02.25.17 ઉદકદ્રોણં તણ્ડુલાનાં અર્ધાઢકં ત્રયઃ પ્રસ્થાઃ કિણ્વસ્ય ઇતિ મેદકયોગઃ

02.25.18 દ્વાદશાઢકં પિષ્ટસ્ય પઞ્ચ પ્રસ્થાઃ કિણ્વસ્ય ક્રમુકત્વક્ફલયુક્તો વા જાતિસમ્ભારઃ પ્રસન્નાયોગઃ

02.25.19 કપિત્થતુલા ફાણિતં પઞ્ચતૌલિકં પ્રસ્થો મધુન ઇત્યાસવયોગઃ

U2.25.20 પાદ્ઽધિકો જ્યેષ્ઠઃ પાદહીનઃ કનિષ્ઠઃ

U2.25.21 ચિકિત્સકપ્રમાણાઃ પ્રત્યેકશો વિકારાણાં અરિષ્ટાઃ

U2.25.22 મેષશ◌ૃઙ્ગીત્વક્ક્વાથાભિષુતો ગુડપ્રતીવાપઃ પિપ્પલીમરિચસમ્ભારઃ ત્રિફલાયુક્તો વા મૈરેયઃ

U2.25.23 ગુડયુક્તાનાં વા સર્વેષાં ત્રિફલાસમ્ભારઃ

U2.25.24 મૃદ્વીકારસો મધુ

u2.25.25 તસ્ય સ્વદેશો વ્યાખ્યાનં કાપિશાયનં હારહૂરકં ઇતિ

U2.25.26 માષકલનીદ્રોણમામં સિદ્ધં વા ત્રિભાગાધિકતણ્ડુલં મોરટાદીનાં કાર્ષિકભાગયુક્તં કિણ્વબન્ધઃ

02.25.27 પાઠાલોધ્રતેજોવત્ય્।એલાવાલુકમધુકમધુરસાપ્રિયઙ્ગુદારુહરિદ્રામરિચપિપ્પલીનાં ચ પઞ્ચકાર્ષિકઃ સમ્ભારયોગો મેદકસ્ય પ્રસન્નાયાશ્ચ

02.25.28 મધુકનિર્યૂહયુક્તા કટશર્કરા વર્ણપ્રસાદની ચ

02.25.29 ચોચચિત્રકવિલઙ્ગગજપિપ્પલીનાં ચ કાર્ષિકઃ ક્રમુકમધુકમુસ્તાલોધ્રાણાં દ્વિકાર્ષિકશ્ચાસવસમ્ભારઃ

02.25.30 દશભાગશ્ચ એષાં બીજબન્ધઃ

02.25.31 પ્રસન્નાયોગઃ શ્વેતસુરાયાઃ

02.25.32 સહકારસુરા રસ ઉત્તરા બીજ ઉત્તરા વા મહાસુરા સમ્ભારિકી વા

02.25.33 તાસાં મોરટાપલાશપત્તૂરમેષશ◌ૃઙ્ગીકરઞ્જક્ષીરવૃક્ષકષાયભાવિતં દગ્ધકટશર્કરાચૂર્ણં લોધ્રચિત્રકવિલઙ્ગપાઠામુસ્તાકલિઙ્ગયવદારુહરિદ્ર ઇન્દીવરશતપુષ્પાપામાર્ગસપ્તપર્ણનિમ્બાસ્ફોતકલ્કાર્ધયુક્તં અન્તર્નખો મુષ્ટિઃ કુમ્ભીં રાજપેયાં પ્રસાદયતિ

02.25.34 ફાણિતઃ પઞ્ચપલિકશ્ચાત્ર રસવૃદ્ધિર્દેયઃ

02.25.35 કુટુમ્બિનઃ કૃત્યેષુ શ્વેતસુરાં, ઔષધાર્થં વારિષ્ટં, અન્યદ્ વા કર્તું લભેરન્

02.25.36 ઉત્સવસમાજયાત્રાસુ ચતુર્ઽહઃ સૌરિકો દેયઃ

02.25.37 તેષ્વનનુજ્ઞાતાનાં પ્રહવનાન્તં દૈવસિકં અત્યયં ગૃહ્ણીયાત્

02.25.38 સુરાકિણ્વવિચયં સ્ત્રિયો બાલાશ્ચ કુર્યુઃ

02.25.39 અરાજપણ્યાઃ પઞ્ચકં શતં શુલ્કં દદ્યુઃ, સુરકામેદકારિષ્ટમધુફલામ્લામ્લશીધૂનાં ચ

02.25.40ab અહ્નશ્ચ વિક્રયં જ્ઞાત્વા વ્યાજીં માનહિરણ્યયોઃ ।

02.25.40chd તથા વૈધરણં કુર્યાદ્ ઉચિતં ચાનુવર્તયેત્ (ઇતિ)

Chapt . Supervisor of (animal-)slaughter

02.26.01 સૂનાઽધ્યક્ષઃ પ્રદિષ્ટાભયાનાં અભયવનવાસિનાં ચ મૃગપશુપક્ષિમત્સ્યાનાં બન્ધવધહિંસાયાં ઉત્તમં દણ્ડં કારયેત્, કુટુમ્બિનાં અભયવનપરિગ્રહેષુ મધ્યમમ્

02.26.02 અપ્રવૃત્તવધાનાં મત્સ્યપક્ષિણાં બન્ધવધહિંસાયાં પાદ ઊનસપ્તવિંશતિપણં અત્યયં કુર્યાત્, મૃગપશૂનાં દ્વિગુણમ્

02.26.03 પ્રવૃત્તહિંસાનાં અપરિગૃહીતાનાં ષડ્ભાગં ગૃહ્ણીયાત્, મત્સ્યપક્ષિણાં દશભાગં વાઽધિકં, મૃગપશૂનાં શુલ્કં વાઽધિકમ્

02.26.04 પક્ષિમૃગાણાં જીવત્ ષડ્ભાગં અભયવનેષુ પ્રમુઞ્ચેત્

02.26.05 સામુદ્રહસ્ત્યશ્વપુરુષવૃષગર્દભાકૃતયો મત્સ્યાઃ સારસા નાદેયાઃ તટાકકુલ્યા ઉદ્ભવા વા ક્રૌઞ્ચ ઉત્ક્રોશકદાત્યૂહહંસચક્રવાકજીવઞ્જીવકભૃઙ્ગરાજચકોરમત્તકોકિલમયૂરશુકમદનશારિકા વિહારપક્ષિણો મઙ્ગલ્યાશ્ચાન્યેઽપિ પ્રાણિનઃ પક્ષિમૃગા હિંસાબાધેભ્યો રક્ષ્યાઃ

02.26.06 રક્ષાઽતિક્રમે પૂર્વઃ સાહસદણ્ડઃ

02.26.07 મૃગપશૂનાં અનસ્થિમાંસં સદ્યોહતં વિક્રીણીરન્

02.26.08 અસ્થિમતઃ પ્રતિપાતં દદ્યુઃ

02.26.09 તુલાહીને હીનાષ્ટગુણમ્

02.26.10 વત્સો વૃષો ધેનુશ્ચ એષાં અવધ્યાઃ

02.26.11 ઘ્નતઃ પઞ્ચાશત્કો દણ્ડઃ, ક્લિષ્ટઘાતં ઘાતયતશ્ચ

02.26.12 પરિશૂનં અશિરઃપાદાસ્થિ વિગન્ધં સ્વયંમૃતં ચ ન વિક્રીણીરન્

02.26.13 અન્યથા દ્વાદશપણો દણ્ડઃ

02.26.14ab દુષ્ટાઃ પશુમૃગવ્યાલા મત્સ્યશ્ચાભયચારિણઃ ।

02.26.14chd અન્યત્ર ગુપ્તિસ્થાનેભ્યો વધબન્ધં અવાપ્નુયુઃ (ઇતિ)

Chapt . Superintendent of courtesans

02.27.01 ગણિકાઽધ્યક્ષો ગણિકાઽન્વયાં અગણિકાઽન્વયાં વા રૂપયૌવનશિલ્પસમ્પન્નાં સહસ્રેણ ગણિકાં કારયેત્, કુટુમ્બાર્ધેન પ્રતિગણિકામ્

02.27.02 નિષ્પતિતાપ્રેતયોર્દુહિતા ભગિની વા કુટુમ્બં ભરેત, માતા વા પ્રતિગણિકાં સ્થાપયેત્

02.27.03 તાસાં અભાવે રાજા હરેત્

02.27.04 સૌભાગ્યાલઙ્કારવૃદ્ધ્યા સહસ્રેણ વારં કનિષ્ઠં મધ્યમં ઉત્તમં વાઽઽરોપયેત્ છત્રભૃઙ્ગારવ્યજનશિબિકાપીઠિકારથેષુ ચ વિશેષાર્થમ્

02.27.05 સૌભાગ્યભઙ્ગે માતૃકાં કુર્યાત્

02.27.06 નિષ્ક્રયશ્ચતુર્વિંશતિસાહસ્રો ગણિકાયાઃ, દ્વાદશસાહસ્રો ગણિકાપુત્રસ્ય

02.27.07 અષ્ટવર્ષાત્ પ્રભૃતિ રાજ્ઞઃ કુશીલવકર્મ કુર્યાત્

02.27.08 ગણિકાદાસી ભગ્નભોગા કોષ્ઠાગારે મહાનસે વા કર્મ કુર્યાત્

02.27.09 અવિશન્તી સપાદપણં અવરુદ્ધા માસવેતનં દદ્યાત્

02.27.10 ભોગં દાયમાયં વ્યયં આયતિં ચ ગણિકાયા નિબન્ધયેત્, અતિવ્યયકર્મ ચ વારયેત્

02.27.11 માતૃહસ્તાદ્ અન્યત્ર અભરણન્યાસે સપાદચતુષ્પણો દણ્ડઃ

02.27.12 સ્વાપતેયં વિક્રયં આધાનં વા નયન્ત્યાઃ સપાદપઞ્ચાશત્પણઃ પણોઽર્ધપણચ્છેદને

02.27.13 અકામાયાઃ કુમાર્યા વા સાહસે ઉત્તમો દણ્ડઃ, સકામાયાઃ પૂર્વઃ સાહસદણ્ડઃ

02.27.14 ગણિકાં અકામાં રુન્ધતો નિષ્પાતયતો વા વ્રણવિદારણેન વા રૂપં। ઉપઘ્નતઃ સહસ્રં દણ્ડઃ

02.27.15 સ્થાન્વિશેષેણ વા દણ્ડવૃદ્ધિઃ આનિષ્ક્રયદ્વિગુણાત્

02.27.16 પ્રાપ્તાધિકારં ગણિકાં ઘતયતો નિષ્ક્રયત્રિગુણો દણ્ડઃ

02.27.17 માતૃકાદુહિતૃકારૂપદાસીનાં ઘાતે ઉત્તમઃ સાહસદણ્ડઃ

02.27.18 સર્વત્ર પ્રથમેઽપરાધે પ્રથમઃ, દ્વિતીયે દ્વિગુણઃ, તૃતીયે ત્રિગુણઃ, ચતુર્થે યથાકામી સ્યાત્

02.27.19 રાજાજ્ઞયા પુરુષં અનભિગચ્છન્તી ગણિકા શિફાસહસ્રં લભીત, પઞ્ચસહસ્રં વા દણ્ડઃ

02.27.20 ભોગં ગૃહીત્વા દ્વિષત્યા ભોગદ્વિગુણો દણ્ડઃ

02.27.21 વસતિભોગાપહારે ભોગં અષ્ટગુણં દદ્યાદ્ અન્યત્ર વ્યાધિપુરુષદોષેભ્યઃ

02.27.22 પુરુષં ઘ્નત્યાશ્ચિતાપ્રતાપેઽપ્સુ પ્રવેશનં વા

02.27.23 ગણિકાભરણં અર્થં ભોગં વાઽપહરતોઽષ્ટગુણો દણ્ડઃ

02.27.24 ગણિકા ભોગં આયતિં પુરુષં ચ નિવેદયેત્

02.27.25 એતેન નટનર્તકગાયનવાદકવાગ્જીવનકુશીલવપ્લવકસૌભિકચારણાનાં સ્ત્રીવ્યવહારિણાં સ્ત્રિયો ગૂઢાજીવાશ્ચ વ્યાખ્યાતાઃ

02.27.26 તેષાં તૂર્યં આગન્તુકં પઞ્ચપણં પ્રેક્ષાવેતનં દદ્યાત્

02.27.27 રૂપાજીવા ભોગદ્વયગુણં માસં દદ્યુઃ

02.27.28 ગીતવાદ્યપાઠ્યનૃત્યનાટ્યાક્ષરચિત્રવીણાવેણુમૃદઙ્ગપરચિત્તજ્ઞાનગન્ધમાલ્યસમ્યૂહનસંવાદનસંવાહનવૈશિકકલાજ્ઞા ગણિકા દાસી રઙ્ગ ઉપજીવિનીશ્ચ ગ્રાહયતો રાજમણ્ડલાદ્ આજીવં કુર્યાત્

02.27.29 ગણિકાપુત્રાન્ રઙ્ગ ઉપજીવિનાં ચ મુખ્યાન્નિષ્પાદયેયુઃ, સર્વતાલાવચરાણાં ચ

02.27.30ab સંજ્ઞાભાષાઽન્તરજ્ઞાશ્ચ સ્ત્રિયઃ તેષાં અનાત્મસુ ।

02.27.30chd ચારઘાતપ્રમાદાર્થં પ્રયોજ્યા બન્ધુવાહનાઃ  (ઇતિ)

Chapt . Controller of shipping

02.28.01 નાવ્ડધ્યક્ષઃ સમુદ્રસમ્યાનનદીમુખતરપ્રચારાન્ દેવસરોવિસરોનદીતરાંશ્ચ સ્થાનીયાદિષ્વવેક્ષેત

02.28.02 તદ્વેલાકૂલગ્રામાઃ ક્લૃપ્તં દદ્યુઃ

02.28.03 મત્સ્યબન્ધકા નૌકાભાટકં ષડ્ભાગં દદ્યુઃ

02.28.04 પત્તનાનુવૃત્તં શુલ્કભાગં વણિજો દદ્યુઃ, યાત્રાવેતનં રાજનૌભિઃ સમ્પતન્તઃ

02.28.05 શઙ્ખમુક્તાગ્રાહિણો નૌભાટકં દદ્યુઃ, સ્વનૌભિર્વા તરેયુઃ

02.28.06 અધ્યક્ષશ્ચ એષાં ખન્ય્ડધ્યક્ષેણ વ્યાખ્યાતઃ

02.28.07 પત્તનાધ્યક્ષનિબદ્ધં પણ્યપત્તનચારિત્રં નાવ્ડધ્યક્ષઃ પાલયેત્

02.28.08 મૂઢવાતાહતા નાવઃ પિતા ઇવાનુગૃહ્ણીયાત્

02.28.09 ઉદકપ્રાપ્તં પણ્યં અશુલ્કં અર્ધશુલ્કં વા કુર્યાત્

02.28.10 યથાનિર્દિષ્ટાશ્ચ એતાઃ પણ્યપત્તનયાત્રાકાલેષુ પ્રેષયેત્

02.28.11 સમ્યાતીર્નાવઃ ક્ષેત્રાનુગતાઃ શુલ્કં યાચેત્

02.28.12 હિંસ્રિકા નિર્ઘાતયેત્, અમિત્રવિષયાતિગાઃ પણ્યપત્તનચારિત્ર ઉપઘાતિકાશ્ચ

02.28.13 શાસકનિર્યામકદાત્રાશ્મિગ્રાહક ઉત્સેચકાધિષ્ઠિતાશ્ચ મહાનાવો હેમન્તગ્રીષ્મતાર્યાસુ મહાનદીષુ પ્રયોજયેત્, ક્ષુદ્રિકાઃ ક્ષુદ્રિકાસુ વર્ષાસ્રાવિણીષુ

02.28.14 બાધતીર્થાશ્ચ એતાઃ કાર્યા રાજદ્વિષ્ટકારિણાં તરણભયાત્

02.28.15 અકાલેડતીર્થે ચ તરતઃ પૂર્વઃ સાહસદણ્ડઃ

02.28.16 કાલે તીર્થે ચાનિષૃષ્ટતારિણઃ પાદ ઊનસપ્તવિંશતિપણઃ તરાત્યયઃ

02.28.17 કૈવર્તકાષ્ટતૃણભારપુષ્પફલવાટષણ્ડગોપાલકાનાં અનત્યયઃ, સમ્ભાવ્યદૂતાનુપાતિનાં ચ સેનાભાણ્ડપ્રયોગાણાં ચ સ્વતરણૈઃ તરતાં, બીજભક્તદ્રવ્ય ઉપસ્કરાંશ્ચાનૂપગ્રામાણાં તારયતામ્

02.28.18 બ્રાહ્મણપ્રવ્રજિતબાલવૃદ્ધવ્યાધિતશાસનહરગર્ભિણ્યો નાવ્ડધ્યક્ષમુદ્રાભિઃ તરેયુઃ

02.28.19 કૃતપ્રવેશાઃ પારવિષયિકાઃ સાર્થપ્રમાણા વા પ્રવિશેયુઃ

02.28.20 પરસ્ય ભાર્યાં કન્યાં વિત્તં વાડપહરન્તં શવિત્તં વાડપહરન્તં શઙ્કિતં આવિગ્નં ઉદ્ભાણ્ડીકૃતં મહાભાણ્ડેન મૂર્ધ્નિ ભારેણાવચ્છાદયન્તં સદ્યોગૃહીતલિઙ્ગિનં અલિઙ્ગિનં વા પ્રવ્રજિતં અલક્ષ્યવ્યાધિતં ભયવિકારિણં ગૂઢસારભાણ્ડશાસનશસ્ત્રાગ્નિયોગં વિષહસ્તં દીર્ઘપથિકં અમુદ્રં ચ ઉપગ્રાહયેત્

02.28.21 ક્ષુદ્રપશુર્મનુષ્યશ્ચ સભારો માષકં દદ્યાત્, શિરોભારઃ કાયભારો ગવાશ્વં ચ દ્વૌ, ઉષ્ટ્રમહિષં ચતુરઃ, પઞ્ચ લઘુયાનં, ષડ્ ગોલિઙ્ગં, સપ્ત શકટં, પન્યભારઃ પાદમ્

02.28.22 તેન ભાણ્ડભારો વ્યાખ્યાતઃ

02.28.23 દ્વિગુણો મહાનદીષુ તરઃ

02.28.24 ક્લૃપ્તં આનૂપગ્રામા ભક્તવેતનં દદ્યુઃ

02.28.25 પ્રત્યન્તેષુ તરાઃ શુલ્કં આતિવાહિકં વર્તનીં ચ ગૃહ્ણીયુઃ, નિર્ગચ્છતશ્ચામુદ્રદ્રવ્યસ્ય ભાણ્ડં હરેયુઃ, અતિભારેણાવેલાયાં અતિર્થે તરતશ્ચ

02.28.26 પુરુષ ઉપકરણહીનાયાં અસંસ્કૃતાયાં વા નાવિ વિપન્નાયાં નાવ્ડધ્યક્ષો નષ્ટં વિનષ્ટં વાડભ્યાવહેત્

02.28.27ab સમાહવૃત્તાં આષાઢીં કાર્ત્તિકીં ચાન્તરા તરઃ ।

02.28.27chd કાર્મિકઃ પ્રત્યયં દદ્યાન્નિત્યં ચાહ્નિકં આવહેત્ (ઇતિ)

Chapt . Superintendent of cattle

02.29.01 ગોડધ્યક્ષો વેતન ઉપગ્રાહિકં કરપ્રતિકરં ભગ્ન ઉત્સૃષ્ટકં ભાગાનુપ્રવિષ્ટકં વ્રજપર્યગ્રં નષ્ટં વિનષ્ટં ક્ષીરઘૃતસઞ્જાતં ચ ઉપલભેત

02.29.02 ગોપાલકપિણ્ડારકદોહકમન્થકલુબ્ધકાઃ શતં શતં ધેનૂનાં હિરણ્યભૃતાઃ પાલયેયુઃ

02.29.03 ક્ષીરઘૃતભૃતા હિ વત્સાન્ ઉપહન્યુઃ । ઇતિ વેતન ઉપગ્રાહિકમ્

02.29.04 જરદ્ગુધેનુગર્ભિણીપષ્ઠૌહીવત્સતરીણાં સમવિભાગં રૂપશતં એકઃ પાલયેત્

02.29.05 ઘૃતસ્યાષ્ટૌ વારકાન્ પણિકં પુચ્છં અઙ્કચર્મ ચ વાર્ષિકં દદ્યાત્ । ઇતિ કરપ્રતિકરઃ

02.29.06 વ્યાધિતાન્યઙ્ગાડનન્યદોહીદુર્દોહાપુત્રઘ્નીનાં ચ સમવિભાગં રૂપશતં પાલયન્તઃ તજ્જાતિકં ભાગં દદ્યુઃ । ઇતિ ભગ્ન ઉત્સૃષ્ટકમ્

02.29.07 પરચક્રાટવીભયાદ્ અનુપ્રવિષ્ટાનાં પશૂનાં પાલનધર્મેણ દશભગં દદ્યુઃ । ઇતિ ભાગાનુપ્રવિષ્ટકમ્

02.29.08 વત્સા વત્સતરા દમ્યા વહિનો વૃષા ઉક્ષાણશ્ચ પુઙ્ગવાઃ, યુગવાહનશકટવહા વૃષભાઃ સૂનામહિષાઃ પૃષ્ટસ્કન્ધવાહિનશ્ચ મહિષાઃ, વત્સિકા વત્સતરી પષ્ટહુહી ગર્ભિણી ધેનુશ્ચાપ્રજાતા વન્ધ્યાશ્ચ ગાવો મહિષ્યશ્ચ, માસદ્વિમાસજાતાઃ તાસાં ઉપજા વત્સા વત્સિકાશ્ચ

02.29.09 માસદ્વિમાસજાતાન્ અઙ્કયેત્

02.29.10 માસદ્વિમાસપર્યુષિતં અઙ્કયેત્

02.29.11 અઙ્કં ચિહ્નં વર્ણં શૃઙ્ગાન્તરં ચ લક્ષણં એવં ઉપજા નિબન્ધયેત્ । ઇતિ વ્રજપર્યગ્રમ્

02.29.12 ચોરહૃતં અન્યયૂથપ્રવિષ્ટં અવલીનં વા નષ્ટમ્

02.29.13 પઙ્કવિષમવ્યાધિજરાતોયાહારાવસન્નં વૃક્ષતટકાષ્ઠશિલાડભિહતં ઈશાનવ્યાલસર્પગ્રાહદાવાગ્નિવિપન્નં વિનષ્ટમ્

02.29.14 પ્રમાદાદ્ અભ્યાવહેયુઃ

02.29.15 એવં રૂપાગ્રં વિદ્યાત્

02.29.16 સ્વયં હન્તા ઘાતયિતા હર્તા હારયિતા ચ વધ્યઃ

02.29.17 પરપશૂનાં રાજાઙ્કેન પરિવર્તયિતા રૂપસ્ય પૂર્વં સાહસદણ્ડં દદ્યાત્

02.29.18 સ્વદેશીયાનાં ચોરહૃતં પ્રત્યાનીય પણિતં રૂપં હરેત્

02.29.19 પરદેશીયાનાં મોક્ષયિતાડર્ધં હરેત્

02.29.20 બાલવૃદ્ધવ્યાધિતાનાં ગોપાલકાઃ પ્રતિકુર્યુઃ

02.29.21 લુબ્ધકશ્વગણિભિરપાસ્તઃ તેનાવ્યાલપરાબાધભયં ઋતુવિભક્તં અરણ્યં ચારયેયુઃ

02.29.22 સર્પવ્યાલત્રાસનાર્થં ગોચરાનુપાતજ્ઞાનાર્થં ચ ત્રસ્નૂનાં ઘણ્ટાતૂર્યં ચ બધ્નીયુઃ

02.29.23 સમવ્યૂઢતીર્થં અકર્દમગ્રાહં ઉદકં અવતારયેયુઃ પાલયેયુશ્ચ

02.29.24 સ્તેનવ્યાલસર્પગ્રાહગૃહીતં વ્યાધિજરાऽવસન્નં ચાવેદયેયુઃ, અન્યથા રૂપમૂલ્યં ભજેરન્

02.29.25 કારણમૃતસ્યાઙ્કચર્મ ગોમહિષસ્ય, કર્ણલક્ષણં અજાવિકાનાં, પુચ્છં અઙ્કચર્મ ચાશ્વખર ઉષ્ટ્રાણાં, બાલચર્મબસ્તિપિત્તસ્નાયુદન્તખુરશૃઙ્ગાસ્થીનિ ચાહરેયુઃ

02.29.26 માંસં આર્દ્રં શુષ્કં વા વિક્રીણીયુઃ

02.29.27 ઉદશ્વિત્શ્વવરાહેભ્યો દદ્યુઃ

02.29.28 કૂર્ચિકાં સેનાભક્તાર્થં આહરેયુઃ

02.29.29 કિલાટો ઘાણપિણ્યાકક્લેદાર્થઃ

02.29.30 પશુવિક્રેતા પાદિકં રૂપં દદ્યાત્

02.29.31 વર્ષાશરદ્ધેમન્તાન્ ઉભયતઃકાલં દુહ્યુઃ, શિશિરવસન્તગ્રીષ્માન્ એકકાલમ્

02.29.32 દ્વિતીયકાલદોગ્ધુરઙ્ગુષ્ઠચ્છેદો દણ્ડઃ

02.29.33 દોહનકાલં અતિક્રામતઃ તત્ફલહાનં દણ્ડઃ

02.29.34 એતેન નસ્યદમ્યયુગપિઙ્ગનવર્તનકાલા વ્યાખ્યાતાઃ

02.29.35 ક્ષીરદ્રોણે ગવાં ઘૃતપ્રસ્થઃ, પઞ્ચભાગાધિકો મહિષીણાં, દ્વિભાગાધિકોऽજાવીનામ્

02.29.36 મન્થો વા સર્વેષાં પ્રમાણમ્

02.29.37 ભૂમિતૃણ ઉદકવિશેષાદ્ હિ ક્ષીરઘૃતવૃદ્ધિર્ભવતિ

02.29.38 યૂથવૃષં વૃષેણાવપાતયતઃ પૂર્વઃ સાહસદણ્ડઃ, ઘાતયત ઉત્તમઃ

02.29.39 વર્ણાવરોધેન દશતી રક્ષા

02.29.40 ઉપનિવેશદિગ્વિભાગો ગોપ્રચારાદ્ બલાન્વયતો વા ગવાં રક્ષાસામર્થ્યાચ્ચ

02.29.41 અજાવીનાં ષણ્માસિકીમૂર્ણાં ગ્રાહયેત્

02.29.42 તેનાશ્વખર ઉષ્ટ્રવરાહવ્રજા વ્યાખ્યાતાઃ

02.29.43 બલીવર્દાનાં નસ્યાશ્વભદ્રગતિવાહિનાં યવસસ્યાર્ધભારઃ તૃણસ્ય દ્વિગુણં, તુલા ઘાણપિણ્યાકસ્ય, દશાઢકં કણકુણ્ડકસ્ય, પઞ્ચપલિકં મુખલવનાં, તૈલકુડુબો નસ્યં પ્રસ્થઃ પાનં, માંસતુલા, દધ્નશ્ચાઢકં, યવદ્રોણં માષાણાં વા પુલાકઃ, ક્ષીરદ્રોણં અર્ધાઢકં વા સુરાયાઃ સ્નેહપ્રસ્થઃ ક્ષારદશપલં શૃઙ્ગિબેરપલં ચ પ્રતિપાનમ્

02.29.44 પાદ ઊનં અશ્વતરગોખરાણાં, દ્વિગુણં મહિષ ઉષ્ટ્રાણામ્

02.29.45 કર્મકરબલીવર્દાનાં પાયનાર્થાનાં ચ ધેનૂનાં કર્મકાલતઃ ફલતશ્ચ વિધાદાનમ્

02.29.46 સર્વેષાં તૃણ ઉદકપ્રાકામ્યમ્

02.29.47 ઇતિ ગોમણ્ડલં વ્યાખ્યાતમ્

02.29.48ab પઞ્ચ। ઋષભં ખરાશ્વાનાં અજાવીનાં દશ। ઋષભમ્ ।

02.29.48chd શત્યં ગોમહિષ ઉષ્ટ્રાણાં યૂથં કુર્યાચ્ચતુર્વૃષમ્ (ઇતિ)

Chapt . Superintendent of horses

02.30.01 અશ્વાધ્યક્ષઃ પણ્યાગારિકં ક્રય ઉપાગતં આહવલબ્ધં આજાતં સાહાય્યાગતકં પણસ્થિતં યાવત્કાલિકં વાऽશ્વપર્યગ્રં કુલવયોવર્ણચિહ્નવર્ગાગમૈર્લેખયેત્

02.30.02 અપ્રશસ્તન્યઙ્ગવ્યાધિતાંશ્ચાવેદયેત્
02.30.03 કોશકોષ્ઠાગારાભ્યાં ચ ગૃહીત્વા માસલાભં અશ્વવાહશ્ચિન્તયેત્
02.30.04 અશ્વવિભવેનાયતાં અશ્વાયાં અદ્વિગુણવિસ્તારાં ચતુર્દ્વાર ઉપાવર્તનમધ્યાં સ-પ્રગ્રીવાં પ્રદ્વારાસનફલકયુક્તાનાં વાનરમયૂરપૃષતનકુલચકોરશુકસારિકાકીર્ણાં શાલાં નિવેશયેત્
02.30.05 અશ્વાયાં અચતુર્ડશ્રશ્લક્ષ્ણફલકાસ્તારં સ-ખાદનકોષ્ઠકં સ-મૂત્રપુરીષ ઉત્સર્ગં એક એકશઃ પ્રાન્મુખં ઉદન્મુખં વા સ્થાનં નિવેશયેત્
02.30.06 શાલાવશેન વા દિગ્વિભાગં કલ્પયેત્
02.30.07 વડવાવૃષકિશોરાણાં એકાન્તેષુ
02.30.08 વડવાયાઃ પ્રજતાયાઃ ત્રિરાત્રં ઘૃતપ્રસ્થઃ પાનમ્
02.30.09 અત ઊર્ધ્વં સક્તુપ્રસ્થઃ સ્નેહભૈષજ્યપ્રતિપાનં દશરાત્રમ્
02.30.10 તતઃ પુલાકો યવસં આર્તવશ્ચાહારઃ
02.30.11 દશરાત્રાદ્ ઊર્ધ્વં કિશોરસ્ય ઘૃતચતુર્ભાગઃ સક્તુકુડુબઃ ક્ષીરપ્રસ્થશ્ચાહાર આષણ્માસાત્
02.30.12 તતઃ પરં માસ ઉત્તરં અર્ધવૃદ્ધિર્યવપ્રસ્થ આત્રિવર્ષાત્, દ્રોણ આચતુર્વર્ષાત્
02.30.13 અત ઊર્ધ્વં ચતુર્વર્ષઃ પઞ્ચવર્ષો વા કર્મણ્યઃ પૂર્ણપ્રમાણઃ
02.30.14 દ્વાત્રિંશદ્ઙ્ગુલં મુખં ઉત્તમાશ્વસ્ય, પઞ્ચમુખાન્યાયામો, વિંશત્ય્ઙ્ગુલા જઙ્ઘા, ચતુર્જઙ્ઘ ઉત્સેધઃ
02.30.15 ત્ર્યઙ્ગુલાવરં મધ્યમાવરયોઃ
02.30.16 શતાઙ્ગુલઃ પરિણાહઃ
02.30.17 પઞ્ચભાગાવરો મધ્યમાવરયોઃ
02.30.18 ઉત્તમાશ્વસ્ય દ્વિદ્રોણં શાલિવ્રીહિયવપ્રિયઙ્ગૂણાં અર્ધશુષ્કં અર્ધસિદ્ધં વા મુદ્ગમાષાણાં વા પુલાકઃ સ્નેહપ્રસ્થશ્ચ, પઞ્ચપલં લવણસ્ય, માંસં પઞ્ચાશત્પલિકં રસસ્યાઢકં દ્વિગુણં વા દધ્નઃ પિણ્ડક્લેદનાર્થં, ક્ષારપઞ્ચપલિકઃ સુરાયાઃ પ્રસ્થઃ પયસો વા દ્વિગુણઃ પ્રતિપાનમ્
02.30.19 દીર્ઘપથભારક્લાન્તાનાં ચ ખાદનાર્થં સ્નેહપ્રસ્થોઽનુવાસનં કુડુબો નસ્યકર્મણઃ, યવસસ્યાર્ધભારઃ તૃણસ્ય દ્વિગુણઃ ષડ્ડરત્નિપરિક્ષેપઃ પુઞ્જીલગ્રહો વા
02.30.20 પાદાવરં એતન્ મધ્યમાવરયોઃ
02.30.21 ઉત્તમસમો રથ્યો વૃષશ્ચ મધ્યમઃ
02.30.22 મધ્યમસમશ્ચાવરઃ
02.30.23 પાદહીનં વડવાનાં પારશમાનાં ચ
02.30.24 અતોઽર્ધં કિશોરાણાં ચ
02.30.25 ઇતિ વિધાયોગઃ
02.30.26 વિધાપાચકસૂત્રગ્રાહકચિકિત્સકાઃ પ્રતિસ્વાદભાજઃ
02.30.27 યુદ્ધવ્યાધિજરાકર્મક્ષીણાઃ પિણ્ડગોચરિકાઃ સ્યુઃ
02.30.28 અસમરપ્રયોગ્યાઃ પૌરજાનપદાનાં અર્થેન વૃષા વડવાસ્વાયોજ્યાઃ

02.30.29 પ્રયોગ્યાનાં ઉત્તમાઃ કામ્બોજસૈન્ધવારટ્ટવનાયુજાઃ, મધ્યમા બાહ્લીકપાપેયકસૌવીરકતૈતલાઃ, શેષાઃ પ્રત્યવરાઃ

02.30.30 તેષાં તીક્ષ્ણભદ્રમન્દવશેન સાન્નાહ્યં ઔપવાહ્યકં વા કર્મ પ્રયોજયેત્

02.30.31 ચતુરશ્રં કર્માશ્વસ્ય સાન્નાહ્યમ્

02.30.32 વલ્ગનો નીચૈર્ગતો લઙ્ઘનો ધોરણો નારોષ્ટ્રશ્ચાઉપવાહ્યાઃ

02.30.33 તત્રાઉપવેણુકો વર્ધમાનકો યમક આલીઢપ્લુતઃ પૃથુગ્ઽસ્ત્રિકચાલી ચ વલ્ગનઃ

02.30.34 સ એવ શિરઃકર્ણવિશુદ્ધો નીચૈર્ગતઃ, ષોડશમાર્ગો વા

02.30.35 પ્રકીર્ણકઃ પ્રકીર્ણ ઉત્તરો નિષણ્ણઃ પાર્શ્વાનુવૃત્ત ઊર્મિમાર્ગઃ શરભક્રીડિતઃ શરભપ્લુતઃ ત્રિતાલો બાહ્યાનુવૃત્તઃ પઞ્ચપાણિઃ સિંહાયતઃ સ્વાધૂતઃ ક્લિષ્ટઃ શ્લિઙ્ગિતો બૃંહિતઃ પુષ્પાભિકીર્ણશ્ચ ઇતિ નીચૈર્ગતમાર્ગઃ

02.30.36 કપિપ્લુતો ભેકપ્લુતેણપ્લુત એકપાદપ્લુતઃ કોકિલસઞ્ચાર્ય્। ઉરસ્યો બકચારી ચ લઙ્ઘનઃ

02.30.37 કાઙ્કો વારિકાઙ્કો માયૂરોઽર્ધમાયૂરો નાકુલોર્ધનાકુલો વારાહોઽર્ધવારાહશ્ચ ઇતિ ધોરણઃ

02.30.38 સંજ્ઞાપ્રતિકારો નાર ઉષ્ટ્ર ઇતિ

02.30.39 ષણ્ણવ દ્વાદશ ઇતિ યોજનાન્ય્ધ્વા રથ્યાનાં, પઞ્ચ યોજનાન્યર્ધાષ્ટમાનિ દશ ઇતિ પૃષ્ઠવાહિનાં અશ્વાનાં અધ્વા

02.30.40 વિક્રમો ભદ્રાશ્વાસો ભારવાહ્ય ઇતિ માર્ગાઃ

02.30.41 વિક્રમો વલ્ગિતં ઉપકણ્ઠં ઉપજવો જવશ્ચ ધારાઃ

02.30.42 તેષાં બન્ધન ઉપકરણં યોગ્યાચાર્યાઃ પ્રતિદિશેયુઃ, સાઙ્ગ્રામિકં રથાશ્વાલઙ્કારં ચ સૂતાઃ

02.30.43 અશ્વાનાં ચિકિત્સકાઃ શરીરહ્રાસવૃદ્ધિપ્રતીકારં ઋતુવિભક્તં ચાહારમ્

02.30.44 સૂત્રગ્રાહકાશ્વબન્ધકયાવસિકવિધાપાચકસ્થાનપાલકેશકારજાઙ્ગુલીવિદશ્ચ સ્વકર્મભિરશ્વાન્ આરાધયેયુઃ

02.30.45 કર્માતિક્રમે ચ એષાં દિવસવેતનચ્છેદનં કુર્યાત્

02.30.46 નીરાજન ઉપરુદ્ધં વાહયતશ્ચિકિત્સક ઉપરુદ્ધં વા દ્વાદશપણો દણ્ડઃ

02.30.47 ક્રિયાભૈષજ્યસઙ્ગેન વ્યાધિવૃદ્ધૌ પ્રતીકારદ્વિગુણો દણ્ડઃ

02.30.48 તદ્ઽપરાધેન વૈલોમ્યે પત્રમૂલ્યં દણ્ડઃ

02.30.49 તેન ગોમણ્ડલં ખર ઉષ્ટ્રમહિષં અજાવિકં ચ વ્યાખ્યાતમ્

02.30.50ab દ્વિરહ્નઃ સ્નાનં અશ્વાનાં ગન્ધમાલ્યં ચ દાપયેત્ ।

02.30.50chd કૃષ્ણસન્ધિષુ ભૂત ઇજ્યાઃ શુક્લેષુ સ્વસ્તિવાચનમ્

02.30.51ab નીરાજનાં આશ્વયુજે કારયેન્નવમેઽહનિ ।

02.30.51chd યાત્રાઽઽદાવવસાને વા વ્યાધૌ વા શાન્તિકે રતઃ (ઇતિ)

Chapt . Superintendent of elephants

02.31.01 હસ્ત્ય્ઽધ્યક્ષો હસ્તિવનરક્ષાં દમ્યકર્મક્ષાન્તાનાં હસ્તિહસ્તિનીકલભાનાં શાલાસ્થાનશય્યાકર્મવિધાયવસપ્રમાણં કર્મસ્વાયોગં બન્ધન ઉપકરણં સાઙ્ગ્રામિકં અલઙ્કારં ચિકિત્સકાનીકસ્થાઉપસ્થાયિકવર્ગં ચાનુતિષ્ઠેત્

02.31.02 હસ્ત્યૢ। આયામદ્વિગુણ ઉત્સેધવિષ્કમ્ભાયામાં હસ્તિનીસ્થાનાધિકાં સપ્રગ્રીવાં કુમારીસઙ્ગ્રહાં પ્રાઙ્મુખીં ઉદઙ્મુખીં વા શાલાં નિવેશયેત્

02.31.03 હસ્ત્યૢ। આયામચતુરૢઽશ્રશ્લક્ષ્ણાલાનસ્તમ્ભફલકાસ્તરકં સ-મૂત્રપુરીષ ઉત્સર્ગં સ્થાનં નિવેશયેત્

02.31.04 સ્થાનસમાં શય્યાં અર્ધાપાશ્રયાં દુર્ગે સાન્નાહ્યાઉપવાહ્યાનાં બહિર્દમ્યવ્યાલાનામ્

02.31.05 પ્રથમસપ્તમ અષ્ટમભાગાવહ્નઃ સ્નાનકાલૌ, તદ્ઽનન્તરં વિધાયાઃ

02.31.06 પૂર્વાહ્ણે વ્યાયામકાલઃ, પશ્ચાહ્નઃ પ્રતિપાનકાલઃ

02.31.07 રાત્રિભાગૌ દ્વૌ સ્વપ્નકાલા, ત્રિભાગઃ સંવેશન ઉત્થાનિકઃ

02.31.08 ગ્રીષ્મે ગ્રહણકાલઃ

02.31.09 વિંશતિવર્ષો ગ્રાહ્યઃ

02.31.10 વિક્કો મોઢો મક્કણો વ્યાથિતો ગર્ભિણી ધેનુકા હસ્તિની ચાગ્રાહ્યાઃ

02.31.11 સપ્તારત્નિ ઉત્સેધો નવાયામો દશ પરિણાહઃ પ્રમાણતશ્ચત્વારિંશદ્વર્ષો ભવત્યુત્તમઃ, ત્રિંશદ્વર્ષો મધ્યમઃ, પઞ્ચવિંશતિવર્ષોઽવરઃ

02.31.12 તયોઃ પાદાવરો વિધાવિધિઃ

02.31.13 અરત્નૌ તણ્ડુલદ્રોણઃ, અર્ધાઢકં તૈલસ્ય, સર્પિષઃ ત્રયઃ પ્રસ્થાઃ, દશપલં લવણસ્ય, માંસં પઞ્ચાશત્પલિકં, રસસ્યાઢકં દ્વિગુણં વા દધ્નઃ પિણ્ડક્લેદનાર્થં, ક્ષારદશપલિકં મદ્યસ્યાઢકં દ્વિગુણં વા પયસઃ પ્રતિપાનં, ગાત્રાવસેકઃ તૈલપ્રસ્થઃ, શિરસોઽષ્ટભાગઃ પ્રાદીપિકશ્ચ, યવસસ્ય દ્વૌ ભારૌ સ-પાદૌ, શષ્પસ્ય શુષ્કસ્યાર્ધતૃતીયો ભારઃ, કડઙ્ગરસ્યાનિયમઃ

02.31.14 સપ્તારત્નિના તુલ્યભોજનોઽષ્ટારત્નિરત્યરાલઃ

02.31.15 યથાહસ્તં અવશેષઃ ષડ્ઽરત્નિઃ પઞ્ચારત્નિશ્ચ

02.31.16 ક્ષીરયાવસિકો વિક્કઃ ક્રીડાઽર્થં ગ્રાહ્યઃ

02.31.17 સઞ્જાતલોહિતા પ્રતિચ્છન્ના સમ્લિપ્તપક્ષા સમકક્ષ્યા વ્યતિકીર્ણમાંસા સમતલ્પતલા જાતદ્રોણિકા ઇતિ શોભાઃ

02.31.18ab શોભાવશેન વ્યાયામં ભદ્રમ મન્દં ચ કારયેત્ ।

02.31.18chd મૃગં સઙ્કીર્ણલિઙ્ગં ચ કર્મસ્વૃતુવશેન વા

Chapt . Activity of elephants

02.32.01 કર્મસ્કન્ધાશ્ચત્વારો દમ્યઃ સાન્નાહ્ય ઔપવાહ્યો વ્યાલશ્ચ

02.32.02 તત્ર દમ્યઃ પઞ્ચવિધઃ સ્કન્ધગતઃ સ્તમ્ભગતો વારિગતોઽવપાતગતો યૂથગતશ્ચ ઇતિ

02.32.03 તસ્ય ઉપવિચારો વિક્કકર્મ

02.32.04 સાન્નાહ્યઃ સપ્તક્રિયાપથ ઉપસ્થાનં સંવર્તનં સમ્યાનં વધાવધો હસ્તિયુદ્ધં નાગરાયણં સાઙ્ગ્રામિકં ચ

02.32.05 તસ્ય ઉપવિચારઃ કક્ષ્યાકર્મ ગ્રૈવેયકર્મ યૂથકર્મ ચ

02.32.06 ઔપવાહ્યોઽષ્ટવિધ આચરણઃ કુઞ્જરાઉપવાહ્યો ધોરણ આધાનગતિકો યષ્ટ્યૢ। ઉપવાહ્યઃ તોત્ર ઉપવાહ્યઃ શુદ્ધ ઉપવાહ્યો માર્ગયુકશ્ચ ઇતિ

02.32.07 તસ્ય ઉપવિચારઃ શારદકર્મ હીનકર્મ નાર ઉષ્ટ્રકર્મ ચ

02.32.08 વ્યાલ એકક્રિયાપથઃ શઙ્કિતોઽવરુદ્ધો વિષમઃ પ્રભિન્નઃ પ્રભિન્નવિનિશ્ચયો મદહેતુવિનિશ્ચયશ્ચ

02.32.09 તસ્ય-ઉપવિચાર આયમ્ય એકરક્ષાકર્મ

02.32.10 ક્રિયાવિપન્નો વ્યાલઃ શુદ્ધઃ સુવ્રતો વિષમઃ સર્વદોષપ્રદુષ્ટશ્ચ

02.32.11 તેષાં બન્ધન ઉપકરણં અનીકસ્થપ્રમાણમ્

02.32.12 આલાનગ્રૈવેયકક્ષ્યાપારાયણપરિક્ષેપ ઉત્તરાદિકં બન્ધનમ્

02.32.13 અઙ્કુશવેણુયન્ત્રાદિકં ઉપકરણમ્

02.32.14 વૈજયન્તીક્ષુરપ્રમાલાસ્તરણકુથાઽઽદિકં ભૂષણમ્

02.32.15 વર્મતોમરશરાવાપયન્ત્રાદિકઃ સાઙ્ગ્રામિકાલઙ્કારઃ

02.32.16 ચિકિત્સકાનીકસ્થારોહકાધોરણહસ્તિપકૌપચારિકવિધાપાચકયાવસિકપાદપાશિકકુટીર્રક્ષકાઉપશયૈકાદિરૌપસ્થાયિ

02.32.17 ચિકિત્સકકુટીરક્ષવિધાપાચકાઃ પ્રસ્થોદનં સ્નેહપ્રસૃતિં ક્ષારલવણયોશ્ચ દ્વિપલિકં હરેયુઃ, દશપલં માંસસ્ય, અન્યત્ર ચિકિત્સકેભ્યઃ

02.32.18 પથિવ્યાધિકર્મમદજરાઽભિતપ્તાનાં ચિકિત્સકાઃ પ્રતિકુર્યુઃ

02.32.19 સ્થાનસ્યાશુદ્ધિર્યવસસ્યાગ્રહણં સ્થલે શાયનં અભાગે ઘાતઃ પરારોહણં અકાલે યાનં અભૂમાવતીર્થેઽવતારણં તરુષણ્ડ ઇત્યત્યયસ્થાનાનિ

02.32.20 તં એષાં ભક્તવેતનાદ્ આદદીત

02.32.21ab તિસ્રો નીરાજનાઃ કાર્યાશ્ચાતુર્માસ્ય। ઋતુસન્ધિષુ ।

02.32.21chd ભૂતાનાં કૃષ્ણસન્ધી ઇજ્યાઃ સેનાન્યઃ શુક્લસન્ધુષુ

02.32.22ab દન્તમૂલપરીણાહદ્વિગુણં પ્રોજ્ઝ્ય કલ્પયેત્ ।

02.32.22chd અબ્દે દ્વ્યઽર્ધે નદીજાનાં પઞ્ચાબ્દે પર્વતોકસામ્ (ઇતિ)

Chapt . Superintendent of chariots

Superintendent of foot-soldiers

Activity of the commandant of the army

02.33.01 અશ્વાધ્યક્ષેણ રથાધ્યક્ષો વ્યાખ્યાતઃ

02.33.02 સ રથકર્માન્તાન્ કારયેત્

02.33.03 દશપુરુષો દ્વાદશાન્તરો રથઃ

02.33.04 તસ્માદ્ એકાન્તરાવરા આષડ્ઽન્તરાદ્ ઇતિ સપ્ત રથાઃ

02.33.05 દેવરથપુષ્યરથસાઙ્ગ્રામિકપારિયાણિકપરપુરાભિયાનિકવૈનયિકાંશ્ચ રથાન્ કારયેત્

02.33.06 ઇષ્વ્ઽસ્ત્રપ્રહરણાવરણ ઉપકરણકલ્પનાઃ સારથિરથિકરથ્યાનાં ચ કર્મસ્વાયોગં વિદ્યાત્, આકર્મભ્યશ્ચ ભક્તવેતનં ભૃતાનાં અભૃતાનાં ચ યોગ્યારક્ષાઽનુષ્ઠાનં અર્થમાનકર્મ ચ

02.33.07 એતેન પત્ત્ય્ઽધ્યક્ષો વ્યાખ્યાતઃ

02.33.08 સ મૌલભૃતશ્રેણિમિત્રામિત્રાટવીબલાનાં સારફલ્ગુતાં વિદ્યાત્, નિમ્નસ્થલપ્રકાશકૂટખનકાકાશદિવારાત્રિયુદ્ધવ્યાયામં ચ, આયોગં અયોગં ચ કર્મસુ

02.33.09 તેદ્ એવ સેનાપતિઃ સર્વયુદ્ધપ્રહરણવિદ્યાવિનીતો હસ્ત્યૢશ્વરથચર્યાસઙ્ઘુષ્ટશ્ચતુરૢઙ્ગસ્ય બલસ્યાનુષ્ઠાનાધિષ્ઠાનં વિદ્યાત્

02.33.10 સ્વભૂમિં યુદ્ધકાલં પ્રત્યનીકં અભિન્નભેદનં ભિન્નસન્ધાનં સંહતભેદનં ભિન્નવધં દુર્ગવધં યાત્રાકાલં ચ પશ્યેત્

02.33.11ab તૂર્યધ્વજપતાકાભિર્વ્યૂહસંજ્ઞાઃ પ્રકલ્પયેત્ ।

02.33.11chd સ્થાને યાને પ્રહરણે સૈન્યાનાં વિનયે રતઃ (ઇતિ)

Chapt . Superintendent of passports

Superintendent of pasture lands

02.34.01 મુદ્રાઽધ્યક્ષો મુદ્રાં માષકેણ દદ્યાત્

02.34.02 સ-મુદ્રો જનપદં પ્રવેષ્ટું નિષ્ક્રમિતું વા લભેત

02.34.03 દ્વાદશપણં અમુદ્રો જાનપદો દદ્યાત્

02.34.04 કૂટમુદ્રાયાં પૂર્વઃ સાહસદણ્ડઃ તિરોજનપદસ્ય ઉત્તમઃ

02.34.05 વિવીતાધ્યક્ષો મુદ્રાં પશ્યેત્

02.34.06 ગ્રામાન્તરેષુ ચ વિવીતં સ્થાપયેત્

02.34.07 ચોરવ્યાલભયાન્નિમ્નારણ્યાનિ શોધયેત્

02.34.08 અનુદકે કૂપસેતુબન્ધ ઉત્સાન્ સ્થાપયેત્, પુષ્પફલવાટાંશ્ચ

02.34.09 લુબ્ધકશ્વગણિનઃ પરિવ્રજેયુરરણ્યાનિ

02.34.10 તસ્કરામિત્રાભ્યાગમે શઙ્ખદુન્દુભિશબ્દં અગ્રાહ્યાઃ કુર્યુઃ શૈલવૃક્ષાધિરૂઢા વા શીઘ્રવાહના વા

02.34.11 અમિત્રાટવીસઞ્ચારં ચ રાજ્ઞો ગૃહકપોતૈર્મુદ્રાયુક્તૈર્હારયેત્, ધૂમાગ્નિપરમ્પરયા વા

02.34.12ab દ્રવ્યહસ્તિવનાજીવં વર્તનીં ચોરરક્ષણમ્ ।

02.34.12chd સાર્થાતિવાહ્યં ગોરક્ષ્યં વ્યવહારં ચ કારયેત્ (ઇતિ)

Chapt . Activity of the administrator

Secret agents in the disguise of householders, traders, and ascetics

02.35.01 સમાહર્તા ચતુર્ધા જનાપ્દં વિભજ્ય જ્યેષ્ઠમધ્યમકનિષ્ઠવિભાગેન ગ્રામાગ્રં પરિહારકં આયુધીયં ધાન્યપશુહિરણ્યકુપ્યવિષ્ટિપ્રતિકરં ઇદં એતાવદ્ ઇતિ નિબન્ધયેત્

02.35.02 તત્પ્રદિષ્ટઃ પઞ્ચગ્રામીં દશગ્રામીં વા ગોપશ્ચિન્તયેત્

02.35.03 સીમાવરોધેન ગ્રામાગ્રં, કૃષ્ટાકૃષ્ટસ્થલકેદારારામષણ્ડવાટવનવાસ્તુચૈત્યદેવગૃહસેતુબન્ધશ્મશાનસત્ત્રપ્રપાપુણ્યસ્થાન ક્ષેત્રાગ્રં, તેન સીમ્નાં ક્ષેત્રાણાં ચ કરદાકરદસઙ્ખ્યાનેન

02.35.04 તેષુ ચ એતાવચ્ચાતુર્વાર્ણ્યં, એતાવન્તઃ કર્ષકગોરક્ષકવૈદેહકકારુકર્મકરદાસાશ્ચ, એતાવચ્ચ દ્વિપદચતુષ્પદં, ઇદં ચ એષુ હિરણ્યવ્વિષ્ટિશુલ્કદણ્ડં સમુત્તિષ્ઠતિ ઇતિ

02.35.05 કુલાનાં ચ સ્ત્રીપુરુષાણાં બાલવૃદ્ધકર્મચરિત્રાજીવવ્યયપરિમાણં વિદ્યાત્

02.35.06 એવં ચ જનપદચતુર્ભાગં સ્થાનિકશ્ચિન્તયેત્

02.35.07 ગોપસ્થાનિકસ્થાનેષુ પ્રદેષ્ટારઃ કાર્યકરણં બલિપ્રગ્રહં ચ કુર્યુઃ

02.35.08 સમાહર્તૃપ્રદિષ્ટાશ્ચ ગૃહપતિકવ્યઞ્જના યેષુ ગ્રામેષુ પ્રણિહિતાઃ તેષાં ગ્રામાણાં ક્ષેત્રગૃહકુલાગ્રં વિદ્યુઃ, માનસઞ્જાતાભ્યાં ક્ષેત્રાણિ ભોગપરિહારાભ્યાં ગૃહાણિ વર્ણકર્મભ્યાં કુલાનિ ચ

02.35.09 તેષાં જઙ્ઘાગ્રં આયવ્યયૌ ચ વિદ્યુઃ

02.35.10 પ્રસ્થિતાગતાનાં ચ પ્રવાસાવાસકારણં, અનર્થ્યાનાં ચ સ્ત્રીપુરુષાણાં ચારપ્રચારં ચ વિદ્યુઃ

02.35.11 એવં વૈદેહકવ્યઞ્જનાઃ સ્વભૂમિજાનાં રાજપણ્યાનાં ખનિસેતુવનકર્માન્તક્ષેત્રજાનાં પ્રમાણં અર્ઘં ચ વિદ્યુઃ

02.35.12 પરભૂમિજાતાનાં વારિસ્થલપથ ઉપયાતાનાં સારફલ્ગુપુણ્યાનાં કર્મસુ ચ શુલ્કવર્તન્ય્ । આતિવાહિકગુલ્મતરદેયભાગભ
વિદ્યુઃ

02.35.13 એવં સમાહર્તૃપ્રદિષ્ટાઃ તાપસવ્યઞ્જનાઃ કર્ષકગોરક્ષકવૈદેહકાનાં અધ્યક્ષાણાં ચ શૌચાશૌચં વિદ્યુઃ

02.35.14 પુરાણ ચોરવ્યઞ્જનાશ્ચાન્તેવાસિનશ્ચૈત્યચતુષ્પથશૂન્યપદ ઉદપાનનદીનિપાનતીર્થાયતનાશ્રમારણ્યશૈલવનગહનેષુ સ્તેનામિત્રપ્રવીરપુરુષાણાં ચ પ્રવેશનસ્થાનગમનપ્રયોજનાન્યુપલભેરન્

02.35.15ab સમાહર્તા જનપદં ચિન્તયેદ્ એવં ઉત્થિતઃ ।

02.35.15chd ચિન્તયેયુશ્ચ સંસ્થાઃ તાઃ સંસ્થાશ્ચાન્યાઃ સ્વયોનયઃ (ઇતિ)

Chapt . Rules for the city-superintendent

02.36.01 સમાહર્તૃવન્નાગરિકો નગરં ચિન્તયેત્

02.36.02 દશકુલીં ગોપો વિંશતિકુલીં ચત્વારિંશત્કુલીં વા

02.36.03 સ તસ્યાં સ્ત્રીપુરુષાણાં જાતિગોત્રનામકર્મભિઃ જઙ્ઘાગ્રં આયવ્યયૌ ચ વિદ્યાત્

02.36.04 એવં દુર્ગચતુર્ભાગં સ્થાનિકશ્ચિન્તયેત્

02.36.05 ધર્માવસથિનઃ પાષણ્ડિપથિકાન્ આવેદ્ય વાસયેયુઃ, સ્વપ્રત્યયાશ્ચ તપસ્વિનઃ શ્રોત્રિયાંશ્ચ

02.36.06 કારુશિલ્પિનઃ સ્વકર્મસ્થાનેષુ સ્વજનં વાસયેયુઃ, વૈદેહકાશ્ચાન્યોન્યં સ્વકર્મસ્થાનેષુ

02.36.07 પણ્યાનાં અદેશકાલવિક્રેતારં અસ્વકરણં ચ નિવેદયેયુઃ

02.36.08 શૌણ્ડિકપાક્વમાંસિકાઉદનિકરૂપાજીવાઃ પરિજ્ઞાતં આવાસયેયુઃ

02.36.09 અતિવ્યયકર્તારં અત્યાહિતકર્માણં ચ નિવેદયેયુઃ

02.36.10 ચિકિત્સકઃ પ્રચ્છન્નવ્રણપ્રતીકારકારયિતારં અપથ્યકારિણં ચ ગૃહસ્વામી ચ નિવેદ્ય ગોપસ્થાનિકયોર્મુચ્યેત, અન્યથા તુલ્યદોષઃ સ્યાત્

02.36.11 પ્રસ્થિતાગતૌ ચ નિવેદયેત્, અન્યથા રાત્રિદોષં ભજેત

02.36.12 ક્ષેમરાત્રિષુ ત્રિપણં દદ્યાત્

02.36.13 પથિક ઉત્પથિકાશ્ચ બહિર્ઽન્તશ્ચ નગરસ્ય દેવગૃહપુણ્યસ્થાનવનશ્મશાનેષુ સ-વ્રણં અનિષ્ટ ઉપકરણં ઉદ્ભાણ્ડીકૃતં આવિગ્નં અતિસ્વપ્નં અધ્વક્લાન્તં અપૂર્વં વા ગૃહ્ણીયુઃ

02.36.14 એવં અભ્યન્તરે શૂન્યનિવેશાવેશનશૌણ્ડિકાઉદનિકપાક્વમાંસિકદ્યૂતપાષણ્ડાવાસેષુ વિચયં કુર્યુઃ

02.36.15 અગ્નિપ્રતીકારં ચ ગ્રીષ્મે

02.36.16 મધ્યમયોરર્ધશ્ચતુર્ભાગયોરષ્ટભાગોઽગ્નિદણ્ડઃ

02.36.17 બહિરઽધિશ્રયણં વા કુર્યુઃ

02.36.18 પાદઃ પઞ્ચઘટીનાં કુમ્ભદ્રોણિનિઃશ્રેણીપરશુશૂર્પાઙ્કુશકચગ્રહણીદૃતીનાં ચાકરણે

02.36.19 તૃણકટચ્છન્નાન્યપનયેત્

02.36.20 અગ્નિજીવિન એકસ્થાન્ વાસયેત્

02.36.21 સ્વગૃહપ્રદ્વારેષુ ગૃહસ્વામિનો વસેયુઃ અસમ્પાતિનો રાત્રૌ

02.36.22 રથ્યાસુ કુટવ્રજાઃ સહસ્રં તિષ્ઠેયુઃ, ચતુષ્પથદ્વારરાજપરિગ્રહેષુ ચ

02.36.23 પ્રદીપ્તં અનભિધાવતો ગૃહસ્વામિનો દ્વાદશપણો દણ્ડઃ, ષટ્પણોઽવક્રયિણઃ

02.36.24 પ્રમાદાદ્ દીપ્તેષુ ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ

02.36.25 પ્રદીપિકોઽગ્નિના વધ્યઃ

02.36.26 પાંસુન્યાસે રથ્યાયાં અષ્ટભાગો દણ્ડઃ, પઙ્કુ ઉદકસન્નિરોધે પાદઃ

02.36.27 રાજમાર્ગે દ્વિગુણઃ

02.36.28 પણ્યસ્થાન ઉદકસ્થાનદેવગૃહરાજપરિગ્રહેષુ પણ ઉત્તરા વિષ્ટાદણ્ડાઃ, મૂત્રેષ્વર્ધદણ્ડાઃ

02.36.29 ભૈષજ્યવ્યાધિભયનિમિત્તં અદણ્ડ્યાઃ

02.36.30 માર્જારશ્વનકુલસર્પપ્રેતાનાં નગરસ્યાન્તર્। ઉત્સર્ગે ત્રિપણો દણ્ડઃ, ખર ઉષ્ટ્રાશ્વતરાશ્વપ્રેતાનાં ષટ્પણઃ, મનુષ્યપ્રેતાનાં પઞ્ચાશત્પણઃ

02.36.31 માર્ગવિપર્યાસે શવદ્વારાદ્ અન્યતશ્ચ શવનિર્ણયને પૂર્વઃ સાહસદણ્ડઃ

02.36.32 દ્વાઃસ્થાનાં દ્વિશતમ્

02.36.33 શ્મશાનાદ્ અન્યત્ર ન્યાસે દહને ચ દ્વાદશપણો દણ્ડઃ

02.36.34 વિષણ્ણાલિકં ઉભયતોરાત્રં યામતૂર્યમ્

02.36.35 તૂર્યશબ્દે રાજ્ઞો ગૃહાભ્યાશે સપાદપણંઽક્ષણતાડનં પ્રથમપશ્ચિમયામિકં, મધ્યમયામિકં દ્વિગુણં, અન્તશ્ચતુર્ગુણમ્

02.36.36 શઙ્કુનીયે દેશે લિઙ્ગે પૂર્વાપદાને ચ ગૃહીતં અનુયુઞ્જીત

02.36.37 રાજપરિગ્રહ ઉપગમને નગરરક્ષાઽઽરોહણે ચ મધ્યમઃ સાહસદણ્ડઃ

02.36.38 સૂતિકાચિકિત્સકપ્રેતપ્રદીપયાનનાગરિકતૂર્યપ્રેક્ષાઽગ્નિનિમિત્તં મુદ્રાભિશ્ચાગ્રાહ્યાઃ

02.36.39 ચારરાત્રિષુ પ્રચ્છન્નવિપરીતવેષાઃ પ્રવ્રજિતા દણ્ડશસ્ત્રહસ્તાશ્ચ મનુષ્યા દોષતો દણ્ડ્યાઃ

02.36.40 રક્ષિણાં અવાર્યં વારયતાં વાર્યં ચાવારયતાં ક્ષણદ્વિગુણો દણ્ડઃ

02.36.41 સ્ત્રિયં દાસીં અધિમેહયતાં પૂર્વઃ સાહસદણ્ડઃ, અદાસીં મધ્યમઃ, કૃતાવરોધાં ઉત્તમઃ, કુલસ્ત્રિયં વધઃ

02.36.42 ચેતનાચેતનિકં રાત્રિદોષં અશંસતો નાગરિકસ્ય દોષાનુરૂપો દણ્ડઃ, પ્રમાદસ્થાને ચ

02.36.43 નિત્યં ઉદકસ્થાનમાર્ગભ્રમચ્છન્નપથવપ્રપ્રાકારરક્ષાઽવેક્ષણં નષ્ટપ્રસ્મૃતાપસૃતાનાં ચ રક્ષણમ્

02.36.44 બન્ધનાગારે ચ બાલવૃદ્ધવ્યાધિતાનાથાનાં જાતનક્ષત્રપૌર્ણમાસીષુ વિસર્ગઃ

02.36.45 પણ્યશીલાઃ સમયાનુબદ્ધા વા દોષનિષ્ક્રયં દદ્યુઃ

02.36.46ab દિવસે પઞ્ચરાત્રે વા બન્ધનસ્થાન્ વિશોધયેત્ ।

02.36.46chd કર્મણા કાયદણ્ડેન હિરણ્યાનુગ્રહેણ વા

02.36.47ab અપૂર્વદેશાધિગમે યુવરાજાભિષેચને ।

02.36.47chd પુત્રજન્મનિ વા મોક્ષો બન્ધનસ્ય વિધીયતે (ઇતિ)

Book . Determination of (valid and invalid) transactions

Chapt . Filing of law-suits

03.1.01 ધર્મસ્થાઃ ત્રયઃ ત્રયોઽમાત્યા જનપદસન્ધિસઙ્ગ્રહણદ્રોણમુખસ્થાનીયેષુ વ્યાવહારિકાન્ અર્થાન્ કુર્યુઃ

03.1.02 તિરોહિતાન્તર્ઙગારનક્તારણ્ય ઉપધ્ય્। ઉપહ્વરકૃતાંશ્ચ વ્યવહારાન્ પ્રતિષેધયેયુઃ

03.1.03 કર્તુઃ કારયિતુઃ પૂર્વઃ સાહસદણ્ડઃ

03.1.04 શ્રોતૃણાં એક એકં પ્રત્યર્ધદણ્ડાઃ

03.1.05 શ્રદ્ધેયાનાં તુ દ્રવ્યવ્યપનયઃ

03.1.06 પરોક્ષેણાધિક। ઋણગ્રહણં અવક્તવ્યકરા વા તિરોહિતાઃ સિધ્યેયુઃ

03.1.07 દાયનિક્ષેપ ઉપનિધિવિવાહયુક્તાઃ સ્ત્રીણાં અનિષ્કાસિનીનાં વ્યાધિતાનાં ચામૂઢસંજ્ઞાનાં અન્તર્ઙગારકૃતાઃ સિધ્યેયુઃ

03.1.08 સાહસાનુપ્રવેશકલહવિવાહરાજનિયોગયુક્તાઃ પૂર્વરાત્રવ્યવહારિણાં ચ રાત્રિકૃતાઃ સિધ્યેયુઃ

03.1.09 સાર્થવ્રજાશ્રમવ્યાધચારણમધ્યેષ્વરણ્યચરાણાં અરણ્યકૃતાઃ સિધ્યેયુઃ

03.1.10 ગૂઢાજીવિષુ ચ ઉપધિકૃતાઃ સિધ્યેયુઃ

03.1.11 મિથઃસમવાયે ચ ઉપહ્વરકૃતાઃ સિધ્યેયુઃ

03.1.12 અતોઽન્યથા ન સિધ્યેયુઃ, અપાશ્રયવદ્ભિશ્ચ કૃતાઃ, પિતૃમતા પુત્રેણ, પિત્રા પુત્રવતા, નિષ્કુલેન ભ્રાત્રા, કનિષ્ઠેનાવિભક્તાંશેન, પતિમત્યા પુત્રવત્યા ચ સ્ત્રિયા, દાસાહિતકાભ્યાં, અપ્રાપ્તાતીતવ્યવહારાભ્યાં, અભિશસ્તપ્રવ્રજિતન્યઙ્ગવ્યસનિભિશ્ચ, અન્યત્ર નિષૃષ્ટવ્યવહારેભ્યઃ

03.1.13 તત્રાપિ ક્રુદ્ધેનાર્તેન મત્તેન ઉન્મત્તેનાવગૃહીતેન વા કૃતા વ્યવહારા ન સિધ્યેયુઃ

03.1.14 કર્તૃકારયિતૃશ્રોતૃણાં પૃથગ્ યથા ઉક્તા દણ્ડાઃ

03.1.15 સ્વે સ્વે તુ વર્ગે દેશે કાલે ચ સ્વકરણકૃતાઃ સમ્પૂર્ણાચારાઃ શુદ્ધદેશા દૃષ્ટરૂપલક્ષણપ્રમાણગુણાઃ સર્વવ્યવહારાઃ સિધ્યેયુઃ

03.1.16 પશ્ચિમં ચ એષાં કરણં આદેશાધિવર્જં શ્રદ્ધેયમ્ ઇતિ વ્યવહારસ્થાપના ।

03.1.17 સંવત્સરં ઋતું માસં પક્ષં દિવસં કરણં અધિકરણં ઋણં વેદકાવેદકયોઃ કૃતસમર્થાવસ્થયોર્દેશગ્રામજાતિગોત્રનામકર્માણિ ચાભિલિખ્ય વાદિપ્રતિવાદિપ્રશ્નાન્ અર્થાનુપૂર્વ્યા નિવેશયેત્

03.1.18 નિવિષ્ટાંશ્ચાવેક્ષેત

03.1.19 નિબદ્ધં વાદં ઉત્સૃજ્યાન્યં વાદં સઙ્ક્રામતિ, પૂર્વ ઉક્તં પશ્ચિમેનાર્થેન નાભિસન્ધત્તે, પરવાક્યં અનભિગ્રાહ્યં અભિગ્રાહ્યાવતિષ્ઠતે, પ્રતિજ્ઞાય દેશં નિર્દિશ ઇત્યુક્તે ન નિર્દિશતિ, હીનદેશં અદેશં વા નિર્દિશતિ, નિર્દિષ્ટાદ્ દેશાદ્

અન્યં દેશં ઉપસ્થાપયતિ, ઉપસ્થિતે દેશેऽર્થવચનં ન એવં ઇત્યપવ્યયતે, સાક્ષિભિરવધૃતં ન ઇચ્છતિ, અસમ્ભાષ્યે દેશે સાક્ષિભિર્મિથઃ સમ્ભાષતે, ઇતિ પરા ઉક્તહેતવઃ

03.1.20 પરા ઉક્તદણ્ડઃ પઞ્ચબન્ધઃ

03.1.21 સ્વયંવાદિદણ્ડો દશબન્ધઃ

03.1.22 પુરુષભૃતિરષ્ટાંશઃ

03.1.23 પથિભક્તં અર્ઘવિશેષતઃ

03.1.24 તદ્ ઉભયં નિયમ્યો દદ્યાત્

03.1.25 અભિયુક્તો ન પ્રત્યભિયુઞ્જીત, અન્યત્ર કલહસાહસસાર્થસમવાયેભ્યઃ

03.1.26 ન ચાભિયુક્તેऽભિયોગેऽસ્તિ

03.1.27 અભિયોક્તા ચેત્ પ્રત્યુક્તઃ તદ્ऽહરેવ ન પ્રતિબ્રૂયાત્ પરા ઉક્તઃ સ્યાત્

03.1.28 કૃતકાર્યવિનિશ્ચયો હ્યભિયોક્તા નાભિયુક્તઃ

03.1.29 તસ્યાપ્રતિબ્રુવતઃ ત્રિરાત્રં સપ્તરાત્રં ઇતિ

03.1.30 અત ઊર્ધ્વં ત્રિપણાવરાર્ધ્યં દ્વાદશપણપરં દણ્ડં કુર્યાત્

03.1.31 ત્રિપક્ષાદ્ ઊર્ધ્વં અપ્રતિબ્રુવતઃ પરા ઉક્તદણ્ડં કૃત્વા યાન્યસ્ય દ્રવ્યાણિ સ્યુઃ તતોऽભિયોક્તારં પ્રતિપાદયેદ્, અન્યત્ર વૃત્ત્યુ્। ઉપકરણેભ્યઃ

03.1.32 તદ્ એવ નિષ્પતતોऽભિયુક્તસ્ય કુર્યાત્

03.1.33 અભિયોક્તુર્નિષ્પાતસમકાલઃ પરા ઉક્તભાવઃ

03.1.34 પ્રેતસ્ય વ્યસનિનો વા સાક્ષિવચનં અસારમ્

03.1.35 અભિયોક્તા દણ્ડં દત્ત્વા કર્મ કારયેત્

03.1.36 આધિં વા સ કામં પ્રવેશયેત્

03.1.37 રક્ષોઘ્નરક્ષિતં વા કર્મણા પ્રતિપાદયેદ્, અન્યત્ર બ્રાહ્મણાત્

03.1.38ab ચતુર્વર્ણાશ્રમસ્યાયં લોકસ્યાચારરક્ષણાત્ ।

03.1.38chd નશ્યતાં સર્વધર્માણાં રાજા ધર્મપ્રવર્તકઃ

03.1.39ab ધર્મશ્ચ વ્યવહારશ્ચ ચરિત્રં રાજશાસનમ્ ।

03.1.39chd વિવાદાર્થશ્ચતુષ્પાદઃ પશ્ચિમઃ પૂર્વબાધકઃ

03.1.40ab તત્ર સત્યે સ્થિતો ધર્મો વ્યવહારઃ તુ સાક્ષિષુ ।

03.1.40chd ચરિત્રં સઙ્ગ્રહે પુંસાં રાજ્ઞાં આજ્ઞા તુ શાસનમ્

03.1.41ab રાજ્ઞઃ સ્વધર્મઃ સ્વર્ગાય પ્રજા ધર્મેણ રક્ષિતુઃ ।

03.1.41chd અરક્ષિતુર્વા ક્ષેપ્તુર્વા મિથ્યાદણ્ડં અતોऽન્યથા

03.1.42ab દણ્ડો હિ કેવલો લોકં પરં ચ ઇમં ચ રક્ષતિ ।

03.1.42chd રાજ્ઞા પુત્રે ચ શત્રૌ ચ યથાદોષં સમં ધૃતઃ

03.1.43ab અનુશાસદ્ હિ ધર્મેણ વ્યવહારેણ સંસ્થયા ।

03.1.43chd ન્યાયેન ચ ચતુર્થેન ચતુરૢન્તાં વા મહીં જયેત્
03.1.44ab સંસ્થા યા ધર્મશાસ્ત્રેણ શાસ્ત્રં વા વ્યાવહારિકમ્ ।
03.1.44chd યસ્મિન્ન્ અર્થે વિરુધ્યેત ધર્મેણાર્થં વિનિર્ણયેત્
03.1.45ab શાસ્ત્રં વિપ્રતિપદ્યેત ધર્મે ન્યાયેન કેનચિત્ ।
03.1.45chd ન્યાયઃ તત્ર પ્રમાણં સ્યાત્ તત્ર પાઠો હિ નશ્યતિ
03.1.46ab દૃષ્ટદોષઃ સ્વયંવાદઃ સ્વપક્ષપરપક્ષયોઃ ।
03.1.46chd અનુયોગાર્જવં હેતુઃ શપથશ્ચાર્થસાધકઃ
03.1.47ab પૂર્વ ઉત્તરાર્થવ્યાઘાતે સાક્ષિવક્તવ્યકારણે ।
03.1.47chd ચારહસ્તાચ્ચ નિષ્પાતે પ્રદેષ્ટવ્યઃ પરાજયઃ (ઇતિ)

Chapt . Concerning marriage

(i) Law of marriage (I) Rules concerning women property(Ii) Concerning supersession (of a wife) by a second marriage

03.2.01 વિવાહપૂર્વો વ્યવહારઃ
03.2.02 કન્યાદાનં કન્યાં અલઙ્કૃત્ય બ્રાહ્મો વિવાહઃ
03.2.03 સહધર્મચર્યા પ્રાજાપત્યઃ
03.2.04 ગોમિથુનાદાનાદ્ આર્ષઃ
03.2.05 અન્તર્વેદ્યાં ઋત્વિજે દાનાદ્ દૈવઃ
03.2.06 મિથઃસમવાયાદ્ ગાન્ધર્વઃ
03.2.07 શુલ્કાદાનાદ્ આસુરઃ
03.2.08 પ્રસહ્યાદાનાદ્ રાક્ષસઃ
03.2.09 સુપ્તમત્તાદાનાત્ પૈશાચઃ
03.2.10 પિતૃપ્રમાણાશ્ચત્વારઃ પૂર્વે ધર્મ્યાઃ, માતાપિતૃપ્રમાણાઃ શેષાઃ
03.2.11 તૌ હિ શુલ્કહરૌ દુહિતુઃ, અન્યતરાભાવેઽન્યતરો વા
03.2.12 દ્વિતીયં શુલ્કં સ્ત્રી હરેત
03.2.13 સર્વેષાં પ્રીત્ય્।આરોપણં અપ્રતિષિદ્ધમ્ ઇતિ વિવાહધર્મઃ ।
03.2.14 વૃત્તિરાબન્ધ્યં વા સ્ત્રીધનમ્
03.2.15 પરદ્વિસાહસ્રા સ્થાપ્યા વૃત્તિઃ, આબન્ધ્યાનિયમઃ
03.2.16 તદ્ આત્મપુત્રસ્નુષાભર્મણિ પ્રવાસાપ્રતિવિધાને ચ ભાર્યાયા ભોક્તું અદોષઃ, પ્રતિરોધકવ્યાધિદુર્ભિક્ષભયપ્રતીકારે ધર્મકાર્યે ચ પત્યુઃ, સમ્ભૂય વા દમ્પત્યોર્મિથુનં પ્રજાતયોઃ
03.2.17 ત્રિવર્ષ ઉપભુક્તં ચ ધર્મિષ્ઠેષુ વિવાહેષુ નાનુયુઞ્જીત
03.2.18 ગાન્ધર્વાસુર ઉપભુક્તં સ-વૃદ્ધિકં ઉભયં દાપ્યેત, રાક્ષસપૈશાચ ઉપભુક્તં સ્તેયં દદ્યાત્
03.2.19 મૃતે ભર્તરિ ધર્મકામા તદાનીં એવ સ્થાપ્યાભરણં શુલ્કશેષં ચ લભેત

03.2.20 લબ્ધ્વા વા વિન્દમાના સ-વૃદ્ધિકં ઉભયં દાપ્યેત

03.2.21 કુટુમ્બકામા તુ શ્વશુરપતિદત્તં નિવેશકાલે લભેત

03.2.22 નિવેશકાલં હિ દીર્ઘપ્રવાસે વ્યાખ્યાસ્યામઃ

03.2.23 શ્વશુરપ્રાતિલોમ્યેન વા નિવિષ્ટા શ્વશુરપતિદત્તં જીયેત

03.2.24 જ્ઞાતિહસ્તાદ્ઽભિમૃષ્ટાયા જ્ઞાતયો યથાગૃહીતં દદ્યુઃ

03.2.25 ન્યાય ઉપગતાયાઃ પ્રતિપત્તા સ્ત્રીધનં ગોપયેત્

03.2.26 પતિદાયં વિન્દમાના જીયેત

03.2.27 ધર્મકામા ભુઞ્જીત

03.2.28 પુત્રવતી વિન્દમાના સ્ત્રીધનં જીયેત

03.2.29 તત્ તુ સ્ત્રીધનં પુત્રા હરેયુઃ

03.2.30 પુત્રભરણાર્થં વા વિન્દમાના પુત્રાર્થં સ્ફાતીકુર્યાત્

03.2.31 બહુપુરુષપ્રજાનાં પુત્રાણાં યથાપિતૃદત્તં સ્ત્રીધનં અવસ્થાપયેત્

03.2.32 કામકરણીયં અપિ સ્ત્રીધનં વિન્દમાના પુત્રસંસ્થં કુર્યાત્

03.2.33 અપુત્રા પતિશયનં પાલયન્તી ગુરુસમીપે સ્ત્રીધનં આયુઃક્ષયાદ્ ભુઞ્જીત

03.2.34 આપદ્ઽર્થં હિ સ્ત્રીધનમ્

03.2.35 ઊર્ધ્વં દાયાદં ગચ્છેત્

03.2.36 જીવતિ ભર્તરિ મૃતાયાઃ પુત્રા દુહિતરશ્ચ સ્ત્રીધનં વિભજેરન્, અપુત્રાયા દુહિતરઃ, તદ્ઽભાવે ભર્તા

03.2.37 શુલ્કં અન્વાધેયં અન્યદ્ વા બન્ધુભિર્દત્તં બાન્ધવા હરેયુઃ ઇતિ સ્ત્રીધનકલ્પઃ ।

03.2.38 વર્ષાણ્યષ્ટાવપ્રજાયમાનાં અપુત્રાં વન્ધ્યાં ચાકાङ્ક્ષેત, દશ નિન્દું, દ્વાદશ કન્યાપ્રસવિનીમ્

03.2.39 તતઃ પુત્રાર્થી દ્વિતીયાં વિન્દેત

03.2.40 તસ્યાતિક્રમે શુલ્કં સ્ત્રીધનં અર્ધં ચાધિવેદનિકં દદ્યાત્, ચતુર્વિંશતિપણપરં ચ દણ્ડમ્

03.2.41 શુલ્કં સ્ત્રીધનં અશુલ્કસ્ત્રીધનાયાઃ તત્પ્રમાણં આધિવેદનિકં અનુરૂપાં ચ વૃત્તિં દત્ત્વા બહ્વીરપિ વિન્દેત

03.2.42 પુત્રાર્થા હિ સ્ત્રિયઃ

03.2.43 તીર્થસમવાયે ચાસાં યથાવિવાહં પૂર્વં ઊઢાં જીવત્પુત્રાં વા પૂર્વં ગચ્છેત્

03.2.44 તીર્થગૂહનાગમને ષણ્ણ્ઁઅવતિર્દણ્ડઃ

03.2.45 પુત્રવતીં ધર્મકામાં વન્ધ્યાં નિન્દું નીરજસ્કાં વા નાકામાં ઉપેયાત્

03.2.46 ન ચાકામઃ પુરુષઃ કુષ્ઠિનીં ઉન્મત્તાં વા ગચ્છેત્

03.2.47 સ્ત્રી તુ પુત્રાર્થં એવમ્ભૂતં વા ઉપગચ્છેત્

03.2.48ab નીચત્વં પરદેશં વા પ્રસ્થિતો રાજકિલ્બિષી ।

03.2.48chd પ્રાણાભિહન્તા પતિતઃ ત્યાજ્યઃ ક્લીબોઽપિ વા પતિઃ (ઇતિ)

Chapt . iv) Marital duty, (v) Maintenance, (vi) Cruelty, (vI) Disaffection, (vIi) Misconduct, (ix) Prohibition of favours and dealings

03.3.01 દ્વાદશવર્ષા સ્ત્રી પ્રાપ્તવ્યવહારા ભવતિ, ષોડશવર્ષઃ પુમાન્

03.3.02 અત ઊર્ધ્વં અશુશ્રૂષાયાં દ્વાદશપણઃ સ્ત્રિયા દણ્ડઃ, પુંસો દ્વિગુણઃ ઇતિ શુશ્રૂષા ।

03.3.03 ભર્મણ્યાયાં અનિર્દિષ્ટકાલાયાં ગ્રાસાચ્છાદનં વાડધિકં યથાપુરુષપરિવાપં સવિશેષં દદ્યાત્

03.3.04 નિર્દિષ્ટકાલાયાં તદ્ એવ સઙ્ખ્યાય બન્ધં ચ દદ્યાત્

03.3.05 શુલ્કસ્ત્રીધનાધિવેદનિકાનાં અનાદાને ચ

03.3.06 શ્વશુરકુલપ્રવિષ્ટાયાં વિભક્તાયાં વા નાભિયોજ્યઃ પતિઃ ઇતિ ભર્મ ।

03.3.07 નષ્ટે વિનષ્ટે ન્યઙ્ગે અપિતૃકે અમાતૃકે ઇત્યનિર્દેશેન વિનયગ્રાહણમ્

03.3.08 વેણુદલરજ્જુહસ્તાનાં અન્યતમેન વા પૃષ્ઠે ત્રિરાઘાતઃ

03.3.09 તસ્યાતિક્રમે વાગ્દણ્ડપારુષ્યદણ્ડાભ્યાં અર્ધદણ્ડાઃ

03.3.10 તદ્ એવ સ્ત્રિયા ભર્તરિ પ્રસિદ્ધદોષાયાઃ

03.3.11 ઈર્ષ્યયા બાહ્યવિહારેષુ દ્વારેષ્વત્યયો યથાનિર્દિષ્ટઃ ઇતિ પારુષ્યમ્ ।

03.3.12 ભર્તારં દ્વિષતી સ્ત્રી સપ્તાર્તવાન્યમણ્ડયમાના તદાનીં એવ સ્થાપ્યાભરણં નિધાય ભર્તારં અન્યયા સહ શયાનં અનુશયીત

03.3.13 ભિક્ષુક્યન્વાધિજ્ઞાતિકુલાનાં અન્યતમે વા ભર્તા દ્વિષન્ સ્ત્રિયં એકાં અનુશયીત

03.3.14 દૃષ્ટલિઙ્ગે મૈથુનાપહારે સવર્ણાપસર્પ ઉપગમે વા મિથ્યાવાદી દ્વાદશપણં દદ્યાત્

03.3.15 અમોક્ષ્યા ભર્તુરકામસ્ય દ્વિષતી ભાર્યા, ભાર્યાયાશ્ચ ભર્તા

03.3.16 પરસ્પરન્દ્વેષાન્ મોક્ષઃ

03.3.17 સ્ત્રીવિપ્રકારાદ્ વા પુરુષશ્ચેન્ મોક્ષં ઇચ્છેદ્ યથાગૃહીતં અસ્યૈ દદ્યાત્

03.3.18 પુરુષવિપ્રકારાદ્ વા સ્ત્રી ચેન્ મોક્ષં ઇચ્છેન્નાસ્યૈ યથાગૃહીતં દદ્યાત્

03.3.19 અમોક્ષો ધર્મવિવાહાનામ્ ઇતિ દ્વેષઃ ।

03.3.20 પ્રતિષિદ્ધા સ્ત્રી દર્પમદ્યક્રીડાયાં ત્રિપણં દણ્ડં દદ્યાત્

03.3.21 દિવા સ્ત્રીપ્રેક્ષાવિહારગમને ષટ્પણો દણ્ડઃ, પુરુષપ્રેક્ષાવિહારગમને દ્વાદશપણઃ

03.3.22 રાત્રૌ દ્વિગુણઃ

03.3.23 સુપ્તમત્તપ્રવ્રજને ભર્તુરદાને ચ દ્વારસ્ય દ્વાદશપણઃ

03.3.24 રાત્રૌ નિષ્કસને દ્વિગુણઃ

03.3.25 સ્ત્રીપુંસયોર્મૈથુનાર્થેનાઙ્ગવિચેષ્ટાયાં રહોડશ્લીલસમ્ભાષાયાં વા ચતુર્વિંશતિપણઃ સ્ત્રિયા દણ્ડઃ, પુંસો દ્વિગુણઃ

03.3.26 કેશનીવિદન્તનખાલમ્બનેષુ પૂર્વઃ સાહસદણ્ડઃ, પુંસો દ્વિગુણઃ

03.3.27 શઙ્કિતસ્થાને સમ્ભાષાયાં ચ પણસ્થાને શિફાદણ્ડઃ

03.3.28 સ્ત્રીણાં ગ્રામમધ્યે ચણ્ડાલઃ પક્ષાન્તરે પઞ્ચશિફા દદ્યાત્

03.3.29 પણિકં વા પ્રહારં મોક્ષયેત્ ઇત્યતીચારઃ ।

03.3.30 પ્રતિષિદ્ધયોઃ સ્ત્રીપુંસયોરન્યોન્ય ઉપકારે ક્ષુદ્રકદ્રવ્યાણાં દ્વાદશપણો દણ્ડઃ, સ્થૂલકદ્રવ્યાણાં ચતુર્વિંશતિપણઃ, હિરણ્યસુવર્ણયોશ્ચતુષ્પઞ્ચાશત્પણઃ સ્ત્રિયા દણ્ડઃ, પુંસોર્દ્વિગુણઃ

03.3.31 ત એવાગમ્યયોરર્ધદણ્ડાઃ, તથા પ્રતિષિદ્ધપુરુષવ્યવહારેષુ ચ ઇતિ પ્રતિષેધઃ ।

03.3.32ab રાજદ્વિષ્ટાતિચારાભ્યાં આત્માપક્રમણેન ચ ।

03.3.32chd સ્ત્રીધનાનીતશુલ્કાનાં અસ્વામ્યં જાયતે સ્ત્રિયાઃ (ઇતિ)

Chapt . Leaving home, goi.g away(with a man), Short absence from home, Long absence from home

03.4.01 પતિકુલાન્નિષ્પતિતાયાઃ સ્ત્રિયાઃ ષટ્પણો દણ્ડઃ, અન્યત્ર વિપ્રકારાત્

03.4.02 પ્રતિષિદ્ધાયાં દ્વાદશપણઃ

03.4.03 પ્રતિવેશગૃહાતિગતાયાઃ ષટ્પણઃ

03.4.04 પ્રાતિવેશિકભિક્ષુકવૈદેહકાનાં અવકાશભિક્ષાપણ્યદાને દ્વાદશપણો દણ્ડઃ

03.4.05 પ્રતિષિદ્ધાનાં પૂર્વઃ સાહસદણ્ડઃ

03.4.06 પરગૃહાતિગતાયાશ્ચતુર્વિંશતિપણઃ

03.4.07 પરભાર્યાઽવકાશદાને શત્યો દણ્ડઃ, અન્યત્રાપદ્ભ્યઃ

03.4.08 વારણાજ્ઞાનયોર્નિર્દોષઃ

03.4.09 પતિવિપ્રકારાત્ પતિજ્ઞાતિસુખાવસ્થગ્રામિકાન્વાધિભિક્ષુકીજ્ઞાતિકુલાનાં અન્યતમં અપુરુષં ગન્તું અદોષઃ ઇતિ આચાર્યાઃ

03.4.10 સ-પુરુષં વા જ્ઞાતિકુલમ્

03.4.11 કુતો હિ સાધ્વીજનસ્યચ્છલમ્

03.4.12 સુખં એતદ્ અવબોદ્ધું, ઇતિ કૌટિલ્યઃ

03.4.13 પ્રેતવ્યાધિવ્યસનગર્ભનિમિત્તં અપ્રતિષિદ્ધં એવ જ્ઞાતિકુલગમનમ્

03.4.14 તન્નિમિત્તં વારયતો દ્વાદશપણો દણ્ડઃ

03.4.15 તત્રાપિ ગૂહમાના સ્ત્રીધનં જીયેત, જ્ઞાતયો વા છાદયન્તઃ શુલ્કશેષમ્ ઇતિ નિષ્પતનમ્ ।

03.4.16 પતિકુલાન્નિષ્પત્ય ગ્રામાન્તરગમને દ્વાદશપણો દણ્ડઃ સ્થાપ્યાઽઽભરણલોપશ્ચ

03.4.17 ગમ્યેન વા પુંસા સહ પ્રસ્થાને ચતુર્વિંશતિપણઃ સર્વધર્મલોપશ્ચ, અન્યત્ર ભર્મદાનતીર્થગમનાભ્યામ્

03.4.18 પુંસઃ પૂર્વઃ સાહસદણ્ડઃ તુલ્યશ્રેયસોઃ, પાપીયસો મધ્યમઃ

03.4.19 બન્ધુર્ઽદણ્ડ્યઃ

03.4.20 પ્રતિષેધેઽર્ધદણ્ડાઃ

03.4.21 પથિ વ્યન્તરે ગૂઢદેશાભિગમને મૈથુનાર્થેન શઙ્કિતપ્રતિષિદ્ધાયાં વા પથ્ય્ઽનુસરણે સઙ્ગ્રહણં વિદ્યાત્

03.4.22 તાલાવચરચારણમત્સ્યબન્ધકલુબ્ધકગોપાલકશૌણ્ડિકાનાં અન્યેષાં ચ પ્રસૃષ્ટસ્ત્રીકાણાં પથ્ય્ઽનુસરણં અદોષઃ

03.4.23 પ્રતિષિદ્ધે વા નયતઃ પુંસઃ સ્ત્રિયો વા ગચ્છન્ત્યાઃ ત એવાર્ધદણ્ડાઃ ઇતિ પથ્ય્ઽનુસરણમ્ ।

03.4.24 હ્રસ્વપ્રવાસિનાં શૂદ્રવૈશ્યક્ષત્રિયબ્રાહ્મણાનાં ભાર્યાઃ સંવત્સર ઉત્તરં કાલં આકાङ्क्षેરન્ અપ્રજાતાઃ, સંવત્સરાધિકં પ્રજાતાઃ

03.4.25 પ્રતિવિહિતા દ્વિગુણં કાલમ્

03.4.26 અપ્રતિવિહિતાઃ સુખાવસ્થા બિભૃયુઃ, પરં ચત્વારિ વર્ષાણ્યષ્ટૌ વા જ્ઞાતયઃ

03.4.27 તતો યથાદત્તં આદાય પ્રમુઞ્ચેયુઃ

03.4.28 બ્રાહ્મણં અધીયાનં દશવર્ષાણ્યપ્રજાતા, દ્વાદશ પ્રજાતા, રાજપુરુષં આયુઃક્ષયાદ્ આકાङ्क्षેત

03.4.29 સવર્ણતશ્ચ પ્રજાતા નાપવાદં લભેત

03.4.30 કુટુમ્બ। ઋદ્ધિલોપે વા સુખાવસ્થૈર્વિમુક્તા યથા ઇષ્ટં વિન્દેત, જીવિતાર્થં આપદ્ગતા વા

03.4.31 ધર્મવિવાહાત્ કુમારી પરિગ્રહીતારં અનાખ્યાય પ્રોષિતં અશ્રૂયમાણં સપ્ત તીર્થાન્યાકાङ्क्षેત, સંવત્સરં શ્રૂયમાણમ્

03.4.32 આખ્યાય પ્રોષિતં અશ્રૂયમાણં પઞ્ચ તીર્થાન્યાકાङ्क्षેત, દશ શ્રૂયમાણમ્

03.4.33 એકદેશદત્તશુલ્કં ત્રીણિ તીર્થાન્યશ્રૂયમાણં, શ્રૂયમાણં સપ્ત તીર્થાન્યાકાङ्क्षેત

03.4.34 દત્તશુલ્કં પઞ્ચ તીર્થાન્યશ્રૂયમાણં, દશ શ્રૂયમાણમ્

03.4.35 તતઃ પરં ધર્મસ્થૈર્વિસૃષ્ટા યથા ઇષ્ટં વિન્દેત

03.4.36 તીર્થ ઉપરોધો હિ ધર્મવધ ઇતિ કૌટિલ્યઃ ઇતિ હ્રસ્વપ્રવાસઃ ॥

03.4.37 દીર્ઘપ્રવાસિનઃ પ્રવ્રજિતસ્ય પ્રેતસ્ય વા ભાર્યા સપ્ત તીર્થાન્યાકાङ्क्षેત, સંવત્સરં પ્રજાતા

03.4.38 તતઃ પતિસોદર્યં ગચ્છેત્

03.4.39 બહુષુ પ્રત્યાસન્નં ધાર્મિકં ભર્મસમર્થં કનિષ્ઠં અભાર્યં વા

03.4.40 તદ્ઽભાવેઽપ્યસોદર્યં સપિણ્ડં કુલ્યં વાઽઽસન્નમ્

03.4.41 એતેષાં એષ એવ ક્રમઃ

03.4.42ab એતાન્ ઉત્ક્રમ્ય દાયાદાન્ વેદને જારકર્મણિ ।

03.4.42chd જારસ્ત્રીદાતૃવેત્તારઃ સમ્પ્રાપ્તાઃ સઙ્ગ્રહાત્યયમ્ (ઇતિ)

Chapt . Partition of inheritance

Orderof inheritance

03.5.01 અનીશ્વરાઃ પિતૃમન્તઃ સ્થિતપિતૃમાતૃકાઃ પુત્રાઃ

03.5.02 તેષાં ઊર્ધ્વં પિતૃતો દાયવિભાગઃ પિતૃદ્રવ્યાણામ્

03.5.03 સ્વયં। આર્જિતં અવિભાજ્યં, અન્યત્ર પિતૃદ્રવ્યાદ્ ઉત્થિતેભ્યઃ

03.5.04 પિતૃદ્રવ્યાદ્ અવિભક્ત ઉપગતાનાં પુત્રાઃ પૌત્રા વા આચતુર્થાદ્ ઇત્યંશભાજઃ

03.5.05 તાવદ્ અવિચ્છિન્નઃ પિણ્ડો ભવતિ

03.5.06 વિચ્છિન્નપિણ્ડાઃ સર્વે સમં વિભજેરન્

03.5.07 અપિતૃદ્રવ્યા વિભક્તપિતૃદ્રવ્યા વા સહ જીવન્તઃ પુનર્વિભજેરન્

03.5.08 યતશ્ચ ઉત્તિષ્ઠેત સ દ્વ્યંશં લભેત

03.5.09 દ્રવ્યં અપુત્રસ્ય સોદર્યા ભ્રાતરઃ સહજીવિનો વા હરેયુઃ કન્યાશ્ચ

03.5.10 રિક્થં પુત્રવતઃ પુત્રા દુહિતરો વા ધર્મિષ્ઠેષુ વિવાહેષુ જાતાઃ

03.5.11 તદ્ઽભાવે પિતા ધરમાણઃ

03.5.12 પિત્ર્ઽભાવે ભ્રાતરો ભ્રાતૃપુત્રાશ્ચ

03.5.13 અપિતૃકા બહવોઽપિ ચ ભ્રાતરો ભ્રાતૃપુત્રાશ્ચ પિતુરેકં અંશં હરેયુઃ

03.5.14 સોદર્યાણાં અનેકપિતૃકાણાં પિતૃતો દાયવિભાગઃ

03.5.15 પિતૃભ્રાતૃપુત્રાણાં પૂર્વે વિદ્યમાને નાપરં અવલમ્બન્તે, જ્યેષ્ઠે ચ કનિષ્ઠં અર્થગ્રાહિણમ્

03.5.16 જીવદ્વિભાગે પિતા ન એકં વિશેષયેત્

03.5.17 ન ચ એકં અકારણાન્નિર્વિભજેત

03.5.18 પિતુરસત્યર્થે જ્યેષ્ઠાઃ કનિષ્ઠાન્ અનુગૃહ્ણીયુઃ, અન્યત્ર મિથ્યાવૃત્તેભ્યઃ

03.5.19 પ્રાપ્તવ્યવહારાણાં વિભાગઃ

03.5.20 અપ્રાપ્તવ્યવહારાણાં દેયવિશુદ્ધં માતૃબન્ધુષુ ગ્રામવૃદ્ધેષુ વા સ્થાપયેયુઃ આવ્યવહારપ્રાપણાત્, પ્રોષિતસ્ય વા

03.5.21 સન્નિવિષ્ટસમં અસન્નિવિષ્ટેભ્યો નૈવેશનિકં દદ્યુઃ, કન્યાભ્યશ્ચ પ્રાદાનિકમ્

03.5.22 ઋણરિક્થયોઃ સમો વિભાગઃ

03.5.23 ઉદપાત્રાણ્યપિ નિષ્કિઞ્ચના વિભજેરન્ ઇત્યાચાર્યાઃ

03.5.24 છલં એતદ્ ઇતિ કૌટિલ્યઃ

03.5.25 સતોઽર્થસ્ય વિભાગો નાસતઃ

03.5.26 એતાવાન્ અર્થઃ સામાન્યઃ તસ્ય એતાવાન્ પ્રત્ય્ઽંશ ઇત્યનુભાષ્ય બ્રુવન્ સાક્ષિષુ વિભાગં કારયેત્

03.5.27 દુર્વિભક્તં અન્યોન્યાપહૃતં અન્તર્હિતં અવિજ્ઞાત ઉત્પન્નં વા પુનર્વિભજેરન્

03.5.28 અદાયાદકં રાજા હરેત્ સ્ત્રીવૃત્તિપ્રેતકાર્યવર્જં, અન્યત્ર શ્રોત્રિયદ્રવ્યાત્

03.5.29 તત્ ત્રૈવેદ્યેભ્યઃ પ્રયચ્છેત્

03.5.30 પતિતઃ પતિતાજ્ જાતઃ ક્લીબશ્ચાનંશાઃ, જડ ઉન્મત્તાન્ધકુષ્ઠિનશ્ચ

03.5.31 સતિ ભાર્યાર્થે તેષાં અપત્યં અતદ્વિધં ભાગં હરેત્

03.5.32 ગ્રાસાચ્છાદનં ઇતરે પતિતવર્જાઃ

03.5.33ab તેષાં ચ કૃતદારાણાં લુપ્તે પ્રજનને સતિ ।

03.5.33chd સૃજેયુર્બાન્ધવાઃ પુત્રાં તેષાં અંશાન્ પ્રકલ્પયેત્ (ઇતિ)

Chapt . Division into shares

03.6.01 એકસ્ત્રીપુત્રાણાં જ્યેષ્ઠાંશઃ - બ્રાહ્મણાનાં અજાઃ, ક્ષત્રિયાણાં અશ્વાઃ, વૈશ્યાનાં ગાવઃ, શૂદ્રાણાં અવયઃ

03.6.02 કાણલઙ્ગાઃ તેષાં મધ્યમાંશઃ, ભિન્નવર્ણાઃ કનિષ્ઠાંશઃ

03.6.03 ચતુષ્પદાભાવે રત્નવર્જાનાં દશાનાં ભાગં દ્રવ્યાણાં એકં જ્યેષ્ઠો હરેત્

03.6.04 પ્રતિમુક્તસ્વધાપાશો હિ ભવતિ

03.6.05 ઇત્યૌશનસો વિભાગઃ

03.6.06 પિતુઃ પરિવાપાદ્ યાનં આભરણં ચ જ્યેષ્ઠાંશઃ, શયનાસનં ભુક્તકાંસ્યં ચ મધ્યમાંશઃ, કૃષ્ણં ધાન્યાયસં ગૃહપરિવાપો ગોશકટં ચ કનિષ્ઠાંશઃ

03.6.07 શેષદ્રવ્યાણાં એકદ્રવ્યસ્ય વા સમો વિભાગઃ

03.6.08 અદાયાદા ભગિન્યઃ, માતુઃ પરિવાપાદ્ ભુક્તકાંસ્યાભરણભાગિન્યઃ

03.6.09 માનુષહીનો જ્યેષ્ઠઃ તૃતીયં અંશં જ્યેષ્ઠાંશાલ્લભેત, ચતુર્થં અન્યાયવૃત્તિઃ, નિવૃત્તધર્મકાર્યો વા

03.6.10 કામાચારઃ સર્વં જીયેત

03.6.11 તેન મધ્યમકનિષ્ઠૌ વ્યાખ્યાતૌ

03.6.12 તયોર્માનુષ ઉપેતો જ્યેષ્ઠાંશાદ્ અર્ધં લભેત

03.6.13 નાનાસ્ત્રીપુત્રાણાં તુ સંસ્કૃતાસંસ્કૃતયોઃ કન્યાકૃતક્ષતયોરભાવે ચ એકસ્યાઃ પુત્રયોર્યમયોર્વા પૂર્વજન્મના જ્યેષ્ઠભાવઃ

03.6.14 સૂતમાગધવ્રાત્યરથકારાણાં ઐશ્વર્યતો વિભાગઃ

03.6.15 શેષાઃ તં ઉપજીવેયુઃ

03.6.16 અનીશ્વરાઃ સમવિભાગાઃ

03.6.17 ચાતુર્વર્ણ્યપુત્રાણાં બ્રાહ્મણીપુત્રશ્ચતુરોઽંશાન્ હરેત્, ક્ષત્રિયાપુત્રસ્ત્રીન્ અંશાન્, વૈશ્યાપુત્રો દ્વાવંશૌ, એકં શૂદ્રાપુત્રઃ

03.6.18 તેન ત્રિવર્ણદ્વિવર્ણપુત્રવિભાગઃ ક્ષત્રિયવૈશ્યયોર્વ્યાખ્યાતઃ

03.6.19 બ્રાહ્મણસ્યાનન્તરાપુત્રઃ તુલ્યાંશઃ

03.6.20 ક્ષત્રિયવૈશ્યયોરર્ધાંશઃ તુલ્યાંશો વા માનુષ ઉપેતઃ

03.6.21 તુલ્યાતુલ્યયોરેકપુત્રઃ સર્વં હરેત્, બન્ધૂંશ્ચ બિભૃયાત્

03.6.22 બ્રાહ્મણાનાં તુ પારશવઃ તૃતીયં અંશં લભેત, દ્વાવંશૌ સપિણ્ડઃ કુલ્યો વાઽઽસન્નઃ, સ્વધાદાનહેતોઃ

03.6.23 તદ્ઽભાવે પિતુરાચાર્યોઽન્તેવાસી વા

03.6.24ab ક્ષેત્રે વા જનયેદ્ અસ્ય નિયુક્તઃ ક્ષેત્રજં સુતમ્ ।

03.6.24chd માતૃબન્ધુઃ સગોત્રો વા તસ્મૈ તત્ પ્રદિશેદ્ ધનમ્ (ઇતિ)

Chapt . Classification of sons

03.7.01 પરપરિગ્રહે બીજં ઉત્સૃષ્ટં ક્ષેત્રિણઃ ઇત્યાચાર્યાઃ

03.7.02 માતા ભસ્ત્રા, યસ્ય રેતઃ તસ્યાપત્યમ્ ઇત્યપરે

03.7.03 વિદ્યમાનં ઉભયં ઇતિ કૌટિલ્યઃ

03.7.04 સ્વયઞ્જાતઃ કૃતક્રિયાયાં ઔરસઃ

03.7.05 તેન તુલ્યઃ પુત્રિકાપુત્રઃ

03.7.06 સગોત્રેણાન્યગોત્રેણ વા નિયુક્તેન ક્ષેત્રજાતઃ ક્ષેત્રજઃ પુત્રઃ

03.7.07 જનયિતુરસત્યન્યસ્મિન્ પુત્રે સ એવ દ્વિપિતૃકો દ્વિગોત્રો વા દ્વયોરપિ સ્વધારિક્થભાગ્ ભવતિ

03.7.08 તત્સધર્મા બન્ધૂનાં ગૃહે ગૂઢજાતઃ તુ ગૂઢજઃ

03.7.09 બન્ધુના ઉત્સૃષ્ટોઽપવિદ્ધઃ સંસ્કર્તુઃ પુત્રઃ

03.7.10 કન્યાગર્ભઃ કાનીનઃ

03.7.11 સગર્ભ ઊઢાયાઃ સહ ઊઢઃ

03.7.12 પુનર્ભૂતાયાઃ પૌનર્ભવઃ

03.7.13 સ્વયઞ્જાતઃ પિતુર્બન્ધૂનાં ચ દાયાદઃ

03.7.14 પરજાતઃ સંસ્કર્તુરેવ ન બન્ધૂનામ્

03.7.15 તત્સધર્મા માતાપિતૃભ્યાં અદ્ભિર્મુક્તો દત્તઃ

03.7.16 સ્વયં બન્ધુભિર્વા પુત્રભાવ ઉપગત ઉપગતઃ

03.7.17 પુત્રત્વેઽધિકૃતઃ કૃતકઃ

03.7.18 પરિક્રીતઃ ક્રીતઃ ઇતિ ।

03.7.19 ઔરસે તુ ઉત્પન્ને સવર્ણાઃ તૃતીયાંશહરાઃ, અસવર્ણા ગ્રાસાચ્છાદનભાગિનઃ

03.7.20 બ્રાહ્મણક્ષત્રિયયોરનન્તરાપુત્રાઃ સવર્ણાઃ, એકાન્તરા અસવર્ણાઃ

03.7.21 બ્રાહ્મણસ્ય વૈશ્યાયાં અમ્બષ્ઠઃ, શૂદ્રાયાં નિષાદઃ પારશવો વા

03.7.22 ક્ષત્રિયસ્ય શૂદ્રાયાં ઉગ્રઃ

03.7.23 શૂદ્ર એવ વૈશ્યસ્ય

03.7.24 સવર્ણાસુ ચ એષાં અચરિતવ્રતેભ્યો જાતા વ્રાત્યાઃ

03.7.25 ઇત્યનુલોમાઃ

03.7.26 શૂદ્રાદ્ આયોગવક્ષત્તચણ્ડાલાઃ

03.7.27 વૈશ્યાન્ માગધવૈદેહકૌ

03.7.28 ક્ષત્રિયાત્ સૂતઃ

03.7.29 પૌરાણિકઃ ત્વન્યઃ સૂતો માગધશ્ચ, બ્રહ્મક્ષત્રાદ્ વિશેષઃ

03.7.30 ત એતે પ્રતિલોમાઃ સ્વધર્માતિક્રમાદ્ રાજ્ઞઃ સમ્ભવન્તિ

03.7.31 ઉગ્રાન્નૈષાદ્યાં કુક્કુટઃ, વિપર્યયે પુલ્કસઃ

03.7.32 વૈદેહિકાયાં અમ્બષ્ઠાદ્ વૈણઃ, વિપર્યયે કુશીલવઃ

03.7.33 ક્ષત્તાયાં ઉગ્રાત્શ્વપાકઃ

03.7.34 ઇત્યેતેઽન્યે ચાન્તરાલાઃ

03.7.35 કર્મણા વૈશ્યો રથકારઃ

03.7.36 તેષાં સ્વયોનૌ વિવાહઃ, પૂર્વાપરગામિત્વં વૃત્તાનુવૃત્તં ચ

03.7.37 શૂદ્રસધર્માણો વા, અન્યત્ર ચણ્ડાલેભ્યઃ

03.7.38 કેવલં એવં વર્તમાનઃ સ્વર્ગં આપ્નોતિ રાજા, નરકં અન્યથા

03.7.39 સર્વેષાં અન્તરાલાનાં સમો વિભાગઃ

03.7.40ab દેશસ્ય જાત્યાઃ સઙ્ઘસ્ય ધર્મો ગ્રામસ્ય વાઽપિ યઃ ।

03.7.40chd ઉચિતઃ તસ્ય તેન એવ દાયધર્મં પ્રકલ્પયેત્ (ઇતિ)

Chapt . Immovable property

Dwelling-places

03.8.01 સામન્તપ્રત્યયા વાસ્તુવિવાદાઃ

03.8.02 ગૃહં ક્ષેત્રં આરામઃ સેતુબન્ધઃ તટાકં આધારો વા વાસ્તુઃ

03.8.03 કર્ણકીલાયસસમ્બન્ધોઽનુગૃહં સેતુઃ

03.8.04 યથાસેતુભોગં વેશ્મ કારયેત્

03.8.05 અભૂતં વા પરકુડ્યાદ્ અપક્રમ્ય દ્વાવરત્ની ત્રિપદીં વા દેશબન્ધં કારયેત્

03.8.06 અવસ્કરં ભ્રમં ઉદપાનં વા ન ગૃહ ઉચિતાદ્ અન્યત્ર, અન્યત્ર સૂતિકાકૂપાદ્ આનિર્દશાહાદ્ ઇતિ

03.8.07 તસ્યાતિક્રમે પૂર્વઃ સાહસદણ્ડઃ

03.8.08 તેન ઇન્ધનાવઘાતનકૃતં કલ્યાણકૃત્યેષ્વાચામ ઉદકમાર્ગાશ્ચ વ્યાખ્યાતાઃ

03.8.09 ત્રિપદીપ્રતિક્રાન્તં અધ્યર્ધં અરત્નિં વા ગાઢપ્રસૃતં ઉદકમાર્ગં પ્રસ્રવણપ્રપાતં વા કારયેત્

03.8.10 તસ્યાતિક્રમે ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ

03.8.11 એકપદીપ્રતિક્રાન્તં અરત્નિં વા ચક્રિચતુષ્પદસ્થાનં અગ્નિષ્ઠં ઉદઞ્જરસ્થાનં રોચનીં કુટ્ટનીં વા કારયેત્

03.8.12 તસ્યાતિક્રમે ચતુર્વિંશતિપણો દણ્ડઃ

03.8.13 સર્વવાસ્તુકયોઃ પ્રાક્ષિપ્તકયોર્વા શાલયોઃ કિષ્કુરન્તરિકા ત્રિપદી વા

03.8.14 તયોશ્ચતુરઙ્ગુલં નીપ્રાન્તરમ્ નીવ્રાન્તરમ્? સમારૂઢકં વા

03.8.15 કિષ્કુમાત્રં આણિદ્વારં અન્તરિકાયાં ખણ્ડફુલ્લાર્થં અસમ્પાતં કારયેત્

03.8.16 પ્રકાશાર્થં અલ્પં ઊર્ધ્વં વાતાયનં કારયેત્

03.8.17 તદ્ઽવસિતે વેશ્મનિચ્છાદયેત્

03.8.18 સમ્ભૂય વા ગૃહસ્વામિનો યથા ઇષ્ટં કારયેયુઃ, અનિષ્ટં વારયેયુઃ

03.8.19 વાનલટ્યાશ્ચ ઊર્ધ્વં આવાર્યભાગં કટપ્રચ્છન્નં અવમર્શભિત્તિં વા કારયેદ્ વર્ષાબાધભયાત્

03.8.20 તસ્યાતિક્રમે પૂર્વઃ સાહસદણ્ડઃ, પ્રતિલોમદ્વારવાતાયનબાધાયાં ચ, અન્યત્ર રાજમાર્ગરથ્યાભ્યઃ

03.8.21 ખાતસોપાનપ્રણાલીનિશ્રેણ્યઽવસ્કરભાગૈર્બહિર્બાધાયાં ભોગનિગ્રહે ચ

03.8.22 પરકુડ્યં ઉદકેન ઉપઘ્નતો દ્વાદશપણો દણ્ડઃ, મૂત્રપુરીષ ઉપઘાતે દ્વિગુણઃ

03.8.23 પ્રણાલીમોક્ષો વર્ષતિ, અન્યથા દ્વાદશપણો દણ્ડઃ

03.8.24 પ્રતિષિદ્ધસ્ય ચ વસતઃ, નિરસ્યતશ્ચાવક્રયિણં અન્યત્ર પારુષ્યસ્તેયસાહસસઙ્ગ્રહણમિથ્યાભોગેભ્યઃ

03.8.25 સ્વયંઽભિપ્રસ્થિતો વર્ષાવક્રયશેષં દદ્યાત્

03.8.26 સામાન્યે વેશ્મનિ સાહાય્યં અપ્રયચ્છતઃ, સામાન્યં ઉપરુન્ધતો ભોગં ચ ગૃહે દ્વાદશપણો દણ્ડઃ

03.8.27 વિનાશયતઃ તદ્દ્વિગુણઃ

03.8.28ab કોષ્ઠકાઙ્ગણવર્ચાનાં અગ્નિકુટ્ટનશાલયોઃ ।

03.8.28chd વિવૃતાનાં ચ સર્વેષાં સામાન્યો ભોગ ઇષ્યતે (ઇતિ)

Chapt . sale of immovable property Fixing of boundaries Enchroachment and Damage

03.9.01 જ્ઞાતિસામન્તધનિકાઃ ક્રમેણ ભૂમિપરિગ્રહાન્ ક્રેતું અભ્યાભવેયુઃ

03.9.02 તતોઽન્યે બાહ્યાઃ

03.9.03 સામન્તચત્વારિંશત્કુલ્યેષુ ગૃહપ્રતિમુખે વેશ્મ શ્રાવયેયુઃ, સામન્તગ્રામવૃદ્ધેષુ ક્ષેત્રં આરામં સેતુબન્ધં તટાકં આધારં વા મર્યાદાસુ યથાસેતુભોગં અનેનાર્ઘેણ કઃ ક્રેતા ઇતિ

03.9.04 ત્રિરાઘુષિતં અવ્યાહતં ક્રેતા ક્રેતું લભેત

03.9.05 સ્પર્ધયા વા મૂલ્યવર્ધને મૂલ્યવૃદ્ધિઃ સ-શુલ્કા કોશં ગચ્છેત્

03.9.06 વિક્રયપ્રતિક્રોષ્ટા શુલ્કં દદ્યાત્

03.9.07 અસ્વામિપ્રતિક્રોશે ચતુર્વિંશતિપણો દણ્ડઃ

03.9.08 સપ્તરાત્રાદ્ ઊર્ધ્વં અનભિસરતઃ પ્રતિક્રુષ્ટો વિક્રીણીત

03.9.09 પ્રતિક્રુષ્ટાતિક્રમે વાસ્તુનિ દ્વિશતો દણ્ડઃ, અન્યત્ર ચતુર્વિંશતિપણો દણ્ડઃ ઇતિ વાસ્તુવિક્રયઃ ।

03.9.10 સીમવિવાદં ગ્રામયોરુભયોઃ સામન્તા પઞ્ચગ્રામી દશગ્રામી વા સેતુભિઃ સ્થાવરૈઃ કૃત્રિમૈર્વા કુર્યાત્

03.9.11 કર્ષકગોપાલકવૃદ્ધાઃ પૂર્વભુક્તિકા વા બાહ્યાઃ સેતૂનાં અભિજ્ઞા બહવ એકો વા નિર્દિશ્ય સીમસેતૂન્ વિપરીતવેષાઃ સીમાનં નયેયુઃ

03.9.12 ઉદ્દિષ્ટાનાં સેતૂનાં અદર્શને સહસ્રં દણ્ડઃ ।

03.9.13 તદ્ એવ નીતે સીમાપહારિણાં સેતુચ્છિદાં ચ કુર્યાત્

03.9.14 પ્રનષ્ટસેતુભોગં વા સીમાનં રાજા યથા ઉપકારં વિભજેત્ ઇતિ સીમવિવાદઃ ।

03.9.15 ક્ષેત્રવિવાદં સામન્તગ્રામવૃદ્ધાઃ કુર્યુઃ

03.9.16 તેષાં દ્વૈધીભાવે યતો બહવઃ શુચયોઽનુમતા વા તતો નિયચ્છેયુઃ મધ્યં વા ગૃહ્ણીયુઃ

03.9.17 તદ્।ઉભયપરા ઉક્તં વાસ્તુ રાજા હરેત્, પ્રનષ્ટસ્વામિકં ચ

03.9.18 યથા ઉપકારં વા વિભજેત્

03.9.19 પ્રસહ્યાદાને વાસ્તુનિ સ્તેયદણ્ડઃ

03.9.20 કારણાદાને પ્રયાસં આજીવં ચ પરિસઙ્ખ્યાય બન્ધં દદ્યાત્ ઇતિ ક્ષેત્રવિવાદઃ ।

03.9.21 મર્યાદાઽપહરણે પૂર્વઃ સાહસદણ્ડઃ

03.9.22 મર્યાદાભેદે ચતુર્વિંશતિપણઃ

03.9.23 તેન તપોવનવિવીતમહાપથશ્મશાનદેવકુલયજનપુણ્યસ્થાનવિવાદા વ્યાખ્યાતાઃ ઇતિ મર્યાદાસ્થાપનમ્ ।

03.9.24 સર્વ એવ વિવાદાઃ સામન્તપ્રત્યયાઃ

03.9.25 વિવીતસ્થલકેદારષણ્ડખલવેશ્મવાહનકોષ્ઠાનાં પૂર્વમ્પૂર્વં આબાધં સહેત

03.9.26 બ્રહ્મસોમારણ્યદેવયજનપુણ્યસ્થાનવર્જાઃ સ્થલપ્રદેશાઃ

03.9.27 આધારપરિવાહકેદાર ઉપભોગૈઃ પરક્ષેત્રકૃષ્ટબીજહિંસાયાં યથા ઉપઘાતં મૂલ્યં દદ્યુઃ

03.9.28 કેદારારામસેતુબન્ધાનાં પરસ્પરહિંસાયાં હિંસાદ્વિગુણો દણ્ડઃ

03.9.29 પશ્ચાન્નિવિષ્ટં અધરતટાકં ન ઉપરિતટાકસ્ય કેદારં ઉદકેનાપ્લાવયેત્

03.9.30 ઉપરિનિવિષ્ટં નાધરતટાકસ્ય પૂરાસ્રાવં વારયેદ્, અન્યત્ર ત્રિવર્ષ ઉપરતકર્મણઃ

03.9.31 તસ્યાતિક્રમે પૂર્વઃ સાહસદણ્ડઃ, તટાકવામનં ચ

03.9.32 પઞ્ચવર્ષ ઉપરતકર્મણઃ સેતુબન્ધસ્ય સ્વામ્યં લુપ્યેત, અન્યત્રાપદ્ભ્યઃ

03.9.33 તટાકસેતુબન્ધાનાં નવપ્રવર્તને પાઞ્ચવર્ષિકઃ પરિહારઃ, ભગ્ન ઉત્સૃષ્ટાનાં ચાતુર્વર્ષિકઃ, સમુપારૂઢાનાં ત્રૈવર્ષિકઃ, સ્થલસ્ય દ્વૈવર્ષિકઃ

03.9.34 સ્વાત્માધાને વિક્રયે ચ

03.9.35 ખાતપ્રાવૃત્તિં અનદીનિબન્ધાયતનતટાકકેદારારામષણ્ડવાપાનાં સસ્યવર્ણભાગ ઉત્તરિકં અન્યેભ્યો વા યથા ઉપકારં દદ્યુઃ

03.9.36 પ્રક્રયાવક્રયાધિભાગભોગનિષૃષ્ટ ઉપભોક્તારશ્ચ એષાં પ્રતિકુર્યુઃ

03.9.37 અપ્રતીકારે હીનદ્વિગુણો દણ્ડઃ

03.9.38ab સેતુભ્યો મુઞ્ચતઃ તોયં અવારે ષટ્પણો દમઃ ।

03.9.38chd વારે વા તોયં અન્યેષાં પ્રમાદેન ઉપરુન્ધતઃ (ઇતિ)

Chapt . Damage to pastures, fields and roads

03.10.01 કર્મ ઉદકમાર્ગં ઉચિતં રુન્ધતઃ કુર્વતોઽનુચિતં વા પૂર્વઃ સાહસદણ્ડઃ, સેતુકૂપપુણ્યસ્થાનચૈત્યદેવાયતનાનિ ચ પરભૂમૌ નિવેશયતઃ

03.10.02 પૂર્વાનુવૃત્તં ધર્મસેતું આધાનં વિક્રયં વા નયતો નાયયતો વા મધ્યમઃ સાહસદણ્ડઃ, શ્રોતૃણાં ઉત્તમઃ, અન્યત્ર ભગ્ન ઉત્સૃષ્ટાત્

03.10.03 સ્વામ્યભાવે ગ્રામાઃ પુણ્યશીલા વા પ્રતિકુર્યુઃ

03.10.04 પથિપ્રમાણં દુર્ગનિવેશે વ્યાખ્યાતમ્

03.10.05 ક્ષુદ્રપશુમનુષ્યપથં રુન્ધતો દ્વાદશપણો દણ્ડઃ, મહાપશુપથં ચતુર્વિંશતિપણઃ, હસ્તિક્ષેત્રપથં ચતુષ્પઞ્ચાશત્પણઃ, સેતુવનપથં ષટ્શતઃ, શ્મશાનગ્રામપથં દ્વિશતઃ, દ્રોણમુખપથં પઞ્ચશતઃ, સ્થાનીયરાષ્ટ્રવિવીતપથં સાહસ્રઃ

03.10.06 અતિકર્ષણે ચ એષાં દણ્ડચતુર્થા દણ્ડાઃ

03.10.07 કર્ષણે પૂર્વ ઉક્તાઃ

03.10.08 ક્ષેત્રિકસ્યાક્ષિપતઃ ક્ષેત્રં ઉપવાસસ્ય વા ત્યજતો બીજકાલે દ્વાદશપણો દણ્ડઃ, અન્યત્ર દોષ ઉપનિપાતાવિષહ્યેભ્યઃ

03.10.09 કરદાઃ કરદેષ્વાધાનં વિક્રયં વા કુર્યુઃ, બ્રહ્મદેયિકા બ્રહ્મદેયિકેષુ

03.10.10 અન્યથા પૂર્વઃ સાહસદણ્ડઃ

03.10.11 કરદસ્ય વાઽકરદગ્રામં પ્રવિશતઃ

03.10.12 કરદં તુ પ્રવિશતઃ સર્વદ્રવ્યેષુ પ્રાકામ્યં સ્યાત્, અન્યત્રાગારાત્

03.10.13 તદ્ અપ્યસ્મૈ દદ્યાત્
03.10.14 અનાદેયં અકૃષતોઽન્યઃ પઞ્ચવર્ષાણ્યુપભુજ્ય પ્રયાસનિષ્ક્રયેણ દદ્યાત્
03.10.15 અકરદાઃ પરત્ર વસન્તો ભોગં ઉપજીવેયુઃ
03.10.16 ગ્રામાર્થેન ગ્રામિકં વ્રજન્તં ઉપવાસાઃ પર્યાયેણાનુગચ્છેયુઃ
03.10.17 અનનુગચ્છન્તઃ પણાર્ધપણિકં યોજનં દદ્યુઃ
03.10.18 ગ્રામિકસ્ય ગ્રામાદ્ અસ્તેનપારદારિકં નિરસ્યતશ્ચતુર્વિંશતિપણો દણ્ડઃ, ગ્રામસ્ય ઉત્તમઃ
03.10.19 નિરસ્તસ્ય પ્રવેશો હ્યભિગમેન વ્યાખ્યાતઃ
03.10.20 સ્તમ્ભૈઃ સમન્તતો ગ્રામાદ્ ધનુઃશતાપકૃષ્ટં ઉપસાલં કારયેત્
03.10.21 પશુપ્રચારાર્થં વિવીતં આલવનેન ઉપજીવેયુઃ
03.10.22 વિવીતં ભક્ષયિત્વાઽપસૃતાનાં ઉષ્ટ્રમહિષાણાં પાદિકં રૂપં ગૃહ્ણીયુઃ, ગવાશ્વખરાણાં ચાર્ધપાદિકં, ક્ષુદ્રપશૂનાં ષોડશભાગિકમ્
03.10.23 ભક્ષયિત્વા નિષણ્ણાનાં એત એવ દ્વિગુણા દણ્ડાઃ, પરિવસતાં ચતુર્ગુણાઃ
03.10.24 ગ્રામદેવવૃષા વાઽનિર્દશાહા વા ધેનુરુક્ષાણો ગોવૃષાશ્ચાદણ્ડ્યાઃ
03.10.25 સસ્યભક્ષણે સસ્ય ઉપઘાતં નિષ્પત્તિતઃ પરિસઙ્ખ્યાય દ્વિગુણં દાપયેત્
03.10.26 સ્વામિનશ્ચાનિવેદ્ય ચારયતો દ્વાદશપણો દણ્ડઃ, પ્રમુઞ્ચતશ્ચતુર્વિંશતિપણઃ
03.10.27 પાલિનાં અર્ધદણ્ડાઃ
03.10.28 તદ્ એવ ષણ્ડભક્ષણે કુર્યાત્
03.10.29 વાટભેદે દ્વિગુણઃ વેશ્મખલવલયગતાનાં ચ ધાન્યાનાં ભક્ષણે
03.10.30 હિંસાપ્રતીકારં કુર્યાત્
03.10.31 અભયવનમૃગાઃ પરિગૃહીતા વા ભક્ષયન્તઃ સ્વામિનો નિવેદ્ય યથાઽવધ્યાઃ તથા પ્રતિષેદ્ધવ્યાઃ
03.10.32 પશવો રશ્મિપ્રતોદાભ્યાં વારયિતવ્યાઃ
03.10.33 તેષાં અન્યથા હિંસાયાં દણ્ડપારુષ્યદણ્ડાઃ
03.10.34 પ્રાર્થયમાના દૃષ્ટાપરાધા વા સર્વ ઉપાયૈર્નિયન્તવ્યાઃ ઇતિ ક્ષેત્રપથહિંસા ।
03.10.35 કર્ષકસ્ય ગ્રામં અભ્યુપેત્યાકુર્વતો ગ્રામ એવાત્યયં હરેત્
03.10.36 કર્માકરણે કર્મવેતનદ્વિગુણં, હિરણ્યાદાને પ્રત્યંશદ્વિગુણં, ભક્ષ્યપેયાદાને ચ પ્રહવણેષુ દ્વિગુણં અંશં દદ્યાત્
03.10.37 પ્રેક્ષાયાં અનંશદઃ, સ-સ્વજનો ન પ્રેક્ષેત
03.10.38 પ્રચ્છન્નશ્રવણ ઈક્ષણે ચ સર્વહિતે ચ કર્મણિ નિગ્રહેણ દ્વિગુણં અંશં દદ્યાત્
03.10.39 સર્વહિતં એકસ્ય બ્રુવતઃ કુર્યુરાજ્ઞામ્
03.10.40 અકરણે દ્વાદશપણો દણ્ડઃ
03.10.41 તં ચેત્ સમ્ભૂય વા હન્યુઃ પૃથગ્ એષાં અપરાધદ્વિગુણો દણ્ડઃ
03.10.42 ઉપહન્તૃષુ વિશિષ્ટઃ

03.10.43 બ્રાહ્મણશ્ચ એષાં જ્યૈષ્ઠ્યં નિયમ્યેત

03.10.44 પ્રહવણેષુ ચ એષાં બ્રાહ્મણા નાકામાઃ કુર્યુઃ, અંશં ચ લભેરન્

03.10.45 તેન દેશજાતિકુલસઙ્ઘાનાં સમયસ્યાનપાકર્મ વ્યાખ્યાતમ્

03.10.46ab રાજા દેશહિતાન્ સેતૂન્ કુર્વતાં પથિ સઙ્ક્રમાન્ ।

03.10.46chd ગ્રામશોભાશ્ચ રક્ષાશ્ચ તેષાં પ્રિયહિતં ચરેત્ (ઇતિ)

Chapt . Non-payment of debts

03.11.01 સપાદપણા ધર્મ્યા માસવૃદ્ધિઃ પણશતસ્ય, પઞ્ચપણા વ્યાવહારિકી, દશપણા કાન્તારગાણાં, વિંશતિપણા સામુદ્રાણામ્

03.11.02 તતઃ પરં કર્તુઃ કારયિતુશ્ચ પૂર્વઃ સાહસદણ્ડઃ, શ્રોતૄણાં એક એકં પ્રત્યર્ધદણ્ડઃ

03.11.03 રાજન્યયોગક્ષેમાવહે તુ ધનિકધારણિકયોશ્ચરિત્રં અવેક્ષેત

03.11.04 ધાન્યવૃદ્ધિઃ સસ્યનિષ્પત્તાવુપાર્ધા, પરં મૂલ્યકૃતા વર્ધેત

03.11.05 પ્રક્ષેપવૃદ્ધિરુદયાદ્ અર્ધં સન્નિધાનસન્ના વાર્ષિકી દેયા

03.11.06 ચિરપ્રવાસઃ સ્તમ્ભપ્રવિષ્ટો વા મૂલ્યદ્વિગુણં દદ્યાત્

03.11.07 અકૃત્વા વૃદ્ધિં સાધયતો વર્ધયતો વા, મૂલ્યં વા વૃદ્ધિં આરોપ્ય શ્રાવયતો બન્ધચતુર્ગુણો દણ્ડઃ

03.11.08 તુચ્છશ્રાવણાયાં અભૂતચતુર્ગુણઃ

03.11.09 તસ્ય ત્રિભાગં આદાતા દદ્યાત્, શેષં પ્રદાતા

03.11.10 દીર્ઘસત્ત્રવ્યાધિગુરુકુલ ઉપરુદ્ધં બાલં અસારં વા નઋણં અનુવર્ધેત

03.11.11 મુચ્યમાનં ઋણં અપ્રતિગૃહ્ણતો દ્વાદશપણો દણ્ડઃ

03.11.12 કારણાપદેશેન નિવૃત્તવૃદ્ધિકં અન્યત્ર તિષ્ઠેત્

03.11.13 દશવર્ષ ઉપેક્ષિતં ઋણં અપ્રતિગ્રાહ્યં, અન્યત્ર બાલવૃદ્ધવ્યાધિતવ્યસનિપ્રોષિતદેશત્યાગરાજ્યવિભ્રમેભ્યઃ

03.11.14 પ્રેતસ્ય પુત્રાઃ કુસીદં દદ્યુઃ, દાયાદા વા રિક્થહરાઃ, સહગ્રાહિણઃ, પ્રતિભુવો વા

03.11.15 ન પ્રાતિભાવ્યં અન્યત્

03.11.16 અસારં બાલપ્રાતિભાવ્યમ્

03.11.17 અસઙ્ખ્યાતદેશકાલં તુ પુત્રાઃ પૌત્રા દાયાદા વા રિક્થં હરમાણા દદ્યુઃ

03.11.18 જીવિતવિવાહભૂમિપ્રાતિભાવ્યં અસઙ્ખ્યાતદેશકાલં તુ પુત્રાઃ પૌત્રા વા વહેયુઃ

03.11.19 નાનાઋણસમવાયે તુ ન એકં દ્વૌ યુગપદ્ અભિવદેયાતાં, અન્યત્ર પ્રતિષ્ઠમાનાત્

03.11.20 તત્રાપિ ગૃહીતાનુપૂર્વ્યા રાજશ્રોત્રિયદ્રવ્યં વા પૂર્વં પ્રતિપાદયેત્

03.11.21 દમ્પત્યોઃ પિતાપુત્રયોઃ ભ્રાતૃણાં ચાવિભક્તાનાં પરસ્પર। કૃતં ઋણં અસાધ્યમ્

03.11.22 અગ્રાહ્યાઃ કર્મકાલેષુ કર્ષકા રાજપુરુષાશ્ચ

03.11.23 સ્ત્રી ચાપ્રતિશ્રાવિણી પતિકૃતં ઋણં, અન્યત્ર ગોપાલકાર્ધસીતિકેભ્યઃ

03.11.24 પતિઃ તુ ગ્રાહ્યઃ સ્ત્રીકૃતં ઋણં, અપ્રતિવિધાય પ્રોષિત ઇતિ

03.11.25 સમ્પ્રતિપત્તાવુત્તમઃ

03.11.26 અસ્મપ્રતિપત્તૌ તુ સાક્ષિણઃ પ્રમાણં પ્રાત્યયિકાઃ શુચયોઽનુમતા વા ત્રયોઽવરાર્ધ્યાઃ

03.11.27 પક્ષાનુમતૌ વા દ્વૌ, ઋણં પ્રતિ ન ત્વેવ એકઃ

03.11.28 પ્રતિષિદ્ધાઃ સ્યાલસહાયાન્વર્થિધનિકધારણિકવૈરિન્યઙ્ગધૃતદણ્ડાઃ, પૂર્વે ચાવ્યવહાર્યાઃ

03.11.29 રાજશ્રોત્રિયગ્રામભૃતકકુષ્ઠિવ્રણિનઃ પતિતચણ્ડાલકુત્સિતકર્માણોઽન્ધબધિરમૂકાહંવાદિનઃ સ્ત્રીરાજપુરુષાશ્ચ, અન્યત્ર સ્વવર્ગેભ્યઃ

03.11.30 પારુષ્યસ્તેયસઙ્ગ્રહણેષુ તુ વૈરિસ્યાલસહાયવર્જાઃ

03.11.31 રહસ્યવ્યવહારેષ્વેકા સ્ત્રી પુરુષ ઉપશ્રોતા ઉપદ્રષ્ટા વા સાક્ષી સ્યાદ્ રાજતાપસવર્જમ્

03.11.32 સ્વામિનો ભૃત્યાનાં ઋત્વિગ્ । આચાર્યાઃ શિષ્યાણાં માતાપિતરૌ પુત્રાણાં ચાનિગ્રહેણ સાક્ષ્યં કુર્યુઃ, તેસાં ઇતરે વા

03.11.33 પરસ્પરાભિયોગે ચ એષાં ઉત્તમાઃ પરા ઉક્તા દશબન્ધં દદ્યુઃ, અવરાઃ પઞ્ચબન્ધમ્ ઇતિ સાક્ષ્ય્ઽધિકારઃ ॥

03.11.34 બ્રાહ્મણ ઉદકુમ્ભાગ્નિસકાશે સાક્ષિણઃ પરિગૃહ્ણીયાત્

03.11.35 તત્ર બ્રાહ્મણં બ્રૂયાત્ સત્યં બ્રૂહિ ઇતિ

03.11.36 રાજન્યં વૈશ્યં વા મા તવ ઇષ્ટાપૂર્તફલં, કપાલહસ્તઃ શત્રુકુલં ભિક્ષાઽર્થી ગચ્છેઃ ઇતિ

03.11.37 શૂદ્રં જન્મમરણાન્તરે યદ્ વઃ પુણ્યફલં તદ્ રાજાનં ગચ્છેદ્, રાજ્ઞશ્ચ કિલ્બિષં યુષ્માન્ અન્યથાવાદે, દણ્ડશ્ચાનુબદ્ધઃ, પશ્ચાદ્ અપિ જ્ઞાયેત યથાદૃષ્ટશ્રુતં, એકમન્ત્રાઃ સત્યં ઉપહરત ઇતિ

03.11.38 અનુપહરતાં સપ્તરાત્રાદ્ ઊર્ધ્વં દ્વાદશપણો દણ્ડઃ, ત્રિપક્ષાદ્ ઊર્ધ્વં અભિયોગં દદ્યુઃ

03.11.39 સાક્ષિભેદે યતો બહવઃ શુચયોઽનુમતા વા તતો નિયચ્છેયુઃ, મધ્યં વા ગૃહ્ણીયુઃ

03.11.40 તદ્ વા દ્રવ્યં રાજા હરેત્

03.11.41 સાક્ષિણશ્ચેદ્ અભિયોગાદ્ ઊનં બ્રૂયુરતિરિક્તસ્યાભિયોક્તા બન્ધં દદ્યાત્

03.11.42 અતિરિક્તં વા બ્રૂયુઃ તદ્ઽતિરિક્તં રાજા હરેત્

03.11.43 બાલિશ્યાદ્ અભિયોક્તુર્વા દુહ્શ્રુતં દુર્લિખિતં પ્રેતાભિનિવેશં વા સમીક્ષ્ય સાક્ષિપ્રત્યયં એવ સ્યાત્

03.11.44 સાક્ષિબાલિશ્યેષ્વેવ પૃથગ્ઽનુયોગે દેશકાલકાર્યાણાં પૂર્વમધ્યમ ઉત્તમા દણ્ડાઃ ઇત્યૌશનસાઃ

03.11.45 કૂટસાક્ષિણો યં અર્થં અભૂતં કુર્યુર્ભૂતં વા નાશયેયુઃ તદ્ દશગુણં દણ્ડં દદ્યુઃ ઇતિ માનવાઃ

03.11.46 બાલિશ્યાદ્ વા વિસંવાદયતાં ચિત્રો ઘાતઃ ઇતિ બાર્હસ્પત્યાઃ

03.11.47 ન ઇતિ કૌટિલ્યઃ

03.11.48 ધ્રુવં હિ સાક્ષિભિઃ શ્રોતવ્યમ્

03.11.49 અશ‍ૃણ્વતાં ચતુર્વિંશતિપણો દણ્ડઃ, તતોઽર્ધં અબ્રુવાણાનામ્

03.11.50ab દેશકાલાવિદૂરસ્થાન્ સાક્ષિણઃ પ્રતિપાદયેત્ ।

03.11.50chd દૂરસ્થાન્ અપ્રસારાન્ વા સ્વામિવાક્યેન સાધયેત્ (ઇતિ)

Chapt . Deposits

03.12.01 ઉપનિધિરૃણેન વ્યાખ્યાતઃ

03.12.02 પરચક્રાટવિકાભ્યાં દુર્ગરાષ્ટ્રવિલોપે વા, પ્રતિરોધકૈર્વા ગ્રામસાર્થવ્રજવિલોપે, ચક્રયુક્તનાશે વા, ગ્રામમધ્યાગ્ન્ય્।ઉદકાબાધે જ્વાલાવેગ ઉપરુદ્ધે વા, નાવિ નિમગ્નાયાં મુષિતાયાં વા સ્વયં ઉપરૂઢો ન ઉપનિધિં અભ્યાવહેત્

03.12.03 ઉપનિધિભોક્તા દેશકાલાનુરૂપં ભોગવેતનં દદ્યાત્, દ્વાદશપણં ચ દણ્ડમ્

03.12.04 ઉપભોગનિમિત્તં નષ્ટં વિનષ્ટં વાઽભ્યાવહેત્, ચતુર્વિંશતિપણશ્ચ દણ્ડઃ, અન્યથા વા નિષ્પતને

03.12.05 પ્રેતં વ્યસનગતં વા ન ઉપનિધિં અભ્યાવહેત્

03.12.06 આધાનવિક્રયાપવ્યયનેષુ ચાસ્ય ચતુર્ગુણપઞ્ચબન્ધો દણ્ડઃ

03.12.07 પરિવર્તને નિષ્પાતને વા મૂલ્યસમઃ

03.12.08 તેનાધિપ્રણાશ ઉપભોગવિક્રયાધાનાપહારા વ્યાખ્યાતાઃ

03.12.09 નાધિઃ સ-ઉપકારઃ સીદેત્, ન ચાસ્ય મૂલ્યં વર્ધેત, અન્યત્ર નિસર્ગાત્

03.12.10 નિરુપકારઃ સીદેત્, મૂલ્યં ચાસ્ય વર્ધેત

03.12.11 ઉપસ્થિતસ્યાધિં અપ્રયચ્છતો દ્વાદશણપણો દણ્ડઃ

03.12.12 પ્રયોજકાસમ્નિધાને વા ગ્રામવૃદ્ધેષુ સ્થાપયિત્વા નિષ્ક્રયં આધિં પ્રતિપદ્યેત

03.12.13 નિવૃત્તવૃદ્ધિકો વાઽઽધિઃ તત્કાલકૃતમૂલ્યઃ તત્ર એવાવતિષ્ઠેત, અનાશવિનાશકરણાધિષ્ઠિતો વા

03.12.14 ધારણિકાસમ્નિધાને વા વિનાશભયાદ્ ઉદ્ગતાર્ઘં ધર્મસ્થાનુજ્ઞાતો વિક્રીણીત, આધિપાલપ્રત્યયો વા

03.12.15 સ્થાવરઃ તુ પ્રયાસભોગ્યઃ ફલભોગ્યો વા પ્રક્ષેપવૃદ્ધિમૂલ્યશુદ્ધં આજીવં અમૂલ્યક્ષયેણ ઉપનયેત્

03.12.16 અનિસૃષ્ટ ઉપભોક્તા મૂલ્યશુદ્ધં આજીવં બન્ધં ચ દદ્યાત્

03.12.17 શેષં ઉપનિધિના વ્યાખ્યાતમ્

03.12.18 એતેનાદેશોઽન્વાધિશ્ચ વ્યાખ્યાતૌ

03.12.19 સાર્થેનાન્વાધિહસ્તો વા પ્રદિષ્ટાં ભૂમિં અપ્રાપ્તશ્ચોરૈર્ભગ્ન ઉત્સૃષ્ટો વા નાન્વાધિં અભ્યાવહેત્

03.12.20 અન્તરે વા મૃતસ્ય દાયાદોઽપિ નાભ્યાવહેત્

03.12.21 શેષં ઉપનિધિના વ્યકહ્યાતમ્

03.12.22 યાચિતકં અવક્રીતકં વા યથાવિધં ગૃહ્ણીયુઃ તથાવિધં એવાર્પયેયુઃ

03.12.23 ભ્રેષ ઉપનિપાતાભ્યાં દેશકાલ ઉપરોધિ દત્તં નષ્ટં વિનષ્ટં વા નાભ્યાવહેયુઃ

03.12.24 શેષં ઉપનિધિના વ્યાખ્યાતમ્

03.12.25 વૈયાવૃત્યવિક્રયઃ તુ - વૈયાવૃત્યકરા યથાદેશકાલં વિક્રીણાનાઃ પણ્યં યથાજાતં મૂલ્યં ઉદયં ચ દદ્યુઃ

03.12.26 દેશકાલાતિપાતને વા પરિહીણં સમ્પ્રદાનકાલિકેનાર્ઘેણ મૂલ્યં ઉદયં ચ દદ્યુઃ

03.12.27 યથાસમ્ભાષિતં વા વિક્રીણાના ન ઉદયં અધિગચ્છેયુઃ, મૂલ્યં એવ દદ્યુઃ

03.12.28 અર્ઘપતને વા પરિહીણં યથાપરિહીણં મૂલ્યં ઊનં દદ્યુઃ

03.12.29 સાંવ્યવહારિકેષુ વા પ્રાત્યયિકેષ્વરાજવાચ્યેષુ ભ્રેષ ઉપનિપાતાભ્યાં નષ્ટં વિનષ્ટં વા મૂલ્યં અપિ ન દદ્યુઃ

03.12.30 દેશકાલાન્તરિતાનાં તુ પણ્યાનાં ક્ષયવ્યયવિશુદ્ધં મૂલ્યં ઉદયં ચ દદ્યુઃ, પણ્યસમવાયાનાં ચ પ્રત્યંશમ્

03.12.31 શેષં ઉપનિધિના વ્યાખ્યાતમ્

03.12.32 એતેન વૈયાવૃત્યવિક્રયો વ્યાખ્યાતઃ

03.12.33 નિક્ષેપશ્ચ ઉપનિધિના

03.12.34 તં અન્યેન નિક્ષિપ્તં અન્યસ્યાર્પયતો હીયેત

03.12.35 નિક્ષેપાપહારે પૂર્વાપદાનં નિક્ષેપ્તારશ્ચ પ્રમાણમ્

03.12.36 અશુચયો હિ કારવઃ

03.12.37 ન એષાં કરણપૂર્વો નિક્ષેપધર્મઃ

03.12.38 કરણહીનં નિક્ષેપં અપવ્યયમાનં ગૂઢભિત્તિન્યસ્તાન્ સાક્ષિણો નિક્ષેપ્તા રહસિ પ્રણિપાતેન પ્રજ્ઞાપયેત્, વનાન્તે વા મદ્યપ્રહવણવિશ્વાસેન

03.12.39 રહસિ વૃદ્ધો વ્યાધિતો વા વૈદેહકઃ કશ્ચિત્ કૃતલક્ષણં દ્રવ્યં અસ્ય હસ્તે નિક્ષિપ્યાપગચ્છેત્

03.12.40 તસ્ય પ્રતિદેશેન પુત્રો ભ્રાતા વાઽભિગમ્ય નિક્ષેપં યાચેત

03.12.41 દાને શુચિઃ, અન્યથા નિક્ષેપં સ્તેયદણ્ડં ચ દદ્યાત્

03.12.42 પ્રવ્રજ્યાઽભિમુખો વા શ્રદ્ધેયઃ કશ્ચિત્ કૃતલક્ષણં દ્રવ્યં અસ્ય હસ્તે નિક્ષિપ્ય પ્રતિષ્ઠેત

03.12.43 તતઃ કાલાન્તરાગતો યાચેત

03.12.44 દાને શુચિઃ, અન્યથા નિક્ષેપં સ્તેયદણ્ડં ચ દદ્યાત્

03.12.45 કૃતલક્ષણેન વા દ્રવ્યેણ પ્રત્યાનયેદ્ એનમ્

03.12.46 બાલિશજાતીયો વા રાત્રૌ રાજદાયિકાક્ષણભીતઃ સારં અસ્ય હસ્તે નિક્ષિપ્યાપગચ્છેત્

03.12.47 સ એનં બન્ધનાગારગતો યાચેત

03.12.48 દાને શુચિઃ, અન્યથા નિક્ષેપં સ્તેયદણ્ડં ચ દદ્યાત્

03.12.49 અભિજ્ઞાનેન ચાસ્ય ગૃહે જનં ઉભયં યાચેત

03.12.50 અન્યતર્તાદાને યથા ઉક્તં પુરસ્તાત્

03.12.51 દ્રવ્યભોગાનાં આગમં ચાસ્યાનુયુઞ્જીત, તસ્ય ચાર્થસ્ય વ્યવહાર ઉપલિઙ્ગનં, અભિયોક્તુશ્ચાર્થસામર્થ્યમ્

03.12.52 એતેન મિથઃસમવાયો વ્યાખ્યાતઃ

03.12.53ab તસ્માત્ સાક્ષિમદ્ અચ્છન્નં કુર્યાત્ સમ્યગ્વિભાષિતમ્ ।

03.12.53chd સ્વે પરે વા જને કાર્યં દેશકાલાગ્રવર્ણતઃ (ઇતિ)

Chapt . Law concerning slaves and labourers

03.13.01 ઉદરદાસવર્જં આર્યપ્રાણં અપ્રાપ્તવ્યવહારં શૂદ્રં વિક્રયાધાનં નયતઃ સ્વજનસ્ય દ્વાદશપણો દણ્ડઃ, વૈશ્યં દ્વિગુણઃ, ક્ષત્રિયં ત્રિગુણઃ, બ્રાહ્મણં ચતુર્ગુણઃ

03.13.02 પરજનસ્ય પૂર્વમધ્યમ ઉત્તમવધા દણ્ડાઃ, ક્રેતૃશ્રોતૃણાં ચ

03.13.03 મ્લેચ્છાનાં અદોષઃ પ્રજાં વિક્રેતું આધાતું વા

03.13.04 ન ત્વેવાર્યસ્ય દાસભાવઃ

03.13.05 અથવાઽઽર્યં આધાય કુલબન્ધન આર્યાણાં આપદિ, નિષ્ક્રયં ચાધિગમ્ય બાલં સાહાય્યદાતારં વા પૂર્વં નિષ્ક્રીણીરન્

03.13.06 સકૃદ્ ।આત્માધાતા નિષ્પતિતઃ સીદેત્, દ્વિરન્યેનાહિતકઃ, સકૃદ્ ઉભૌ પરવિષયાભિમુખૌ

03.13.07 વિત્તાપહારિણો વા દાસસ્યાર્યભાવં અપહરતોઽર્ધદણ્ડઃ

03.13.08 નિષ્પતિતપ્રેતવ્યસનિનાં આધાતા મૂલ્યં ભજેત

03.13.09 પ્રેતવિણ્મૂત્ર ઉચ્છિષ્ટગ્રાહણં આહિતસ્ય નગ્નસ્નાપનં દણ્ડપ્રેષણં અતિક્રમણં ચ સ્ત્રીણાં મૂલ્યનાશકરં, ધાત્રીપરિચારિકાર્ધસીતિક ઉપચારિકાણાં ચ મોક્ષકરમ્

03.13.10 સિદ્ધં ઉપચારકસ્યાભિપ્રજાતસ્યાપક્રમણમ્

03.13.11 ધાત્રીં આહિતિકાં વાઽકામાં સ્વવશાં ગચ્છતઃ પૂર્વઃ સાહસદણ્ડઃ, પરવશાં મધ્યમઃ

03.13.12 કન્યાં આહિતિકાં વા સ્વયં અન્યેન વા દુષયતો મૂલ્યનાશઃ શુલ્કં તદ્દ્વિગુણશ્ચ દણ્ડઃ

03.13.13 આત્મવિક્રયિણઃ પ્રજાં આર્યાં વિદ્યાત્

03.13.14 આત્માધિગતં સ્વામિકર્માવિરુદ્ધં લભેત, પિત્ર્યં ચ દાયમ્

03.13.15 મૂલ્યેન ચાર્યત્વં ગચ્છેત્

03.13.16 તેન ઉદરદાસાહિતકૌ વ્યાખ્યાતૌ

03.13.17 પ્રક્ષેપાનુરૂપશ્ચાસ્ય નિષ્ક્રયઃ

03.13.18 દણ્ડપ્રણીતઃ કર્મણા દણ્ડં ઉપનયેત્

03.13.19 આર્યપ્રાણો ધ્વજાહૃતઃ કર્મકાલાનુરૂપેણ મૂલ્યાર્ધેન વા વિમુચ્યેત

03.13.20 ગૃહેજાતદાયાગતલબ્ધક્રીતાનાં અન્યતમં દાસં ઊનાષ્ટવર્ષં વિબન્ધું અકામં નીચે કર્મણિ વિદેશે દાસીં વા સગર્ભાં અપ્રતિવિહિતગર્ભભર્મણ્યાં વિક્રયાધાનં નયતઃ પૂર્વઃ સાહસદણ્ડઃ, ક્રેતૃશ્રોતૄણાં ચ

03.13.21 દાસં અનુરૂપેણ નિષ્ક્રયેણાર્યં અકુર્વતો દ્વાદશપણો દણ્ડઃ, સંરોધશ્ચાકરણાત્

03.13.22 દાસદ્રવ્યસ્ય જ્ઞાતયો દાયાદાઃ, તેષાં અભાવે સ્વામી

03.13.23 સ્વામિનઃ સ્વસ્યાં દાસ્યાં જાતં સમાતૃકં અદાસં વિદ્યાત્

03.13.24 ગૃહ્યા ચેત્ કુટુમ્બાર્થચિન્તની માતા ભ્રાતા ભગિની ચાસ્યા અદાસાઃ સ્યુઃ

03.13.25 દાસં દાસીં વા નિષ્ક્રીય પુનર્વિક્રયાધાનં નયતો દ્વાદશપણો દણ્ડઃ, અન્યત્ર સ્વયંવાદિભ્યઃ ઇતિ દાસકલ્પઃ ।

03.13.26 કર્મકરસ્ય કર્મસમ્બન્ધં આસન્ના વિદ્યુઃ

03.13.27 યથાસમ્ભાષિતં વેતનં લભેત, કર્મકાલાનુરૂપં અસમ્ભાષિતવેતનઃ

03.13.28 કર્ષકઃ સસ્યાનાં ગોપાલકઃ સર્પિષાં વૈદેહકઃ પણ્યાનાં આત્મના વ્યવહૃતાનાં દશભાગં અસમ્ભાષિતવેતનો લભેત

03.13.29 સમ્ભાષિતવેતનઃ તુ યથાસમ્ભાષિતમ્

03.13.30 કારુશિલ્પિકુશીલવચિકિત્સકવાગ્જીવનપરિચારકાદિરાશાકારિકવર્ગઃ તુ યથાઽન્યઃ તદ્વિધઃ કુર્યાદ્ યથા વા કુશલાઃ કલ્પયેયુઃ તથા વેતનં લભેત

03.13.31 સાક્ષિપ્રત્યયં એવ સ્યાત્

03.13.32 સાક્ષિણાં અભાવે યતઃ કર્મ તતોઽનુયુઞ્જીત

03.13.33 વેતનાદાને દશબન્ધો દણ્ડઃ, ષટ્પણો વા

03.13.34 અપવ્યયમાને દ્વાદશપણો દણ્ડઃ, પઞ્ચબન્ધો વા

03.13.35 નદીવેગજ્વાલાસ્તેનવ્યાલ ઉપરુદ્ધઃ સર્વસ્વપુત્રદારાત્મદાનેનાર્તઃ ત્રાતારં આહૂય નિષ્તીર્ણઃ કુશલપ્રદિષ્ટં વેતનં દદ્યાત્

03.13.36 તેન સર્વત્રાર્તદાનાનુશયા વ્યાખ્યાતાઃ

03.13.37ab લભેત પુંશ્ચલી ભોગં સઙ્ગમસ્ય ઉપલિઙ્ગનાત્ ।

03.13.37chd અતિયાચ્ના તુ જીયેત દૌર્મત્યાવિનયેન વા  (ઇતિ)

Chapt .   Duties of servants

Undertaking in partnership

03.14.01 ગૃહીત્વા વેતનં કર્માકુર્વતો ભૃતકસ્ય દ્વાદશપણો દણ્ડઃ, સંરોધશ્ચાકરણાત્

03.14.02 અશક્તઃ કુત્સિતે કર્મણિ વ્યાધૌ વ્યસને વાઽનુશયં લભેત, પરેણ વા કારયિતુમ્

03.14.03 તસ્યવ્યયકર્મણા લભેત ભર્તા વા કારયિતુમ્

03.14.04 નાન્યઃ ત્વયા કારયિતવ્યો, મયા વા નાન્યસ્ય કર્તવ્યમ્ ઇત્યવરોધે ભર્તુરકારયતો ભૃતકસ્યાકુર્વતો વા દ્વાદશપણો દણ્ડઃ

03.14.05 કર્મનિષ્ઠાપને ભર્તુરન્યત્ર ગૃહીતવેતનો નાસકામઃ કુર્યાત્

03.14.06 ઉપસ્થિતં અકારયતઃ કૃતં એવ વિદ્યાદ્ ઇત્યાચાર્યાઃ

03.14.07 ન ઇતિ કૌટિલ્યઃ

03.14.08 કૃતસ્ય વેતનં નાકૃતસ્યાસ્તિ

03.14.09 સ ચેદ્ અલ્પં અપિ કારયિત્વા ન કારયેત્ કૃતં એવાસ્ય વિદ્યાત્

03.14.10 દેશકાલાતિપાતનેન કર્મણાં અન્યથાકરણે વા નાસકામઃ કૃતં અનુમન્યેત

03.14.11 સમ્ભાષિતાદ્ અધિકક્રિયાયાં પ્રયાસં ન મોઘં કુર્યાત્

03.14.12 તેન સઙ્ઘભૃતા વ્યાખ્યાતાઃ

03.14.13 તેષાં આધિઃ સપ્તરાત્રં આસીત

03.14.14 તતોઽન્યં ઉપસ્થાપયેત્, કર્મનિષ્પાકં ચ

03.14.15 ન ચાનિવેદ્ય ભર્તુઃ સઙ્ઘઃ કઞ્ચિત્ પરિહરેદ્ ઉપનયેદ્ વા

03.14.16 તસ્યાતિક્રમે ચતુર્વિંશતિપણો દણ્ડઃ

03.14.17 સઙ્ઘેન પરિહૃતસ્યાર્ધદણ્ડઃ ઇતિ ભૃતકાધિકારઃ ॥

03.14.18 સઙ્ઘભૃતાઃ સમ્ભૂયસમુત્થાતારો વા યથાસમ્ભાષિતં વેતનં સમં વા વિભજેરન્

03.14.19 કર્ષણવૈદેહકા વા સસ્યપણ્યારમ્ભપર્યવસાનાન્તરે સન્નસ્ય યથાકૃતસ્ય કર્મણઃ પ્રત્યંશં દદ્યુઃ

03.14.20 પુરુષ ઉપસ્થાને સમગ્રં અંશં દદ્યુઃ

03.14.21 સંસિદ્ધે તુ ઉદ્ધૃતપણ્યે સન્નસ્ય તદાનીં એવ પ્રત્યંશં દદ્યુઃ

03.14.22 સામાન્યા હિ પથિસિદ્ધિશ્ચાસિદ્ધિશ્ચ

03.14.23 પ્રક્રાન્તે તુ કર્મણિ સ્વસ્થસ્યાપક્રામતો દ્વાદશપણો દણ્ડઃ

03.14.24 ન ચ પ્રાકામ્યં અપક્રમણે

03.14.25 ચોરં ત્વભયપૂર્વં કર્મણઃ પ્રત્યંશેન ગ્રાહયેદ્, દદ્યાત્ પ્રત્યંશં અભયં ચ

03.14.26 પુનઃસ્તેયે પ્રવાસનં, અન્યત્રગમને ચ

03.14.27 મહાઽપરાધે તુ દૂષ્યવદ્ આચરેત્

03.14.28 યાજકાઃ સ્વાપ્રચારદ્રવ્યવર્જં યથાસમ્ભાષિતં વેતનં સમં વા વિભજેરન્

03.14.29 અગ્નિષ્ટોમાદિષુ ચ ક્રતુષુ દીક્ષણાદ્ ઊર્ધ્વં તૃતીયં અંશં, મધ્યમ ઉપસદ ઊર્ધ્વં અર્ધં અંશં, સુત્યે પ્રાતઃસવનાદ્ ઊર્ધ્વં પાદ ઊનં અંશમ્

03.14.30 માધ્યન્દિનાત્ સવનાદ્ ઊર્ધ્વં સમગ્રં અંશં લભેત

03.14.31 નીતા હિ દક્ષિણા ભવન્તિ

03.14.32 બૃહસ્પતિસવવર્જં પ્રતિસવનં હિ દક્ષિણા દીયન્તે

03.14.33 તેનાહર્ગણદક્ષિણા વ્યાખ્યાતાઃ

03.14.34 સનાનાં આદશાહોરાત્રાત્શેષભૃતાઃ કર્મ કુર્યુઃ, અન્યે વા સ્વપ્રત્યયાઃ

03.14.35 કર્મણ્યસમાપ્તે તુ યજમાનઃ સીદેદ્, ઋત્વિજઃ કર્મ સમાપય્ય દક્ષિણાં હરેયુઃ

03.14.36 અસમાપ્તે તુ કર્મણિ યાજ્યં યાજકં વા ત્યજતઃ પૂર્વઃ સાહસદણ્ડઃ

03.14.37ab અનાહિતાગ્નિઃ શતગુરુયજ્વા ચ સહસ્રગુઃ ।

03.14.37chd સુરાપો વૃષલીભર્તા બ્રહ્મહા ગુરુતલ્પગઃ

03.14.38ab અસત્પ્રતિગ્રહે યુક્તઃ સ્તેનઃ કુત્સિતયાજકઃ ।

03.14.38chd અદોષઃ ત્યક્તું અન્યોન્યં કર્મસઙ્કરનિશ્ચયાત્ (ઇતિ)

Chapt . Rescission of sale and purchase

03.15.01 વિક્રીય પણ્યં અપ્રયચ્છતો દ્વાદશપણો દણ્ડઃ, અન્યત્ર દોષ ઉપનિપાતાવિષહ્યેભ્યઃ

03.15.02 પણ્યદોષો દોષઃ

03.15.03 રાજચોરાગ્ન્યુ્। ઉદકબાધ ઉપનિપાતઃ

03.15.04 બહુગુણહીનં આર્તકૃતં વાઽવિષહ્યમ્

03.15.05 વૈદેહકાનાં એકરાત્રં અનુશયઃ, કર્ષકાણાં ત્રિરાત્રં, ગોરક્ષકાણાં પઞ્ચરાત્રમ્

03.15.06 વ્યામિશ્રાણાં ઉત્તમાનાં ચ વર્ણાનાં વૃત્તિવિક્રયે સપ્તરાત્રમ્

03.15.07 આતિપાતિકાનાં પણ્યાનાં અન્યત્રાવિક્રેયમ્ ઇત્યવરોધેનાનુશયો દેયઃ

03.15.08 તસ્યાતિક્રમે ચતુર્વિંશતિપણો દણ્ડઃ, પણ્યદશભાગો વા

03.15.09 ક્રીત્વા પણ્યં અપ્રતિગૃહ્ણતો દ્વાદશપણો દણ્ડઃ, અન્યત્ર દોષ ઉપનિપાતાવિષહ્યેભ્યઃ

03.15.10 સમાનશ્ચાનુશયો વિક્રેતુરનુશયેન

03.15.11 વિવાહાનાં તુ ત્રયાણાં પૂર્વેષાં વર્ણાનાં પાણિગ્રહણાત્ સિદ્ધં ઉપાવર્તનં, શૂદ્રાણાં ચ પ્રકર્મણઃ

03.15.12 વૃત્તપાણિગ્રહણયોરપિ દોષં ઔપશાયિકં દૃષ્ટ્વા સિદ્ધં ઉપાવર્તનમ્

03.15.13 ન ત્વેવાભિપ્રજાતયોઃ

03.15.14 કન્યાદોષં ઔપશાયિકં અનાખ્યાય પ્રયચ્છતઃ કન્યાં ષણ્ણઁઅવતિર્દણ્ડઃ, શુલ્કસ્ત્રીધનપ્રતિદાનં ચ

03.15.15 વરયિતુર્વા વરદોષં અનાખ્યાય વિન્દતો દ્વિગુણઃ, શુલ્કસ્ત્રીધનનાશશ્ચ

03.15.16 દ્વિપદચતુષ્પદાનાં તુ કુણ્ઠવ્યાધિતાશુચીનાં ઉત્સાહસ્વાસ્થ્યશુચીનાં આખ્યાને દ્વાદશપણો દણ્ડઃ

03.15.17 આત્રિપક્ષાદ્ ઇતિ ચતુષ્પદાનાં ઉપાવર્તનં, આસંવત્સરાદ્ ઇતિ મનુષ્યાણામ્

03.15.18 તાવતા હિ કાલેન શક્યં શૌચાશૌચે જ્ઞાતુમ્

03.15.19ab દાતા પ્રતિગ્રહીતા ચ સ્યાતાં ન ઉપહતૌ યથા ।

03.15.19chd દાને ક્રયે વાઽનુશયં તથા કુર્યુઃ સભાસદઃ (ઇતિ)

Chapt . Non-conveyance of gifts

sale without ownership

Relation of ownership

03.16.01 દત્તસ્યાપ્રદાનં ઋણાદાનેન વ્યાખ્યાતમ્

03.16.02 દત્તં અવ્યવહાર્યં એકત્રાનુશયે વર્તેત

03.16.03 સર્વસ્વં પુત્રદારં આત્માનં વા પ્રદાયાનુશયિનઃ પ્રયચ્છેત્

03.16.04 ધર્મદાનં અસાધુષુ કર્મસુ ચાઉપઘાતિકેષુ વા, અર્થદાનં અનુપકારિષ્વપકારિષુ વા, કામદાનં અનર્હેષુ ચ

03.16.05 યથા ચ દાતા પ્રતિગ્રહીતા ચ ન ઉપહતૌ સ્યાતાં તથાઽનુશયં કુશલાઃ કલ્પયેયુઃ

03.16.06 દણ્ડભયાદ્ આક્રોશભયાદ્ અનર્થભયાદ્ વા ભયદાનં પ્રતિગૃહ્ણતઃ સ્તેયદણ્ડઃ, પ્રયચ્છતશ્ચ

03.16.07 રોષદાનં પરહિંસાયાં, રાજ્ઞાં ઉપરિ દર્પદાનં ચ

03.16.08 તત્ર ઉત્તમો દણ્ડઃ

03.16.09 પ્રાતિભાવ્યં દણ્ડશુલ્કશેષં આક્ષિકં સૌરિકં ચ નાકામઃ પુત્રો દાયાદો વા રિક્થહરો દદ્યાત્ ઇતિ દત્તસ્યાનપાકર્મ ।

03.16.10 અસ્વામિવિક્રયઃ તુ - નષ્ટાપહૃતં આસાદ્ય સ્વામી ધર્મસ્થેન ગ્રાહયેત્

03.16.11 દેશકાલાતિપત્તૌ વા સ્વયં ગૃહીત્વા ઉપહરેત્

03.16.12 ધર્મસ્થશ્ચ સ્વામિનં અનુયુઞ્જીત કુતઃ તે લબ્ધમ્ ઇતિ

03.16.13 સ ચેદ્ આચારક્રમં દર્શયેત, ન વિક્રેતારં, તસ્ય દ્રવ્યસ્યાતિસર્ગેણ મુચ્યેત

03.16.14 વિક્રેતા ચેદ્ દૃશ્યેત, મૂલ્યં સ્તેયદણ્ડં ચ દદ્યાત્

03.16.15 સ ચેદ્ અપસારં અધિગચ્છેદ્ અપસરેદ્ આઽપસારક્ષયાત્

03.16.16 ક્ષયે મૂલ્યં સ્તેયદણ્ડં ચ દદ્યાત્

03.16.17 નાષ્ટિકશ્ચ સ્વકરણં કૃત્વા નષ્ટપ્રત્યાહૃતં લભેત

03.16.18 સ્વકરણાભાવે પઞ્ચબન્ધો દણ્ડઃ

03.16.19 તચ્ચ દ્રવ્યં રાજધર્મ્યં સ્યાત્

03.16.20 નષ્ટાપહૃતં અનિવેદ્ય ઉત્કર્ષતઃ સ્વામિનઃ પૂર્વઃ સાહસદણ્ડઃ

03.16.21 શુલ્કસ્થાને નષ્ટાપહૃત ઉત્પન્નં તિષ્ઠેત્

03.16.22 ત્રિપક્ષાદ્ ઊર્ધ્વં અનભિસારં રાજા હરેત્, સ્વામી વા સ્વકરણેન

03.16.23 પઞ્ચપણિકં દ્વિપદરૂપસ્ય નિષ્ક્રયં દદ્યાત્, ચતુષ્પણિકં એકખુરસ્ય, દ્વિપણિકં ગોમહિષસ્ય, પાદિકં ક્ષુદ્રપશૂનામ્

03.16.24 રત્નસારફલ્ગુકુપ્યાનાં પઞ્ચકં શતં દદ્યાત્

03.16.25 પરચક્રાટવીહૃતં તુ પ્રત્યાનીય રાજા યથાસ્વં પ્રયચ્છેત્

03.16.26 ચોરહૃતં અવિદ્યમાનં સ્વદ્રવ્યેભ્યઃ પ્રયચ્છેત્, પ્રત્યાનેતું અશક્તો વા

03.16.27 સ્વયઙ્ગ્રાહેણાહૃતં પ્રત્યાનીય તન્નિષ્ક્રયં વા પ્રયચ્છેત્

03.16.28 પરવિષયાદ્ વા વિક્રમેણાનીતં યથાપ્રદિષ્ટં રાજ્ઞા ભુઞ્જીત, અન્યત્રાર્યપ્રાણેભ્યો દેવબ્રાહ્મણતપસ્વિદ્રવ્યેભ્યશ્ચ ઇત્યસ્વામિવિક્રયઃ ।

03.16.29 સ્વસ્વામિસમ્બન્ધઃ તુ - ભોગાનુવૃત્તિરુચ્છિન્નદેશાનાં યથાસ્વં દ્રવ્યાણામ્

03.16.30 યત્ સ્વં દ્રવ્યં અન્યૈર્ભુજ્યમાનં દશ વર્ષાણ્યુપેક્ષેત, હીયેતાસ્ય, અન્યત્ર બાલવૃદ્ધવ્યાધિતવ્યસનિપ્રોષિતદેશત્યાગરાજ્ય

03.16.31 વિંશતિવર્ષ ઉપેક્ષિતં અનવસિતં વાસ્તુ નાનુયુઞ્જીત

03.16.32 જ્ઞાતયઃ શ્રોત્રિયાઃ પાષણ્ડા વા રાજ્ઞાં અસંનિધૌ પરવાસ્તુષુ વિવસન્તો ન ભોગેન હરેયુઃ, ઉપનિધિં આધિં નિધિં નિક્ષેપં સ્ત્રિયં સીમાનં રાજશ્રોત્રિયદ્રવ્યાણિ ચ

03.16.33 આશ્રમિણઃ પાષણ્ડા વા મહત્યવકાશે પરસ્પરં અબાધમાના વસેયુઃ

03.16.34 અલ્પાં બાધાં સહેરન્

03.16.35 પૂર્વાગતો વા વાસપર્યાયં દદ્યાત્

03.16.36 અપ્રદાતા નિરસ્યેત

03.16.37 વાનપ્રસ્થયતિબ્રહ્મચારિણાં આચાર્યશિષ્યધર્મભ્રાતૃસમાનતીર્થ્યા રિક્થભાજઃ ક્રમેણ

03.16.38 વિવાદપદેષુ ચ એષાં યાવન્તઃ પણા દણ્ડાઃ તાવતી રાત્રીઃ ક્ષપણાભિષેકાગ્નિકાર્યમહાકચ્છવર્ધનાનિ રાજ્ઞશ્ચરેયુઃ

03.16.39 અહિરણ્યસુવર્ણાઃ પાષઢાઃ સાધવઃ

03.16.40 તે યથાસ્વં ઉપવાસવ્રતૈરારાધયેયુઃ, અન્યત્ર પારુષ્યસ્તેયસાહસસઙ્ગ્રહણેભ્યઃ

03.16.41 તેષુ યથા ઉક્તા દણ્ડાઃ કાર્યાઃ

03.16.42ab પ્રવ્રજ્યાસુ વૃથાઽઽચારાન્ રાજા દણ્ડેન વારયેત્ ।

03.16.42chd ધર્મો હ્યધર્મ ઉપહતઃ શાસ્તારં હન્ત્યુપેક્ષિતઃ (ઇતિ)

Chapt . Forcible seizure

03.17.01 સાહસં અન્વયવત્ પ્રસભકર્મ

03.17.02 નિરન્વયે સ્તેયં, અપવ્યયને ચ
03.17.03 રત્નસારફલ્ગુકુપ્યાનાં સાહસે મૂલ્યસમો દણ્ડઃ ઇતિ માનવાઃ
03.17.04 મૂલ્યદ્વિગુણઃ ઇત્યૌશનસાઃ
03.17.05 યથાઽપરાધ ઇતિ કૌટિલ્યઃ
03.17.06 પુષ્પફલશાકમૂલકન્દપક્વાન્નચર્મવેણુમૃદ્ભાણ્ડાદીનાં ક્ષુદ્રકદ્રવ્યાણાં દ્વાદ્શપણાવરશ્ચતુર્વિંશતિપણપરો દણ્ડઃ
03.17.07 કાલાયસકાષ્ઠરજ્જુદ્રવ્યક્ષુદ્રપશુપટાદીનાં સ્થૂલકદ્રવ્યાણાં ચતુર્વિંશતિપણાવરોઽષ્ટચત્વારિંશત્પણપરો દણ્ડઃ
03.17.08 તામ્રવૃત્તકંસકાચદન્તભાણ્ડાદીનાં સ્થૂલકદ્રવ્યાણાં અષ્ટચત્વારિંશત્પણાવરઃ ષણ્ણઁવતિપરઃ પૂર્વઃ સાહસદણ્ડઃ
03.17.09 મહાપશુમનુષ્યક્ષેત્રગૃહહિરણ્યસુવર્ણસૂક્ષ્મવસ્ત્રાદીનાં સ્થૂલકદ્રવ્યાણાં દ્વિશતાવરઃ પઞ્ચશતપરો મધ્યમઃ સાહસદણ્ડઃ
03.17.10 સ્ત્રિયં પુરુષં વાઽભિષહ્ય બધ્નતો બન્ધયતો બન્ધં વા મોક્ષયતઃ પઞ્ચશતાવરઃ સહસ્રપર ઉત્તમઃ સાહસદણ્ડઃ ઇત્યાચાર્યાઃ ॥

03.17.11 યઃ સાહસં પ્રતિપત્તા ઇતિ કારયતિ સ દ્વિગુણં દદ્યાત્
03.17.12 યાવદ્ હિરણ્યં ઉપયોક્ષ્યતે તાવદ્ દાસ્યામિ ઇતિ સ ચતુર્ગુણં દણ્ડં દદ્યાત્
03.17.13 યઃ એતાવદ્ હિરણ્યં દાસ્યામિ ઇતિ પ્રમાણં ઉદ્દિશ્ય કારયતિ સ યથા ઉક્તં હિરણ્યં દણ્ડં ચ દદ્યાત્ ઇતિ બાર્હસ્પત્યાઃ
03.17.14 સ ચેત્ કોપં મદં મોહં વાઽપદિશેદ્ યથા ઉક્તવદ્ દણ્ડં એનં કુર્યાદ્ ઇતિ કૌટિલ્યઃ
03.17.15ab દણ્ડકર્મસુ સર્વેષુ રૂપં અષ્ટપણં શતમ્ ।
03.17.15chd શતાત્ પરેષુ વ્યાજી ચ વિદ્યાત્ પઞ્ચપણં શતમ્
03.17.16ab પ્રજાનાં દોષબાહુલ્યાદ્ રાજ્ઞાં વા ભાવદોષતઃ ।
03.17.16chd રૂપવ્યાજ્યાવધર્મિષ્ઠે ધર્મ્યા તુ પ્રકૃતિઃ સ્મૃતા (ઇતિ)

Chapt . Verbal i njury

03.18.01 વાક્પારુષ્યં ઉપવાદઃ કુત્સનં અભિભર્ત્સનં ઇતિ
03.18.02 શરીરપ્રકૃતિશ્રુતવૃત્તિજનપદાનાં શરીર ઉપવાદે કાણખઞ્જાદિભિઃ સત્યે ત્રિપણો દણ્ડઃ, મિથ્યા ઉપવાદે ષટ્પણો દણ્ડઃ
03.18.03 શોભનાક્ષિમન્તઃ ઇતિ કાણખઞ્જાદીનાં સ્તુતિનિન્દાયાં દ્વાદશપણો દણ્ડઃ
03.18.04 કુષ્ઠ ઉન્માદક્લૈબ્યાદિભિઃ કુત્સાયાં ચ સત્યમિથ્યાસ્તુતિનિન્દાસુ દ્વાદશપણ ઉત્તરા દણ્ડાઃ તુલ્યેષુ
03.18.05 વિશિષ્ટેષુ દ્વિગુણાઃ, હીનેષ્વર્ધદણ્ડાઃ, પરસ્ત્રીષુ દ્વિગુણાઃ, પ્રમાદમદમોહાદિભિરર્ધદણ્ડાઃ

03.18.06 કુષ્ઠ ઉન્માદયોશ્ચિકિત્સકાઃ સંનિકૃષ્ટા પુમાંસશ્ચ પ્રમાણં, ક્લીબભાવે સ્ત્રિયો મૂત્રફેનોઽપ્સુ વિષ્ઠાનિમજ્જનં ચ

03.18.07 પ્રકૃત્ય્ ઉપવાદે બ્રાહ્મણક્ષત્રિયવૈશ્યશૂદ્રાન્તાવસાયિનાં અપરેણ પૂર્વસ્ય ત્રિપણ ઉત્તરા દણ્ડાઃ, પૂર્વેણાપરસ્ય દ્વિપણાધરાઃ, કુબ્રાહ્મણાદિભિશ્ચ કુત્સાયામ્

03.18.08 તેન શ્રુત ઉપવાદો વાગ્જીવનાનાં, કારુકુશીલવાનાં વૃત્ત્ય્ ઉપવાદઃ, પ્રાજ્જૂણકગાન્ધારાદીનાં ચ જનપદ ઉપવાદા વ્યાખ્યાતાઃ

03.18.09 યઃ પરં એવં ત્વાં કરિષ્યામિ ઇતિ કરણેનાભિભર્ત્સયેદ્, અકરણે યઃ તસ્ય કરણે દણ્ડઃ તતોઽર્ધદણ્ડં દદ્યાત્

03.18.10 અશક્તઃ કોપં મદં મોહં વાઽપદિશેદ્ દ્વાદશપણં દણ્ડં દદ્યાત્

03.18.11 જાતવૈરાશયઃ શક્તશ્ચાપકર્તું યાવજ્જીવિકાવસ્થં દદ્યાત્

03.18.12ab સ્વદેશગ્રામયોઃ પૂર્વં મધ્યમં જાતિસઙ્ઘયોઃ ।

03.18.12chd આક્રોશાદ્ દેવચૈત્યાનાં ઉત્તમં દણ્ડં અર્હતિ (ઇતિ)

Chapt . Physical i njury

03.19.01 દણ્ડપારુષ્યં સ્પર્શનં અવગૂર્ણં પ્રહતં ઇતિ

03.19.02 નાભેરધઃકાયં હસ્તપઙ્કભસ્મપાંસુભિરિતિ સ્પૃશતઃ ત્રિપણો દણ્ડઃ, તૈરેવામેધ્યૈઃ પાદષ્ઠીવિકાભ્યાં ચ ષટ્પણઃ, છર્દિમૂત્રપુરીષાદિભિર્દ્વાદશપણઃ

03.19.03 નાભેરુપરિ દ્વિગુણાઃ, શિરસિ ચતુર્ગુણાઃ સમેષુ

03.19.04 વિશિષ્ટેષુ દ્વિગુણાઃ, હીનેષ્વર્ધદણ્ડાઃ, પરસ્ત્રીષુ દ્વિગુણાઃ, પ્રમાદમદમોહાદિભિરર્ધદણ્ડાઃ

03.19.05 પાદવસ્ત્રહસ્તકેશાવલમ્બનેષુ ષટ્પણ ઉત્તરા દણ્ડાઃ

03.19.06 પીડનાવેષ્ટનાઞ્ચનપ્રકર્ષણાધ્યાસનેષુ પૂર્વઃ સાહસદણ્ડઃ

03.19.07 પાતયિત્વાઽપક્રામતોઽર્ધદણ્ડઃ

03.19.08 શૂદ્રો યેનાઙ્ગેન બ્રાહ્મણં અભિહન્યાત્ તદ્ અસ્યચ્છેદયેત્

03.19.09 અવગૂર્ણે નિષ્ક્રયઃ, સ્પર્શેઽર્ધદણ્ડઃ

03.19.10 તેન ચણ્ડાલાશુચયો વ્યાખ્યાતઃ

03.19.11 હસ્તેનાવગૂર્ણે ત્રિપણાવરો દ્વાદશપણપરો દણ્ડઃ, પાદેન દ્વિગુણઃ, દુઃખ ઉત્પાદનેન દ્રવ્યેણ પૂર્વઃ સાહસદણ્ડઃ, પ્રાણાબાધિકેન મધ્યમઃ

03.19.12 કાષ્ઠલોષ્ટપાષાણલોહદણ્ડરજ્જુદ્રવ્યાણાં અન્યતમેન દુઃખં અશોણિતં ઉત્પાદયતશ્ચતુર્વિંશતિપણો દણ્ડઃ, શોણિત ઉત્પાદને દ્વિગુણઃ, અન્યત્ર દુષ્ટશોણિતાત્

03.19.13 મૃતકલ્પં અશોણિતં ઘ્નતો હસ્તપાદપારઞ્ચિકં વા કુર્વતઃ પૂર્વઃ સાહસદણ્ડઃ, પાણિપાદદન્તભઙ્ગે કર્ણનાસાચ્છેદને વ્રણવિદારણે ચ્ય, અન્યત્ર દુષ્ટવ્રણેભ્યઃ

03.19.14 સક્થિગ્રીવાભઞ્જને નેત્રભેદને વા વાક્યચેષ્ટાભોજન ઉપરોધેષુ ચ મધ્યમઃ સાહસદણ્ડઃ સમુત્થાનવ્યયશ્ચ

03.19.15 વિપત્તૌ કણ્ટકશોધનાય નીયેત

03.19.16 મહાજનસ્ય એકં ઘ્નતઃ પ્રત્યેકં દ્વિગુણો દણ્ડઃ

03.19.17 પર્યુષિતઃ કલહોઽનુપ્રવેશો વા નાભિયોજ્યઃ ઇત્યાચાર્યાઃ

03.19.18 નાસ્ત્યપકારિણો મોક્ષ ઇતિ કૌટિલ્યઃ

03.19.19 કલહે પૂર્વાગતો જયતિ, અક્ષમમાણો હિ પ્રધાવતિ ઇત્યાચાર્યાઃ

03.19.20 ન ઇતિ કૌટિલ્યઃ

03.19.21 પૂર્વં પશ્ચાદ્ વાઽભિગતસ્ય સાક્ષિણઃ પ્રમાણં, અસાક્ષિકે ઘાતઃ કલહ ઉપલિઙ્ગનં વા

03.19.22 ઘાતાભિયોગં અપ્રતિબ્રુવતઃ તદ્ અહરેવ પશ્ચાત્કારઃ

03.19.23 કલહે દ્રવ્યં અપહરતો દશપણો દણ્ડઃ, ક્ષુદ્રકદ્રવ્યહિંસાયાં તચ્ચ તાવચ્ચ દણ્ડઃ, સ્થૂલકદ્રવ્યહિંસાયાં તચ્ચ દ્વિગુણશ્ચ દણ્ડઃ, વસ્ત્રાભરણહિરણ્યસુવર્ણભાણ્ડહિંસાયાં તચ્ચ પૂર્વશ્ચ સાહસદણ્ડઃ

03.19.24 પરકુડ્યં અભિઘાતેન ક્ષોભયતઃ ત્રિપણો દણ્ડઃ, છેદનભેદને ષટ્પણઃ, પ્રતીકારશ્ચ

03.19.25 દુઃખ ઉત્પાદનં દ્રવ્યં અન્યવેશ્મનિ પ્રક્ષિપતો દ્વાદશપણો દણ્ડઃ, પ્રાણાબાધિકં પૂર્વઃ સાહસદણ્ડઃ

03.19.26 ક્ષુદ્રપશૂનાં કાષ્ઠાદિભિર્દુઃખ ઉત્પાદને પણો દ્વિગુણો વા દણ્ડઃ, શોણિત ઉત્પાદને દ્વિગુણઃ

03.19.27 મહાપશૂનાં એતેષ્વેવ સ્થાનેષ્વિદ્વગુણો દણ્ડઃ સમુત્થાનવ્યયશ્ચ

03.19.28 પુર ઉપવનવનસ્પતીનાં પુષ્પફલચ્છાયાવતાં પ્રરોહચ્છેદને ષટ્પણઃ, ક્ષુદ્રશાખાચ્છેદને દ્વાદશપણઃ, પીનશાખાચ્છેદને ચતુર્વિંશતિપણઃ, સ્કન્ધવધે પૂર્વઃ સાહસદણ્ડઃ, સમુચ્છિત્તૌ મધ્યમઃ

03.19.29 પુષ્પફલચ્છાયાવદ્ગુલ્મલતાસ્વર્ધદણ્ડાઃ, પુણ્યસ્થાનતપોવનશ્મશાનદ્રુમેષુ ચ

03.19.30ab સીમવૃક્ષેષુ ચૈત્યેષુ દ્રુમેષ્વાલક્ષિતેષુ ચ ।

03.19.30chd ત એવ દ્વિગુણા દણ્ડાઃ કાર્યા રાજવનેષુ ચ  (ઇતિ)

Chapt .  Gambling and betting

Mischellaneous

03.20.01 દ્યૂતાધ્યક્ષો દ્યૂતં એકમુખં કારયેત્

03.20.02 અન્યત્ર દીવ્યતો દ્વાદશપણો દણ્ડો ગૂઢાજીવિજ્ઞાપનાર્થમ્

03.20.03 દ્યૂતાભિયોગે જેતુઃ પૂર્વઃ સાહસદણ્ડઃ, પરાજિતસ્ય મધ્યમઃ

03.20.04 બાલિશજાતીયો હ્યેષ જેતુકામઃ પરાજયં ન ક્ષમતે ઇત્યાચાર્યાઃ

03.20.05 ન ઇત્કૌટિલ્યઃ

03.20.06 પરાજિતશ્ચેદ્ દ્વિગુણદણ્ડઃ ક્રિયેત ન કશ્ચન રાજાનં અભિસરિષ્યતિ

03.20.07 પ્રાયશો હિ કિતવાઃ કૂટદેવિનઃ

03.20.08 તેષાં અધ્યક્ષાઃ શુદ્ધાઃ કાકણીરક્ષાંશ્ચ સ્થાપયેયુઃ

03.20.09 કાકણ્યઙ્ક્ષાણાં અન્ય ઉપધાને દ્વાદશપણો દણ્ડઃ, કૂટકર્મણિ પૂર્વઃ સાહસદણ્ડો જિતપ્રત્યાદાનં, ઉપધૌ સ્તેયદણ્ડશ્ચ

03.20.10 જિતદ્રવ્યાદ્ અધ્યક્ષઃ પઞ્ચકં શતં આદદીત, કાકણ્યઙ્ક્ષારાલાશલાકાઽવક્રયં ઉદકભૂમિકર્મક્રયં ચ

03.20.11 દ્રવ્યાણાં આધાનં વિક્રયં ચ કુર્યાત્

03.20.12 અક્ષભૂમિહસ્તદોષાણાં ચાપ્રતિષેધને દ્વિગુણો દણ્ડઃ

03.20.13 તેન સમાહ્વયો વ્યાખ્યાતઃ, અન્યત્ર વિદ્યાશિલ્પસમાહ્વયાત્ । ઇતિ

03.20.14 પ્રકીર્ણકં તુ - યાચિતકાવક્રીતકાહિતકનિક્ષેપકાણાં યથાદેશકાલં અદાને, યામચ્છાયાસમુપવેશસંસ્થિતીનાં વા દેશકાલાતિપાતને, ગુલ્મતરદેયં બ્રાહ્મણં સાધયતઃ, પ્રતિવેશાનુવેશયોરુપરિ નિમન્ત્રણે ચ દ્વાદશપણો દણ્ડઃ

03.20.15 સન્દિષ્ટં અર્થં અપ્રયચ્છતો, ભ્રાતૃભાર્યાં હસ્તેન લઙ્ઘયતો, રૂપાજીવાં અન્ય ઉપરુદ્ધાં ગચ્છતઃ, પરવક્તવ્યં પણ્યં ક્રીણાનસ્ય, સમુદ્રં ગૃહં ઉદ્ભિન્દતઃ, સામન્તચત્વારિંશત્કુલ્યાબાધાં આચરતશ્ચાષ્ટચત્વારિંશત્પણો દણ્ડઃ

03.20.16 કુલનીવીગ્રાહકસ્યાપવ્યયને, વિધવાં છન્દવાસિનીં પ્રસહ્યાધિચરતઃ, ચણ્ડાલસ્યાર્યાં સ્પૃશતઃ, પ્રત્યાસન્નં આપદ્યનભિધાવતો, નિષ્કારણં અભિધાવનં કુર્વતઃ, શાક્યાજીવકાદીન્ વૃષલપ્રવ્રજિતાન્ દેવપિતૃકાર્યેષુ ભોજયતઃ શત્યો દણ્ડઃ

03.20.17 શપથવાક્યાનુયોગં અનિસૃષ્ટં કુર્વતઃ, યુક્તકર્મ ચાયુક્તસ્ય, ક્ષુદ્રપશુવૃષાણાં પુંસ્ત્વ ઉપઘાતિનઃ, દાસ્યા ગર્ભં ઔષધેન પાતયતશ્ચ પૂર્વઃ સાહસદણ્ડઃ

03.20.18 પિતાપુત્રયોર્દમ્પત્યોર્ભ્રાતૃભગિન્યોર્માતુલભગિનેયયોઃ શિષ્યાચાર્યયોર્વા પરસ્પરં અપતિતં ત્યજતઃ, સાર્થાભિપ્રયાતં ગ્રામમધ્યે વા ત્યજતઃ પૂર્વઃ સાહસદણ્ડઃ, કાન્તારે મધ્યમઃ, તન્નિમિત્તં ભ્રેષયત ઉત્તમઃ, સહપ્રસ્થાયિષ્વન્યેષ્વર્ધદણ્ડાઃ

03.20.19 પુરુષં અબન્ધનીયં બધ્નતો બન્ધયતો બન્ધં વા મોક્ષયતો, બાલં અપ્રાપ્તવ્યવહારં બધ્નતો બન્ધયતો વા સહસ્રં દણ્ડઃ

03.20.20 પુરુષાપરાધવિશેષેણ દણ્ડવિશેષઃ કાર્યઃ

03.20.21 તીર્થકરઃ તપસ્વી વ્યાધિતઃ ક્ષુત્પિપાસાઽધ્વક્લાન્તઃ તિરોજનપદો દણ્ડખેદી નિષ્કિઞ્ચનશ્ચાનુગ્રાહ્યાઃ

03.20.22 દેવબ્રાહ્મણતપસ્વિસ્ત્રીબાલવૃદ્ધવ્યાધિતાનાં અનાથાનાં અનભિસરતાં ધર્મસ્થાઃ કાર્યાણિ કુર્યુઃ, ન ચ દેશકાલભોગચ્છલેનાતિહરેયુઃ

03.20.23 પૂજ્યા વિદ્યાબુદ્ધિપૌરુષાભિજનકર્માતિશયતશ્ચ પુરુષાઃ

03.20.24ab એવં કાર્યાણિ ધર્મસ્થાઃ કુર્યુરચ્છલદર્શિનઃ ।

03.20.24chd સમાઃ સર્વેષુ ભાવેષુ વિશ્વાસ્યા લોકસમ્પ્રિયાઃ (ઇતિ)

Book . suppression of criminals

Chapt . keeping a watch over artisans

04.1.01 પ્રદેષ્ટારઃ ત્રયઃ ત્રયોઽમાત્યાઃ કણ્ટકશોધનં કુર્યુઃ

04.1.02 અર્થ્યપ્રતીકારાઃ કારુશાસિતારઃ સંનિક્ષેપ્તારઃ સ્વવિત્તકારવઃ શ્રેણીપ્રમાણા નિક્ષેપં ગૃહ્ણીયુઃ

04.1.03 વિપત્તૌ શ્રેણી નિક્ષેપં ભજેત

04.1.04 નિર્દિષ્ટદેશકાલકાર્યં ચ કર્મ કુર્યુઃ, અનિર્દિષ્ટદેશકાલં કાર્યાપદેશમ્

04.1.05 કાલાતિપાતને પાદહીનં વેતનં તદ્દ્વિગુણશ્ચ દણ્ડઃ

04.1.06 અન્યત્ર ભ્રેષ ઉપનિપાતાભ્યાં નષ્ટં વિનષ્ટં વાઽભ્યાવહેયુઃ

04.1.07 કાર્યસ્યાન્યથાકરણે વેતનનાશઃ તદ્દ્વિગુણશ્ચ દણ્ડઃ

04.1.08 તન્તુવાયા દશ એકાદશિકં સૂત્રં વર્ધયેયુઃ

04.1.09 વૃદ્ધિચ્છેદે છેદદ્વિગુણો દણ્ડઃ
04.1.10 સૂત્રમૂલ્યં વાનવેતનં, ક્ષૌમકૌશેયાનાં અધ્યર્ધગુણં, પત્ત્ર ઊર્ણાકમ્બલદુકૂલાનાં દ્વિગુણમ્
04.1.11 માનહીને હીનાવહીનં વેતનં તદ્દ્વિગુણશ્ચ દણ્ડઃ, તુલાહીને હીનચતુર્ગુણો દણ્ડઃ, સૂત્રપરિવર્તને મૂલ્યદ્વિગુણઃ
04.1.12 તેન દ્વિપટવાનં વ્યાખ્યાતમ્
04.1.13 ઊર્ણાતુલાયાઃ પઞ્ચપલિકો વિહનનચ્છેદો રોમચ્છેદશ્ચ
04.1.14 રજકાઃ કાષ્ઠફલકશ્લક્ષ્ણશિલાસુ વસ્ત્રાણિ નેનિજ્યુઃ
04.1.15 અન્યત્ર નેનિજતો વસ્ત્ર ઉપઘાતં ષટ્પણં ચ દણ્ડં દદ્યુઃ
04.1.16 મુદ્ગરાઙ્કાદ્ અન્યદ્ વાસઃ પરિદધાનાઃ ત્રિપણં દણ્ડં દદ્યુઃ
04.1.17 પરવસ્ત્રવિક્રયાવક્રયાધાનેષુ ચ દ્વાદશપણો દણ્ડઃ, પરિવર્તને મૂલ્યદ્વિગુણો વસ્ત્રદાનં ચ
04.1.18 મુકુલાવદાતં શિલાપટ્ટશુદ્ધં ધૌતસૂત્રવર્ણં પ્રમૃષ્ટશ્વેતં ચ એકરાત્ર ઉત્તરં દદ્યુઃ
04.1.19 પઞ્ચરાત્રિકં તનુરાગં, ષડ્રાત્રિકં નીલં, પુષ્પલાક્ષામઞ્જિષ્ઠારક્તં ગુરુપરિકર્મ યત્ન ઉપચાર્યં જાત્યં વાસઃ સપ્તરાત્રિકમ્
04.1.20 તતઃ પરં વેતનહાનિં પ્રાપ્નુયુઃ
04.1.21 શ્રદ્ધેયા રાગવિવાદેષુ વેતનં કુશલાઃ કલ્પયેયુઃ
04.1.22 પરાર્ધ્યાનાં પણો વેતનં, મધ્યમાનાં અર્ધપણઃ, પ્રત્યવરાણાં પાદઃ, સ્થૂલકાનાં માષકદ્વિમાષકં, દ્વિગુણં રક્તકાનામ્
04.1.23 પ્રથમનેજને ચતુર્ભાગઃ ક્ષયઃ, દ્વિતીયે પઞ્ચભાગઃ
04.1.24 તેન ઉત્તરં વ્યાખ્યાતમ્
04.1.25 રજકૈઃ તુન્નવાયા વ્યાખ્યાતાઃ
04.1.26 સુવર્ણકારાણાં અશુચિહસ્તાદ્ રૂપ્યં સુવર્ણં અનાખ્યાય સરૂપં ક્રીણતાં દ્વાદશપણો દણ્ડઃ, વિરૂપં ચતુર્વિંશતિપણઃ, ચોરહસ્તાદ્ અષ્ટચત્વારિંશત્પણઃ
04.1.27 પ્રચ્છન્નવિરૂપમૂલ્યહીનક્રયેષુ સ્તેયદણ્ડઃ, કૃતભાણ્ડ ઉપધૌ ચ
04.1.28 સુવર્ણાન્ માષકં અપહરતો દ્વિશતો દણ્ડઃ, રૂપ્યધરણાન્ માષકં અપહરતો દ્વાદશપણઃ
04.1.29 તેન ઉત્તરં વ્યાખ્યાતમ્
04.1.30 વર્ણ ઉત્કર્ષં અપસારણં યોગં વા સાધયતઃ પઞ્ચશતો દણ્ડઃ
04.1.31 તયોરપચરણે રાગસ્યાપહારં વિદ્યાત્
04.1.32 માષકો વેતનં રૂપ્યધરણસ્ય, સુવર્ણસ્યાષ્ટભાગઃ
04.1.33 શિક્ષાવિશેષેણ દ્વિગુણો વેતનવૃદ્ધિઃ
04.1.34 તેન ઉત્તરં વ્યાખ્યાતમ્
04.1.35 તામ્રવૃત્તકંસવૈકૃન્તકારકૂટકાનાં પઞ્ચકં શતં વેતનમ્
04.1.36 તામ્રપિણ્ડો દશભાગક્ષયઃ
04.1.37 પલહીને હીનદ્વિગુણો દણ્ડઃ

04.1.38 તેન ઉત્તરં વ્યાખ્યાતમ્

04.1.39 સીસત્રપુપિણ્ડો વિંશતિભાગક્ષયઃ

04.1.40 કાકણી ચાસ્ય પલવેતનમ્

04.1.41 કાલાયસપિણ્ડઃ પઞ્ચભાગક્ષયઃ

04.1.42 કાકણીદ્વયં ચાસ્ય પલવેતનમ્

04.1.43 તેન ઉત્તરં વ્યાખ્યાતમ્

04.1.44 રૂપદર્શકસ્ય સ્થિતાં પણયાત્રાં અકોપ્યાં કોપયતઃ કોપ્યાં અકોપયતો દ્વાદશપણો દણ્ડઃ

04.1.45 વ્યાજીપરિશુદ્ધૌ પણયાત્રા

04.1.46 પણાન્ માષકં ઉપજીવતો દ્વાદશપણો દણ્ડઃ

04.1.47 તેન ઉત્તરં વ્યાખ્યાતમ્

04.1.48 કૂટરૂપં કારયતઃ પ્રતિગૃહ્ણતો નિર્યાપયતો વા સહસ્રં દણ્ડઃ, કોશે પ્રક્ષિપતો વધઃ

04.1.49 ચરકપાંસુધાવકાઃ સારત્રિભાગં, દ્વૌ રાજા રત્નં ચ

04.1.50 રત્નાપહાર ઉત્તમો દણ્ડઃ

04.1.51 ખનિરત્નનિધિનિવેદનેષુ ષષ્ઠં અંશં નિવેત્તા લભેત, દ્વાદશં અંશં ભૃતકઃ

04.1.52 શતસહસ્રાદ્ ઊર્ધ્વં રાજગામી નિધિઃ

04.1.53 ઊને ષષ્ઠં અંશં દદ્યાત્

04.1.54 પૌર્વપૌરુષિકં નિધિં જાનપદઃ શુચિઃ સ્વકરણેન સમગ્રં લભેત

04.1.55 સ્વકરણાભાવે પઞ્ચશતો દણ્ડઃ, પ્રચ્છન્નાદાને સહસ્રમ્

04.1.56 ભિષજઃ પ્રાણાબાધિકં અનાખ્યાય ઉપક્રમમાણસ્ય વિપત્તૌ પૂર્વઃ સાહસદણ્ડઃ, કર્માપરાધેન વિપત્તૌ મધ્યમઃ

04.1.57 મર્મવધવૈગુણ્યકરણે દણ્ડપારુષ્યં વિદ્યાત્

04.1.58 કુશીલવા વર્ષારાત્રં એકસ્થા વસેયુઃ

04.1.59 કામદાનં અતિમાત્રં એકસ્યાતિવાદં ચ વર્જયેયુઃ

04.1.60 તસ્યાતિક્રમે દ્વાદશપણો દણ્ડઃ

04.1.61 કામં દેશજાતિગોત્રચરણમૈથુનાવહાસેન નર્મયેયુઃ

04.1.62 કુશીલવૈશ્ચારણા ભિક્ષુકાશ્ચ વ્યાખ્યાતાઃ

04.1.63 તેષાં અયઃશૂલેન યાવતઃ પણાન્ અભિવદેયુઃ તાવન્તઃ શિફાપ્રહારા દણ્ડાઃ

04.1.64 શેષાણાં કર્મણાં નિષ્પત્તિવેતનં શિલ્પિનાં કલ્પયેત્

04.1.65ab એવં ચોરાન્ અચોરાખ્યાન્ વણિક્કારુકુશીલવાન્ ।

04.1.66chd ભિક્ષુકાન્ કુહકાંશ્ચાન્યાન્ વારયેદ્ દેશપીડનાત્ (ઇતિ)

Chapt . keeping a watch overtraders

04.2.01 સંસ્થાઽધ્યક્ષઃ પણ્યસંસ્થાયાં પુરાણભાણ્ડાનાં સ્વકરણવિશુદ્ધાનાં આધાનં વિક્રયં વા સ્થાપયેત્

04.2.02 તુલામાનભાણ્ડાનિ ચાવેક્ષેત પૌતવાપચારાત્

04.2.03 પરિમાણીદ્રોણયોરર્ધપલહીનાતિરિક્તં અદોષઃ
04.2.04 પલહીનાતિરિક્તે દ્વાદશપણો દણ્ડઃ
04.2.05 તેન પલ ઉત્તરા દણ્ડવૃદ્ધિર્વ્યાખ્યાતા
04.2.06 તુલાયાઃ કર્ષહીનાતિરિક્તં અદોષઃ
04.2.07 દ્વિકર્ષહીનાતિરિક્તે ષટ્પણો દણ્ડઃ
04.2.08 તેન કર્ષ ઉત્તરા દણ્ડવૃદ્ધિર્વ્યાખ્યાતા
04.2.09 આઢકસ્યાર્ધકર્ષહીનાતિરિક્તં અદોષઃ
04.2.10 કર્ષહીનાતિરિક્તે ત્રિપણો દણ્ડઃ
04.2.11 તેન કર્ષ ઉત્તરા દણ્ડવૃદ્ધિર્વ્યાખ્યાતા
04.2.12 તુલામાનવિશેષાણાં અતોઽન્યેષાં અનુમાનં કુર્યાત્
04.2.13 તુલામાનાભ્યાં અતિરિક્તાભ્યાં ક્રીત્વા હીનાભ્યાં વિક્રીણાનસ્ય ત એવ દ્વિગુણા દણ્ડાઃ
04.2.14 ગણ્યપણ્યેષ્વષ્ટભાગં પણ્યમૂલ્યેષ્વપહરતઃ ષણ્ણવતિર્દણ્ડઃ
04.2.15 કાષ્ઠલોહમણિમયં રજ્જુચર્મમૃણ્મયં સૂત્રવલ્કરોમમયં વા જાત્યં ઇત્યજાત્યં વિક્રયાધાનં નયતો મૂલ્યાષ્ટગુણો દણ્ડઃ
04.2.16 સારભાણ્ડં ઇત્યસારભાણ્ડં તજ્જાતં ઇત્યતજ્જાતં રાધાયુક્તં ઇત્યુપધિયુક્તં સમુદ્ગપરિવર્તિમં વા વિક્રયાધાનં નયતો હીનમૂલ્યં ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ, પણમૂલ્યં દ્વિગુણો, દ્વિપણમૂલ્યં દ્વિશતઃ
04.2.17 તેનાર્ઘવૃદ્ધૌ દણ્ડવૃદ્ધિર્વ્યાખ્યાતા
04.2.18 કારુશિલ્પિનાં કર્મગુણાપકર્ષં આજીવં વિક્રયક્રય ઉપઘાતં વા સમ્ભૂય સમુત્થાપયતાં સહસ્રં દણ્ડઃ
04.2.19 વૈદેહકાનાં વા સમ્ભૂય પણ્યં અવરુન્ધતાં અનર્ઘેણ વિક્રીણતાં વા સહસ્રં દણ્ડઃ
04.2.20 તુલામાનાન્તરં અર્ઘવર્ણાન્તરં વા - ધરકસ્ય માયકસ્ય વા પણમૂલ્યાદ્ અષ્ટભાગં હસ્તદોષેણાચરતો દ્વિશતો દણ્ડઃ
04.2.21 તેન દ્વિશત ઉત્તરા દણ્ડવૃદ્ધિર્વ્યાખ્યાતા
04.2.22 ધાન્યસ્નેહક્ષારલવણગન્ધભૈષજ્યદ્રવ્યાણાં સમવર્ણ ઉપધાને દ્વાદશપણો દણ્ડઃ
04.2.23 યન્નિસૃષ્ટં ઉપજીવેયુઃ તદ્ એષાં દિવસસઞ્જાતં સઙ્ખ્યાય વણિક્ સ્થાપયેત્
04.2.24 ક્રેતૃવિક્રેત્રોરન્તરપતિતં આદાયાદ્ અન્યદ્ ભવતિ
04.2.25 તેન ધાન્યપણ્યનિચયાંશ્ચાનુજ્ઞાતાઃ કુર્યુઃ
04.2.26 અન્યથાનિચિતં એષાં પણ્યાધ્યક્ષો ગૃહ્ણીયાત્
04.2.27 તેન ધાન્યપણ્યવિક્રયે વ્યવહરેતાનુગ્રહેણ પ્રજાનામ્
04.2.28 અનુજ્ઞાતક્રયાદ્ ઉપરિ ચ એષાં સ્વદેશીયાનાં પણ્યાનાં પઞ્ચકં શતં આજીવં સ્થાપયેત્, પરદેશીયાનાં દશકમ્
04.2.29 તતઃ પરં અર્ઘં વર્ધયતાં ક્રયે વિક્રયે વા ભાવયતાં પણશતે પઞ્ચપણાદ્ દ્વિશતો દણ્ડઃ
04.2.30 તેનાર્ઘવૃદ્ધૌ દણ્ડવૃદ્ધિર્વ્યાખ્યાતા

04.2.31 સમ્ભૂયક્રયે ચ એષાં અવિક્રીતે નાન્યં સમ્ભૂયક્રયં દદ્યાત્

04.2.32 પણ્ય ઉપઘાતે ચ એષાં અનુગ્રહં કુર્યાત્

04.2.33 પણ્યબાહુલ્યાત્ પણ્યાધ્યક્ષઃ સર્વપણ્યાન્યેકમુખાનિ વિક્રીણીત

04.2.34 તેષ્વવિક્રીતેષુ નાન્યે વિક્રીણીરન્

04.2.35 તાનિ દિવસવેતનેન વિક્રીણીરન્ન્ અનુગ્રહેણ પ્રજાનામ્

04.2.36ab દેશકાલાન્તરિતાનાં તુ પણ્યાનાં - પ્રક્ષેપં પણ્યનિષ્પત્તિં શુલ્કં વૃદ્ધિં અવક્રયમ્ ।

04.2.36chd વ્યયાન્ અન્યાંશ્ચ સઙ્ખ્યાય સ્થાપયેદ્ અર્ઘં અર્ઘવિત્ (ઇતિ)

Chapt . Remedial measures during calamities

04.3.01 દૈવાન્યષ્ટૌ મહાભયાનિ - અગ્નિરુદકં વ્યાધિર્દુર્ભિક્ષં મૂષિકા વ્યાલાઃ સર્પા રક્ષાંસિ ઇતિ

04.3.02 તેભ્યો જનપદં રક્ષેત્

04.3.03 ગ્રીષ્મે બહિર્ડધિશ્રયણં ગ્રામાઃ કુર્યુઃ, દશમૂલીસઙ્ગ્રહેણાધિષ્ઠિતા વા

04.3.04 નાગરિકપ્રણિધાવગ્નિપ્રતિષેધો વ્યાખ્યાતઃ, નિશાન્તપ્રણિધૌ રાજપરિગ્રહે ચ

04.3.05 બલિહોમસ્વસ્તિવાચનૈઃ પર્વસુ ચાગ્નિપૂજાઃ કારયેત્

04.3.06 વર્ષારાત્રં આનૂપગ્રામાઃ પૂરવેલાં ઉત્સૃજ્ય વસેયુઃ

04.3.07 કાષ્ઠવેણુનાવશ્ચ ઉપગૃહ્ણીયુઃ

04.3.08 ઉહ્યમાનં અલાબુદૃતિપ્લવગણ્ડિકાવેણિકાભિઃ તારયેયુઃ

04.3.09 અનભિસરતાં દ્વાદશપણો દણ્ડઃ, અન્યત્ર પ્લવહીનેભ્યઃ

04.3.10 પર્વસુ ચ નદીપૂજાઃ કારયેત્

04.3.11 માયાયોગવિદો વેદવિદો વા વર્ષં અભિચરેયુઃ

04.3.12 વર્ષાવગ્રહે શચીનાથગઙ્ગાપર્વતમહાકચ્છપૂજાઃ કારયેત્

04.3.13 વ્યાધિભયં ઔપનિષદિકૈઃ પ્રતીકારૈઃ પ્રતિકુર્યુઃ, ઔષધૈશ્ચિકિત્સકાઃ શાન્તિપ્રાયશ્ચિત્તૈર્વા સિદ્ધતાપસાઃ

04.3.14 તેન મરકો વ્યાખ્યાતઃ

04.3.15 તીર્થાભિષેચનં મહાકચ્છવર્ધનં ગવાં શ્મશાનાવદોહનં કબન્ધદહનં દેવરાત્રિં ચ કારયેત્

04.3.16 પશુવ્યાધિમરકે સ્થાનાર્થનીરાજનં સ્વદૈવતપૂજનં ચ કારયેત્

04.3.17 દુર્ભિક્ષે રાજા બીજભક્ત ઉપગ્રહં કૃત્વાડનુગ્રહં કુર્યાત્, દુર્ગસેતુકર્મ વા ભક્તાનુગ્રહેણ, ભક્તસંવિભાગં વા, દેશનિક્ષેપં વા

04.3.18 મિત્રાણિ વા વ્યપાશ્રયેત, કર્શનં વમનં વા કુર્યાત્

04.3.19 નિષ્પન્નસસ્યં અન્યવિષયં વા સજનપદો યાયાત્, સમુદ્રસરસ્તટાકાનિ વા સંશ્રયેત

04.3.20 ધાન્યશાકમૂલફલાવાપાન્ વા સેતુષુ કુર્વીત, મૃગપશુપક્ષિવ્યાલમત્સ્યારમ્ભાન્ વા

04.3.21 મૂષિકભયે માર્જારનકુલ ઉત્સર્ગઃ

04.3.22 તેષાં ગ્રહણહિંસાયાં દ્વાદશપણો દણ્ડઃ, શુનાં અનિગ્રહે ચાન્યત્રારણ્યચરેભ્યઃ

04.3.23 સ્નુહિક્ષીરલિપ્તાનિ ધાન્યાનિ વિસૃજેદ્, ઉપનિષદ્યોગયુક્તાનિ વા

04.3.24 મૂષિકકરં વા પ્રયુઞ્જીત

04.3.25 શાન્તિં વા સિદ્ધતાપસાઃ કુર્યુઃ

04.3.26 પર્વસુ ચ મૂષિકપૂજાઃ કારયેત્

04.3.27 તેન શલભપક્ષિક્રિમિભયપ્રતીકારા વ્યાખ્યાતાઃ

04.3.28 વ્યાલભયે મદનરસયુક્તાનિ પશુશવાનિ પ્રસૃજેત્, મદનકોદ્રવપૂર્ણાન્યૌદર્યાણિ વા

04.3.29 લુબ્ધકાઃ શ્વગણિનો વા કૂટપઞ્જરાવપાતૈશ્ચરેયુઃ

04.3.30 આવરણિનઃ શસ્ત્રપાણયો વ્યાલાન્ અભિહન્યુઃ

04.3.31 અનભિસર્તુર્દ્વાદશપણો દણ્ડઃ

04.3.32 સ એવ લાભો વ્યાલઘાતિનઃ

04.3.33 પર્વસુ ચ પર્વતપૂજાઃ કારયેત્

04.3.34 તેન મૃગપશુપક્ષિસઙ્ઘગ્રાહપ્રતીકારા વ્યાખ્યાતાઃ

04.3.35 સર્પભયે મન્ત્રૈરોષધિભિશ્ચ જાઙ્ગુલીવિદશ્ચરેયુઃ

04.3.36 સમ્ભૂય વાઽપિ સર્પાન્ હન્યુઃ

04.3.37 અથર્વવેદવિદો વાઽભિચરેયુઃ

04.3.38 પર્વસુ ચ નાગપૂજાઃ કારયેત્

04.3.39 તેન ઉદકપ્રાણિભયપ્રતીકારા વ્યાખ્યાતાઃ

04.3.40 રક્ષોભયે રક્ષોઘ્નાન્યથર્વવેદવિદો માયાયોગવિદો વા કર્માણિ કુર્યુઃ

04.3.41 પર્વસુ ચ વિતર્દિચ્છત્ર ઉલ્લોપિકાહસ્તપતાકાચ્છાગ ઉપહારૈશ્ચૈત્યપૂજાઃ કારયેત્

04.3.42 ચરું વશ્ચરામઃ ઇત્યેવં સર્વભયેષ્વહોરાત્રં ચરેયુઃ

04.3.43 સર્વત્ર ચ ઉપહતાન્ પિતા ઇવાનુગૃહ્ણીયાત્

04.3.44ab માયાયોગવિદઃ તસ્માદ્ વિષયે સિદ્ધતાપસાઃ ।

04.3.44chd વસેયુઃ પૂજિતા રાજ્ઞા દૈવાપત્પ્રતિકારિણઃ (ઇતિ)

Chapt . Guarding against persons with secret means of income

04.4.01 સમાહર્તૃપ્રણિધૌ જનપદરક્ષણં ઉક્તમ્

04.4.02 તસ્ય કણ્ટકશોધનં વક્ષ્યામઃ

04.4.03 સમાહર્તા જનપદે સિદ્ધતાપસપ્રવ્રજિતચક્રચરચારણકુહકપ્રચ્છન્દકકાર્તાન્તિકનૈમિત્તિકમૌહૂર્તિકચિકિત્સક ઉન્મત્તમૂકબધિરજડાન્ધવૈદેહકકારુશિલ્પિકુશીલવવેશશૌણ્ડિકાપૂપિકપાક્વમાંસિકાઉદનિકવ્યઞ્જનાન્ પ્રણિદધ્યાત્

04.4.04 તે ગ્રામાણાં અધ્યક્ષાણાં ચ શૌચાશૌચં વિદ્યુઃ

04.4.05 યં ચાત્ર ગૂઢાજીવિનં શઙ્કેત તં સત્રિણાઽપસર્પયેત્

04.4.06 ધર્મસ્થં વિશ્વાસ ઉપગતં સત્ત્રી બ્રૂયાત્ - અસૌ મે બન્ધુરભિયુક્તઃ, તસ્યાયં અનર્થઃ પ્રતિક્રિયતાં, અયં ચાર્થઃ પ્રતિગૃહ્યતામ્ ઇતિ

04.4.07 સ ચેત્ તથા કુર્યાદ્ ઉપદાગ્રાહક ઇતિ પ્રવાસ્યેત

04.4.08 તેન પ્રદેષ્ટારો વ્યાખ્યાતાઃ

04.4.09 ગ્રામકૂટં અધ્યક્ષં વા સત્રી બ્રૂયાત્ - અસૌ જાલ્મઃ પ્રભૂતદ્રવ્યઃ, તસ્યાયં અનર્થઃ, તેન એનં આહારયસ્વ ઇતિ

04.4.10 સ ચેત્ તથા કુર્યાદ્ ઉત્કોચક ઇતિ પ્રવાસ્યેત

04.4.11 કૃતકાભિયુક્તો વા કૂટસાક્ષિણોઽભિજ્ઞાતાનર્થવૈપુલ્યેનારભેત

04.4.12 તે ચેત્ તથા કુર્યુઃ કૂટસાક્ષિણ ઇતિ પ્રવાસ્યેરન્

04.4.13 તેન કૂટશ્રાવણકારકા વ્યાખ્યાતાઃ

04.4.14 યં વા મન્ત્રયોગમૂલકર્મભિઃ શ્માશાનિકૈર્વા સંવદનકરકં મન્યેત તં સત્રી બ્રૂયાત્ - અમુષ્ય ભાર્યાં સ્નુષાં દુહિતરં વા કામયે, સા માં પ્રતિકામયતાં, અયં ચાર્થઃ પ્રતિગૃહ્યતામ્ ઇતિ

04.4.15 સ ચેત્ તથા કુર્યાત્ સંવદનકારક ઇતિ પ્રવાસ્યેત

04.4.16 તેન કૃત્યાભિચારશીલૌ વ્યાખ્યાતૌ

04.4.17 યં વા રસસ્ય કર્તારં ક્રેતારં વિક્રેતારં ભૈષજ્યાહારવ્યવહારિણં વા રસદં મન્યેત તં સત્રી બ્રૂયાત્ - અસૌ મે શત્રુઃ, તસ્ય ઉપઘાતઃ ક્રિયતાં, અયં ચાર્થઃ પ્રતિગૃહ્યતામ્ ઇતિ

04.4.18 સ ચેત્ તથા કુર્યાદ્ રસદ ઇતિ પ્રવાસ્યેત

04.4.19 તેન મદનયોગવ્યવહારી વ્યાખ્યાતઃ

04.4.20 યં વા નાનાલોહક્ષારાણાં અઙ્ગારભસ્માસન્દંશમુષ્ટિકાધિકરણીબિમ્બ।ટઙ્કમૂષાણાં અભીક્ષ્ણક્રેતારં મષીભસ્મધૂમદિગ્ધહસ્તવસ્ત્રલિઙ્ગં કર્માર ઉપકરણસંસર્ગં કૂટરૂપકારકં મન્યેત તં સત્રી શિષ્યત્વેન સંવ્યવહારેણ ચાનુપ્રવિશ્ય પ્રજ્ઞાપયેત્

04.4.21 પ્રજ્ઞાતઃ કૂટરૂપકારક ઇતિ પ્રવાસ્યેત

04.4.22 તેન રાગસ્યાપહર્તા કૂટસુવર્ણવ્યવહારી ચ વ્યાખ્યાતઃ

04.4.23ab આરબ્ધારઃ તુ હિંસાયાં ગૂઢાજીવાઃ ત્રયોદશ ।

04.4.23chd પ્રવાસ્યા નિષ્ક્રયાર્થં વા દદ્યુર્દોષવિશેષતઃ (ઇતિ)

Chapt . Detection of criminals througH secret agents in the disguise of holymen

04.5.01 સત્રિપ્રયોગાદ્ ઊર્ધ્વં સિદ્ધવ્યઞ્જના માણવાન્ માણવવિદ્યાભિઃ પ્રલોભયેયુઃ, પ્રસ્વાપનાન્તર્ધાનદ્વારાપોહમન્ત્રેણ પ્રતિરોધકાન્, સંવદનમન્ત્રેણ પારતલ્પિકાન્

04.5.02 તેષાં કૃત ઉત્સાહાનાં મહાન્તં સઙ્ઘં આદાય રાત્રાવન્યં ગ્રામં ઉદ્દિશ્યાન્યં ગ્રામં કૃતકસ્ત્રીપુરુષં ગત્વા બ્રૂયુઃ - ઇહ એવ વિદ્યાપ્રભાવો દૃશ્યતાં, કૃચ્છ્રઃ પરગ્રામો ગન્તુમ્ ઇતિ

04.5.03 તતો દ્વારાપોહમન્ત્રેણ દ્વારાણ્યપોહ્ય પ્રવિશ્યતામ્ ઇતિ બ્રૂયુઃ

04.5.04 અન્તર્ધાનમન્ત્રેણ જાગ્રતાં આરક્ષિણાં મધ્યેન માણવાન્ અતિક્રામયેયુઃ

04.5.05 પ્રસ્વાપનમન્ત્રેણ પ્રસ્વાપયિત્વા રક્ષિણઃ શયાભિર્માણવૈઃ સઞ્ચારયેયુઃ

04.5.06 સંવદનમન્ત્રેણ ભાર્યાવ્યઞ્જનાઃ પરેષાં માણવૈઃ સમ્મોદયેયુઃ

04.5.07 ઉપલબ્ધવિદ્યાપ્રભાવાણાં પુરશ્ચરણાઽઽદ્યાદિશેયુરભિજ્ઞાનાર્થમ્
04.5.08 કૃતલક્ષણદ્રવ્યેષુ વા વેશ્મસુ કર્મ કારયેયુઃ
04.5.09 અનુપ્રવિષ્ટા વા એકત્ર ગ્રાહયેયુઃ
04.5.10 કૃતલક્ષણદ્રવ્યક્રયવિક્રયાધાનેષુ યોગસુરામત્તાન્ વા ગ્રાહયેયુઃ
04.5.11 ગૃહીતાન્ પૂર્વાપદાનસહાયાન્ અનુયુઞ્જીત
04.5.12 પુરાણચોરવ્યઞ્જના વા ચોરાન્ અનુપ્રવિષ્ટાઃ તથા એવ કર્મ કારયેયુર્ગ્રાહયેયુશ્ચ
04.5.13 ગૃહીતાન્ સમાહર્તા પૌરજાનપદાનાં દર્શયેત્ - ચોરગ્રહણીં વિદ્યાં અધીતે રાજા, તસ્ય ઉપદેશાદ્ ઇમે ચોરા ગૃહીતાઃ, ભૂયશ્ચ ગ્રહીષ્યામિ, વારયિતવ્યો વઃ સ્વજનઃ પાપાચારહ્ ઇતિ
04.5.14 યં ચાત્રાપસર્પ ઉપદેશેન શમ્યાપ્રતોદાદીનાં અપહર્તારં જાનીયાત્ તં એષાં પ્રત્યાદિશેત્ એષ રાજ્ઞઃ પ્રભાવઃ ઇતિ
04.5.15 પુરાણચોરગોપાલકવ્યાધશ્વગણિનશ્ચ વનચોરાટવિકાન્ અનુપ્રવિષ્ટાઃ પ્રભૂતકૂટહિરણ્યકુપ્યભાણ્ડેષુ સાર્થવ્રજગ્રામેષ્વેનાન્ અભિયોજયેયુઃ
04.5.16 અભિયોગે ગૂઢબલૈર્ઘાતયેયુઃ, મદનરસયુક્તેન વા પથ્ય્ઽદનેન
04.5.17 ગૃહીતલોપ્ત્રભારાન્ આયતગતપરિશ્રાન્તાન્ પ્રસ્વપતઃ પ્રહવણેષુ યોગસુરામત્તાન્ વા ગ્રાહયેયુઃ
04.5.18ab પૂર્વવચ્ચ ગૃહીત્વા એનાન્ સમાહર્તા પ્રરૂપયેત્ ।
04.5.18chd સર્વજ્ઞખ્યાપનં રાજ્ઞઃ કારયન્ રાષ્ટ્રવાસિષુ (ઇતિ)

Chapt . Arrest on suspicion, with the stolen article and by indication of the act

04.6.01 સિદ્ધપ્રયોગાદ્ ઊર્ધ્વં શઙ્કારૂપકર્માભિગ્રહઃ
04.6.02a ક્ષીણદાયકુટુમ્બં, અલ્પનિર્વેશં, વિપરીતદેશજાતિગોત્રનામકર્માપદેશં, પ્રચ્છન્નવૃત્તિકર્માણં,
04.6.02b માંસસુરાભક્ષ્યભોજનગન્ધમાલ્યવસ્ત્રવિભૂષણેષુ પ્રસક્તં, અતિવ્યયકર્તારં, પુંશ્ચલીદ્યૂતશૌણ્ડિકેષુ પ્રસક્તં,
04.6.02ch અભીક્ષ્ણપ્રવાસિનં, અવિજ્ઞાતસ્થાનગમનં, એકાન્તારણ્યનિષ્કુટવિકાલચારિણં, પ્રચ્છન્ને સામિષે વા દેશે બહુમન્ત્રસંનિપાતં,
04.6.02d સદ્યઃક્ષતવ્રણાનાં ગૂઢપ્રતીકારકારયિતારં, અન્તર્ગૃહનિત્યં, અભ્યધિગન્તારં, કાન્તાપરં,
04.6.02e પરપરિગ્રહાણાં પરસ્ત્રીદ્રવ્યવેશ્મનાં અભીક્ષ્ણપ્રષ્ટારં, કુત્સિતકર્મશાસ્ત્ર ઉપકરણસંસર્ગં,
04.6.02f વિરાત્રે છન્નકુડ્યચ્છાયાસઞ્ચારિણં, વિરૂપદ્રવ્યાણાં અદેશકાલવિક્રેતારં, જાતવૈરશયં, હીનકર્મજાતિં,
04.6.02g વિગૂહમાનરૂપં, લિઙ્ગેનાલિઙ્ગિનં, લિઙ્ગિનં વા ભિન્નાચારં, પૂર્વકૃતાપદાનં, સ્વકર્મભિરપદિષ્ટં,
04.6.02h નાગરિકમહામાત્રદર્શને ગુહમાનં અપસરન્તં અનુચ્છ્વાસ ઉપવેશિનં આવિગ્નં શુષ્કભિન્નસ્વરમુખવર્ણં,
04.6.02i શસ્ત્રહસ્તમનુષ્યસમ્પાતત્રાસિનં, હિંસ્રસ્તેનનિધિનિક્ષેપાપહારપરપ્રયોગગૂઢાજીવિનાં અન્યતમં શઙ્કેત ઇતિ શઙ્કાઽભિગ્રહઃ ॥
04.6.03 રૂપાભિગ્રહઃ તુ - નષ્ટાપહૃતં અવિદ્યમાનં તજ્જાતવ્યવહારિષુ નિવેદયેત્

04.6.04 તચ્ચેન્નિવેદિતં આસાદ્ય પ્રચ્છાદયેયુઃ સાચિવ્યકરદોષં આપ્નુયુઃ

04.6.05 અજાનન્તોऽસ્ય દ્રવ્યસ્યાતિસર્ગેણ મુચ્યેરન્

04.6.06 ન ચાનિવેદ્ય સંસ્થાऽધ્યક્ષસ્ય પુરાણભાણ્ડાનાં આધાનં વિક્રયં વા કુર્યુઃ

04.6.07 તચ્ચેન્નિવેદિતં આસાદ્યેત, રૂપાભિગૃહીતં આગમં પૃચ્છેત્ કુતઃ તે લબ્ધમ્ ઇતિ

04.6.08 સ ચેત્ બ્રૂયાત્ દાયાદ્યાદ્ અવાપ્તં, અમુષ્માલ્લબ્ધં ક્રીતં કારિતં આધિપ્રચ્છન્નં, અયં અસ્ય દેશઃ કાલશ્ચ ઉપસમ્પ્રાપ્તેઃ, અયં અસ્યાર્ઘઃ પ્રમાણં લક્ષણં મૂલ્યં ચ ઇતિ, તસ્યાગમસમાધૌ મુચ્યેત

04.6.09 નાષ્ટિકશ્ચેત્ તદ્ એવ પ્રતિસન્દધ્યાત્, યસ્યા પૂર્વો દીર્ઘશ્ચ પરિભોગઃ શુચિર્વા દેશઃ તસ્ય દ્રવ્યં ઇતિ વિદ્યાત્

04.6.10 ચતુષ્પદદ્વિપદાનાં અપિ હિ રૂપલિઙ્ગસામાન્યં ભવતિ, કિં અઙ્ગ પુનરેકયોનિદ્રવ્યકર્તૃપ્રસૂતાનાં કુપ્યાભરણભાણ્ડાનાં ઇતિ

04.6.11 સ ચેદ્ બ્રૂયાત્ યાચિતકં અવક્રીતકં આહિતકં નિક્ષેપં ઉપનિધિં વૈયાવૃત્યકર્મ વાऽમુષ્ય ઇતિ, તસ્યાપસારપ્રતિસન્ધાનેન મુચ્યેત

04.6.12 ન એવમ્ ઇત્યપસારો વા બ્રૂયાત્, રૂપાભિગૃહીતઃ પરસ્ય દાનકારણં આત્મનઃ પ્રતિગ્રહકારણં ઉપલિઙ્ગનં વા દાયકદાપકનિબન્ધકપ્રતિગ્રાહક ઉપદ્રષ્ટૃભિરુપશ્રોતૃભિર્વા પ્રતિસમાનયેત્

04.6.13 ઉજ્ઝિતપ્રનષ્ટનિષ્પતિત ઉપલબ્ધસ્ય દેશકાલલાભ ઉપલિઙ્ગનેન શુદ્ધિઃ

04.6.14 અશુદ્ધઃ તચ્ચ તાવચ્ચ દણ્ડં દદ્યાત્

04.6.15 અન્યથા સ્તેયદણ્ડં ભજેત ઇતિ રૂપાભિગ્રહઃ ।

04.6.16 કર્માભિગ્રહઃ તુ - મુષિતવેશ્મનઃ પ્રવેશનિષ્કસનં અદ્વારેણ, દ્વારસ્ય સન્ધિના બીજેન વા વેધં, ઉત્તમાગારસ્ય જાલવાતાયનનીપ્રવેધં, આરોહણાવતરણે ચ કુડ્યસ્ય વેધં, ઉપખનનં વા ગૂઢદ્રવ્યનિક્ષેપણગ્રહણ ઉપાયં, ઉપદેશ ઉપલભ્યં અભ્યન્તરચ્છેદ ઉત્કરપરિમર્દ ઉપકરણં અભ્યન્તરકૃતં વિદ્યાત્

04.6.17 વિપર્યયે બાહ્યકૃતં, ઉભયત ઉભયકૃતમ્

04.6.18a અભ્યન્તરકૃતે પુરુષં આસન્નં વ્યસનિનં ક્રૂરસહાયં તસ્કર ઉપકરણસંસર્ગં, સ્ત્રિયં વા દરિદ્રકુલાં અન્યપ્રસક્તાં વા,

04.6.18b પરિચારકજનં વા તદ્વિધાચારં, અતિસ્વપ્નં, નિદ્રાક્લાન્તં, આવિગ્નમ્ । શુષ્કભિન્નસ્વરમુખવર્ણં, અનવસ્થિતં,

04.6.18ch અતિપ્રલાપિનં, ઉચ્ચારોહણસંરબ્ધગાત્રં, વિલૂનનિઘૃષ્ટભિન્નપાટિતશરીરવસ્ત્રં, જાતકિણસંરબ્ધહસ્તપાદં,

04.6.18d પાંસુપૂર્ણકેશનખં વિલૂનભુગ્નકેશનખં વા, સમ્યક્સ્નાતાનુલિપ્તં તૈલપ્રમૃષ્ટગાત્રં સદ્યોદૌતહસ્તપાદં વા,

04.6.18e પાંસુપિચ્છિલેષુ તુલ્યપાદપદનિક્ષેપં, પ્રવેશનિષ્કસનયોર્વા તુલ્યમાલ્યમદ્યગન્ધવસ્ત્રચ્છેદવિલેપનસ્વેદં પરીક્ષેત

04.6.19 ચોરં પારદારિકં વા વિદ્યાત્

04.6.20ab સગોપસ્થાનિકો બાહ્યં પ્રદેષ્ટા ચોરમાર્ગણમ્ ।

04.6.20chd કુર્યાન્નાગરિકશ્ચાન્તર્દુર્ગે નિર્દિષ્ટહેતુભિઃ (ઇતિ)

Chapt . In quest of sudden deaths

04.7.01 તૈલાભ્યક્તં આશુમૃતકં પરીક્ષેત

04.7.02 નિષ્કીર્ણમૂત્રપુરીષં વાતપૂર્ણકોષ્ઠત્વક્કં શૂનપાદપાણિમાન્ મીલિતાક્ષં સવ્યઞ્જનકણ્ઠં પીટનનિરુદ્ધ ઉચ્છ્વાસહતં વિદ્યાત્

04.7.03 તં એવ સઙ્કુચિતબાહુસક્થિં ઉદ્બન્ધહતં વિદ્યાત્

04.7.04 શૂનપાણિપાદ ઉદરં અપગતાક્ષં ઉદ્વૃત્તનાભિં અવરોપિતં વિદ્યાત્

04.7.05 નિસ્તબ્ધગુદાક્ષં સન્દષ્ટજિહ્વં આધ્માત ઉદરં ઉદકહતં વિદ્યાત્

04.7.06 શોણિતાનુસિક્તં ભગ્નભિન્નગાત્રં કાષ્ઠૈરશ્મભિર્વા હતં વિદ્યાત્

04.7.07 સમ્ભગ્નસ્ફુટિતગાત્રં અવક્ષિપ્તં વિદ્યાત્

04.7.08 શ્યાવપાણિપાદદન્તનખં શિથિલમાંસરોમચર્માણં ફેન ઉપદિગ્ધમુખં વિષહતં વિદ્યાત્

04.7.09 તં એવ સ-શોણિતદંશં સર્પકીટહતં વિદ્યાત્ ।

04.7.10 વિક્ષિપ્તવસ્ત્રગાત્રં અતિવન્તવિરિક્તં મદનયોગહતં વિદ્યાત્

04.7.11 અતોઽન્યતમેન કારણેન હતં હત્વા વા દણ્ડભયાદ્ ઉદ્બદ્ધનિકૃત્તકણ્ઠં વિદ્યાત્

04.7.12 વિષહતસ્ય ભોજનશેષં વયોભિઃ પરીક્ષેત

04.7.13 હૃદયાદ્ ઉદ્ધૃત્યાગ્નૌ પ્રક્ષિપ્તં ચિટિચિટાયદ્ । ઇન્દ્રધનુર્વર્ણં વા વિષયુક્તં વિદ્યાત્, દગ્ધસ્ય હૃદયં અદગ્ધં દૃષ્ટ્વા વા

04.7.14 તસ્ય પરિચારકજનં વાગ્દણ્ડપારુષ્યાતિલબ્ધં માર્ગેત, દુઃખ ઉપહતં અન્યપ્રસક્તં વા સ્ત્રીજનં, દાયવૃત્તિસ્ત્રીજનાભિમન્તારં વા બન્ધુમ્

04.7.15 તદ્ એવ હત ઉદ્બદ્ધસ્ય પરીક્ષેત

04.7.16 સ્વયં ઉદ્બદ્ધસ્ય વા વિપ્રકારં અયુક્તં માર્ગેત

04.7.17 સર્વેષાં વા સ્ત્રીદાયાદ્યદોષઃ કર્મસ્પર્ધા પ્રતિપક્ષદ્વેષઃ પણ્યસંસ્થાસમવાયો વા વિવાદપદાનાં અન્યતમદ્ વા રોષસ્થાનમ્

04.7.18 રોષનિમિત્તો ઘાતઃ

04.7.19 સ્વયં । આદિષ્ટપુરુષૈર્વા, ચોરૈરર્થનિમિત્તં, સાદૃશ્યાદ્ અન્યવૈરિભિર્વા હતસ્ય ઘાતં આસન્નેભ્યઃ પરીક્ષેત

04.7.20 યેનાહૂતઃ સહ સ્થિતઃ પ્રસ્થિતો હતભૂમિં આનીતો વા તં અનુયુઞ્જીત

04.7.21 યે ચાસ્ય હતભૂમાવાસન્નચરાઃ તાન્ એક એકશઃ પૃચ્છેત્ કેનાયં ઇહાનીતો હતો વા, કઃ સશસ્ત્રઃ સઙ્ગૂહમાન ઉદ્વિગ્નો વા યુષ્માભિર્દૃષ્ટઃ ઇતિ

04.7.22 તે યથા બ્રૂયુઃ તથાઽનુયુઞ્જીત

04.7.23ab અનાથસ્ય શરીરસ્થં ઉપભોગં પરિચ્છદમ્ ।

04.7.23chd વસ્ત્રં વેષં વિભૂષાં વા દૃષ્ટ્વા તદ્વ્યવહારિણઃ

04.7.24ab અનુયુઞ્જીત સંયોગં નિવાસં વાસકારણમ્ ।

04.7.24chd કર્મ ચ વ્યવહારં ચ તતો માર્ગણં આચરેત્

04.7.25ab રજ્જુશસ્ત્રવિષૈર્વાઽપિ કામક્રોધવશેન યઃ ।

04.7.25chd ઘાતયેત્ સ્વયં આત્માનં સ્ત્રી વા પાપેન મોહિતા

04.7.26ab રજ્જુના રાજમાર્ગે તાંશ્ચણ્ડાલેનાપકર્ષયેત્ ।

04.7.26chd ન શ્મશાનવિધિઃ તેષાં ન સમ્બન્ધિક્રિયાઃ તથા

04.7.27ab બન્ધુઃ તેષાં તુ યઃ કુર્યાત્ પ્રેતકાર્યક્રિયાવિધિમ્ ।

04.7.27chd તદ્ગતિં સ ચરેત્ પશ્ચાત્ સ્વજનાદ્ વા પ્રમુચ્યતે

04.7.28ab સંવત્સરેણ પતતિ પતિતેન સમાચરન્ ।

04.7.28chd યાજનાધ્યાપનાદ્ યૌનાત્ તૈશ્ચાન્યોઽપિ સમાચરન્ (ઇતિ)

Chapt . Investigation througH interrogation and througH torture

04.8.01 મુષિતસંનિધૌ બાહ્યાનાં અભ્યન્તરાણાં ચ સાક્ષિણાં અભિશસ્તસ્ય દેશજાતિગોત્રનામકર્મસારસહાયનિવાસાન્ અનુયુઞ્જીત

04.8.02 તાંશ્ચાપદેશૈઃ પ્રતિસમાનયેત્

04.8.03 તતઃ પૂર્વસ્યાહ્નઃ પ્રચારં રાત્રૌ નિવાસં ચ<chA> ગ્રહણાદ્ ઇત્યનુયુઞ્જીત

04.8.04 તસ્યાપસારપ્રતિસન્ધાને શુદ્ધઃ સ્યાત્, અન્યથા કર્મપ્રાપ્તઃ

04.8.05 ત્રિરાત્રાદ્ ઊર્ધ્વં અગ્રાહ્યઃ શઙ્કિતકઃ પૃચ્છાઽભાવાદ્ અન્યત્ર ઉપકરણદર્શનાત્

04.8.06 અચોરં ચોર ઇત્યભિવ્યાહરતશ્ચોરસમો દણ્ડઃ, ચોરં પ્રચ્છાદયતશ્ચ

04.8.07 ચોરેણાભિશસ્તો વૈરદ્વેષાભ્યાં અપદિષ્ટકઃ શુદ્ધઃ સ્યાત્

04.8.08 શુદ્ધં પરિવાસયતઃ પૂર્વઃ સાહસદણ્ડઃ

04.8.09 શઙ્કાનિષ્પન્નં ઉપકરણમન્ત્રિસહાયરૂપવૈયાવૃત્યકરાન્નિષ્પાદયેત્

04.8.10 કર્મણશ્ચ પ્રદેશદ્રવ્યાદાનાંશવિભાગૈઃ પ્રતિસમાનયેત્

04.8.11 એતેષાં કારણાનાં અનભિસન્ધાને વિપ્રલપન્તં અચોરં વિદ્યાત્

04.8.12 દૃશ્યતે હ્યચોરોઽપિ ચોરમાર્ગે યદૃચ્છયા સંનિપાતે ચોરવેષશસ્ત્રભાણ્ડસામાન્યેન ગૃહ્યમાણશ્ચોરભાણ્ડસ્ય ઉપવાસેન વા, યથાઽણિમાણ્ડવ્યઃ કર્મક્લેશભયાદ્ અચોરઃ ચોરોઽસ્મિ ઇતિ બ્રુવાણઃ

04.8.13 તસ્માત્ સમાપ્તકરણં નિયમયેત્

04.8.14 મન્દાપરાધં બાલં વૃદ્ધં વ્યાધિતં મત્તં ઉન્મત્તં ક્ષુત્પિપાસાઽધ્વક્લાન્તં અત્યાશિતં આમકાશિતં દુર્બલં વા ન કર્મ કારયેત્

04.8.15 તુલ્ય શીલપુંશ્ચલીપ્રાપાવિકકથાઽવકાશભોજનદાતૃભિરપસર્પયેત્

04.8.16 એવં અતિસન્દધ્યાત્, યથા વા નિક્ષેપાપહારે વ્યાખ્યાતમ્

04.8.17 આપ્તદોષં કર્મ કારયેત્, ન ત્વેવ સ્ત્રિયં ગર્ભિણીં સૂતિકાં વા માસાવરપ્રજાતામ્

04.8.18 સ્ત્રિયાઃ ત્વર્ધકર્મ, વાક્યાનુયોગો વા

04.8.19 બ્રાહ્મણસ્ય સત્રિપરિગ્રહઃ શ્રુતવતઃ તપસ્વિનશ્ચ

04.8.20 તસ્યાતિક્રમ ઉત્તમો દણ્ડઃ કર્તુઃ કારયિતુશ્ચ, કર્મણા વ્યાપાદનેન ચ

04.8.21 વ્યાવહારિકં કર્મચતુષ્કં - ષડ્ દણ્ડાઃ, સપ્ત કશાઃ, દ્વાવુપરિનિબન્ધૌ, ઉદકનાલિકા ચ

04.8.22 પરં પાપકર્મણાં નવ વેત્રલતાઃ, દ્વાદશ કશાઃ, દ્વાવૂરુવેષ્ટૌ, વિંશતિર્નક્તમાલલતાઃ, દ્વાત્રિંશત્તલાઃ, દ્વૌ વૃશ્ચિકબન્ધૌ, ઉલ્લમ્બને ચ દ્વે, સૂચી હસ્તસ્ય, યવાગૂપીતસ્ય એકપર્વદહનં અઙ્ગુલ્યાઃ, સ્નેહપીતસ્ય પ્રતાપનં એકં અહઃ, શિશિરરાત્રૌ બલ્બજાગ્રશય્યા ચ

04.8.23 ઇત્યષ્ટાદશકં કર્મ

04.8.24 તસ્ય ઉપકરણં પ્રમાણં પ્રહરણં પ્રધરણં અવધારણં ચ ખરપટ્ટાદ્ આગમયેત્

04.8.25 દિવસાન્તરં એક એકં ચ કર્મ કારયેત્

04.8.26 પૂર્વકૃતાપદાનં પ્રતિજ્ઞાયાપહરન્તં એકદેશદૃષ્ટદ્રવ્યં કર્મણા રૂપેણ વા ગૃહીતં રાજકોશં અવસ્તૃણન્તં કર્મવધ્યં વા રાજવચનાત્ સમસ્તં વ્યસ્તં અભ્યસ્તં વા કર્મ કારયેત્

04.8.27 સર્વાપરાધેષ્વપીડનીયો બ્રાહ્મણઃ

04.8.28 તસ્યાભિશસ્તાઙ્કો લલાટે સ્યાદ્ વ્યવહારપતનાય, સ્તેયો શ્વા, મનુષ્યવધે કબન્ધઃ, ગુરુતલ્પે ભગં, સુરાપાને મદ્યધ્વજઃ

04.8.29ab બ્રાહ્મણં પાપકર્માણં ઉદ્ઘુષ્યાઙ્કકૃતવ્રણમ્ ।

04.8.29chd કુર્યાન્નિર્વિષયં રાજા વાસયેદ્ આકરેષુ વા (ઇતિ)

Chapt . keeping a watch over officers of all departments

04.9.01 સમાહર્તૃપ્રદેષ્ટારઃ પૂર્વં અધ્યક્ષાણાં અધ્યક્ષપુરુષાણાં ચ નિયમનં કુર્યુઃ

04.9.02 ખનિસારકર્માન્તેભ્યઃ સારં રત્નં વાઽપહરતઃ શુદ્ધવધઃ

04.9.03 ફલ્ગુદ્રવ્યકર્માન્તેભ્યઃ ફલ્ગુ દ્રવ્યં ઉપસ્કરં વા પૂર્વઃ સાહસદણ્ડઃ

04.9.04 પણ્યભૂમિભ્યો વા રાજપણ્યં માષમૂલ્યાદ્ ઊર્ધ્વં આપાદમૂલ્યાદ્ ઇત્યપહરતો દ્વાદશપણો દણ્ડઃ, આદ્વિપાદમૂલ્યાદ્ ઇતિ ચતુર્વિંશતિપણઃ, આત્રિપાદમૂલ્યાદ્ ઇતિ ષટ્ત્રિંશત્પણઃ, આપણમૂલ્યાદ્ ઇત્યષ્ટચત્વારિંશત્પણઃ, આદ્વિપણમૂલ્યાદ્ ઇતિ પૂર્વઃ સાહસદણ્ડઃ, આચતુષ્પણમૂલ્યાદ્ ઇતિ મધ્યમઃ, આઽષ્ટપણમૂલ્યાદ્ ઇત્યુત્તમઃ, આદશપણમૂલ્યાદ્ ઇતિ વધઃ

04.9.05 કોષ્ઠપણ્યકુપ્યાયુધાગારેભ્યઃ કુપ્યભાણ્ડ ઉપસ્કરાપહારેષ્વર્ધમૂલ્યેષુ એત એવ દણ્ડાઃ

04.9.06 કોશભાણ્ડાગારાક્ષશાલાભ્યશ્ચતુર્ભાગમૂલ્યેષુ એત એવ દ્વિગુણા દણ્ડાઃ

04.9.07 ચોરાણાં અભિપ્રધર્ષણે ચિત્રો ઘાતઃ

04.9.08 ઇતિ રાજપરિગ્રહેષુ વ્યાખ્યાતમ્

04.9.09 બાહ્યેષુ તુ - પ્રચ્છન્નં અહનિ ક્ષેત્રખલવેશ્માપણેભ્યઃ કુપ્યભાણ્ડં ઉપસ્કરં વા માષમૂલ્યાદ્ ઊર્ધ્વં આપાદમૂલ્યાદ્ ઇત્યપહરતઃ ત્રિપણો દણ્ડઃ, ગોમયપ્રદેહેન વા પ્રલિપ્યાવઘોષણમ્ આદ્વિપાદમૂલ્યાદ્ ઇતિ ષટ્પણઃ, ગોમયભસ્મના વા પ્રલિપ્યાવઘોષણં, આત્રિપાદમૂલ્યાદ્ ઇતિ નવપણઃ, ગોમયભસ્મના વા પ્રલિપ્યાવઘોષણં, શરાવમેખલયા વા।આપણમૂલ્યાદ્ ઇતિ દ્વાદશપણઃ, મુણ્ડનં પ્રવ્રાજનં વા।આદ્વિપણમૂલ્યાદ્ ઇતિ ચતુર્વિંશતિપણઃ, મુણ્ડસ્ય ઇષ્ટકાશકલેન પ્રવ્રાજનં વા।આચતુષ્પણમૂલ્યાદ્ ઇતિ ષટ્ત્રિંશત્પણઃ આપઞ્ચપણમૂલ્યાદ્ ઇત્યષ્ટચત્વારિંશત્પણઃ, આદશપણમૂલ્યાદ્ ઇતિ પૂર્વઃ સાહસદણ્ડઃ આવિંશતિપણમૂલ્યાદ્ ઇત્ દ્વિશતઃ

આત્રિંશત્પણમૂલ્યાદ્ ઇતિ પઞ્ચશતઃ આચત્વારિંશત્પણમૂલ્યાદ્ ઇતિ સાહસ્રઃ આપઞ્ચાશત્પણમૂલ્યાદ્ ઇતિ વધઃ

04.9.10 પ્રસહ્ય દિવા રાત્રૌ વાઽઽન્તર્યામિકં અપહરતોઽર્ધમૂલ્યેષુ એત એવ દણ્ડાઃ

04.9.11 પ્રસહ્ય દિવા રાત્રૌ વા સ-શસ્ત્રસ્યાપહરતશ્ચતુર્ભાગમૂલ્યેષુ એત એવ દ્વિગુણા દણ્ડાઃ

04.9.12 કુટુમ્બિકાધ્યક્ષમુખ્યસ્વામિનાં કૂટશાસનમુદ્રાકર્મસુ પૂર્વમધ્ય ઉત્તમવધા દણ્ડાઃ, યથાઽપરાધં વા

04.9.13 ધર્મસ્થશ્ચેદ્ વિવદમાનં પુરુષં તર્જયતિ ભર્ત્સયત્યપસારયત્યભિગ્રસતે વા પૂર્વં અસ્મૈ સાહસદણ્ડં કુર્યાત્, વાક્પારુષ્યે દ્વિગુણમ્

04.9.14 પૃચ્છ્યં ન પૃચ્છતિ, અપૃચ્છ્યં પૃચ્છતિ, પૃષ્ટ્વા વા વિસૃજતિ, શિક્ષયતિ, સ્મારયતિ, પૂર્વં દદાતિ વા, ઇતિ મધ્યમં અસ્મૈ સાહસદણ્ડં કુર્યાત્

04.9.15 દેયં દેશં ન પૃચ્છતિ, અદેયં દેશં પૃચ્છતિ, કાર્યં અદેશેનાતિવાહયતિ, છલેનાતિહરતિ, કાલહરણેન શ્રાન્તં અપવાહયતિ, માર્ગાપન્નં વાક્યં ઉત્ક્રમયતિ, મતિસાહાય્યં સાક્ષિભ્યો દદાતિ, તારિતાનુશિષ્ટં કાર્યં પુનરપિ ગૃહ્ણાતિ, ઉત્તમં અસ્મૈ સાહસદણ્ડં કુર્યાત્

04.9.16 પુનર્ઽપરાધે દ્વિગુણં સ્થાનાદ્ વ્યવરોપણં ચ

04.9.17 લેખકશ્ચેદ્ ઉક્તં ન લિખતિ, અનુક્તં લિખતિ, દુરુક્તં ઉપલિખતિ, સૂક્તં ઉલ્લિખતિ, અર્થ ઉત્પત્તિં વા વિકલ્પયતિ, ઇતિ પૂર્વં અસ્મૈ સાહસદણ્ડં કુર્યાદ્, યથાઽપરાધં વા

04.9.18 ધર્મસ્થઃ પ્રદેષ્ટા વા હૈરણ્યદણ્ડં અદણ્ડ્યે ક્ષિપતિ ક્ષેપદ્વિગુણં અસ્મૈ દણ્ડં કુર્યાત્, હીનાતિરિક્તાષ્ટગુણં વા

04.9.19 શરીરદણ્ડં ક્ષિપતિ શારીરં એવ દણ્ડં ભજેત, નિષ્ક્રયદ્વિગુણં વા

04.9.20 યં વા ભૂતં અર્થં નાશયતિ અભૂતં અર્થં કરોતિ તદ્ઽષ્ટગુણં દણ્ડં દદ્યાત્

04.9.21 ધર્મસ્થીયે ચારકે બન્ધનાગારે વા શય્યાઽઽસનભોજન ઉચ્ચારસઞ્ચારરોધબન્ધનેષુ ત્રિપણ ઉત્તરા દણ્ડાઃ કર્તુઃ કારયિતુશ્ચ

04.9.22 ચારકાદ્ અભિયુક્તં મુઞ્ચતો નિષ્પાતયતો વા મધ્યમઃ સાહસદણ્ડઃ, અભિયોગદાનં ચ, બન્ધનાગારાત્ સર્વસ્વં વધશ્ચ

04.9.23 બન્ધનાગારાધ્યક્ષસ્ય સંરુદ્ધકં અનાખ્યાય ચારયતશ્ચતુર્વિંશતિપણો દણ્ડઃ, કર્મ કારયતો દ્વિગુણઃ, સ્થાનાન્યત્વં ગમયતોઽન્નપાનં વા રુન્ધતઃ ષણ્ણઁઅવતિર્દણ્ડઃ, પરિક્લેશયત ઉત્કોટયતો વા મધ્યમઃ સાહસદણ્ડઃ, ઘ્નતઃ સાહસ્રઃ

04.9.24 પરિગૃહીતાં દાસીં આહિતિકાં વા સંરુદ્ધિકાં અધિચરતઃ પૂર્વઃ સાહસદણ્ડઃ, ચોરઽ◌ામરિકભાર્યાં મધ્યમઃ, સંરુદ્ધિકાં આર્યાં ઉત્તમઃ

04.9.25 સંરુદ્ધસ્ય વા તત્ર એવ ઘાતઃ

04.9.26 તદ્ એવાક્ષણગૃહીતાયાં આર્યાયાં વિદ્યાત્, દાસ્યાં પૂર્વઃ સાહસદણ્ડઃ

04.9.27 ચારકં અભિત્ત્વા નિષ્પાતયતો મધ્યમઃ, ભિત્ત્વા વધઃ, બન્ધનાગારાત્ સર્વસ્વં વધશ્ચ

04.9.28ab એવં અર્થચરાન્ પૂર્વં રાજા દણ્ડેન શોધયેત્ ।

04.9.28chd શોધયેયુશ્ચ શુદ્ધાઃ તે પૌરજાનપદાન્ દમૈઃ (ઇતિ)

Chapt . Redemption from the cutting of individual limbs

04.10.01 તીર્થઘાતગ્રન્થિભેદ ઊર્ધ્વકરાણાં પ્રથમેઽપરાધે સન્દેશચ્છેદનં ચતુષ્પઞ્ચાશત્પણો વા દણ્ડઃ, દ્વિતીયે છેદનં પણસ્ય શત્યો વા દણ્ડઃ, તૃતીયે દક્ષિણહસ્તવધશ્ચતુઃશતો વા દણ્ડઃ, ચતુર્થે યથાકામી વધઃ

04.10.02 પઞ્ચવિંશતિપણાવરેષુ કુક્કુટનકુલમાર્જારશ્વસૂકરસ્તેયેષુ હિંસાયાં વા ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ, નાસાગ્રચ્છેદનં વાચણ્ડાલારણ્યચરાણાં અર્ધદણ્ડાઃ

04.10.03 પાશજાલકૂટાવપાતેષુ બદ્ધાનાં મૃગપશુપક્ષિવ્યાલમત્સ્યાનાં આદાને તચ્ચ તાવચ્ચ દણ્ડઃ

04.10.04 મૃગદ્રવ્યવનાન્ મૃગદ્રવ્યાપહારે શાત્યો દણ્ડઃ

04.10.05 બિમ્બવિહારમૃગપક્ષિસ્તેયે હિંસાયાં વા દ્વિગુણો દણ્ડઃ

04.10.06 કારુશિલ્પિકુશીલવતપસ્વિનાં ક્ષુદ્રકદ્રવ્યાપહારે શત્યો દણ્ડઃ, સ્થૂલકદ્રવ્યાપહારે દ્વિશતઃ, કૃષિદ્રવ્યાપહારે ચ

04.10.07 દુર્ગં અકૃતપ્રવેશસ્ય પ્રવિશતઃ પ્રાકારચ્છિદ્રાદ્ વા નિક્ષેપં ગૃહીત્વાઽપસરતઃ કાણ્ડરાવધો, દ્વિશાતો વા દણ્ડઃ

04.10.08 ચક્રયુક્તં નાવં ક્ષુદ્રપશું વાઽપહરત એકપાદવધઃ, ત્રિશતો વા દણ્ડઃ

04.10.09 કૂટકાકણ્યક્ષારાલાશલાકાહસ્તવિષમકારિણ એકહસ્તવધઃ, ચતુઃશતો વા દણ્ડઃ

04.10.10 સ્તેનપારદારિકયોઃ સાચિવ્યકર્મણિ સ્ત્રિયાઃ સઙ્ગૃહીતાયાશ્ચ કર્ણનાસાચ્છેદનં, પઞ્ચશતો વા દણ્ડઃ, પુંષો દ્વિગુણઃ

04.10.11 મહાપશું એકં દાસં દાસીં વાઽપહરતઃ પ્રેતભાણ્ડં વા વિક્રીણાનસ્ય દ્વિપાદવધઃ, ષટ્છતો વા દણ્ડઃ

04.10.12 વર્ણ ઉત્તમાનાં ગુરૂણાં ચ હસ્તપાદલઙ્ઘને રાજયાનવાહનાદ્ય્ । આરોહણે ચ એકહસ્તપાદવધઃ, સપ્તશતો વા દણ્ડઃ

04.10.13 શૂદ્રસ્ય બ્રાહ્મણવાદિનો દેવદ્રવ્યં અવસ્તૃણતો રાજદ્વિષ્ટં આદિશતો દ્વિનેત્રભેદિનશ્ચ યોગાઞ્જનેનાન્ધત્વં, અષ્ટશતો વા દણ્ડઃ

04.10.14 ચોરં પારદારિકં વા મોક્ષયતો રાજશાસનં ઊનં અતિરિક્તં વા લિખતઃ કન્યાં દાસીં વા સ-હિરણ્યં અપરહતઃ કૂટવ્યવહારિણો વિમાંસવિક્રયિણશ્ચ વામહસ્તદ્વિપાદવધો, નવશતો વા દણ્ડઃ

04.10.15 માનુષમાંસવિક્રયે વધઃ

04.10.16 દેવપશુપ્રતિમામનુષ્યક્ષેત્રગૃહહિરણ્યસુવર્ણરત્નસસ્યાપહારિણ ઉત્તમો દણ્ડઃ, શુદ્ધવધો વા

04.10.17ab પુરુષં ચાપરાધં ચ કારણં ગુરુલાઘવમ્ ।

04.10.17chd અનુબન્ધં તદાત્વં ચ દેશકાલૌ સમીક્ષ્ય ચ

04.10.18ab ઉત્તમાવરમધ્યત્વં પ્રદેષ્ટા દણ્ડકર્મણિ ।

04.10.18chd રાજ્ઞશ્ચ પ્રકૃતીનાં ચ કલ્પયેદ્ અન્તરા સ્થિતઃ (ઇતિ)

Chapt . Law of capital punishment, simple and with torture

04.11.01 કલહે ઘ્નતઃ પુરુષં ચિત્રો ઘાતઃ

04.11.02 સપ્તરાત્રસ્યાન્તર્મૃતે શુદ્ધવધઃ, પક્ષસ્યાન્તરુત્તમઃ, માસસ્યાન્તઃ પઞ્ચશતઃ સમુત્થાનવ્યયશ્ચ

04.11.03 શસ્ત્રેણ પ્રહરત ઉત્તમો દણ્ડઃ

04.11.04 મદેન હસ્તવધઃ, મોહેન દ્વિશતઃ

04.11.05 વધે વધઃ

04.11.06 પ્રહારેણ ગર્ભં પાતયત ઉત્તમો દણ્ડઃ, ભૈષજ્યેન મધ્યમઃ, પરિક્લેશેન પૂર્વઃ સાહસદણ્ડઃ

04.11.07 પ્રસભસ્ત્રીપુરુષઘાતકાભિસારકનિગ્રાહકાવઘોષકાવસ્કન્દક ઉપવેધકાન્ પથિવેશ્મપ્રતિરોધકાન્ રાજહસ્ત્યઽશ્વરથાનાં હિંસકાન્ સ્તેનાન્ વા શૂલાન્ આરોહયેયુઃ

04.11.08 યશ્ચ એનાન્ દહેદ્ અપનયેદ્ વા સ તં એવ દણ્ડં લભેત, સાહસં ઉત્તમં વા

04.11.09 હિંસ્રસ્તેનાનાં ભક્તવાસ ઉપકરણાગ્નિમન્ત્રદાનવૈયાવૃત્યકર્મસુ ઉત્તમો દણ્ડઃ, પરિભાષણં અવિજ્ઞાતે

04.11.10 હિંસ્રસ્તેનાનાં પુત્રદારં અસમન્ત્રં વિસૃજેત્, સમન્ત્રં આદદીત

04.11.11 રાજ્યકામુકં અન્તઃપુરપ્રધર્ષકં અટવ્યઽમિત્ર ઉત્સાહકં દુર્ગરાષ્ટ્રદણ્ડકોપકં વા શિરોહસ્તપ્રદીપિકં ઘાતયેત્

04.11.12 બ્રાહ્મણં તમઃ પ્રવેશયેત્

04.11.13 માતૃપિતૃપુત્રભ્રાત્।આચાર્યતપસ્વિઘાતકં વાઽત્વક્શિરઃપ્રાદીપિકં ઘાતયેત્

04.11.14 તેષાં આક્રોશે જિહ્વાચ્છેદઃ, અઙ્ગાભિરદને તદ્ઽઙ્ગાન્ મોચ્યઃ

04.11.15 યદૃચ્છાઘાતે પુંસઃ પશુયૂથસ્તેયે ચ શુદ્ધવધઃ

04.11.16 દશાવરં ચ યૂથં વિદ્યાત્

04.11.17 ઉદકધારણં સેતું ભિન્દતઃ તત્ર એવાપ્સુ નિમજ્જનં, અનુદકં ઉત્તમઃ સાહસદણ્ડઃ, ભગ્ન ઉત્સૃષ્ટકં મધ્યમઃ

04.11.18 વિષદાયકં પુરુષં સ્ત્રિયં ચ પુરુષઘ્નીં અપઃ પ્રવેશયેદ્ અગર્ભિણીં, ગર્ભિણીં માસાવરપ્રજાતામ્

04.11.19 પતિગુરુપ્રજાઘાતિકાં અગ્નિવિષદાં સન્ધિચ્છેદિકાં વા ગોભિઃ પાટયેત્

04.11.20 વિવીતક્ષેત્રખલવેશ્મદ્રવ્યહસ્તિવનાદીપિકં અગ્નિના દાહયેત્

04.11.21 રાજાક્રોશકમન્ત્રભેદકયોરનિષ્ટપ્રવૃત્તિકસ્ય બ્રાહ્મણમહાનસાવલેહિનશ્ચ જિહ્વાં ઉત્પાટયેત્

04.11.22 પ્રહરણાવરણસ્તેનં અનાયુધીયં ઇષુભિર્ઘાતયેત્

04.11.23 આયુધીયસ્ય ઉત્તમઃ

04.11.24 મેઢ્રફલ ઉપઘાતિનઃ તદ્ એવચ્છેદયેત્

04.11.25 જિહ્વાનાસ ઉપઘાતે સન્દંશવધઃ

04.11.26ab એતે શાસ્ત્રેષ્વનુગતાઃ ક્લેશદણ્ડા મહાત્મનામ્ ।

04.11.26chd અક્લિષ્ટાનાં તુ પાપાનાં ધર્મ્યઃ શુદ્ધવધઃ સ્મૃતઃ (ઇતિ)

Chapt . Violation of maidens

04.12.01 સવર્ણાં અપ્રાપ્તફલાં પ્રકુર્વતો હસ્તવધઃ, ચતુઃશતો વા દણ્ડઃ

04.12.02 મૃતાયાં વધઃ

04.12.03 પ્રાપ્તફલાં પ્રકુર્વતો મધ્યમાપ્રદેશિનીવધો, દ્વિશતો વા દણ્ડઃ

04.12.04 પિતુશ્ચાવહીનં દદ્યાત્

04.12.05 ન ચ પ્રાકામ્યં અકામાયાં લભ્ભેત

04.12.06 સકામાયાં ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ, સ્ત્રિયાઃ ત્વર્ધદણ્ડઃ

04.12.07 પરશુલ્કાવરુદ્ધાયાં હસ્તવધઃ, ચતુઃશતો વા દણ્ડઃ, શુલ્કદાનં ચ

04.12.08 સપ્તાર્તવપ્રજાતાં વરણાદ્ ઊર્ધ્વં અલભમાનઃ પ્રકૃત્ય પ્રાકામી સ્યાત્, ન ચ પિતુરવહીનં દદ્યાત્

04.12.09 ઋતુપ્રતિરોધિભિઃ સ્વામ્યાદ્ અપક્રામતિ

04.12.10 ત્રિવર્ષપ્રજાતાર્તવાયાઃ તુલ્યો ગન્તું અદોષઃ, તતઃ પરં અતુલ્યોઽપ્યનલઙ્કૃતાયાઃ

04.12.11 પિતૃદ્રવ્યાદાને સ્તેયં ભજેત

04.12.12 પરં ઉદ્દિશ્યાન્યસ્ય વિન્દતો દ્વિશતો દણ્ડઃ

04.12.13 ન ચ પ્રાકાંયં અકામાયાં લભેત

04.12.14 કન્યાં અન્યાં દર્શયિત્વાઽન્યાં પ્રયચ્છતઃ શત્યો દણ્ડઃ તુલ્યાયાં, હીનાયાં દ્વિગુણઃ

04.12.15 પ્રકર્મણ્યકુમાર્યાશ્ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ, શુલ્કવ્યયકર્મણી ચ પ્રતિદદ્યાત્

04.12.16 અવસ્થાય તજ્જાતં પશ્ચાત્કૃતા દ્વિગુણં દદ્યાત્

04.12.17 અન્યશોણિત ઉપધાને દ્વિશતો દણ્ડઃ, મિથ્યાઽભિશંસિનશ્ચ પુંસઃ

04.12.18 શુલ્કવ્યયકર્મણી ચ જીયેત

04.12.19 ન ચ પ્રાકાંયં અકામાયાં લભેત

04.12.20 સ્ત્રીપ્રકૃતા સકામા સમાના દ્વાદશપણં દણ્ડં દદ્યાત્, પ્રકર્ત્રી દ્વિગુણમ્

04.12.21 અકામાયાઃ શત્યો દણ્ડ આત્મરાગાર્થં, શુલ્કદાનં ચ

04.12.22 સ્વયં પ્રકૃતા રાજદાસ્યં ગચ્છેત્

04.12.23 બહિર્ગ્રામસ્ય પ્રકૃતાયાં મિથ્યાઽભિશંસને ચ દ્વિગુણો દણ્ડઃ

04.12.24 પ્રસહ્ય કન્યાં અપહરતો દ્વિશતઃ, સ-સુવર્ણાં ઉત્તમઃ

04.12.25 બહૂનાં કન્યાઽપહારિણાં પૃથગ્ યથા ઉક્તા દણ્ડાઃ

04.12.26 ગણિકાદુહિતરં પ્રકુર્વતશ્ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ, શુલ્કં માતુર્ભોગઃ ષોડશગુણઃ

04.12.27 દાસસ્ય દાસ્યા વા દુહિતરં અદાસીં પ્રકુર્વતશ્ચતુર્વિંશતિપણો દણ્ડઃ શુલ્કાબન્ધ્યદાનં ચ

04.12.28 નિષ્ક્રયાનુરૂપાં દાસીં પ્રકુર્વતો દ્વાદશપણો દણ્ડો વસ્ત્રાબન્ધ્યદાનં ચ

04.12.29 સાચિવ્યાવકાશદાને કર્તૃસમો દણ્ડઃ

04.12.30 પ્રોષિતપતિકાં અપચરન્તીં પતિબન્ધુઃ તત્પુરુષો વા સઙ્ગૃહ્ણીયાત્

04.12.31 સઙ્ગૃહીતા પતિં આકાઙ્ક્ષેત

04.12.32 પતિશ્ચેત્ ક્ષમેત વિસૃજ્યેત ઉભયમ્

04.12.33 અક્ષમાયાં સ્ત્રિયાઃ કર્ણનાસાચ્છેદનં, વધં જારશ્ચ પ્રાપ્નુયાત્

04.12.34 જારં ચોર ઇત્યભિહરતઃ પઞ્ચશતો દણ્ડઃ, હિરણ્યેન મુઞ્ચતઃ તદ્ઽષ્ટગુણઃ

04.12.35 કેશાકેશિકં સઙ્ગ્રહણં, ઉપલિઙ્ગનાદ્ વા શરીર ઉપભોગાનાં, તજ્જાતેભ્યઃ(તજ્જ્ઞાતેભ્યઃ? chf.N12.60), સ્ત્રીવચનાદ્ વા

04.12.36 પરચક્રાટવીહૃતાં ઓઘપ્રવ્યૂઢાં અરણ્યેષુ દુર્ભિક્ષે વા ત્યક્તાં પ્રેતભાવ ઉત્સૃષ્ટાં વા પરસ્ત્રિયં નિસ્તારયિત્વા યથાસમ્ભાષિતં સમુપભુઞ્જીત

04.12.37 જાતિવિશિષ્ટાં અકામાં અપત્યવતીં નિષ્ક્રયેણ દદ્યાત્

04.12.38ab ચોરહસ્તાન્નદીવેગાદ્ દુર્ભિક્ષાદ્ દેશવિભ્રમાત્ ।

04.12.38chd નિસ્તારયિત્વા કાન્તારાન્નષ્ટાં ત્યક્તાં મૃતા ઇતિ વા

04.12.39ab ભુઞ્જીત સ્ત્રિયં અન્યેષાં યથાસમ્ભાષિતં નરઃ ।

04.12.39chd ન તુ રાજપ્રતાપેન પ્રમુક્તાં સ્વજનેન વા

04.12.40ab ન ચ ઉત્તમાં ન ચાકામાં પૂર્વાપત્યવતીં ન ચ ।

04.12.40chd ઈદૃશીં ત્વનુરૂપેણ નિષ્ક્રયેણાપવાહયેત્  (ઇતિ)

Chapt .   Punishments for transgressions

04.13.01 બ્રાહ્મણં અપેયં અભક્ષ્યં વા ગ્રાસયત ઉત્તમો દણ્ડઃ, ક્ષત્રિયં મધ્યમઃ, વૈશ્યં પૂર્વઃ સાહસદણ્ડઃ, શૂદ્રં ચતુષ્પઞ્ચાશત્પણો દણ્ડઃ

04.13.02 સ્વયં ગ્રસિતારો નિર્વિષયાઃ કાર્યાઃ

04.13.03 પરગૃહાભિગમને દિવા પૂર્વઃ સાહસદણ્ડઃ, રાત્રૌ મધ્યમઃ

04.13.04 દિવા રાત્રૌ વા સશસ્ત્રસ્ય પ્રવિશત ઉત્તમો દણ્ડઃ

04.13.05 ભિક્ષુકવૈદેહકૌ મત્ત ઉન્મત્તૌ બલાદ્ આપદિ ચાતિસંનિકૃષ્ટાઃ પ્રવૃત્તપ્રવેશાશ્ચાદણ્ડ્યાઃ, અન્યત્ર પ્રતિષેધાત્

04.13.06 સ્વવેશ્મનો વિરાત્રાદ્ ઊર્ધ્વં પરિવારં આરોહતઃ પૂર્વઃ સાહસદણ્ડઃ, પરવેશ્મનો મધ્યમઃ, ગ્રામારામવાટભેદિનશ્ચ

04.13.07 ગ્રામેષ્વન્તઃ સાર્થિકા જ્ઞાતસારા વસેયુઃ

04.13.08 મુષિતં પ્રવાસિતં ચ એષાં અનિર્ગતં રાત્રૌ ગ્રામસ્વામી દદ્યાત્

04.13.09 ગ્રામાન્તરેષુ વા મુષિતં પ્રવાસિતં વિવીતાધ્યક્ષો દદ્યાત્

04.13.10 અવિવીતાનાં ચોરરજ્જુકઃ

04.13.11 તથાઽપ્યગુપ્તાનાં સીમાવરોધેન વિચયં દદ્યુઃ

04.13.12 અસીમાવરોધે પઞ્ચગ્રામી દશગ્રામી વા

04.13.13 દુર્બલં વેશ્મ શકટં અનુત્તબ્ધં ઊર્ધસ્તમ્ભં શસ્ત્રં અનપાશ્રયં અપ્રતિચ્છન્નં શ્વભ્રં કૂપં કૂટાવપાતં વા કૃત્વા હિંસાયાં દણ્ડપારુષ્યં વિદ્યાત્

04.13.14 વૃક્ષચ્છેદને દંયરશ્મિહરણે ચતુષ્પદાનાં અદાન્તસેવને વાહને વા કાષ્ઠલોષ્ટપાષાણદણ્ડબાણબાહુવિક્ષેપણેષુ યાને હસ્તિના ચ સ્મઘટ્ટને અપેહિ ઇતિ પ્રકોશન્ન્ અદણ્ડ્યઃ

04.13.15 હસ્તિના રોષિતેન હતો દ્રોણાન્નં મદ્યકુમ્ભં માલ્યાનુલેપનં દન્તપ્રમાર્જનં ચ પટં દદ્યાત્

04.13.16 અશ્વમેધાવભૃથસ્નાનેન તુલ્યો હસ્તિના વધ ઇતિ પાદપ્રક્ષાલનમ્

04.13.17 ઉદાસીનવધે યાતુરુત્તમો દણ્ડઃ

04.13.18 શ્ૃઙ્ગિણા દંષ્ટ્રિણા વા હિંસ્યમાનં અમોક્ષયતઃ સ્વામિનઃ પૂર્વઃ સાહસદણ્ડઃ, પ્રતિક્રુષ્ટસ્ય દ્વિગુણઃ

04.13.19 શ ृ ङ्गिदंष्ट्रिभ्यां અન્યોન્યં ઘાતયતઃ તચ્ચ તાવચ્ચ દણ્ડઃ

04.13.20 દેવપશું ઋષભં ઉક્ષાણં ગોકુમારીં વા વાહયતઃ પઞ્ચશતો દણ્ડઃ, પ્રવાસયત ઉત્તમઃ

04.13.21 લોમદોહવાહનપ્રજનન ઉપકારિણાં ક્ષુદ્રપશૂનાં અદાને તચ્ચ તાવચ્ચ દણ્ડઃ, પ્રવાસને ચ, અન્યત્ર દેવપિતૃકાર્યેભ્યઃ

04.13.22 છિન્નનસ્યં ભગ્નયુગં તિર્યક્પ્રતિમુખાગતં પ્રત્યાસરદ્ વા ચક્રયુક્તં યાતા પશુમનુષ્યસમ્બાધે વા હિંસાયાં અદણ્ડ્યઃ

04.13.23 અન્યથા યથા ઉક્તં માનુષપ્રાણિહિંસાયાં દણ્ડં અભ્યાવહેત્

04.13.24 અમાનુષપ્રાણિવધે પ્રાણિદાનં ચ

04.13.25 બાલે યાતરિ યાનસ્થઃ સ્વામી દણ્ડ્યઃ, અસ્વામિનિ યાનસ્થઃ, પ્રાપ્તવ્યવહારો વા યાતા

04.13.26 બાલાધિષ્ઠિતં અપુરુષં વા યાનં રાજા હરેત્

04.13.27 કૃત્યાભિચારાભ્યાં યત્પરં આપાદયેત્ તદ્ । આપાદયિતવ્યઃ

04.13.28 કામં ભાર્યાયાં અનિચ્છન્ત્યાં કન્યાયાં વા દારાર્થિનો ભર્તરિ ભાર્યાયા વા સંવદનકરણમ્

04.13.29 અન્યથાહિંસાયાં મધ્યમઃ સાહસદણ્ડઃ

04.13.30 માતાપિત્રોર્ભગિનીં માતુલાનીં આચાર્યાણીં સ્નુષાં દુહિતરં ભગિનીં વાઽધિચરતઃ ત્રિલિઙ્ગચ્છેદનં વધશ્ચ

04.13.31 સકામા તદ્ એવ લભેત, દાસપરિચારકાહિતકભુક્તા ચ

04.13.32 બ્રાહ્મણ્યાં અગુપ્તાયાં ક્ષત્રિયસ્ય ઉત્તમઃ, સર્વસ્વં વૈશ્યસ્ય, શૂદ્રઃ કટાગ્નિના દહ્યેત

04.13.33 સર્વત્ર રાજભાર્યાગમને કુમ્ભીપાકઃ

04.13.34 શ્વપાકીગમને કૃતકબન્ધાઙ્કઃ પરવિષયં ગચ્છેત્, શ્વપાકત્વં વા શૂદ્રઃ

04.13.35 શ્વપાકસ્યાર્યાગમને વધઃ, સ્ત્રિયાઃ કર્ણનાસાચ્છેદનમ્

04.13.36 પ્રવ્રજિતાગમને ચતુર્વિંશતિપણો દણ્ડઃ

04.13.37 સકામા તદ્ એવ લભેત

04.13.38 રૂપાજીવાયાઃ પ્રસહ્ય ઉપભોગે દ્વાદશપણો દણ્ડઃ

04.13.39 બહૂનાં એકાં અધિચરતાં પૃથક્ ચતુર્વિંશતિપણો દણ્ડઃ

04.13.40 સ્ત્રિયં અયોનૌ ગચ્છતઃ પૂર્વઃ સાહસદણ્ડઃ, પુરુષં અધિમેહતશ્ચ

04.13.41ab મૈથુને દ્વાદશપણઃ તિર્યગ્યોનિષ્વનાત્મનઃ ।

04.13.41chd દૈવતપ્રતિમાનાં ચ ગમને દ્વિગુણઃ સ્મૃતઃ

04.13.42ab અદણ્ડ્યદણ્ડને રાજ્ઞો દણ્ડઃ ત્રિંશદ્ગુણોઽમ્ભસિ ।

04.13.42chd વરુણાય પ્રદાતવ્યો બ્રાહ્મણેભ્યઃ તતઃ પરમ્

04.13.43ab તેન તત્ પૂયતે પાપં રાજ્ઞો દણ્ડાપચારજમ્ ।

04.13.43chd શાસ્તા હિ વરુણો રાજ્ઞાં મિથ્યા વ્યાચરતાં નૃષુ (ઇતિ)

Book .

Chapt . Infliction of secret punishment

05.1.01 દુર્ગરાષ્ટ્રયોઃ કણ્ટકશોધનં ઉક્તમ્

05.1.02 રાજરાજ્યયોર્વક્ષ્યામઃ

05.1.03 રાજાનં અવગૃહ્ય ઉપજીવિનઃ શત્રુસાધારણા વા યે મુખ્યાઃ તેષુ ગૂઢપુરુષપ્રણિધિઃ કૃત્યપક્ષ ઉપગ્રહો વા સિદ્ધિઃ યથા ઉક્તં પુરસ્તાદ્, ઉપજાપોઽપસર્પો વા યથા પારગ્રામિકે વક્ષ્યામઃ

05.1.04 રાજ્ય ઉપઘાતિનઃ તુ વલ્લભાઃ સંહતા વા યે મુખ્યાઃ પ્રકાશં અશક્યાઃ પ્રતિષેદ્ધું દૂષ્યાઃ તેષુ ધર્મરુચિરુપાંશુદણ્ડં પ્રયુઞ્જીત

05.1.05 દૂષ્યમહામાત્રભ્રાતરં અસત્કૃતં સત્ત્રી પ્રોત્સાહ્ય રાજાનં દર્શયેત્

05.1.06 તં રાજા દૂષ્યદ્રવ્ય ઉપભોગાતિસર્ગેણ દૂષ્યે વિક્રમયેત્

05.1.07 શસ્ત્રેણ રસેન વા વિક્રાન્તં તત્ર એવ ઘાતયેદ્ ભ્રાતૃઘાતકોઽયમ્ ઇતિ

05.1.08 તેન પારશવઃ પરિચારિકાપુત્રશ્ચ વ્યાખ્યાતૌ

05.1.09 દૂષ્યંમહામાત્રં વા સત્ત્રિપ્રોત્સાહિતો ભ્રાતા દાયં યાચેત

05.1.10 તં દૂષ્યગૃહપ્રતિદ્વારિ રાત્રાવુપશયાનં અન્યત્ર વા વસન્તં તીક્ષ્ણો હન્તા બ્રૂયાદ્ હતોઽયં દાયકામુકઃ ઇતિ

05.1.11 તતો હતપક્ષં ઉપગૃહ્ય ઇતરં નિગૃહ્ણીયાત્

05.1.12 દૂષ્યસમીપસ્થા વા સત્ત્રિણો ભ્રાતરં દાયં યાચમાનં ઘાતેન પરિભર્ત્સયેયુઃ

05.1.13 તં રાત્રૌ ઇતિ સમાનમ્

05.1.14 દૂષ્યમહામાત્રયોર્વા યઃ પુત્રઃ પિતુઃ પિતા વા પુત્રસ્ય દારાન્ અધિચરતિ, ભ્રાતા વા ભ્રાતુઃ, તયોઃ કાપટિકમુખઃ કલહઃ પૂર્વેણ વ્યાખ્યાતઃ

05.1.15 દૂષ્યમહામાત્રપુત્રં આત્મસમ્ભાવિતં વા સત્ત્રી રાજપુત્રઃ ત્વં, શત્રુભયાદ્ ઇહ ન્યસ્તોઽસિ ઇત્યુપજપેત્

05.1.16 પ્રતિપન્નં રાજા રહસિ પૂજયેત્ પ્રાપ્તયૌવરાજ્યકાલં ત્વાં મહામાત્રભયાન્નાભિષિઞ્ચામિ ઇતિ

05.1.17 તં સત્ત્રી મહામાત્રવધે યોજયેત્

05.1.18 વિક્રાન્તં તત્ર એવ ઘાતયેત્ પિતૃઘાતકોઽયમ્ ઇતિ

05.1.19 ભિક્ષુકી વા દૂષ્યભાર્યાં સાંવદનિકીભિરૌષધીભિઃ સંવાસ્ય રસેનાતિસન્દધ્યાત્

05.1.20 ઇત્યાપ્યપ્રયોગઃ

05.1.21 દૂષ્યમહામાત્રં અટવીં પરગ્રામં વા હન્તું કાન્તારવ્યવહિતે વા દેશે રાષ્ટ્રપાલં અન્તપાલં વા સ્થાપયિતું નાગરસ્થાનં વા કુપિતં અવગ્રાહિતું સાર્થાતિવાહ્યં પ્રત્યન્તે વા સ-પ્રત્યાદેયં આદાતું ફલ્ગુબલં તીક્ષ્ણયુક્તં પ્રેષયેત્

05.1.22 રાત્રૌ દિવા વા યુદ્ધે પ્રવૃત્તે તીક્ષ્ણાઃ પ્રતિરોધકવ્યઞ્જના વા હન્યુઃ અભિયોગે હતઃ ઇતિ

05.1.23 યાત્રાવિહારગતો વા દૂષ્યમહામાત્રાન્ દર્શનાયાહ્વયેત્

05.1.24 તે ગૂઢશસ્ત્રૈઃ તીક્ષ્ણૈઃ સહ પ્રવિષ્ટા મધ્યમકક્ષ્યાયાં આત્મવિચયં અન્તઃપ્રવેશનાર્થં દદ્યુઃ

05.1.25 તતો દૌવારિકાભિગૃહીતાઃ તીક્ષ્ણાઃ દૂષ્યપ્રયુક્તાઃ સ્મ ઇતિ બ્રૂયુઃ

05.1.26 તે તદ્ઽભિવિખ્યાપ્ય દૂષ્યાન્ હન્યુઃ

05.1.27 તીક્ષ્ણસ્થાને ચાન્યે વધ્યાઃ

05.1.28 બહિર્વિહારગતો વા દૂષ્યાન્ આસન્નાવાસાન્ પૂજયેત્

05.1.29 તેષાં દેવીવ્યઞ્જના વા દુઃસ્ત્રી રાત્રાવાવાસેષુ ગૃહ્યેત ઇતિ સમાનં પૂર્વેણ

05.1.30 દૂષ્યમહામાત્રં વા સૂદો ભક્ષકારો વા તે શોભનઃ ઇતિ સ્તવેન ભક્ષ્યભોજ્યં યાચેત, બહિર્વા ક્વચિદ્ અધ્વગતઃ પાનીયમ્

05.1.31 તદ્ । ઉભયં રસેન યોજયિત્વા પ્રતિસ્વાદને તાવેવ ઉપયોજયેત્

05.1.32 તદ્ઽભિવિખ્યાપ્ય રસદૌ ઇતિ ઘાતયેત્

05.1.33 અભિચારશીલં વા સિદ્ધવ્યઞ્જનો ગોધાકૂર્મકર્કટકકૂટાનાં લક્ષણ્યાનાં અન્યતમપ્રાશનેન મનોરથાન્ અવાપ્સ્યસિ ઇતિ ગ્રાહયેત્

05.1.34 પ્રતિપન્નં કર્મણિ રસેન લોહમુસલૈર્વા ઘાતયેત્ કર્મવ્યાપદા હતઃ ઇતિ

05.1.35 ચિકિત્સકવ્યઞ્જનો વા દૌરાત્મિકં અસાધ્યં વા વ્યાધિં દૂષ્યસ્ય સ્થાપયિત્વા ભૈષજ્યાહારયોગેષુ રસેનાતિસન્દધ્યાત્

05.1.36 સૂદારાલિકવ્યઞ્જના વા પ્રણિહિતા દૂષ્યં રસેનાતિસન્દધ્યુઃ

05.1.37 ઇત્યુપનિષત્પ્રતિષેધઃ

05.1.38 ઉભયદૂષ્યપ્રતિષેધઃ તુ

05.1.39 યત્ર દૂષ્યઃ પ્રતિષેદ્ધવ્યઃ તત્ર દૂષ્યં એવ ફલ્ગુબલતીક્ષ્ણયુક્તં પ્રેષયેત્, ગચ્છ, અમુષ્મિન્ દુર્ગે રાષ્ટ્રે વા સૈન્યં ઉત્થાપય હિરણ્યં વા, વલ્લભાદ્ વા હિરણ્યં આહારય, વલ્લભકન્યાં વા પ્રસહ્યાનય, દુર્ગસેતુવણિક્પથશૂન્યનિવેશખનિદ્રવ્યહસ્તિવનકર્મણાં અન્યતમદ્ વા કારય રાષ્ટ્રપાલ્યં અન્તપાલ્યં વાયશ્ચ ત્વા પ્રતિષેધયેન્ન વા તે સાહાય્યં દદ્યાત્ સ બન્ધવ્યઃ સ્યાત્ ઇતિ

05.1.40 તથૈવ ઇતરેષાં પ્રેષયેદ્ અમુષ્યાવિનયઃ પ્રતિષેદ્ધવ્યઃ ઇતિ

05.1.41 તં એતેષુ કલહસ્થાનેષુ કર્મપ્રતિઘાતેષુ વા વિવદમાનં તીક્ષ્ણાઃ શસ્ત્રં પાતયિત્વા પ્રચ્છન્નં હન્યુઃ

05.1.42 તેન દોષેણ ઇતરે નિયન્તવ્યાઃ

05.1.43 પુરાણાં ગ્રામાણાં કુલાનાં વા દૂષ્યાણાં સીમાક્ષેત્રખલવેશ્મમર્યાદાસુ દ્રવ્ય ઉપકરણસસ્યવાહનહિંસાસુ પ્રેક્ષાકૃત્ય ઉત્સવેષુ વા સમુત્પન્ને કલહે તીક્ષ્ણૈરુત્પાદિતે વા તીક્ષ્ણાઃ શસ્ત્રં પાતયિત્વા બ્રૂયુઃ એવં ક્રિયન્તે યેઽમુના કલહાયન્તેઃ ઇતિ

05.1.44 તેન દોષેણ ઇતરે નિયન્તવ્યાઃ

05.1.45 યેષાં વા દૂષ્યાણાં જાતમૂલાઃ કલહાઃ તેષાં ક્ષેત્રખલવેશ્માન્યાદીપયિત્વા બન્ધુસમ્બન્ધિષુ વાહનેષુ વા તીક્ષ્ણાઃ શસ્ત્રં પાતયિત્વા તથૈવ બ્રૂયુઃ અમુના પ્રયુક્તાઃ સ્મઃ ઇતિ

04.4.46 તેન દોષેણ ઇતરે નિયન્તવ્યાઃ

05.1.47 દુર્ગરાષ્ટ્રદૂષ્યાન્ વા સત્રિણઃ પરસ્પરસ્યાવેશનિકાન્ કારયેયુઃ

05.1.48 તત્ર રસદા રસં દદ્યુઃ

05.1.49 તેન દોષેણ ઇતરે નિયન્તવ્યાઃ

05.1.50 ભિક્ષુકી વા દૂષ્યરાષ્ટ્રમુખ્યં દૂષ્યરાષ્ટ્રમુખ્યસ્ય ભાર્યા સ્નુષા દુહિતા વા કામયતે ઇત્યુપજપેત્

05.1.51 પ્રતિપન્નસ્યાભરણં આદાય સ્વામિને દર્શયેત્ અસૌ તે મુખ્યો યૌવન ઉત્સિક્તો ભાર્યાં સ્નુષાં દુહિતરં વાऽભિમન્યતે ઇતિ

05.1.52 તયોઃ કલહો રાત્રૌ ઇતિ સમાનમ્

05.1.53 દૂષ્યદણ્ડ ઉપનતેષુ તુ - યુવરાજઃ સેનાપતિર્વા કિઞ્ચિદ્ અપકૃત્યાપક્રાન્તો વિક્રમેત

05.1.54 તતો રાજા દૂષ્યદણ્ડ ઉપનતાન્ એવ પ્રેષયેત્ ફલ્ગુબલતીક્ષ્ણયુક્તાન્ ઇતિ સમાનાઃ સર્વ એવ યોગાઃ

05.1.55 તેષાં ચ પુત્રેષ્વનુક્ષિયત્સુ યો નિર્વિકારઃ સ પિતૃદાયં લભેત

05.1.56 એવં અસ્ય પુત્રપૌત્રાન્ અનુવર્તતે રાજ્યં અપાસ્તપુરુષદોષમ્

05.1.57ab સ્વપક્ષે પરપક્ષે વા તૂષ્ણીં દણ્ડં પ્રયોજયેત્ ।

05.1.57chd આયત્યાં ચ તદાત્વે ચ ક્ષમાવાન્ અવિશઙ્કિતઃ (ઇતિ)

Chapt . Replenishment of the treasury

05.2.01 કોશં અકોશઃ પ્રત્યુત્પન્નાર્થકૃચ્છ્રઃ સઙ્ગૃહ્ણીયાત્

05.2.02 જનપદં મહાન્તં અલ્પપ્રમાણં વાऽદેવમાતૃકં પ્રભૂતધાન્યં ધાન્યસ્યાંશં તૃતીયં ચતુર્થં વા યાચેત, યથાસારં મધ્યં અવરં વા

05.2.03 દુર્ગસેતુકર્મવણિક્પથશૂન્યનિવેશખનિદ્રવ્યહસ્તિવનકર્મ ઉપકારિણં પ્રત્યન્તં અલ્પપ્રમાણં વા ન યાચેત

05.2.04 ધાન્યપશુહિરણ્યાદિ નિવિશમાનાય દદ્યાત્

05.2.05 ચતુર્થં અંશં ધાન્યાનાં બીજભક્તશુદ્ધં ચ હિરણ્યેન ક્રીણીયાત્

05.2.06 અરણ્યજાતં શ્રોત્રિયસ્વં ચ પરિહરેત્

05.2.07 તદ્ અપ્યનુગ્રહેણ ક્રીણીયાત્

05.2.08 તસ્યાકરણે વા સમાહર્તૃપુરુષા ગ્રીષ્મે કર્ષકાણાં ઉદ્વાપં કારયેયુઃ

05.2.09 પ્રમાદાવસ્કન્નસ્યાત્યયં દ્વિગુણં ઉદાહરન્તો બીજકાલે બીજલેખ્યં કુર્યુઃ

05.2.10 નિષ્પન્ને હરિતપક્વાદાનં વારયેયુઃ, અન્યત્ર શાકકટભઙ્ગમુષ્ટિભ્યાં દેવપિતૃપૂજાદાનાર્થં ગવાર્થં વા

05.2.11 ભિક્ષુકગ્રામભૃતકાર્થં ચ રાશિમૂલં પરિહરેયુઃ

05.2.12 સ્વસસ્યાપહારિણઃ પ્રતિપાતોऽષ્ટગુણઃ

05.2.13 પરસસ્યાપહારિણઃ પઞ્ચાશદ્ગુણઃ સીતાऽત્યયઃ, સ્વવર્ગસ્ય, બાહ્યસ્ય તુ વધઃ

05.2.14 ચતુર્થં અંશં ધાન્યાનાં ષષ્ઠં વન્યાનાં તૂલલાક્ષાક્ષૌમવલ્કકાર્પાસરૌમકૌશેયકૌષધગન્ધપુષ્પફલશાકપણ્યાનાં કાષ્ઠવેણુમાંસવલ્લૂરાણાં ચ ગૃહ્ણીયુઃ, દન્તાજિનસ્યાર્ધમ્

05.2.15 તદ્ અનિસૃષ્ટં વિક્રીણાનસ્ય પૂર્વઃ સાહસદણ્ડઃ

05.2.16 ઇતિ કર્ષકેષુ પ્રણયઃ

05.2.17 સુવર્ણરજતવજ્રમણિમુક્તાપ્રવાલાશ્વહસ્તિપણ્યાઃ પઞ્ચાશત્કરાઃ

05.2.18 સૂત્રવસ્ત્રતામ્રવૃત્તકંસગન્ધભૈષજ્યશીધુપણ્યાશ્ચત્વારિંશત્કરાઃ

05.2.19 ધાન્યરસલોહપણ્યાઃ શકટવ્યવહારિણશ્ચ ત્રિંશત્કરાઃ

05.2.20 કાચવ્યવહારિણો મહાકારવશ્ચ વિંશતિકરાઃ

05.2.21 ક્ષુદ્રકારવો બન્ધકીપોષકાશ્ચ દશકરાઃ

05.2.22 કાષ્ઠવેણુપાષાણમૃદ્ભાણ્ડપક્વાન્નહરિતપણ્યાઃ પઞ્ચકરાઃ

05.2.23 કુશીલવા રૂપાજીવાશ્ચ વેતનાર્ધં દદ્યુઃ

05.2.24 હિરણ્યકરં કર્મણ્યાન્ આહારયેયુઃ, ન ચ એષાં કશ્ચિદ્ અપરાધં પરિહરેયુઃ

05.2.25 તે હ્યપરિગૃહીતં અભિનીય વિક્રીણીરન્

05.2.26 ઇતિ વ્યવહારિષુ પ્રણયઃ

05.2.27 કુક્કુટસૂકરં અર્ધં દદ્યાત્, ક્ષુદ્રપશવઃ ષડ્ભાગં, ગોમહિષાશ્વતરખર ઉષ્ટ્રાશ્ચ દશભાગમ્

05.2.28 બન્ધકીપોષકા રાજપ્રેષ્યાભિઃ પરમરૂપયૌવનાભિઃ કોશં સંહરેયુઃ

05.2.29 ઇતિ યોનિપોષકેષુ પ્રણયઃ

05.2.30 સકૃદ્ એવ ન દ્વિઃ પ્રયોજ્યઃ

05.2.31 તસ્યાકરણે વા સમાહર્તા કાર્યં અપદિશ્ય પૌરજાનપદાન્ ભિક્ષેત

05.2.32 યોગપુરુષાશ્ચાત્ર પૂર્વં અતિમાત્રં દદ્યુઃ

05.2.33 એતેન પ્રદેશેન રાજા પૌરજાનપદાન્ ભિક્ષેત

05.2.34 કાપટિકાશ્ચ એનાન્ અલ્પં પ્રયચ્છતઃ કુત્સયેયુઃ

05.2.35 સારતો વા હિરણ્યં આઢ્યાન્ યાચેત, યથા ઉપકારં વા, સ્વવશા વા યદ્ ઉપહરેયુઃ

05.2.36 સ્થાનચ્છત્રવેષ્ટનવિભૂષાશ્ચ એષાં હિરણ્યેન પ્રયચ્છેત્

05.2.37 પાષણ્ડસઙ્ઘદ્રવ્યં અશ્રોત્રિય ઉપભોગ્યં દેવદ્રવ્યં વા કૃત્યકરાઃ પ્રેતસ્ય દગ્ધગૃહસ્ય વા હસ્તે ન્યસ્તં ઇત્યુપહરેયુઃ

05.2.38 દેવતાઽધ્યક્ષો દુર્ગરાષ્ટ્રદેવતાનાં યથાસ્વં એકસ્થં કોશં કુર્યાત્, તથૈવ ચ ઉપહરેત્

05.2.39 દૈવતચૈત્યં સિદ્ધપુણ્યસ્થાનં ઔપપાદિકં વા રાત્રાવુત્થાપ્ય યાત્રાસમાજાભ્યાં આજીવેત્

05.2.40 ચૈત્ય ઉપવનવૃક્ષેણ વા દેવતાઽભિગમનં અનાર્તવપુષ્પફલયુક્તેન ખ્યાપયેત્

05.2.41 મનુષ્યકરં વા વૃક્ષે રક્ષોભયં પ્રરૂપયિત્વા સિદ્ધવ્યઞ્જનાઃ પૌરજાનપદાનાં હિરણ્યેન પ્રતિકુર્યુઃ

05.2.42 સુરુઙ્ગાયુક્તે વા કૂપે નાગં અનિયતશિરસ્કં હિરણ્ય ઉપહારેણ દર્શયેત્

05.2.43 નાગપ્રતિમાયાં અન્તશ્છન્નાયાં ચૈત્યચ્છિદ્રે વલ્મીકચ્છિદ્રે વા સર્પદર્શનં આહારેણ પ્રતિબદ્ધસંજ્ઞં કૃત્વા શ્રદ્દધાનાનાં દર્શયેત્

05.2.44 અશ્રદ્દધાનાનાં આચમનપ્રોક્ષણેષુ રસં ઉપચાર્ય દેવતાઽભિશાપં બ્રૂયાત્, અભિત્યક્તં વા દંશયિત્વા

05.2.45 યોગદર્શનપ્રતીકારેણ વા કોશાભિસંહરણં કુર્યાત્

05.2.46 વૈદેહકવ્યઞ્જનો વા પ્રભૂતપણ્યાન્તેવાસી વ્યવહરેત

05.2.47 સ યદા પણ્યમૂલ્યે નિક્ષેપપ્રયોગૈરુપચિતઃ સ્યાત્ તદા એનં રાત્રૌ મોષયેત્

05.2.48 એતેન રૂપદર્શકઃ સુવર્ણકારશ્ચ વ્યાખ્યાતૌ

05.2.49 વૈદેહકવ્યઞ્જનો વા પ્રખ્યાતવ્યવહારઃ પ્રહવણનિમિત્તં યાચિતકં અવક્રીતકં વા રૂપ્યસુવર્ણભાણ્ડં અનેકં ગૃહ્ણીયાત્

05.2.50 સમાજે વા સર્વપણ્યસન્દોહેન પ્રભૂતં હિરણ્યસુવર્ણં ઋણં ગૃહ્ણીયાત્, પ્રતિભાણ્ડમૂલ્યં ચ

05.2.51 તદ્ ઉભયં રાત્રૌ મોષયેત્

05.2.52 સાધ્વીવ્યઞ્જનાભિઃ સ્ત્રીભિર્દૂષ્યાન્ ઉન્માદયિત્વા તાસાં એવ વેશ્મસ્વભિગૃહ્ય સર્વસ્વાન્યાહરેયુઃ

05.2.53 દૂષ્યકુલ્યાનાં વા વિવાદે પ્રત્યુત્પન્ને રસદાઃ પ્રણિહિતા રસં દદ્યુઃ

05.2.54 તેન દોષેણ ઇતરે પર્યાદાતવ્યાઃ

05.2.55 દૂષ્યં અભિત્યક્તો વા શ્રદ્ધેયાપદેશં પણ્યં હિરણ્યનિક્ષેપં ઋણપ્રયોગં દાયં વા યાચેત

05.2.56 દાસશબ્દેન વા દૂષ્યં આલમ્બેત, ભાર્યાં અસ્ય સ્નુષાં દુહિતરં વા દાસીશબ્દેન ભાર્યાશબ્દેન વા

05.2.57 તં દૂષ્યગૃહપ્રતિદ્વારિ રાત્રાવુપશયાનં અન્યત્ર વા વસન્તં તીક્ષ્ણો હત્વા બ્રૂયાત્ હતોઽયં અર્થકામુકઃ ઇતિ

05.2.58 તેન દોષેણ ઇતરે પર્યાદાતવ્યાઃ

05.2.59 સિદ્ધવ્યઞ્જનો વા દૂષ્યં જમ્ભકવિદ્યાભિઃ પ્રલોભયિત્વા બ્રૂયાત્ અક્ષયહિરણ્યં રાજદ્વારિકં સ્ત્રીહૃદયં અરિવ્યાધિકરં આયુષ્યં પુત્રીયં વા કર્મ જાનામિ ઇતિ

05.2.60 પ્રતિપન્નં ચૈત્યસ્થાને રાત્રૌ પ્રભૂતસુરામાંસગન્ધં ઉપહારં કારયેત્

05.2.61 એકરૂપં ચાત્ર હિરણ્યં પૂર્વનિખાતં પ્રેતાઙ્ગં પ્રેતશિશુર્વા યત્ર નિહિતઃ સ્યાત્, તતો હિરણ્યં અસ્ય દર્શયેદ્ અત્યલ્પમ્ ઇતિ ચ બ્રૂયાત્

05.2.62 પ્રભૂતહિરણ્યહેતોઃ પુનરુપહારઃ કર્તવ્ય ઇતિ સ્વયં એવ એતેન હિરણ્યેન શ્વોભૂતે પ્રભૂતં ઔપહારિકં ક્રીણીહિ ઇતિ

05.2.63 સ તેન હિરણ્યેનાઉપહારિકક્રયે ગૃહ્યેત

05.2.64 માતૃવ્યઞ્જનયા વા પુત્રો મે ત્વયા હતઃ ઇત્યવકુપિતા સ્યાત્

05.2.65 સંસિદ્ધં એવાસ્ય રાત્રિયાગે વનયાગે વનક્રીડાયાં વા પ્રવૃત્તાયાં તીક્ષ્ણા વિશસ્યાભિત્યક્તં અતિનયેયુઃ

05.2.66 દૂષ્યસ્ય વા ભૃતકવ્યઞ્જનો વેતનહિરણ્યે કૂટરૂપં પ્રક્ષિપ્ય પ્રરૂપયેત્

05.2.67 કર્મકરવ્યઞ્જનો વા ગૃહે કર્મ કુર્વાણઃ સ્તેનકૂટરૂપકારક ઉપકરણં ઉપનિદધ્યાત્, ચિકિત્સકવ્યઞ્જનો વા ગરં અગદાપદેશેન

05.2.68 પ્રત્યાસન્નો વા દૂષ્યસ્ય સત્ત્રી પ્રણિહિતં અભિષેકભાણ્ડં અમિત્રશાસનં ચ કાપટિકમુખેનાચક્ષીત, કારણં ચ બ્રૂયાત્

05.2.69 એવં દૂષ્યેષ્વધાર્મિકેષુ ચ વર્તેત, ન ઇતરેષુ

05.2.70ab પક્વં પક્વં ઇવારામાત્ ફલં રાજ્યાદ્ અવાપ્નુયાત્ ।

05.2.70chd આત્મચ્છેદભયાદ્ આમં વર્જયેત્ કોપકારકમ્ (ઇતિ)

Chapt . Salaries of state servants

05.3.01 દુર્ગજનપદશક્ત્યા ભૃત્યકર્મ સમુદયપાદેન સ્થાપયેત્, કાર્યસાધનસહેન વા ભૃત્યલાભેન

05.3.02 શરીરં અવેક્ષેત, ન ધર્માર્થૌ પીડયેત્

05.3.03 ઋત્વિગ્।આચાર્યમન્ત્રિપુરોહિતસેનાપતિયુવરાજરાજમાતૃરાજમહિષ્યોઽષ્ટચત્વારિંશત્સાહસ્રાઃ

05.3.04 એતાવતા ભરણેનાનાસ્પદ્યત્વં અકોપકં ચ એષાં ભવતિ

05.3.05 દૌવારિકાન્તર્વંશિકપ્રશાસ્તૃસમાહર્તૃસંનિધાતારશ્ચતુર્વિંશતિસાહસ્રાઃ

05.3.06 એતાવતા કર્મણ્યા ભવન્તિ

05.3.07 કુમારકુમારમાતૃનાયકપૌરવ્યાવહારિકકાર્માન્તિકમન્ત્રિપરિષદ્રાષ્ટ્રાન્તપાલાશ્ચ દ્વાદશસાહસ્રાઃ

05.3.08 સ્વામિપરિબન્ધબલસહાયા હ્યેતાવતા ભવન્તિ

05.3.09 શ્રેણીમુખ્યા હસ્ત્યશ્વરથમુખ્યાઃ પ્રદેષ્ટારશ્ચાષ્ટસાહસ્રાઃ

05.3.10 સ્વવર્ગાનુકર્ષિણો હ્યેતાવતા ભવન્તિ

05.3.11 પત્ત્યશ્વરથહસ્ત્યધ્યક્ષા દ્રવ્યહસ્તિવનપાલાશ્ચ ચતુઃસાહસ્રાઃ

05.3.12 રથિકાનીકસ્થચિકિત્સકાશ્વદમકવર્ધકયો યોનિપોષકાશ્ચ દ્વિસાહસ્રાઃ

05.3.13 કાર્તાન્તિકનૈમિત્તિકમૌહૂર્તિકપૌરાણિકસૂતમાગધાઃ પુરોહિતપુરુષાઃ સર્વાધ્યક્ષાશ્ચ સાહસ્રાઃ

05.3.14 શિલ્પવન્તઃ પાદાતાઃ સઙ્ખ્યાયકલેખકાદિવર્ગશ્ચ પઞ્ચશતાઃ

05.3.15 કુશીલવાઃ ત્વર્ધતૃતીયશતાઃ, દ્વિગુણવેતનાશ્ચ એષાં તૂર્યકરાઃ

05.3.16 કારુશિલ્પિનો વિંશતિશતિકાઃ

05.3.17 ચતુષ્પદદ્વિપદપરિચારકપારિકર્મિકાઉપસ્થાયિકપાલકવિષ્ટિબન્ધકાઃ ષષ્ટિવેતનાઃ, આર્યયુક્તારોહકમાણવકશૈલખનકાઃ સર્વ ઉપસ્થાયિનશ્ચ

05.3.18 આચાર્યા વિદ્યાવન્તશ્ચ પૂજાવેતનાનિ યથાઽર્હં લભેરન્ પઞ્ચશતાવરં સહસ્રપરમ્

05.3.19 દશપણિકો યોજને દૂતો મધ્યમઃ, દશ ઉત્તરે દ્વિગુણવેતન આયોજનશતાદ્ ઇતિ

05.3.20 સમાનવિદ્યેભ્યઃ ત્રિગુણવેતનો રાજા રાજસૂયાદિષુ ક્રતુષુ

05.3.21 રાજ્ઞઃ સારથિઃ સાહસ્રઃ

05.3.22 કાપટિક ઉદાસ્થિતગૃહપતિકવૈદેહકતાપસવ્યઞ્જનાઃ સાહસ્રાઃ

05.3.23 ગ્રામભૃતકસત્ત્રિતીક્ષ્ણરસદભિક્ષુક્યઃ પઞ્ચશતાઃ

05.3.24 ચારસઞ્ચારિણોઽર્ધતૃતીયશતાઃ, પ્રયાસવૃદ્ધવેતના વા

05.3.25 શતવર્ગસહસ્રવર્ગાણાં અધ્યક્ષા ભક્તવેતનલાભં આદેશં વિક્ષેપં ચ કુર્યુઃ

05.3.26 અવિક્ષેપો રાજપરિગ્રહદુર્ગરાષ્ટ્રરક્ષાવેક્ષણેષુ ચ

05.3.27 નિત્યમુખ્યાઃ સ્યુરનેકમુખ્યાશ્ચ

05.3.28 કર્મસુ મૃતાનાં પુત્રદારા ભક્તવેતનં લભેરન્

05.3.29 બાલવૃદ્ધવ્યાધિતાશ્ચ એષાં અનુગ્રાહ્યાઃ

05.3.30 પ્રેતવ્યાધિતસૂતિકાકૃત્યેષુ ચ એષાં અર્થમાનકર્મ કુર્યાત્

05.3.31 અલ્પકોશઃ કુપ્યપશુક્ષેત્રાણિ દદ્યાત્, અલ્પં ચ હિરણ્યમ્

05.3.32 શૂન્યં વા નિવેશયિતું અભ્યુત્થિતો હિરણ્યં એવ દદ્યાત્, ન ગ્રામં ગ્રામસઞ્જાતવ્યવહારસ્થાપનાર્થમ્

05.3.33 એતેન ભૃતાનાં અભૃતાનાં ચ વિદ્યાકર્મભ્યાં ભક્તવેતનવિશેષં ચ કુર્યાત્

05.3.34 ષષ્ટિવેતનસ્યાઢકં કૃત્વા હિરણ્યાનુરૂપં ભક્તં કુર્યાત્

05.3.35 પત્ત્યશ્વરથદ્વિપાઃ સૂર્ય ઉદયે બહિઃ સન્ધિદિવસવર્જં શિલ્પયોગ્યાઃ કુર્યુઃ

05.3.36 તેષુ રાજા નિત્યયુક્તઃ સ્યાત્, અભીક્ષ્ણં ચ એષાં શિલ્પદર્શનં કુર્યાત્

05.3.37 કૃતનર ઇન્દ્રાઙ્કં શસ્ત્રાવરણં આયુધાગારં પ્રવેશયેત્

05.3.38 અશસ્ત્રાશ્ચરેયુઃ, અન્યત્ર મુદ્રાઽનુજ્ઞાતાત્

05.3.39 નષ્ટવિનષ્ટં વા દ્વિગુણં દદ્યાત્

05.3.40 વિધ્વસ્તગણનાં ચ કુર્યાત્

05.3.41 સાર્થિકાનાં શસ્ત્રાવરણં અન્તપાલા ગૃહ્ણીયુઃ, સમુદ્રં અવચારયેયુર્વા

05.3.42 યાત્રાં અભ્યુત્થિતો વા સેનાં ઉદ્યોજયેત્

05.3.43 તતો વૈદેહકવ્યઞ્જનાઃ સર્વપણ્યાન્યાયુધીયેભ્યો યાત્રાકાલે દ્વિગુણપ્રત્યાદેયાનિ દદ્યુઃ

05.3.44 એવં રાજપણ્યયોગવિક્રયો વેતનપ્રત્યાદાનં ચ ભવતિ

05.3.45 એવં અવેક્ષિતાયવ્યયઃ કોશદણ્ડવ્યસનં નાવાપ્નોતિ

05.3.46 ઇતિ ભક્તવેતનવિકલ્પઃ

05.3.47ab સત્રિણશ્ચાયુધીયાનાં વેશ્યાઃ કારુકુશીલવાઃ ।

05.3.47chd દણ્ડવૃદ્ધાશ્ચ જાનીયુઃ શૌચાશૌચં અતન્દ્રિતાઃ (ઇતિ)

Chapt . Proper conduct fora dependant

05.4.01 લોકયાત્રાવિદ્ રાજાનં આત્મદ્રવ્યપ્રકૃતિસમ્પન્નં પ્રિયહિતદ્વારેણાશ્રયેત

05.4.02 યં વા મન્યેત યથાઽહં આશ્રય ઈપ્સુરેવં અસૌ વિનય ઈપ્સુરાભિગામિકગુણયુક્તઃ ઇતિ, દ્રવ્યપ્રકૃતિહીનં અપ્યેનં આશ્રયેત, ન ત્વેવાનાત્મસમ્પન્નમ્

05.4.03 અનાત્મવા હિ નીતિશાસ્ત્રદ્વેષાદ્ અનર્થ્યસંયોગાદ્ વા પ્રાપ્યાપિ મહદ્ ઐશ્વર્યં ન ભવતિ

05.4.04 આત્મવતિ લબ્ધાવકાશઃ શાસ્ત્રાનુયોગં દદ્યાત્

05.4.05 અવિસંવાદાદ્ હિ સ્થાનસ્થૈર્યં અવાપ્નોતિ

05.4.06 મતિકર્મસુ પૃષ્ટઃ તદાત્વે ચાયત્યાં ચ ધર્માર્થસંયુક્તં સમર્થં પ્રવીણવદ્ અપરિષદ્ભીરુઃ કથયેત્

05.4.07 ઈપ્સિતઃ પણેત ધર્માર્થાનુયોગં અવિશિષ્ટેષુ બલવત્સંયુક્તેષુ દણ્ડધારણં મત્સંયોગે તદાત્વે ચ દણ્ડધારણં ઇતિ ન કુર્યાઃ, પક્ષં વૃત્તિં ગુહ્યં ચ મે ન ઉપહન્યાઃ, સંજ્ઞયા ચ ત્વાં કામક્રોધદણ્ડનેષુ વારયેયમ્ ઇતિ

05.4.08 આદિષ્ટઃ પ્રદિષ્ટાયાં ભૂમાવનુજ્ઞાતઃ પ્રવિશેત્, ઉપવિશેચ્ચ પાર્શ્વતઃ સંનિકૃષ્ટવિપ્રકૃષ્ટઃ પરાસનમ્

05.4.09 વિગૃહ્ય કથનં અસભ્યં અપ્રત્યક્ષં અશ્રદ્ધેયં અનૃતં ચ વાક્યં ઉચ્ચૈરનર્મણિ હાસં વાતષ્ઠીવને ચ શબ્દવતી ન કુર્યાત્

05.4.10 મિથઃ કથનં અન્યેન, જનવાદે દ્વન્દ્વકથનં, રાજ્ઞો વેષં ઉદ્ધતકુહકાનાં ચ, રત્નાતિશયપ્રકાશાભ્યર્થનં, એકાક્ષ્ય્।ઓષ્ઠનિર્ભોગં ભ્રુકુટીકર્મ વાક્યાવક્ષેપણં ચ બ્રુવતિ, બલવત્ સંયુક્તવિરોધં, સ્ત્રીભિઃ સ્ત્રીદર્શિભિઃ સામન્તદૂતૈર્દ્વેષ્યપક્ષાવક્ષિપ્તાન્ અર્થ્યૈશ્ચ પ્રતિસંસર્ગં એકાર્થચર્યાં સઙ્ઘાતં ચ વર્જયેત્

05.4.11ab અહીનકાલં રાજાર્થં સ્વાર્થં પ્રિયહિતૈઃ સહ ।

05.4.11chd પરાર્થં દેશકાલે ચ બ્રૂયાદ્ ધર્માર્થસંહિતમ્

05.4.12ab પૃષ્ટઃ પ્રિયહિતં બ્રૂયાન્ન બ્રૂયાદ્ અહિતં પ્રિયમ્ ।

05.4.12chd અપ્રિયં વા હિતં બ્રૂયાત્શૃણ્વતોઽનુમતો મિથઃ
05.4.13ab તૂષ્ણીં વા પ્રતિવાક્યે સ્યાદ્ વેષ્યાદીંશ્ચ ન વર્ણયેત્ ।
05.4.13chd અપ્રિયા અપિ દક્ષાઃ સ્યુઃ તદ્ભાવાદ્ યે બહિષ્કૃતાઃ
05.4.14ab અનર્થ્યાશ્ચ પ્રિયા દૃષ્ટાશ્ચિત્તજ્ઞાનાનુવર્તિનઃ ।
05.4.14chd અભિહાસ્યેષ્વભિહસેદ્ ઘોરહાસાંશ્ચ વર્જયેત્ (ઇતિ)
05.4.15ab પરાત્ સઙ્ક્રામયેદ્ ઘોરં ન ચ ઘોરં પરે વદેત્ ।
05.4.15chd તિતિક્ષેતાત્મનશ્ચૈવ ક્ષમાવાન્ પૃથિવીસમઃ
05.4.16ab આત્મરક્ષા હિ સતતં પૂર્વં કાર્યા વિજાનતા ।
05.4.16chd અગ્નાવિવ હિ સમ્પ્રોક્તા વૃત્તી રાજા ઉપજીવિનામ્
05.4.17ab એકદેશં દહેદ્ અગ્નિઃ શરીરં વા પરં ગતઃ ।
05.4.17chd સ-પુત્રદારં રાજા તુ ઘાતયેદ્ અર્ધયેત વા (ઇતિ)

Chapt . Proper behaviour for a courtier

05.5.01 નિયુક્તઃ કર્મસુ વ્યયવિશુદ્ધં ઉદયં દર્શયેત્
05.5.02 આભ્યન્તરં બાહ્યં ગુહ્યં પ્રકાશ્યં આત્યયિકં ઉપેક્ષિતવ્યં વા કાર્યં ઇદં એવમ્ ઇતિ વિશેષયેચ્ચ
05.5.03 મૃગયાદ્યૂતમદ્યસ્ત્રીષુ પ્રસક્તં ન એનં અનુવર્તેત પ્રશંસાભિઃ
05.5.04 આસન્નશ્ચાસ્ય વ્યસન ઉપઘાતે પ્રયતેત, પર ઉપજાપાતિસન્ધાન ઉપધિભ્યશ્ચ રક્ષેત્
05.5.05 ઇઙ્ગિતાકારૌ ચાસ્ય લક્ષયેત્
05.5.06 કામદ્વેષહર્ષદૈન્યવ્યવસાયભયદ્વન્દ્વવિપર્યાસં ઇઙ્ગિતાકારાભ્યાં હિ મન્ત્રસંવરણાર્થં આચરતિ પ્રાજ્ઞઃ
05.5.07 દર્શને પ્રસીદતિ, વાક્યં પ્રતિગૃહ્ણાતિ, આસનં દદાતિ, વિવિક્તો દર્શયતે, શઙ્કાસ્થાને નાતિશઙ્કતે, કથાયાં રમતે, પરિજ્ઞાપ્યેષ્વવેક્ષતે, પથ્યં ઉક્તં સહતે, સ્મયમાનો નિયુઙ્ક્તે, હસ્તેન સ્પૃશતિ, શ્લાઘ્યે ન ઉપહસતિ, પરોક્ષં ગુણં બ્રવીતિ, ભક્ષ્યેષુ સ્મરતિ, સહ વિહારં યાતિ, વ્યસનેઽભ્યુપપદ્યતે, તદ્ભક્તીન્ પૂજયતિ, ગુહ્યં આચષ્ટે, માનં વર્ધયતિ, અર્થં કરોતિ, અનર્થં પ્રતિહન્તિ - ઇતિ તુષ્ટજ્ઞાનમ્
05.5.08 એતદ્ એવ વિપરીતં અતુષ્ટસ્ય, ભૂયશ્ચ વક્ષ્યામઃ
05.5.09 સન્દર્શને કોપઃ, વાક્યસ્યાશ્રવણપ્રતિષેધૌ, આસનચક્ષુષોરદાનં, વર્ણસ્વરભેદઃ, એકાક્ષિભ્રુકુટ્ય્ । ઓષ્ઠનિર્ભોગઃ, સ્વેદશ્વાસસ્મિતાનાં અસ્થાન ઉત્પત્તિઃ, પરમન્ત્રણં, અકસ્માદ્વ્રજનં, વર્ધનં અન્યસ્ય, ભૂમિગાત્રવિલેખનં, અન્યસ્ય ઉપતોદનં, વિદ્યાવર્ણદેશકુત્સા, સમદોષનિન્દા, પ્રતિદોષનિન્દા, પ્રતિલોમસ્તવઃ, સુકૃતાનવેક્ષણં, દુષ્કૃતાનુકીર્તનં, પૃષ્ઠાવધાનં, અતિત્યાગઃ, મિથ્યાઽભિભાષણં, રાજદર્શિનાં ચ તદ્વૃત્તાન્યત્વમ્
05.5.10 વૃત્તિવિકારં ચાવેક્ષેતાપ્યમાનુષાણામ્
05.5.11 અયં ઉચ્ચૈઃ સિઞ્ચતિ ઇતિ કાત્યાયનઃ પ્રવવ્રાજ, ક્રૌઞ્ચોઽપસવ્યમ્ ઇતિ કણિઙ્કો ભારદ્વાજઃ, તૃણમ્ ઇતિ દીર્ઘશ્ચારાયણઃ, શીતા શાટી ઇતિ ઘોટમુખઃ, હસ્તી પ્રત્યૌક્ષીત્ ઇતિ કિઞ્જલ્કઃ, રથાશ્વં પ્રાશંસીત્ ઇતિ પિશુનઃ, પ્રતિરવણે શુનઃ પિશુનપુત્રઃ
05.5.12 અર્થમાનાવક્ષેપે ચ પરિત્યાગઃ

05.5.13 સ્વામિશીલં આત્મનશ્ચ કિલ્બિષં ઉપલભ્ય વા પ્રતિકુર્વીત

05.5.14 મિત્રં ઉપકૃષ્ટં વાઽસ્ય ગચ્છેત્

05.5.15ab તત્રસ્થો દોષનિર્ઘાતં મિત્રૈર્ભર્તરિ ચાચરેત્ ।

05.5.15chd તતો ભર્તરિ જીવે વા મૃતે વા પુનરાવ્રજેત્ (ઇતિ)

Chapt . Continuance of the kingdom

Continuous sovereignty

05.6.01 રાજવ્યસનં એવં અમાત્યઃ પ્રતિકુર્વીત

05.6.02 પ્રાગ્ એવ મરણાબાધભયાદ્ રાજ્ઞઃ પ્રિયહિત ઉપગ્રહેણ માસદ્વિમાસાન્તરં દર્શનં સ્થાપયેદ્ દેશપીડાઽપહં અમિત્રાપહં આયુષ્યં પુત્રીયં વા કર્મ રાજા સાધયતિ ઇત્યપદેશેન

05.6.03 રાજવ્યઞ્જનં અરૂપવેલાયાં પ્રકૃતીનાં દર્શયેત્, મિત્રામિત્રદૂતાનાં ચ

05.6.04 તૈશ્ચ યથા ઉચિતાં સમ્ભાષાં અમાત્યમુખો ગચ્છેત્

05.6.05 દૌવારિકાન્તર્વંશિકમુખશ્ચ યથા ઉક્તં રાજપ્રણિધિં અનુવર્તયેત્

05.6.06 અપકારિષુ ચ હેડં પ્રસાદં વા પ્રકૃતિકાન્તં દર્શયેત્, પ્રસાદં એવ ઉપકારિષુ

05.6.07 આપ્તપુરુષાધિષ્ઠિતૌ દુર્ગપ્રત્યન્તસ્થૌ વા કોશદણ્ડાવેકસ્થૌ કારયેત્, કુલ્યકુમારમુખ્યાંશ્ચાન્યાપદેશેન

05.6.08 યશ્ચ મુખ્યઃ પક્ષવાન્ દુર્ગાટવીસ્થો વા વૈગુણ્યં ભજેત તં ઉપગ્રાહયેત્

05.6.09 બહ્વ્ ।આબાધં વા યાત્રાં પ્રેષયેત્, મિત્રકુલં વા

05.6.10 યસ્માચ્ચ સામન્તાદ્ આબાધં પશ્યેત્ તં ઉત્સવવિવાહહસ્તિબન્ધનાશ્વપણ્યભૂમિપ્રદાનાપદેશેનાવગ્રાહયેત્, સ્વમિત્રેણ વા

05.6.11 તતઃ સન્ધિં અદૂષ્યં કારયેત્

05.6.12 આટવિકામિત્રૈર્વા વૈરં ગ્રાહયેત્

05.6.13 તત્કુલીનં અપરુદ્ધં વા ભૂંય્ ।એકદેશેન ઉપગ્રાહયેત્

05.6.14 કુલ્યકુમારમુખ્ય ઉપગ્રહં કૃત્વા વા કુમારં અભિષિક્તં એવ દર્શયેત્

05.6.15 દાણ્ડકર્મિકવદ્ વા રાજ્યકણ્ટકાન્ ઉદ્ધૃત્ય રાજ્યં કારયેત્

05.6.16 યદિ વા કશ્ચિન્ મુખ્યઃ સામન્તાદીનાં અન્યતમઃ કોપં ભજેત તં એહિ, રાજાનં ત્વા કરિષ્યામિ ઇત્યાવાહયિત્વા ઘાતયેત્

05.6.17 આપત્પ્રતીકારેણ વા સાધયેત્

05.6.18 યુવરાજે વા ક્રમેણ રાજ્યભારં આરોપ્ય રાજવ્યસનં ખ્યાપયેત્

05.6.19 પરભૂમૌ રાજવ્યસને મિત્રેણામિત્રવ્યઞ્જનેન શત્રોઃ સન્ધિં અવસ્થાપ્યાપગચ્છેત્

05.6.20 સામન્તાદીનાં અન્યતમં વાઽસ્ય દુર્ગે સ્થાપયિત્વાઽપગચ્છેત્

05.6.21 કુમારં અભિષિચ્ય વા પ્રતિવ્યૂહેત

05.6.22 પરેણાભિયુક્તો વા યથા ઉક્તં આપત્પ્રતીકારં કુર્યાત્

05.6.23 એવં એકાઇશ્વર્યં અમાત્યઃ કારયેદ્ ઇતિ કૌટિલ્યઃ

05.6.24 ન એવમ્ ઇતિ ભારદ્વાજઃ

05.6.25 પ્રમ્રિયમાણે વા રાજન્યમાત્યઃ કુલ્યકુમારમુખ્યાન્ પરસ્પરં મુખ્યેષુ વા વિક્રમયેત્

05.6.26 વિક્રાન્તં પ્રકૃતિકોપેન ઘાતયેત્

05.6.27 કુલ્યકુમારમુખ્યાન્ ઉપાંશુદણ્ડેન વા સાધયિત્વા સ્વયં રાજ્યં ગૃહ્ણીયાત્

05.6.28 રાજ્યકારણાદ્ હિ પિતા પુત્રાન્ પુત્રાશ્ચ પિતરં અભિદ્રુહ્યન્તિ, કિં અઙ્ગ પુનરમાત્યપ્રકૃતિર્હ્યેકપ્રગ્રહો રાજ્યસ્ય

05.6.29 તત્ સ્વયં ઉપસ્થિતં નાવમન્યેત

05.6.30 સ્વયં આરૂઢા હિ સ્ત્રી ત્યજ્યમાનાऽભિશપતિ ઇતિ લોકપ્રવાદઃ

05.6.31ab કાલશ્ચ સકૃદ્ અભ્યેતિ યં નરં કાલકાઙ્ક્ષિણમ્ ।

05.6.31chd દુર્લભઃ સ પુનઃ તસ્ય કાલઃ કર્મ ચિકીર્ષતઃ

05.6.32 પ્રકૃતિકોપકં અધર્મિષ્ઠં અનૈકાન્તિકં ચ એતદ્ ઇતિ કૌટિલ્યઃ

05.6.33 રાજપુત્રં આત્મસમ્પન્નં રાજ્યે સ્થાપયેત્

05.6.34 સમ્પન્નાભાવેऽવ્યસનિનં કુમારં રાજકન્યાં ગર્ભિણીં દેવીં વા પુરસ્કૃત્ય મહામાત્રાન્ સંનિપાત્ય બ્રૂયાત્ અયં વો નિક્ષેપઃ, પિતરં અસ્યાવેક્ષધ્વં સત્ત્વાભિજનં આત્મનશ્ચ, ધ્વજમાત્રોऽયં ભવન્ત એવ સ્વામિનઃ, કથં વા ક્રિયતામ્ ઇતિ

05.6.35 તથા બ્રુવાણં યોગપુરુષા બ્રૂયુઃ કોऽન્યો ભવત્પુરોગાદ્ અસ્માદ્ રાજ્ઞશ્ચાતુર્વર્ણ્યં અર્હતિ પાલયિતુમ્ ઇતિ

05.6.36 તથા ઇત્યમાત્યઃ કુમારં રાજકન્યાં ગર્ભિણીં દેવીં વાऽધિકુર્વીત, બન્ધુસમ્બન્ધિનાં મિત્રામિત્રદૂતાનાં ચ દર્શયેત્

05.6.37 ભક્તવેતનવિશેષં અમાત્યાનાં આયુધીયાનાં ચ કારયેત્, ભૂયશ્ચાયં વૃદ્ધઃ કરિષ્યતિ ઇતિ બ્રૂયાત્

05.6.38 એવં દુર્ગરાષ્ટ્રમુખ્યાન્ આભાષેત, યથાऽર્હં ચ મિત્રામિત્રપક્ષમ્

05.6.39 વિનયકર્મણિ ચ કુમારસ્ય પ્રયતેત

05.6.40 કન્યાયાં સમાનજાતીયાદ્ અપત્યં ઉત્પાદ્ય વાऽભિષિઞ્ચેત્

05.6.41 માતુશ્ચિત્તક્ષોભભયાત્ કુલ્યં અલ્પસત્ત્વં છાત્રં ચ લક્ષણ્યં ઉપનિદધ્યાત્

05.6.42 ઋતૌ ચ એનાં રક્ષેત્

05.6.43 ન ચાત્માર્થં કઞ્ચિદ્ ઉત્કૃષ્ટં ઉપભોગં કારયેત્

05.6.44 રાજાર્થં તુ યાનવાહનાભરણવસ્ત્રસ્ત્રીવેશ્મપરિવાપાન્ કારયેત્

05.6.45ab યૌવનસ્થં ચ યાચેત વિશ્રમં ચિત્તકારણાત્ ।

05.6.45chd પરિત્યજેદ્ અતુષ્યન્તં તુષ્યન્તં ચાનુપાલયેત્

05.6.46ab નિવેદ્ય પુત્રરક્ષાऽર્થં ગૂઢસારપરિગ્રહાન્ ।

05.6.46chd અરણ્યં દીર્ઘસત્રં વા સેવેતારુચ્યતાં ગતઃ

05.6.47ab મુખ્યૈરવગૃહીતં વા રાજાનં તત્પ્રિયાશ્રિતઃ ।

05.6.47chd ઇતિહાસપુરાણાભ્યાં બોધયેદ્ અર્થશાસ્ત્રવિત્

05.6.48ab સિદ્ધવ્યઞ્જનરૂપો વા યોગં આસ્થાય પાર્થિવમ્ ।

05.6.48chd લભેત લબ્ધ્વા દૂષ્યેષુ દાણ્ડકર્મિકં આચરેત્ (ઇતિ)

Book . મણ્ડલયોનિઃ ષષ્ઠ અધિકરણમ્

Chapt . ષણ્ઁઅવતિતમં પ્રકરણં - પ્રકૃતિસમ્પદઃ

06.1.01 સ્વામ્ય્ડમાત્યજનપદદુર્ગકોશદણ્ડમિત્રાણિ પ્રકૃતયઃ

06.1.02 તત્ર સ્વામિસમ્પત્

06.1.03 મહાકુલીનો દૈવબુદ્ધિસત્ત્વસમ્પન્નો વૃદ્ધદર્શી ધાર્મિકઃ સત્યવાગ્ અવિસંવાદકઃ કૃતજ્ઞઃ સ્થૂલલક્ષો મહા ઉત્સાહોડદીર્ઘસૂત્રઃ શક્યસામન્તો દૃઢબુદ્ધિરક્ષુદ્રપરિષત્કો વિનયકામ ઇત્યાભિગામિકા ગુણાઃ

06.1.04 શુશ્રૂષાશ્રવણગ્રહણધારણવિજ્ઞાન ઊહાપોહતત્ત્વાભિનિવેશાઃ પ્રજ્ઞાગુણાઃ

06.1.05 શૌર્યં અમર્ષઃ શીઘ્રતા દાક્ષ્યં ચ ઉત્સાહગુણાઃ

06.1.06 વાગ્મી પ્રગલ્ભઃ સ્મૃતિમતિબલવાન્ ઉદગ્રઃ સ્વ્ડવગ્રહઃ કૃતશિલ્પોડવ્યસનો દણ્ડનાય્યુપકારાપકારયોર્દૃષ્ટપ્રતીકારી હ્રીમાન્ આપત્પ્રકૃત્યોર્વિનિયોક્તા દીર્ઘદૂરદર્શી દેશકાલપુરુષકારકાર્યપ્રધાનઃ સન્ધિવિક્રમત્યાગસમ્યમપણપરચ્છિદ્રવિભાગી સંવૃતોડદીનાભિહાસ્યજિહ્મભ્રુકુટીક્ષણઃ કામક્રોધલોભસ્તમ્ભચાપલ ઉપતાપપૈશુન્યહીનઃ શક્લઃ સ્મિત ઉદગ્રાભિભાષી વૃદ્ધ ઉપદેશાચાર ઇત્યાત્મસમ્પત્

06.1.07 અમાત્યસમ્પદ્ ઉક્તા પુરસ્તાત્

06.1.08 મધ્યે ચાન્તે ચ સ્થાનવાન્ આત્મધારણઃ પરધારણશ્ચાપદિ સ્વારક્ષઃ સ્વાજીવઃ શત્રુદ્વેષી શક્યસામન્તઃ પઙ્કપાષાણ ઉષરવિષમકણ્ટકશ્રેણીવ્યાલમૃગાટવીહીનઃ કાન્તઃ સીતાખનિદ્રવ્યહસ્તિવનવાન્ ગવ્યઃ પૌરુષેયો ગુપ્તગોચરઃ પશુમાન્ અદેવમાતૃકો વારિસ્થલપથાભ્યાં ઉપેતઃ સારચિત્રબહુપણ્યો દણ્ડકરસહઃ કર્મશીલકર્ષકોડબાલિશસ્વામ્ય્ડવરવર્ણપ્રાયો ભક્તશુચિમનુષ્ય ઇતિ જનપદસમ્પત્

06.1.09 દુર્ગસમ્પદ્ ઉક્તા પુરસ્તાત્

06.1.10 ધર્માધિગતઃ પૂર્વૈઃ સ્વયં વા હેમરૂપ્યપ્રાયશ્ચિત્રસ્થૂલરત્નહિરણ્યો દીર્ઘાં અપ્યાપદં અનાયતિં સહેત ઇતિ કોશસમ્પત્

06.1.11 પિતૃપૈતામહો નિત્યો વશ્યઃ તુષ્ટભૃતપુત્રદારઃ પ્રવાસેષ્વવિસંવાદિતઃ સર્વત્રાપ્રતિહતો દુઃખસહો બહુયુદ્ધઃ સર્વયુદ્ધપ્રહરણવિદ્યાવિશારદઃ સહવૃદ્ધિક્ષયિકત્વાદ્ અદ્વૈધ્યઃ ક્ષત્રપ્રાય ઇતિ દણ્ડસમ્પત્

06.1.12 પિતૃપૈતામહં નિત્યં વશ્યં અદ્વૈધ્યં મહલ્લઘુસમુત્થં ઇતિ મિત્રસમ્પત્

06.1.13 અરાજબીજી લુબ્ધઃ ક્ષુદ્રપરિષત્કો વિરક્તપ્રકૃતિરન્યાયવૃત્તિરયુક્તો વ્યસની નિરુત્સાહો દૈવપ્રમાણો યત્કિઞ્ચનકાર્યગતિરનનુબન્ધઃ ક્લીબો નિત્યાપકારી ચ ઇત્યમિત્રસમ્પત્

06.1.14 એવમ્ભૂતો હિ શત્રુઃ સુખઃ સમુચ્છેત્તું ભવતિ

06.1.15ab અરિવર્જાઃ પ્રકૃતયઃ સપ્ત એતાઃ સ્વગુણ ઉદયાઃ ।

06.1.15chd ઉક્તાઃ પ્રત્યઙ્ગભૂતાઃ તાઃ પ્રકૃતા રાજસમ્પદઃ

06.1.16ab સમ્પાદયત્યસમ્પન્નાઃ પ્રકૃતીરાત્મવાન્નૃપઃ ।

06.1.16chd વિવૃદ્ધાશ્ચાનુરક્તાશ્ચ પ્રકૃતીર્હન્ત્યનાત્મવાન્

06.1.17ab તતઃ સ દુષ્ટપ્રકૃતિશ્ચાતુરન્તોઽપ્યનાત્મવાન્ ।
06.1.17chd હન્યતે વા પ્રકૃતિભિર્યાતિ વા દ્વિષતાં વશમ્
06.1.18ab આત્મવાંઃ ત્વલ્પદેશોઽપિ યુક્તઃ પ્રકૃતિસમ્પદા ।
06.1.18chd નયજ્ઞઃ પૃથિવીં કૃત્સ્નાં જયત્યેવ ન હીયતે (ઇતિ)

Chapt . શમવ્યાયામિકમ્

06.2.01 શમવ્યાયામૌ યોગક્ષેમયોર્યોનિઃ
06.2.02 કર્મારમ્ભાણાં યોગારાધનો વ્યાયામઃ
06.2.03 કર્મફલ ઉપભોગાનાં ક્ષેમારાધનઃ શમઃ
06.2.04 શમવ્યાયામયોર્યોનિઃ ષાડ્ગુણ્યમ્
06.2.05 ક્ષયઃ સ્થાનં વૃદ્ધિરિત્યુદયાઃ તસ્ય
06.2.06 માનુષં નયાપનયૌ, દૈવં અયાનયૌ
06.2.07 દૈવમાનુષં હિ કર્મ લોકં યાપયતિ
06.2.08 અદૃષ્ટકારિતં દૈવમ્
06.2.09 તસ્મિન્ ઇષ્ટેન ફલેન યોગોઽયઃ, અનિષ્ટેનાનયઃ
06.2.10 દૃષ્ટકારિતં માનુષમ્
06.2.11 તસ્મિન્ યોગક્ષેમનિષ્પત્તિર્નયઃ, વિપત્તિરપનયઃ
06.2.12 તચ્ચિન્ત્યં, અચિન્ત્યં દૈવમ્
06.2.13 રાજા આત્મદ્રવ્યપ્રકૃતિસમ્પન્નો નયસ્યાધિષ્ઠાનં વિજિગીષુઃ
06.2.14 તસ્ય સમન્તતો મણ્ડલીભૂતા ભૂમ્ય્ઽનન્તરા અરિપ્રકૃતિઃ
06.2.15 તથા એવ ભૂમ્ય્।એકાન્તરા મિત્રપ્રકૃતિઃ
06.2.16 અરિસમ્પદ્યુક્તઃ સામન્તઃ શત્રુઃ, વ્યસની યાતવ્યઃ, અનપાશ્રયો દુર્બલાશ્રયો વા ઉચ્છેદનીયઃ, વિપર્યયે પીડનીયઃ કર્શનીયો વા
06.2.17 ઇત્યરિવિશેષાઃ
06.2.18 તસ્માન્ મિત્રં અરિમિત્રં મિત્રમિત્રં અરિમિત્રમિત્રં ચાનન્તર્યેણ ભૂમીનાં પ્રસજ્યન્તે પુરસ્તાત્, પશ્ચાત્ પાર્ષ્ણિગ્રાહ આક્રન્દઃ પાર્ષ્ણિગ્રાહાસાર આક્રન્દાસારઃ
06.2.19 ભૂમ્ય્ઽનન્તરઃ પ્રકૃતિમિત્રઃ, તુલ્યાભિજનઃ સહજઃ, વિરુદ્ધો વિરોધયિતા વા કૃત્રિમઃ
06.2.20 ભૂમ્ય્।એકાન્તરં પ્રકૃતિમિત્રં, માતાપિતૃસમ્બદ્ધં સહજં, ધનજીવિતહેતોરાશ્રિતં કૃત્રિમમ્
06.2.21 અરિવિજિગીષ્વોર્ભૂમ્ય્ઽનન્તરઃ સંહતાસંહતયોરનુગ્રહસમર્થો નિગ્રહે ચાસંહતયોર્મધ્યમઃ
06.2.22 અરિવિજિગીષુમધ્યાનાં બહિઃ પ્રકૃતિભ્યો બલવત્તરઃ સંહતાસંહતાનાં અરિવિજિગીષુમધ્યમાનાં અનુગ્રહસમર્થો નિગ્રહે ચાસંહતાનાં ઉદાસીનઃ
06.2.23 ઇતિ પ્રકૃતયઃ
06.2.24 વિજિગીષુર્મિત્રં મિત્રમિત્રં વાઽસ્ય પ્રકૃતયઃ તિસ્રઃ

06.2.25 તાઃ પઞ્ચભિરમાત્યજનપદદુર્ગકોશદણ્ડપ્રકૃતિભિરેક એકશઃ સમ્યુક્તા મણ્ડલં અષ્ટાદશકં ભવતિ

06.2.26 અનેન મણ્ડલપૃથક્ત્વં વ્યાખ્યાતં અરિમધ્યમ ઉદાસીનાનામ્

06.2.27 એવં ચતુર્મણ્ડલસઙ્ક્ષેપઃ

06.2.28 દ્વાદશ રાજપ્રકૃતયઃ ષષ્ટિર્દ્રવ્યપ્રકૃતયઃ, સઙ્ક્ષેપેણ દ્વિસપ્તતિઃ

06.2.29 તાસાં યથાસ્વં સમ્પદઃ

06.2.30 શક્તિઃ સિદ્ધિશ્ચ

06.2.31 બલં શક્તિઃ

06.2.32 સુખં સિદ્ધિઃ

06.2.33 શક્તિઃ ત્રિવિધા - જ્ઞાનબલં મન્ત્રશક્તિઃ, કોશદણ્ડબલં પ્રભુશક્તિઃ, વિક્રમબલં ઉત્સાહશક્તિઃ

06.2.34 એવં સિદ્ધિઃ ત્રિવિધા એવ - મન્ત્રશક્તિસાધ્યા મન્ત્રસિદ્ધિઃ, પ્રભુશક્તિસાધ્યા પ્રભુસિદ્ધિઃ, ઉત્સાહશક્તિસાધ્યા ઉત્સાહસિદ્ધિઃ

06.2.35 તાભિરભ્યુચ્ચિતો જ્યાયાન્ ભવતિ, અપચિતો હીનઃ, તુલ્યશક્તિઃ સમઃ

06.2.36 તસ્માત્શક્તિં સિદ્ધિં ચ ઘટેતાત્મન્યાવેશયિતું, સાધારણો વા દ્રવ્યપ્રકૃતિષ્વાનન્તર્યેણ શૌચવશેન વા

06.2.37 દૂષ્યામિત્રાભ્યાં વાऽપકૃષ્ટું યતેત

06.2.38 યદિ વા પશ્યેત્ અમિત્રો મે શક્તિયુક્તો વાગ્દણ્ડપારુષ્યાર્થદૂષણૈઃ પ્રકૃતીરુપહનિષ્યતિ, સિદ્ધિયુક્તો વા મૃગયાદ્યૂતમદ્યસ્ત્રીભિઃ પ્રમાદં ગમિષ્યતિ, સ વિરક્તપ્રકૃતિરુપક્ષીણઃ પ્રમત્તો વા સાધ્યો મે ભવિષ્યતિ, વિગ્રહાભિયુક્તો વા સર્વસન્દોહેન એકસ્થોऽદુર્ગસ્થો વા સ્થાસ્યતિ, સ સંહતસૈન્યો મિત્રદુર્ગવિયુક્તઃ સાધ્યો મે ભવિષ્યતિ, બલવાન્ વા રાજા પરતઃ શત્રું ઉચ્છેત્તુકામઃ તં ઉચ્છિદ્ય માં ઉચ્છિન્દ્યાદ્ ઇતિ બલવતા પ્રાર્થિતસ્ય મે વિપન્નકર્મારમ્ભસ્ય વા સાહાય્યં દાસ્યતિ, મધ્યમલિપ્સાયાં ચ, ઇત્યેવં।આદિષુ કારણેષ્વમિત્રસ્યાપિ શક્તિં સિદ્ધિં ચ ઇચ્છેત્

06.2.39ab નેમિં એકાન્તરાન્ રાજ્ઞઃ કૃત્વા ચાનન્તરાન્ અરાન્ ।

06.2.39chd નાભિં આત્માનં આયચ્છેન્નેતા પ્રકૃતિમણ્ડલે

06.2.40ab મધ્યે હ્યુપહિતઃ શત્રુર્નેતુર્મિત્રસ્ય ચ ઉભયોઃ ।

06.2.40chd ઉચ્છેદ્યઃ પીડનીયો વા બલવાન્ અપિ જાયતે (ઇતિ)

Book .

Chapt . ષાડ્ગુણ્યસમુદ્દેશઃ - ક્ષયસ્થાનવૃદ્ધિનિશ્ચયઃ

07.1.01 ષાડ્ગુણ્યસ્ય પ્રકૃતિમણ્ડલં યોનિઃ

07.1.02 સન્ધિવિગ્રહાસનયાનસંશ્રયદ્વૈધીભાવાઃ ષાડ્ગુણ્યમ્ ઇત્યાચાર્યાઃ

07.1.03 દ્વૈગુણ્યમ્ ઇતિ વાતવ્યાધિઃ

07.1.04 સન્ધિવિગ્રહાભ્યાં હિ ષાડ્ગુણ્યં સમ્પદ્યતે ઇતિ

07.1.05 ષાડ્ગુણ્યં એવ એતદ્ અવસ્થાભેદાદ્ ઇતિ કૌટિલ્યઃ

07.1.06 તત્ર પણબન્ધઃ સન્ધિઃ

07.1.07 અપકારો વિગ્રહઃ

07.1.08 ઉપેક્ષણં આસનમ્

07.1.09 અભ્યુચ્ચયો યાનમ્

07.1.10 પરાર્પણં સંશ્રયઃ

07.1.11 સન્ધિવિગ્રહ ઉપાદાનં દ્વૈધીભાવઃ

07.1.12 ઇતિ ષડ્ગુણાઃ

07.1.13 પરસ્માદ્ હીયમાનઃ સન્દધીત

07.1.14 અભ્યુચ્ચીયમાનો વિગૃહ્ણીયાત્

07.1.15 ન માં પરો નાહં પરં ઉપહન્તું શક્તઃ ઇત્યાસીત

07.1.16 ગુણાતિશયયુક્તો યાયાત્

07.1.17 શક્તિહીનઃ સંશ્રયેત

07.1.18 સહાયસાધ્યે કાર્યે દ્વૈધીભાવં ગચ્છેત્

07.1.19 ઇતિ ગુણાવસ્થાપનમ્

07.1.20 તેષાં યસ્મિન્ વા ગુણે સ્થિતઃ પશ્યેત્ ઇહસ્થઃ શક્ષ્યામિ દુર્ગસેતુકર્મવણિક્પથશૂન્યનિવેશખનિદ્રવ્યહસ્તિવનકર્માણ્યાત્મ-
પ્રવર્તયિતું, પરસ્ય ચ એતાનિ કર્માણ્યુપહન્તુમ્ ઇતિ તં આતિષ્ઠેત્

07.1.21 સા વૃદ્ધિઃ

07.1.22 આશુતરા મે વૃદ્ધિર્ભૂયસ્તરા વૃદ્ધ્ય્ I ઉદયતરા વા ભવિષ્યતિ, વિપરીતા પરસ્ય ઇતિ જ્ઞાત્વા પરવૃદ્ધિં ઉપેક્ષેત

07.1.23 તુલ્યકાલફલ ઉદયાયાં વા વૃદ્ધૌ સન્ધિં ઉપેયાત્

07.1.24 યસ્મિન્ વા ગુણે સ્થિતઃ સ્વકર્મણાં ઉપઘાતં પશ્યેન્ન ઇતરસ્ય તસ્મિન્ન તિષ્ઠેત્

07.1.25 એષ ક્ષયઃ

07.1.26 ચિરતરેણાલ્પતરં વૃદ્ધ્ય્ I ઉદયતરં વા ક્ષેષ્યે, વિપરીતં પરઃ ઇતિ જ્ઞાત્વા ક્ષયં ઉપેક્ષેત

07.1.27 તુલ્યકાલફલ ઉદયે વા ક્ષયે સન્ધિં ઉપેયાત્

07.1.28 યસ્મિન્ વા ગુણે સ્થિતઃ સ્વકર્મવૃદ્ધિં ક્ષયં વા નાભિપશ્યેદ્ એતત્સ્થાનમ્

07.1.29 હ્રસ્વતરં વૃદ્ધ્ય્ I ઉદયતરં વા સ્થાસ્યામિ, વિપરીતં પરઃ ઇતિ જ્ઞાત્વા સ્થાનં ઉપેક્ષેત

07.1.30 તુલ્યકાલફલ ઉદયે વા સ્થાને સન્ધિં ઉપેયાદ્ ઇત્યાચાર્યાઃ

07.1.31 ન એતદ્ વિભાષિતં ઇતિ કૌટિલ્યઃ

07.1.32a યદિ વા પશ્યેત્ સન્ધૌ સ્થિતો મહાફલૈઃ સ્વકર્મભિઃ પરકર્માણ્યુપહનિષ્યામિ, મહાફલાનિ વા સ્વકર્માણ્યુપભોક્ષ્યે, પરકર્માણિ વા, સન્ધિવિશ્વાસેન વા યોગ ઉપનિષત્પ્રણિધિભિઃ પરકર્માણ્યુપહનિષ્યામિ, સુખં વા સાનુગ્રહપરિહારસૌકર્યં ફલલાભભૂયસ્ત્વેન સ્વકર્મણાં પરકર્મયોગાવહં જનં આસ્રાવયિષ્યામિ -

07.1.32b બલિનાઽતિમાત્રેણ વા સંહિતઃ પરઃ સ્વકર્મ ઉપઘાતં પ્રાપ્સ્યતિ, યેન વા વિગૃહીતો મયાસન્ધત્તે તેનાસ્ય વિગ્રહં દીર્ઘં કરિષ્યામિ, મયા વા સંહિતસ્ય મદ્દ્વેષિણો જનપદં પીડયિષ્યતિ -

07.1.32ch પર ઉપહતો વાડસ્ય જનપદો માં આગમિષ્યતિ, તતઃ કર્મસુ વૃદ્ધિં પ્રાપ્સ્યામિ, વિપન્નકર્મારમ્ભો વા વિષમસ્થઃ પરઃ કર્મસુ ન મે વિક્રમેત -

07.1.32d પરતઃ પ્રવૃત્તકર્મારમ્ભો વા તાભ્યાં સંહિતઃ કર્મસુ વૃદ્ધિં પ્રાપ્સ્યામિ, શત્રુપ્રતિબદ્ધં વા શત્રુણા સન્ધિં કૃત્વા મણ્ડલં ભેત્સ્યામિ -

07.1.32e ભિન્નં અવાપ્સ્યામિ, દણ્ડાનુગ્રહેણ વા શત્રું ઉપગૃહ્ય મણ્ડલલિપ્સાયાં વિદ્વેષં ગ્રાહયિષ્યામિ, વિદ્વિષ્ટં તેન એવ ઘાતયિષ્યામિ ઇતિ સન્ધિના વૃદ્ધિં આતિષ્ઠેત્

07.1.33a યદિ વા પશ્યેત્ આયુધીયપ્રાયઃ શ્રેણીપ્રાયો વા મે જનપદઃ શૈલવનનદીદુર્ગ એકદ્વારારક્ષો વા શક્ષ્યતિ પરાભિયોગં પ્રતિહન્તું, વિષયાન્તે દુર્ગં અવિષહ્યં અપાશ્રિતો વા શક્ષ્યામિ પરકર્માણ્યુપહન્તું -

07.1.33b વ્યસનપીડ ઉપહત ઉત્સાહો વા પરઃ સમ્પ્રાપ્તકર્મ ઉપઘાતકાલઃ, વિગૃહીતસ્યાન્યતો વા શક્ષ્યામિ જનપદં અપવાહયિતુમ્ ઇતિ વિગ્રહે સ્થિતો વૃદ્ધિં આતિષ્ઠેત્

07.1.34 યદિ વા મન્યેત ન મે શક્તઃ પરઃ કર્માણ્યુપહન્તું નાહં તસ્ય કર્મ ઉપઘાતી વા, વ્યસનં અસ્ય, શ્વવરાહયોરિવ કલહે વા, સ્વકર્માનુષ્ઠાનપરો વા વર્ધિષ્યે ઇત્યાસનેન વૃદ્ધિં આતિષ્ઠેત્

07.1.35 યદિ વા મન્યેત યાનસાધ્યઃ કર્મ ઉપઘાતઃ શત્રોઃ, પ્રતિવિહિતસ્વકર્મારક્ષશ્ચાસ્મિ ઇતિ યાનેન વૃદ્ધિં આતિષ્ઠેત્

07.1.36 યદિ વા મન્યેત નાસ્મિ શક્તઃ પરકર્માણ્યુપહન્તું, સ્વકર્મ ઉપઘાતં વા ત્રાતુમ્ ઇતિ, બલવન્તં આશ્રિતઃ સ્વકર્માનુષ્ઠાનેન ક્ષયાત્ સ્થાનં સ્થાનાદ્ વૃદ્ધિં ચાકાઙ્ક્ષેત

07.1.37 યદિ વા મન્યેત સન્ધિના એકતઃ સ્વકર્માણિ પ્રવર્તયિષ્યામિ, વિગ્રહેણ એકતઃ પરકર્માણ્યુપહનિષ્યામિ ઇતિ દ્વૈધીભાવેન વૃદ્ધિં આતિષ્ઠેત્

07.1.38ab એવં ષડ્ભિર્ગુણૈરેતૈઃ સ્થિતઃ પ્રકૃતિમણ્ડલે ।

07.1.38chd પર્યેષેત ક્ષયાત્ સ્થાનં સ્થાનાદ્ વૃદ્ધિં ચ કર્મસુ (ઇતિ)

Chapt . સંશ્રયવૃત્તિ

07.2.01 સન્ધિવિગ્રહયોઃ તુલ્યાયાં વૃદ્ધૌ સન્ધિં ઉપેયાત્

07.2.02 વિગ્રહે હિ ક્ષયવ્યયપ્રવાસપ્રત્યવાયા ભવન્તિ

07.2.03 તેનાસનયાનયોરાસનં વ્યાખ્યાતમ્

07.2.04 દ્વૈધીભાવસંશ્રયયોર્દ્વૈધીભાવં ગચ્છેત્

07.2.05 દ્વૈધીભૂતો હિ સ્વકર્મપ્રધાન આત્મન એવ ઉપકરોતિ, સંશ્રિતઃ તુ પરસ્ય ઉપકરોતિ, નાત્મનઃ

07.2.06 યદ્બલઃ સામન્તઃ તદ્વિશિષ્ટબલં આશ્રયેત્

07.2.07 તદ્વિશિષ્ટબલાભાવે તં એવાશ્રિતઃ કોશદણ્ડભૂમીનાં અન્યતમેનાસ્ય ઉપકર્તું અદૃષ્ટઃ પ્રયતેત

07.2.08 મહાદોષો હિ વિશિષ્ટબલસમાગમો રાજ્ઞાં, અન્યત્રારિવિગૃહીતાત્

07.2.09 અશક્યે દણ્ડ ઉપનતવદ્ વર્તેત

07.2.10 યદા ચાસ્ય પ્રાણહરં વ્યાધિં અન્તઃકોપં શત્રુવૃદ્ધિં મિત્રવ્યસનં ઉપસ્થિતં વા તન્નિમિત્તાં આત્મનશ્ચ વૃદ્ધિં પશ્યેત્ તદા સમ્ભાવ્યવ્યાધિધર્મકાર્યાપદેશેનાપયાયાત્

07.2.11 સ્વવિષયસ્થો વા ન ઉપગચ્છેત્

07.2.12 આસન્નો વાઽસ્ય ચ્છિદ્રેષુ પ્રહરેત્

07.2.13 બલીયસોર્વા મધ્યગતઃ ત્રાણસમર્થં આશ્રયેત, યસ્ય વાઽન્તર્ધિઃ સ્યાત્, ઉભૌ વા

07.2.14 કપાલસંશ્રયઃ તિષ્ઠેત્, મૂલહરં ઇતરસ્ય ઇતરં અપદિશન્

07.2.15 ભેદં ઉભયોર્વા પરસ્પરાપદેશં પ્રયુઞ્જીત, ભિન્નયોરુપાંશુદણ્ડમ્

07.2.16 પાર્શ્વસ્થો વા બલસ્થયોરાસન્નભયાત્ પ્રતિકુર્વીત

07.2.17 દુર્ગાપાશ્રયો વા દ્વૈધીભૂતઃ તિષ્ઠેત્

07.2.18 સન્ધિવિગ્રહક્રમહેતુભિર્વા ચેષ્ટેત

07.2.19 દૂષ્યામિત્રાટવિકાન્ ઉભયોરુપગૃહ્ણીયાત્

07.2.20 એતયોરન્યતરં ગચ્છંઃ તૈરેવાન્યતરસ્ય વ્યસને પ્રહરેત્

07.2.21 દ્વાભ્યાં ઉપહતો વા મણ્ડલાપાશ્રયઃ તિષ્ઠેત્, મધ્યમં ઉદાસીનં વા સંશ્રયેત

07.2.22 તેન સહ એકં ઉપગૃહ્ય ઇતરં ઉચ્છિન્દ્યાદ્, ઉભૌ વા

07.2.23 દ્વાભ્યાં ઉચ્છિન્નો વા મધ્યમ ઉદાસીનયોઃ તત્પક્ષીયાણાં વા રાજ્ઞાં ન્યાયવૃત્તિં આશ્રયેત

07.2.24 તુલ્યાનાં વા યસ્ય પ્રકૃતયઃ સુખ્યેયુરેનં, યત્રસ્થો વા શક્નુયાદ્ આત્માનં ઉદ્ધર્તું, યત્ર વા પૂર્વપુરુષ ઉચિતા ગતિરાસન્નઃ સમ્બન્ધો વા, મિત્રાણિ ભૂયાંસ્યતિશક્તિમન્તિ વા ભવેયુઃ

07.2.25ab પ્રિયો યસ્ય ભવેદ્ યો વા પ્રિયોઽસ્ય કતરઃ તયોઃ ।

07.2.25chd પ્રિયો યસ્ય સ તં ગચ્છેદ્ ઇત્યાશ્રયગતિઃ પરા (ઇતિ)

Chapt . સમહીનજ્યાયસાં ગુણાભિનિવેશઃ - હીનસન્ધયઃ

07.3.01 વિજિગીષુઃ શક્ત્ય્ઽપેક્ષઃ ષાડ્ગુણ્યં ઉપયુઞ્જીત

07.3.02 સમજ્યાયોભ્યાં સન્ધીયેત, હીનેન વિગૃહ્ણીયાત્

07.3.03 વિગૃહીતો હિ જ્યાયસા હસ્તિના પાદયુદ્ધં ઇવાભ્યુપૈતિ

07.3.04 સમેન ચામં પાત્રં આમેનાહતં ઇવ ઉભયતઃ ક્ષયં કરોતિ

07.3.05 કુમ્ભેન ઇવાશ્મા હીનેન એકાન્તસિદ્ધિં અવાપ્નોતિ

07.3.06 જ્યાયાંશ્ચેન્ન સન્ધિં ઇચ્છેદ્ દણ્ડ ઉપનતવૃત્તં આબલીયસં વા યોગં આતિષ્ઠેત્

07.3.07 સમશ્ચેન્ન સન્ધિં ઇચ્છેદ્ યાવન્માત્રં અપકુર્યાત્ તાવન્માત્રં અસ્ય પ્રત્યપકુર્યાત્

07.3.08 તેજો હિ સન્ધાનકારણમ્

07.3.09 નાતપ્તં લોહં લોહેન સન્ધત્ત ઇતિ

07.3.10 હીનશ્ચેત્ સર્વત્રાનુપ્રણતઃ તિષ્ઠેત્ સન્ધિં ઉપેયાત્

07.3.11 આરણ્યોઽગ્નિરિવ હિ દુઃખામર્ષજં તેજો વિક્રમયતિ

07.3.12 મણ્ડલસ્ય ચાનુગ્રાહ્યો ભવતિ

07.3.13 સંહિતશ્ચેત્ પરપ્રકૃતયો લુબ્ધક્ષીણાપચરિતાઃ પ્રત્યાદાનભયાદ્ વા ન ઉપગચ્છન્તિ ઇતિ પશ્યેદ્ હીનોઽપિ વિગૃહ્ણીયાત્

07.3.14 વિગૃહીતશ્ચેત્ પરપ્રકૃતયો લુબ્ધક્ષીણાપચરિતા વિગ્રહ ઉદ્વિગ્ના વા માં ન ઉપગચ્છન્તિ ઇતિ પશ્યેજ્ જ્યાયાન્ અપિ સન્ધીયેત, વિગ્રહ ઉદ્વેગં વા શમયેત્

07.3.15 વ્યસનયૌગપદ્યેઽપિ ગુરુવ્યસનોઽસ્મિ, લઘુવ્યસનઃ પરઃ સુખેન પ્રતિકૃત્ય વ્યસનં આત્મનોઽભિયુઞ્જ્યાદ્ ઇતિ પશ્યેજ્ જ્યાયાન્ અપિ સન્ધીયેત

07.3.16 સન્ધિવિગ્રહયોશ્ચેત્ પરકર્શનં આત્મ ઉપચયં વા નાભિપશ્યેજ્ જ્યાયાન્ અપ્યાસીત

07.3.17 પરવ્યસનં અપ્રતિકાર્યં ચેત્ પશ્યેદ્ હીનોઽપ્યભિયાયાત્

07.3.18 અપ્રતિકાર્યાસન્નવ્યસનો વા જ્યાયાન્ અપિ સંશ્રયેત

07.3.19 સન્ધિના એકતો વિગ્રહેણ એકતશ્ચેત્ કાર્યસિદ્ધિં પશ્યેજ્ જ્યાયાન્ અપિ દ્વૈધીભૂતઃ તિષ્ઠેત્

07.3.20 એવં સમસ્ય ષાડ્ગુણ્ય ઉપયોગઃ

07.3.21 તત્ર તુ પ્રતિવિશેષઃ

07.3.22ab પ્રવૃત્તચક્રેણાક્રાન્તો રાજ્ઞા બલવતાઽબલઃ ।

07.3.22chd સન્ધિના ઉપનમેત્ તૂર્ણં કોશદણ્ડાત્મભૂમિભિઃ

07.3.23ab સ્વયં સઙ્ખ્યાતદણ્ડેન દણ્ડસ્ય વિભવેન વા ।

07.3.23chd ઉપસ્થાતવ્યં ઇત્યેષ સન્ધિરાત્મામિષો મતઃ

07.3.24ab સેનાપતિકુમારાભ્યાં ઉપસ્થાતવ્યં ઇત્યયમ્ ।

07.3.24chd પુરુષાન્તરસન્ધિઃ સ્યાન્નાત્મના ઇત્યાત્મરક્ષણઃ

07.3.25ab એકેનાન્યત્ર યાતવ્યં સ્વયં દણ્ડેન વા ઇત્યયમ્ ।

07.3.25chd અદૃષ્ટપુરુષઃ સન્ધિર્દણ્ડમુખ્યાત્મરક્ષણઃ

07.3.26ab મુખ્યસ્ત્રીબન્ધનં કુર્યાત્ પૂર્વયોઃ પશ્ચિમે ત્વરિમ્ ।

07.3.26chd સાધયેદ્ ગૂઢં ઇત્યેતે દણ્ડ ઉપનતસન્ધયઃ

07.3.27ab કોશદાનેન શેષાણાં પ્રકૃતીનાં વિમોક્ષણમ્ ।

07.3.27chd પરિક્રયો ભવેત્ સન્ધિઃ સ એવ ચ યથાસુખમ્

07.3.28ab સ્કન્ધ ઉપનેયો બહુધા જ્ઞેયઃ સન્ધિરુપગ્રહઃ ।

07.3.28chd નિરુદ્ધો દેશકાલાભ્યાં અત્યયઃ સ્યાદ્ ઉપગ્રહઃ

07.3.29ab વિષહ્યદાનાદ્ આયત્યાં ક્ષમઃ સ્ત્રીબન્ધનાદ્ અપિ ।

07.3.29chd સુવર્ણસન્ધિર્વિશ્વાસાદ્ એકીભાવગતો ભવેત્

07.3.30ab વિપરીતઃ કપાલઃ સ્યાદ્ અત્યાદાનાભિભાષિતઃ ।

07.3.30chd પૂર્વયોઃ પ્રણયેત્ કુપ્યં હસ્ત્યઽશ્વં વા ગરાન્વિતમ્

07.3.31ab તૃતીયે પ્રણયેદ્ અર્થં કથયન્ કર્મણાં ક્ષયમ્ ।

07.3.31chd તિષ્ઠેચ્ચતુર્થ ઇત્યેતે કોશ ઉપનતસન્ધયઃ

07.3.32ab ભૂમ્ય્।એકદેશત્યાગેન શેષપ્રકૃતિરક્ષણમ્ ।

07.3.32chd આદિષ્ટસન્ધિઃ તત્ર ઇષ્ટો ગૂઢસ્તેન ઉપઘાતિનઃ

07.3.33ab ભૂમીનાં આત્તસારાણાં મૂલવર્જં પ્રણામનમ્ ।

07.3.33chd ઉચ્છિન્નસન્ધિઃ તત્ર ઇષ્ટઃ પરવ્યસનકાઙ્ક્ષિણઃ

07.3.34ab ફલદાનેન ભૂમીનાં મોક્ષણં સ્યાદ્ અવક્રયઃ ।

07.3.34chd ફલાતિમુક્તો ભૂમિભ્યઃ સન્ધિઃ સ પરિદૂષણઃ

07.3.35ab કુર્યાદ્ અવેક્ષણં પૂર્વૌ પશ્ચિમૌ ત્વાબલીયસમ્ ।

07.3.35chd આદાય ફલં ઇત્યેતે દેશ ઉપનતસન્ધયઃ

07.3.36ab સ્વકાર્યાણાં વશેન એતે દેશે કાલે ચ ભાષિતાઃ ।

07.3.36chd આબલીયસિકાઃ કાર્યાઃ ત્રિવિધા હીનસન્ધયઃ (ઇતિ)

Chapt . વિગૃહ્યાસનં - સન્ધાયાસનં - વિગૃહ્યયાનં - સન્ધાયયાનં - સમ્ભૂયપ્રયાણમ્

07.4.01 સન્ધિવિગ્રહયોરાસનં યાનં ચ વ્યાખ્યાતમ્

07.4.02 સ્થાનં આસનં ઉપેક્ષણં ચ ઇત્યાસનપર્યાયાઃ

07.4.03 વિશેષઃ તુ - ગુણ એકદેશે સ્થાનં, સ્વવૃદ્ધિપ્રાપ્ત્યર્થં આસનં, ઉપાયાનાં અપ્રયોગ ઉપેક્ષણમ્

07.4.04 અતિસન્ધાનકામયોરરિવિજિગીષ્વોરુપહન્તું અશક્તયોર્વિગૃહ્યાસનં સન્ધાય વા

07.4.05 યદા વા પશ્યેત્ સ્વદણ્ડૈર્મિત્રાટવીદણ્ડૈર્વા સમં જ્યાયાંસં વા કર્શયિતું ઉત્સહે ઇતિ તદા કૃતબાહ્યાભ્યન્તરકૃત્યો વિગૃહ્યાસીત

07.4.06 યદા વા પશ્યેત્ ઉત્સાહયુક્તા મે પ્રકૃતયઃ સંહતા વિવૃદ્ધાઃ સ્વકર્માણ્યવ્યાહતાશ્ચરિષ્યન્તિ પરસ્ય વા કર્માણ્યુપહનિષ્યન્તિ ઇતિ તદા વિગૃહ્યાસીત

07.4.07a યદા વા પશ્યેત્ પરસ્યાપચરિતાઃ ક્ષીણા લુબ્ધાઃ સ્વચક્રસ્તેનાટવીવ્યથિતા વા પ્રકૃતયઃ સ્વયં ઉપજાપેન વા માં એષ્યન્તિ, સમ્પન્ના મે વાર્ત્તા, વિપન્ના પરસ્ય, તસ્ય પ્રકૃતયો દુર્ભિક્ષ ઉપહતા માં એષ્યન્તિ; વિપન્ના મે વાર્ત્તા, સમ્પન્ના પરસ્ય, -

07.4.07b તં મે પ્રકૃતયો ન ગમિષ્યન્તિ, વિગૃહ્ય ચાસ્ય ધાન્યપશુહિરણ્યાન્યાહરિષ્યામિ, સ્વપણ્ય ઉપઘાતીનિ વા પરપણ્યાનિ નિવર્તયિષ્યામિ, -

07.4.07ch પરવણિક્પથાદ્ વા સરવન્તિ માં એષ્યન્તિ વિગૃહીતે, ન ઇતરં, દૂષ્યામિત્રાટવીનિગ્રહં વા વિગૃહીતો ન કરિષ્યતિ, તૈરેવ વા વિગ્રહં પ્રાપ્સ્યતિ, -

07.4.07d મિત્રં મે મિત્રભાવ્યભિપ્રયાતો બહ્વ્ડલ્પકાલં તનુક્ષયવ્યયં અર્થં પ્રાપ્સ્યતિ, ગુણવતીં આદેયાં વા ભૂમિં, -

07.4.07e સર્વસન્દોહેન વા માં અનાદૃત્ય પ્રયાતુકામઃ કથં ન યાયાદ્ ઇતિ પરવૃદ્ધિપ્રતિઘાતાર્થં પ્રતાપાર્થં ચ વિગૃહ્યાસીત

07.4.08 તં એવ હિ પ્રત્યાવૃત્તો ગ્રસતે ઇત્યાચાર્યાઃ

07.4.09 ન ઇતિ કૌટિલ્યઃ

07.4.10 કર્શનમાત્રં અસ્ય કુર્યાદ્ અવ્યસનિનઃ, પરવૃદ્ધ્યા તુ વૃદ્ધઃ સમુચ્છેદનમ્

07.4.11 એવં પરસ્ય યાતવ્યોઽસ્મૈ સાહાય્યં અવિનષ્ટઃ પ્રયચ્છેત્

07.4.12 તસ્માત્ સર્વસન્દોહપ્રકૃતં વિગૃહ્યાસીત

07.4.13 વિગૃહ્યાસનહેતુપ્રાતિલોમ્યે સન્ધાયાસીત

07.4.14 વિગૃહ્યાસનહેતુભિરભ્યુચ્ચિતઃ સર્વસન્દોહવર્જં વિગૃહ્ય યાયાત્

07.4.15 યદા વા પશ્યેત્ વ્યસની પરઃ, પ્રકૃતિવ્યસનં વાઽસ્ય શીષપ્રકૃતિભિરપ્રતિકાર્યં, સ્વચક્રપીડિતા વિરક્તા વાઽસ્ય પ્રકૃતયઃ કર્શિતા નિરુત્સાહાઃ પરસ્પરાદ્ વા ભિન્નાઃ શક્યા લોભયિતું, અગ્ન્યુ્। ઉદકવ્યાધિમરકદુર્ભિક્ષનિમિત્તં ક્ષીણયુગ્યપુરુષનિચયરક્ષાવિધાનઃ પરઃ ઇતિ તદા વિગૃહ્ય યાયાત્

07.4.16 યદા વા પશ્યેત્ મિત્રં આક્રન્દશ્ચ મે શૂરવૃદ્ધાનુરક્તપ્રકૃતિઃ, વિપરીતપ્રકૃતિઃ પરઃ પાર્ષ્ણિગ્રાહશ્ચાસારશ્ચ, શક્ષ્યામિ મિત્રેણાસારં આક્રન્દેન પાર્ષ્ણિગ્રાહં વા વિગૃહ્ય યાતુમ્ ઇતિ તદા વિગૃહ્ય યાયાત્

07.4.17 યદા વા ફલં એકહાર્યં અલ્પકાલં પશ્યેત્ તદા પાર્ષ્ણિગ્રાહાસારાભ્યાં વિગૃહ્ય યાયાત્

07.4.18 વિપર્યયે સન્ધાય યાયાત્

07.4.19 યદા વા પશ્યેત્ ન શક્યં એકેન યાતું અવશ્યં ચ યાતવ્યમ્ ઇતિ તદા સમહીનજ્યાયોભિઃ સામવાયિકૈઃ સમ્ભૂય યાયાદ્, એકત્ર નિર્દિષ્ટેનાંશેન, અનેકત્રાનિર્દિષ્ટેનાંશેન

07.4.20 તેષાં અસમવાયે દણ્ડં અન્યતમસ્માન્નિવિષ્ટાંશેન યાચેત

07.4.21 સમ્ભૂયાભિગમનેન વા નિર્વિશ્યેત, ધ્રુવે લાભે નિર્દિષ્ટેનાંશેન, અધ્રુવે લાભાંશેન

07.4.22ab અંશો દણ્ડસમઃ પૂર્વઃ પ્રયાસસમ ઉત્તમઃ ।

07.4.22chd વિલોપો વા યથાલાભં પ્રક્ષેપસમ એવ વા (ઇતિ)

Chapt . યાતવ્યામિત્રયોરભિગ્રહચિન્તાઃ - ક્ષયલોભવિરાગહેતવઃ પ્રકૃતીનાં - સામવાયિકવિપરિમર્શઃ

07.5.01 તુલ્યસામન્તવ્યસને યાતવ્યં અમિત્રં વા ઇત્યમિત્રં અભિયાયાત્, તત્સિદ્ધૌ યાતવ્યમ્

07.5.02 અમિત્રસિદ્ધૌ હિ યાતવ્યઃ સાહાય્યં દદ્યાન્નામિત્રો યાતવ્યસિદ્ધૌ

07.5.03 ગુરુવ્યસનં યાતવ્યં લઘુવ્યસનં અમિત્રં વા ઇતિ ગુરુવ્યસનં સૌકર્યતો યાયાદ્ ઇત્યાચાર્યાઃ

07.5.04 ન ઇતિ કૌટિલ્યઃ

07.5.05 લઘુવ્યસનં અમિત્રં યાયાત્

07.5.06 લઘ્વપિ હિ વ્યસનં અભિયુક્તસ્ય કૃચ્છ્રં ભવતિ

07.5.07 સત્યં ગુર્વપિ ગુરુતરં ભવતિ

07.5.08 અનભિયુક્તઃ તુ લઘુવ્યસનઃ સુખેન વ્યસનં પ્રતિકૃત્યામિત્રો યાતવ્યં અભિસરેત્, પાર્ષ્ણિં વા ગૃહ્ણીયાત્

07.5.09 યાતવ્યયૌગપદ્યે ગુરુવ્યસનં ન્યાયવૃત્તિં લઘુવ્યસનં અન્યાયવૃત્તિં વિરક્તપ્રકૃતિં વા ઇતિ વિરક્તપ્રકૃતિં યાયાત્

07.5.10 ગુરુવ્યસનં ન્યાયવૃત્તિં અભિયુક્તં પ્રકૃતયોઽનુગૃહ્ણન્તિ, લઘુવ્યસનં અન્યાયવૃત્તિં ઉપેક્ષન્તે, વિરક્તા બલવન્તં અપ્યુચ્છિન્દન્તિ

07.5.11 તસ્માદ્ વિરક્તપ્રકૃતિં એવ યાયાત્

07.5.12 ક્ષીણલુબ્ધપ્રકૃતિં અપચરિતપ્રકૃતિં વા ઇતિ ક્ષીણલુબ્ધપ્રકૃતિં યાયાત્, ક્ષીણલુબ્ધા હિ પ્રકૃતયઃ સુખેન ઉપજાપં પીડાં વા ઉપગચ્છન્તિ, નાપચરિતાઃ પ્રધાનાવગ્રહસાધ્યાઃ ઇત્યાચાર્યાઃ

07.5.13 ન ઇતિ કૌટિલ્યઃ

07.5.14 ક્ષીણલુબ્ધા હિ પ્રકૃતયો ભર્તરિ સ્નિગ્ધા ભર્તૃહિતે તિષ્ઠન્તિ, ઉપજાપં વા વિસંવાદયન્તિ, અનુરાગે સાર્વગુણ્યં ઇતિ

07.5.15 તસ્માદ્ અપચરિતપ્રકૃતિં એવ યાયાત્

07.5.16 બલવન્તં અન્યાયવૃત્તિં દુર્બલં વા ન્યાયવૃત્તિં ઇતિ બલવન્તં અન્યાયવૃત્તિં યાયાત્

07.5.17 બલવન્તં અન્યાયવૃત્તિં અભિયુક્તં પ્રકૃતયો નાનુગૃહ્ણન્તિ, નિષ્પાતયન્તિ, અમિત્રં વાઽસ્ય ભજન્તે

07.5.18 દુર્બલં તુ ન્યાયવૃત્તિં અભિયુક્તં પ્રકૃતયઃ પરિગૃહ્ણન્તિ, અનુનિષ્પતન્તિ વા

07.5.19ab અવક્ષેપેણ હિ સતાં અસતાં પ્રગ્રહેણ ચ ।

07.5.19chd અભૂતાનાં ચ હિંસાનાં અધર્મ્યાણાં પ્રવર્તનૈઃ

07.5.20ab ઉચિતાનાં ચરિત્રાણાં ધર્મિષ્ઠાનાં નિવર્તનૈઃ ।

07.5.20chd અધર્મસ્ય પ્રસઙ્ગેન ધર્મસ્યાવગ્રહેણ ચ

07.5.21ab અકાર્યાણાં ચ કરણૈઃ કાર્યાણાં ચ પ્રણાશનૈઃ ।

07.5.21chd અપ્રદાનૈશ્ચ દેયાનાં અદેયાનાં ચ સાધનૈઃ

07.5.22ab અદણ્ડનૈશ્ચ દણ્ડ્યાનાં અદણ્ડ્યાનાં ચ દણ્ડનૈઃ ।

07.5.22chd અગ્રાહ્યાણાં ઉપગ્રાહૈર્ગ્રાહ્યાણાં ચાનભિગ્રહૈઃ

07.5.23ab અનર્થ્યાનાં ચ કરણૈરર્થ્યાનાં ચ વિઘાતનૈઃ ।

07.5.23chd અરક્ષણૈશ્ચ ચોરેભ્યઃ સ્વયં ચ પરિમોષણૈઃ

07.5.24ab પાતૈઃ પુરુષકારાણાં કર્મણાં ગુણદૂષણૈઃ ।

07.5.24chd ઉપઘાતૈઃ પ્રધાનાનાં માન્યાનાં ચાવમાનનૈઃ

07.5.25ab વિરોધનૈશ્ચ વૃદ્ધાનાં વૈષમ્યેણાનૃતેન ચ ।

07.5.25chd કૃતસ્યાપ્રતિકારેણ સ્થિતસ્યાકરણેન ચ

07.5.26ab રાજ્ઞઃ પ્રમાદાલસ્યાભ્યાં યોગક્ષેમવધેન વા ।

07.5.26chd પ્રકૃતીનાં ક્ષયો લોભો વૈરાગ્યં ચ ઉપજાયતે

07.5.27ab ક્ષીણાઃ પ્રકૃતયો લોભં લુબ્ધા યાન્તિ વિરાગતામ્ ।

07.5.27chd વિરક્તા યાન્ત્યમિત્રં વા ભર્તારં ઘ્નન્તિ વા સ્વયમ્

07.5.28 તસ્માત્ પ્રકૃતીનાં ક્ષયલોભવિરાગકારણાનિ ન ઉત્પાદયેત્, ઉત્પન્નાનિ વા સદ્યઃ પ્રતિકુર્વીત

07.5.29 ક્ષીણા લુબ્ધા વિરક્તા વા પ્રકૃતય ઇતિ

07.5.30 ક્ષીણાઃ પીડન ઉચ્છેદનભયાત્ સદ્યઃ સન્ધિં યુદ્ધં નિષ્પતનં વા રોચયન્તે

07.5.31 લુબ્ધા લોભેનાસન્તુષ્ટાઃ પર ઉપજાપં લિપ્સન્તે

07.5.32 વિરક્તાઃ પરાભિયોગં અભ્યુત્તિષ્ઠન્તે

07.5.33 તાસાં હિરણ્યધાન્યક્ષયઃ સર્વ ઉપઘાતી કૃચ્છ્રપ્રતીકારશ્ચ, યુગ્યપુરુષક્ષયો હિરણ્યધાન્યસાધ્યઃ

07.5.34 લોભ ઐકદેશિકો મુખ્યાયત્તઃ પરાર્થેષુ શક્યઃ પ્રતિહન્તું આદાતું વા

07.5.35 વિરાગઃ પ્રધાનાવગ્રહસાધ્યઃ

07.5.36 નિષ્પ્રધાના હિ પ્રકૃતયો ભોગ્યા ભવન્ત્યનુપજાપ્યાશ્ચાન્યેષાં, અનાપત્સહાઃ તુ

07.5.37 પ્રકૃતિમુખ્યપ્રગ્રહૈઃ તુ બહુધા ભિન્ના ગુપ્તા ભવન્ત્યાપત્સહાશ્ચ

07.5.38 સામવાયિકાનાં અપિ સન્ધિવિગ્રહકારણાન્યવેક્ષ્ય શક્તિશૌચયુક્તૈઃ સમ્ભૂય યાયાત્

07.5.39 શક્તિમાન્ હિ પાર્ષ્ણિગ્રહણે યાત્રાસાહાય્યદાને વા શક્તઃ, શુચિઃ સિદ્ધૌ ચાસિદ્ધૌ ચ યથાસ્થિતકારી ઇતિ

07.5.40 તેષાં જ્યાયસા એકેન દ્વાભ્યાં સમાભ્યાં વા સમ્ભૂય યાતવ્યં ઇતિ દ્વાભ્યાં સમાભ્યાં શ્રેયઃ

07.5.41 જ્યાયસા હ્યવગૃહીતશ્ચરતિ, સમાભ્યાં અતિસન્ધાનાધિક્યે વા

07.5.42 તૌ હિ સુખૌ ભેદયિતું, દુષ્ટશ્ચ એકો દ્વાભ્યાં નિયન્તું ભેદ ઉપગ્રહં ચ ઉપગન્તું ઇતિ

07.5.43 સમેન એકેન દ્વાભ્યાં હીનાભ્યાં વા ઇતિ દ્વાભ્યાં હીનાભ્યાં શ્રેયઃ

07.5.44 તૌ હિ દ્વિકાર્યસાધકૌ વશ્યૌ ચ ભવતઃ

07.5.45ab કાર્યસિદ્ધૌ તુ - કૃતાર્થાજ્ જ્યાયસો ગૂઢઃ સાપદેશં અપસ્રવેત્ ।

07.5.45chd અશુચેઃ શુચિવૃત્તાત્ તુ પ્રતીક્ષેતા વિસર્જનાત્

07.5.46ab સત્રાદ્ અપસરેદ્ યત્તઃ કલત્રં અપનીય વા ।

07.5.46chd સમાદ્ અપિ હિ લબ્ધાર્થાદ્ વિશ્વઃ તસ્ય ભયં ભવેત્

07.5.47ab જ્યાયસ્ત્વે ચાપિ લબ્ધાર્થઃ સમોઽપિ પરિકલ્પતે ।

07.5.47chd અભ્યુચ્ચિતશ્ચાવિશ્વાસ્યો વૃદ્ધિશ્ચિત્તવિકારિણી

07.5.48ab વિશિષ્ટાદ્ અલ્પં અપ્યંશં લબ્ધ્વા તુષ્ટમુખો વ્રજેત્ ।

07.5.48chd અનંશો વા તતોઽસ્યાઙ્કે પ્રહૃત્ય દ્વિગુણં હરેત્

07.5.49ab કૃતાર્થઃ તુ સ્વયં નેતા વિસૃજેત્ સામવાયિકાન્ ।

07.5.49chd અપિ જીયેત ન જયેન્ મણ્ડલ ઇષ્ટઃ તથા ભવેત્ (ઇતિ)

Chapt . સંહિતપ્રયાણિકં - પરિપણિતાપરિપણિતાપસૃતાઃ સન્ધયઃ

07.6.01 વિજિગીષુર્દ્વિતીયાં પ્રકૃતિં એવં અતિસન્દધ્યાત્

07.6.02 સામન્તં સંહિતપ્રયાણે યોજયેત્ ત્વં ઇતો યાહિ, અહં ઇતો યાસ્યામિ, સમાનો લાભઃ ઇતિ

07.6.03 લાભસામ્યે સન્ધિઃ, વૈષમ્યે વિક્રમઃ

07.6.04 સન્ધિઃ પરિપણિતશ્ચાપરિપણિતશ્ચ

07.6.05 ત્વં એતં દેશં યાહિ, અહં ઇમં દેશં યાસ્યામિ ઇતિ પરિપણિતદેશઃ

07.6.06 ત્વં એતાવન્તં કાલં ચેષ્ટસ્વ, અહં એતાવન્તં કાલં ચેષ્ટિષ્યે ઇતિ પરિપણિતકાલઃ

07.6.07 ત્વં એતાવત્કાર્યં સાધય, અહં ઇદં કાર્યં સાધયિષ્યામિ ઇતિ પરિપણિતાર્થઃ

07.6.08 યદિ વા મન્યેત શૈલવનનદીદુર્ગં અટવીવ્યવહિતં છિન્નધાન્યપુરુષવીવધાસારં અયવસ ઇન્ધન ઉદકં અવિજ્ઞાતં પ્રકૃષ્ટં અન્યભાવદેશીયં વા સૈન્યવ્યાયામાનાં અલબ્ધભૌમં વા દેશં પરો યાસ્યતિ, વિપરીતં અહમ્ ઇત્યેતસ્મિન્ વિશેષે પરિપણિતદેશં સન્ધિં ઉપેયાત્

07.6.09 યદિ વા મન્યેત પ્રવર્ષ ઉષ્ણશીતં અતિવ્યાધિપ્રાયં ઉપક્ષીણાહાર ઉપભોગં સૈન્યવ્યાયામાનાં ચાઉપરોધિકં કાર્યસાધનાનાં ઊનં અતિરિક્તં વા કાલં પરશ્લેષ્ટિષ્યતે, વિપરીતં અહમ્ ઇત્યેતસ્મિન્ વિશેષે પરિપણિતકાલં સન્ધિં ઉપેયાત્

07.6.10 યદિ વા મન્યેત પ્રત્યાદેયં પ્રકૃતિકોપકં દીર્ઘકાલં મહાક્ષયવ્યયં અલ્પં અનર્થાનુબન્ધં અકલ્યં અધર્મ્યં મધ્યમ ઉદાસીનવિરુદ્ધં મિત્ર ઉપઘાતકં વા કાર્યં પરઃ સાધયિષ્યતિ, વિપરીતં અહમ્ ઇત્યેતસ્મિન્ વિશેષે પરિપણિતાર્થં સન્ધિં ઉપેયાત્

07.6.11 એવં દેશકાલયોઃ કાલકાર્યયોર્દેશકાર્યયોર્દેશકાલકાર્યાણાં ચાવસ્થાપનાત્ સપ્તવિધઃ પરિપણિતઃ

07.6.12 તસ્મિન્ પ્રાગ્ એવારભ્ય પ્રતિષ્ઠાપ્ય ચ સ્વકર્માણિ પરકર્મસુ વિક્રમેત

07.6.13 વ્યસનત્વરાવમાનાલસ્યયુક્તં અજ્ઞં વા શત્રું અતિસન્ધાતુકામો દેશકાલકાર્યાણાં અનવસ્થાપનાત્ સંહિતૌ સ્વઃ ઇતિ સન્ધિવિશ્વાસેન પરચ્છિદ્રં આસાદ્ય પ્રહરેદ્ ઇત્યપરિપણિતઃ

07.6.14 તત્ર એતદ્ ભવતિ

07.6.15ab સામન્તેન એવ સામન્તં વિદ્વાન્ આયોજ્ય વિગ્રહે ।

07.6.15chd તતોઽન્યસ્ય હરેદ્ ભૂમિં છિત્ત્વા પક્ષં સમન્તતઃ

07.6.16 સન્ધેરકૃતચિકીર્ષા કૃતશ્લેષણં કૃતવિદૂષણં અવશીર્ણક્રિયા ચ

07.6.17 વિક્રમસ્ય પ્રકાશયુદ્ધં કૂટયુદ્ધં તૂષ્ણીંયુદ્ધમ્

07.6.18 ઇતિ સન્ધિવિક્રમૌ

07.6.19 અપૂર્વસ્ય સન્ધેઃ સાનુબન્ધૈઃ સામાદિભિઃ પર્યેષણં સમહીનજ્યાયસાં ચ યથાબલં અવસ્થાપનં અકૃતચિકીર્ષા

07.6.20 કૃતસ્ય પ્રિયહિતાભ્યાં ઉભયતઃ પરિપાલનં યથાસમ્ભાષિતસ્ય ચ નિબન્ધનસ્યાનુવર્તનં રક્ષણં ચ કથં પરસ્માન્ન ભિદ્યેત ઇતિ કૃતશ્લેષણમ્

07.6.21 પરસ્યાપસન્ધેયતાં દૂષ્યાતિસન્ધાનેન સ્થાપયિત્વા વ્યતિક્રમઃ કૃતવિદૂષણમ્

07.6.22 ભૃત્યેન મિત્રેણ વા દોષાપસૃતેન પ્રતિસન્ધાનં અવશીર્ણક્રિયા

07.6.23 તસ્યાં ગતાગતશ્ચતુર્વિધઃ - કારણાદ્ ગતાગતો, વિપરીતઃ, કારણાદ્ ગતોઽકારણાદ્ આગતો, વિપરીતશ્ચ ઇતિ

07.6.24 સ્વામિનો દોષેણ ગતો ગુણેનાગતઃ પરસ્ય ગુણેન ગતો દોષેણાગત ઇતિ કારણાદ્ ગતાગતઃ સન્ધેયઃ

07.6.25 સ્વદોષેણ ગતાગતો ગુણં ઉભયોઃ પરિત્યજ્ય અકારણાદ્ ગતાગતઃ ચલબુદ્ધિરસન્ધેયઃ

07.6.26 સ્વામિનો દોષેણ ગતઃ પરસ્માત્ સ્વદોષેણાગત ઇતિ કારણાદ્ ગતોઽકારણાદ્ આગતઃ તર્કયિતવ્યઃ પરપ્રયુક્તઃ સ્વેન વા દોષેણાપકર્તુકામઃ, પરસ્ય ઉચ્છેત્તારં અમિત્રં મે જ્ઞાત્વા પ્રતિઘાતભયાદ્ આગતઃ, પરં વા માં ઉચ્છેત્તુકામં પરિત્યજ્યાનૃશંસ્યાદ્ આગતઃ ઇતિ

07.6.27 જ્ઞાત્વા કલ્યાણબુદ્ધિં પૂજયેદ્, અન્યથાબુદ્ધિં અપકૃષ્ટં વાસયેત્

07.6.28 સ્વદોષેણ ગતઃ પરદોષેણાગત ઇત્યકારણાદ્ ગતઃ કારણાદ્ આગતઃ તર્કયિતવ્યઃ છિદ્રં મે પૂરયિષ્યતિ, ઉચિતોઽયં અસ્ય વાસઃ, પરત્રાસ્ય જનો ન રમતે, મિત્રૈર્મે સંહિતઃ, શત્રુભિર્વિગૃહીતઃ, લુબ્ધક્રૂરાદ્ આવિગ્નઃ શત્રુસંહિતાદ્ વા પરસ્માત્ ઇતિ

07.6.29 જ્ઞાત્વા યથાબુદ્ધ્યવસ્થાપયિતવ્યઃ

07.6.30 કૃતપ્રણાશઃ શક્તિહાનિર્વિદ્યાપણ્યત્વં આશાનિર્વેદો દેશલૌલ્યં અવિશ્વાસો બલવદ્વિગ્રહો વા પરિત્યાગસ્થાનમ્ ઇત્યાચાર્યાઃ

07.6.31 ભયં અવૃત્તિરમર્ષ ઇતિ કૌટિલ્યઃ

07.6.32 ઇહાપકારી ત્યાજ્યઃ, પરાપકારી સન્ધેયઃ, ઉભયાપકારી તર્કયિતવ્ય ઇતિ સમાનમ્

07.6.33 અસન્ધેયેન ત્વવશ્યં સન્ધાતવ્યે યતઃ પ્રભાવઃ તતઃ પ્રતિવિદધ્યાત્

07.6.34ab સ ઉપકારં વ્યવહિતં ગુપ્તં આયુઃક્ષયાદ્ ઇતિ ।

07.6.34chd વાસયેદ્ અરિપક્ષીયં અવશીર્ણક્રિયાવિધૌ

07.6.35ab વિક્રમયેદ્ ભર્તરિ વા સિદ્ધં વા દણ્ડચારિણમ્

07.6.35chd કુર્યાદ્ અમિત્રાટવીષુ પ્રત્યન્તે વાઽન્યતઃ ક્ષિપેત્

07.6.36ab પણ્યં કુર્યાદ્ અસિદ્ધં વા સિદ્ધં વા તેન સંવૃતમ્

07.6.36chd તસ્ય એવ દોષેણાદૂષ્ય પરસન્ધેયકારણાત્

07.6.37ab અથ વા શમયેદ્ એનં આયત્યઽર્થં ઉપાંશુના

07.6.37chd આયત્યાં ચ વધપ્રેપ્સું દૃષ્ટ્વા હન્યાદ્ ગતાગતમ્

07.6.38ab અરિતોઽભ્યાગતો દોષઃ શત્રુસંવાસકારિતઃ

07.6.38chd સર્પસંવાસધર્મિત્વાન્નિત્ય ઉદ્વેગેન દૂષિતઃ

07.6.39ab જાયતે પ્લક્ષબીજાશાત્ કપોતાદ્ ઇવ શાલ્મલેઃ

07.6.39chd ઉદ્વેગજનનો નિત્યં પશ્ચાદ્ અપિ ભયાવહઃ

07.6.40ab પ્રકાશયુદ્ધં નિર્દિષ્ટે દેશે કાલે ચ વિક્રમઃ

07.6.40chd વિભીષણં અવસ્કન્દઃ પ્રમાદવ્યસનાર્દનમ્

07.6.41ab એકત્ર ત્યાગઘાતૌ ચ કૂટયુદ્ધસ્ય માતૃકા

07.6.41chd યોગગૂઢ ઉપજાપાર્થં તૂષ્ણીંયુદ્ધસ્ય લક્ષણમ્ (ઇતિ)

Chapt . દ્વૈધીભાવિકાઃ સન્ધિવિક્રમાઃ

07.7.01 વિજિગીષુર્દ્વિતીયાં પ્રકૃતિં એવં ઉપગૃહ્ણીયાત્

07.7.02 સામન્તં સામન્તેન સમ્ભૂય યાયાત્, યદિ વા મન્યેત પાર્ષ્ણિં મે ન ગ્રહીષ્યતિ, પાર્ષ્ણિગ્રાહં વારયિષ્યતિ, યાતવ્યં નાભિસરિષ્યતિ, બલદ્વૈગુણ્યં મે ભવિષ્યતિ, વીવધાસારૌ મે પ્રવર્તયિષ્યતિ, પરસ્ય વારયિષ્યતિ, બહ્વ્।આબાધે મે પથિ કણ્ટકાન્ મર્દયિષ્યતિ, દુર્ગાટવ્યઽપસારેષુ દણ્ડેન ચરિષ્યતિ, યાતવ્યં અવિષહ્યે દોષે સન્ધૌ વા

સ્થાપયિષ્યતિ, લબ્ધલાભાંશો વા શત્રૂન્ અન્યાન્ મે વિશ્વાસયિષ્યતિ ઇતિ

07.7.03 દ્વૈધીભૂતો વા કોશેન દણ્ડં દણ્ડેન કોશં સામન્તાનાં અન્યતમાલ્લિપ્સેત

07.7.04 તેષાં જ્યાયસોઽધિકેનાંશેન સમાત્ સમેન હીનાદ્ હીનેન ઇતિ સમસન્ધિઃ

07.7.05 વિપર્યયે વિષમસન્ધિઃ

07.7.06 તયોર્વિશેષલાભાદ્ અતિસન્ધિઃ

07.7.07 વ્યસનિનં અપાયસ્થાને સક્તં અનર્થિનં વા જ્યાયાંસં હીનો બલસમેન લાભેન પણેત

07.7.08 પણિતઃ તસ્યાપકારસમર્થો વિક્રમેત, અન્યથા સન્દધ્યાત્

07.7.09 એવમ્ભૂતો વા હીનશક્તિપ્રતાપપૂરણાર્થં સમ્ભાવ્યાર્થાભિસારી મૂલપાર્ષ્ણિત્રાણાર્થં વા જ્યાયાંસં હીનો બલસમાદ્ વિશિષ્ટેન લાભેન પણેત

07.7.10 પણિતઃ કલ્યાણબુદ્ધિં અનુગૃહ્ણીયાત્, અન્યથા વિક્રમેત

07.7.11 જાતવ્યસનપ્રકૃતિરન્ધ્રં ઉપસ્થિતાનર્થં વા જ્યાયાંસં હીનો દુર્ગમિત્રપ્રતિષ્ટબ્ધો વા હ્રસ્વં અધ્વાનં યાતુકામઃ શત્રું અયુદ્ધં એકાન્તસિદ્ધિં વા લાભં આદાતુકામો બલસમાદ્ હીનેન લાભેન પણેત

07.7.12 પણિતઃ તસ્યાપકારસમર્થો વિક્રમેત, અન્યથા સન્દધ્યાત્

07.7.13 અરન્ધ્રવ્યસનો વા જ્યાયાન્ દુર્।આરબ્ધકર્માણં ભૂયઃ ક્ષયવ્યયાભ્યાં યોક્તુકામો દૂષ્યદણ્ડં પ્રવાસયિતુકામો દૂષ્યદણ્ડં આવાહયિતુકામો વા પીડનીયં ઉચ્છેદનીયં વા હીનેન વ્યથયિતુકામઃ સન્ધિપ્રધાનો વા કલ્યાણબુદ્ધિર્હીનં લાભં પ્રતિગૃહ્ણીયાત્

07.7.14 કલ્યાણબુદ્ધિના સમ્ભૂયાર્થં લિપ્સેત, અન્યથા વિક્રમેત

07.7.15 એવં સમઃ સમં અતિસન્દધ્યાદ્ અનુગૃહ્ણીયાદ્ વા

07.7.16 પરાનીકસ્ય પ્રત્યનીકં મિત્રાટવીનાં વા, શત્રોર્વિભૂમીનાં દેશિકં મૂલપાર્ષ્ણિત્રાણાર્થં વા સમો બલસમેન લાભેન પણેત

07.7.17 પણિતઃ કલ્યાણબુદ્ધિં અનુગૃહ્ણીયાત્, અન્યથા વિક્રમેત

07.7.18 જાતવ્યસનપ્રકૃતિરન્ધ્રં અનેકવિરુદ્ધં અન્યતો લભમાનો વા સમો બલસમાદ્ હીનેન લાભેન પણેત

07.7.19 પણિતઃ તસ્યાપકારસમર્થો વિક્રમેત, અન્યથા સન્દધ્યાત્

07.7.20 એવમ્ભૂતો વા સમઃ સામન્તાયત્તકાર્યઃ કર્તવ્યબલો વા બલસમાદ્ વિશિષ્ટેન લાભેન પણેત

07.7.21 પણિતઃ કલ્યાણબુદ્ધિં અનુગૃહ્ણીયાત્ અન્યથા વિક્રમેત

07.7.22 જાતવ્યસનપ્રકૃતિરન્ધ્રં અભિહન્તુકામઃ સ્વ્।આરબ્ધં એકાન્તસિદ્ધિં વાઽસ્ય કર્મ ઉપહન્તુકામો મૂલે યાત્રાયાં વા પ્રહર્તુકામો યાતવ્યાદ્ભૂયો લભમાનો વા જ્યાયાંસં હીનં સમં વા ભૂયો યાચેત

07.7.23 ભૂયો વા યાચિતઃ સ્વબલરક્ષાઽર્થં દુર્ધર્ષં અન્યદુર્ગં આસારં અટવીં વા પરદણ્ડેન મર્દિતુકામઃ પ્રકૃષ્ટેઽધ્વનિ કાલે વા પરદણ્ડં ક્ષયવ્યયાભ્યાં યોક્તુકામઃ પરદણ્ડેન વા વિવૃદ્ધઃ તં એવ ઉચ્છેત્તુકામઃ પરદણ્ડં આદાતુકામો વા ભૂયો દદ્યાત્

07.7.24 જ્યાયાન્ વા હીનં યાતવ્યાપદેશેન હસ્તે કર્તુકામઃ પરં ઉચ્છિદ્ય વા તં એવ ઉચ્છેત્તુકામઃ, ત્યાગં વા કૃત્વા પ્રત્યાદાતુકામો બલસમાદ્ વિશિષ્ટેન લાભેન પણેત

07.7.25 પણિતઃ તસ્યાપકારસમર્થો વિક્રમેત, અન્યથા સન્દધ્યાત્

07.7.26 યાતવ્યસંહિતો વા તિષ્ઠેત્, દૂષ્યામિત્રાટવીદણ્ડં વાઽસ્મૈ દદ્યાત્

07.7.27 જાતવ્યસનપ્રકૃતિરન્ધ્રો વા જ્યાયાન્ હીનં બલસમેન લાભેન પણેત

07.7.28 પણિતઃ તસ્યાપકારસમર્થો વિક્રમેત, અન્યથા સન્દધ્યાત્

07.7.29 એવમ્ભૂતં હીનં જ્યાયાન્ બલસમાદ્ હીનેન લાભેન પણેત

07.7.30 પણિતઃ તસ્યાપકારસમર્થો વિક્રમેત, અન્યથા સન્દધ્યાત્

07.7.31ab આદૌ બુધ્યેત પણિતઃ પણમાનશ્ચ કારણમ્

07.7.31chd તતો વિતર્ક્ય ઉભયતો યતઃ શ્રેયશ્તતો વ્રજેત્ (ઇતિ)

Chapt . યાતવ્યવૃત્તિઃ - અનુગ્રાહ્યમિત્રવિશેષાઃ

07.8.01 યાતવ્યોઽભિયાસ્યમાનઃ સન્ધિકારણં આદાતુકામો વિહન્તુકામો વા સામવાયિકાનાં અન્યતમં લાભદ્વૈગુણ્યેન પણેત

07.8.02 પણમાનઃ ક્ષયવ્યયપ્રવાસપ્રત્યવાયપર ઉપકારશરીરાબાધાંશ્ચાસ્ય વર્ણયેત્

07.8.03 પ્રતિપન્નં અર્થેન યોજયેત્

07.8.04 વૈરં વા પરૈર્ગ્રાહયિત્વા વિસંવાદયેત્

07.8.05 દુરારબ્ધકર્માણં ભૂયઃ ક્ષયવ્યયાભ્યાં યોક્તુકામઃ સ્વ્।આરબ્ધાં વા યાત્રાસિદ્ધિં વિઘાતયિતુકામો મૂલે યાત્રાયાં વા પ્રહર્તુકામો યાતવ્યસંહિતઃ પુનર્યાચિતુકામઃ પ્રત્યુત્પન્નાર્થકૃચ્છ્રઃ તસ્મિન્ન્ અવિશ્વસ્તો વા તદાત્વે લાભં અલ્પં ઇચ્છેત્, આયત્યાં પ્રભૂતમ્

07.8.06 મિત્ર ઉપકારં અમિત્ર ઉપઘાતં અર્થાનુબન્ધં અવેક્ષમાણઃ પૂર્વ ઉપકારકં કારયિતુકામો ભૂયઃ તદાત્વે મહાન્તં લાભં ઉત્સૃજ્યાયત્યાં અલ્પં ઇચ્છેત્

07.8.07 દૂષ્યામિત્રાભ્યાં મૂલહરેણ વા જ્યાયસા વિગૃહીતં ત્રાતુકામઃ તથાવિધં ઉપકારં કારયિતુકામઃ સમ્બન્ધાવેક્ષી વા તદાત્વે ચાયત્યાં ચ લાભં ન પ્રતિગૃહ્ણીયાત્

07.8.08 કૃતસન્ધિરતિક્રમિતુકામઃ પરસ્ય પ્રકૃતિકર્શનં મિત્રામિત્રસન્ધિવિશ્લેષણં વા કર્તુકામઃ પરાભિયોગાત્શઙ્કમાનો લાભં અપ્રાપ્તં અધિકં વા યાચેત

07.8.09 તં ઇતરઃ તદાત્વે ચાયત્યાં ચ ક્રમં અવેક્ષેત

07.8.10 તેન પૂર્વે વ્યાખ્યાતાઃ

07.8.11 અરિવિજિગીષ્વોઃ તુ સ્વં સ્વં મિત્રં અનુગૃહ્ણતોઃ શક્યકલ્યભવ્યારમ્ભિસ્થિરકર્માનુરક્તપ્રકૃતિભ્યો વિશેષઃ

07.8.12 શક્યારમ્ભી વિષહ્યં કર્મારભતે, કલ્યારમ્ભી નિર્દોષં, ભવ્યારમ્ભી કલ્યાણ ઉદયમ્

07.8.13 સ્થિરકર્મા નાસમાપ્ય કર્મ ઉપરમતે

07.8.14 અનુરક્તપ્રકૃતિઃ સુસહાયત્વાદ્ અલ્પેનાપ્યનુગ્રહેણ કાર્યં સાધયતિ

07.8.15 ત એતે કૃતાર્થાઃ સુખેન પ્રભૂતં ચ ઉપકુર્વન્તિ

07.8.16 અતઃ પ્રતિલોમા નાનુગ્રાહ્યાઃ

07.8.17 તયોરેકપુરુષાનુગ્રહે યો મિત્રં મિત્રતરં વાઽનુગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.8.18 મિત્રાદ્ આત્મવૃદ્ધિં હિ પ્રાપ્નોતિ, ક્ષયવ્યયપ્રવાસપર ઉપકારાન્ ઇતરઃ

07.8.19 કૃતાર્થશ્ચ શત્રુર્વૈગુણ્યં એતિ

07.8.20 મધ્યમં ત્વનુગૃહ્ણતોર્યો મધ્યમં મિત્રં મિત્રતરં વાઽનુગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.8.21 મિત્રાદ્ આત્મવૃદ્ધિં હિ પ્રાપ્નોતિ, ક્ષયવ્યયપ્રવાસપર ઉપકારાન્ ઇતરઃ

07.8.22 મધ્યમશ્ચેદ્ અનુગૃહીતો વિગુણઃ સ્યાદ્ અમિત્રોઽતિસન્ધત્તે

07.8.23 કૃતપ્રયાસં હિ મધ્યમામિત્રં અપસૃતં એકાર્થ ઉપગતં પ્રાપ્નોતિ

07.8.24 તેન ઉદાસીનાનુગ્રહો વ્યાખ્યાતઃ

07.8.25 મધ્યમ ઉદાસીનયોર્બલાંશદાને યઃ શૂરં કૃતાસ્ત્રં દુઃખસહં અનુરક્તં વા દણ્ડં દદાતિ સોઽતિસન્ધીયતે

07.8.26 વિપરીતોઽતિસન્ધત્તે

07.8.27 યત્ર તુ દણ્ડઃ પ્રહિતઃ તં વા ચાર્થં અન્યાંશ્ચ સાધયતિ તત્ર મૌલભૃતશ્રેણીમિત્રાટવીબલાનાં અન્યતમં ઉપલબ્ધદેશકાલં દણ્ડં દદ્યાત્, અમિત્રાટવીબલં વા વ્યવહિતદેશકાલમ્

07.8.28 યં તુ મન્યેત કૃતાર્થો મે દણ્ડં ગૃહ્ણીયાદ્, અમિત્રાટવ્ય્ઽભૂમ્ય્ઽનૃતુષુ વા વાસયેદ્, અફલં વા કુર્યાદ્ ઇતિ, દણ્ડવ્યાસઙ્ગાપદેશેન ન એનં અનુગૃહ્ણીયાત્

07.8.29 એવં અવશ્યં ત્વનુગ્રહીતવ્યે તત્કાલસહં અસ્મૈ દણ્ડં દદ્યાત્

07.8.30 આસમાપ્તેશ્ચ એનં વાસયેદ્ યોધયેચ્ચ બલવ્યસનેભ્યશ્ચ રક્ષેત્

07.8.31 કૃતાર્થાચ્ચ સાપદેશં અપસ્રાવયેત્

07.8.32 દૂષ્યામિત્રાટવીદણ્ડં વાઽસ્મૈ દદ્યાત્

07.8.33 યાતવ્યેન વા સન્ધાય એનં અતિસન્દધ્યાત્

07.8.34ab સમે હિ લાભે સન્ધિઃ સ્યાદ્ વિષમે વિક્રમો મતઃ

07.8.34chd સમહીનવિશિષ્ટાનાં ઇત્યુક્તાઃ સન્ધિવિક્રમાઃ (ઇતિ)

Chapt . મિત્રહિરણ્યભૂમિકર્મસન્ધયઃ, તત્ર મિત્રસન્ધિઃ હિરણ્યસન્ધિશ્ચ

07.9.01 સંહિતપ્રયાણે મિત્રહિરણ્યભૂમિલાભાનાં ઉત્તર ઉત્તરો લાભઃ શ્રેયાન્

07.9.02 મિત્રહિરણ્યે હિ ભૂમિલાભાદ્ ભવતઃ, મિત્રં હિરણ્યલાભાત્

07.9.03 યો વા લાભઃ સિદ્ધઃ શેષયોરન્યતરં સાધયતિ

07.9.04 ત્વં ચાહં ચ મિત્રં લભાવહે ઇત્યેવં। આદિદ્ઃ સમસન્ધિઃ

07.9.05 ત્વં મિત્રમ્ ઇત્યેવં। આદિર્વિષમસન્ધિઃ

07.9.06 તયોર્વિશેષલાભાદ્ અતિસન્ધિઃ

07.9.07 સમસન્ધૌ તુ યઃ સમ્પન્નં મિત્રં મિત્રકૃચ્છ્રે વા મિત્રં અવાપ્નોતિ સોઽતિસન્ધત્તે

07.9.08 આપદ્ હિ સૌહૃદસ્થૈર્યં ઉત્પાદયતિ

07.9.09 મિત્રકૃચ્છ્રેઽપિ નિત્યં અવશ્યં અનિત્યં વશ્યં વા ઇતિ નિત્યં અવશ્યં શ્રેયઃ, તદ્ હિ અનુપકુર્વદ્ અપિ નાપકરોતિ ઇત્યાચાર્યાઃ

07.9.10 ન ઇતિ કૌટિલ્યઃ

07.9.11 વશ્યં અનિત્યં શ્રેયઃ

07.9.12 યાવદ્ ઉપકરોતિ તાવન્ મિત્રં ભવતિ, ઉપકારલક્ષણં મિત્રં ઇતિ

07.9.13 વશ્યયોરપિ મહાભોગં અનિત્યં અલ્પભોગં વા નિત્યં ઇતિ મહાભોગં અનિત્યં શ્રેયઃ, મહાભોગં અનિત્યં અલ્પકાલેન મહદ્ । ઉપકુર્વન્ મહાન્તિ વ્યયસ્થાનાનિ પ્રતિકરોતિ ઇત્યાચાર્યાઃ ॥

07.9.14 ન ઇતિ કૌટિલ્યઃ

07.9.15 નિત્યં અલ્પભોગં શ્રેયઃ

07.9.16 મહાભોગં અનિત્યં ઉપકારભયાદ્ અપક્રામતિ, ઉપકૃત્ય વા પ્રત્યાદાતું ઈહતે

07.9.17 નિત્યં અલ્પભોગં સાતત્યાદ્ અલ્પં ઉપકુર્વન્ મહતા કાલેન મહદ્ ઉપકરોતિ

07.9.18 ગુરુસમુત્થં મહન્ મિત્રં લઘુસમુત્થં અલ્પં વા ઇતિ ગુરુસમુત્થં મહન્ મિત્રં પ્રતાપકરં ભવતિ, યદા ચ ઉત્તિષ્ઠતે તદા કાર્યં સાધયતિ ઇત્યાચાર્યાઃ

07.9.19 ન ઇતિ કૌટિલ્યઃ

07.9.20 લઘુસમુત્થં અલ્પં શ્રેયઃ

07.9.21 લગુસમુત્થં અલ્પં મિત્રં કાર્યકાલં નાતિપાતયતિ દૌર્બલ્યાચ્ચ યથા ઇષ્ટભોગ્યં ભવતિ, ન ઇતરત્ પ્રકૃષ્ટભૌમમ્

07.9.22 વિક્ષિપ્તસૈન્યં અવશ્યસૈન્યં વા ઇતિ વિક્ષિપ્તં સૈન્યં શક્યં પ્રતિસંહર્તું વશ્યત્વાદ્ ઇત્યાચાર્યાઃ

07.9.23 ન ઇતિ કૌટિલ્યઃ

07.9.24 અવશ્યસૈન્યં શ્રેયઃ

07.9.25 અવશ્યં હિ શક્યં સામાદિભિર્વશ્યં કર્તું, ન ઇતરત્ કાર્યવ્યાસક્તં પ્રતિસંહર્તુમ્

07.9.26 પુરુષભોગં હિરણ્યભોગં વા મિત્રં ઇતિ પુરુષભોગં મિત્રં શ્રેયઃ, પ્રુષભોગં મિત્રં પ્રતાપકરં ભવતિ, યદા ચ ઉત્તિષ્ઠતે તદા કાર્યં સાધયતિ ઇત્યાચાર્યાઃ

07.9.27 ન ઇતિ કૌટિલ્યઃ

07.9.28 હિરણ્યભોગં મિત્રં શ્રેયઃ

07.9.29 નિત્યો હિ હિરણ્યેન યોગઃ કદાચિદ્ દણ્ડેન

07.9.30 દણ્ડશ્ચ હિરણ્યેનાન્યે ચ કામાઃ પ્રાપ્યન્ત ઇતિ

07.9.31 હિરણ્યભોગં ભૂમિભોગં વા મિત્રં ઇતિ હિરણ્યભોગં ગતિમત્ત્વાત્ સર્વવ્યયપ્રતીકારકરમ્ ઇત્યાચાર્યાઃ

07.9.32 ન ઇતિ કૌટિલ્યઃ

07.9.33 મિત્રહિરણ્યે હિ ભૂમિલાભાદ્ ભવત ઇત્યુક્તં પુરસ્તાદ્

07.9.34 તસ્માદ્ ભૂમિભોગં મિત્રં શ્રેય ઇતિ

07.9.35 તુલ્યે પુરુષભોગે વિક્રમઃ ક્લેશસહત્વં અનુરાગઃ સર્વબલલાભો વા મિત્રકુલાદ્ વિશેષઃ

07.9.36 તુલ્યે હિરણ્યભોગે પ્રાર્થિતાર્થતા પ્રાભૂત્યં અલ્પપ્રયસતા સાતત્યં ચ વિશેષઃ

07.9.37 તત્ર એતદ્ ભવતિ

07.9.38ab નિત્યં વશ્યં લઘુ । ઉત્થાનં પિતૃપૈતામહં મહત્ ।

07.9.38chd અદ્વૈધ્યં ચ ઇતિ સમ્પન્નં મિત્રં ષડ્ગુણં ઉચ્યતે

07.9.39ab ઋતે યદ્ અર્થં પ્રણયાદ્ રક્ષ્યતે યચ્ચ રક્ષતિ ।
07.9.39chd પૂર્વ ઉપચિતસમ્બન્ધં તન્ મિત્રં નિત્યં ઉચ્યતે
07.9.40ab સર્વચિત્રમહાભોગં ત્રિવિધં વશ્યં ઉચ્યતે ।
07.9.40chd એકતોભોગ્યુભયતઃ સર્વતોભોગિ ચાપરમ્
07.9.41ab આદાતૃ વા દાતૃ઼ડપિ વા જીવત્યરિષુ હિંસયા ।
07.9.41chd મિત્રં નિત્યં અવશ્યં તદ્દુર્ગાટવ્ય્ડપસારિ ચ
07.9.42ab અન્યતો વિગૃહીતં યલ્લઘુવ્યસનં એવ વા ।
07.9.42chd સન્ધત્તે ચ ઉપકારાય તન્ મિત્રં વશ્યં અધ્રુવમ્
07.9.43ab એકાર્થેનાથ સમ્બદ્ધં ઉપકાર્યવિકારિ ચ ।
07.9.43chd મિત્રભાવિ ભવત્યેતન્ મિત્રં અદ્વૈધ્યં આપદિ
07.9.44ab મિત્રભાવાદ્ ધ્રુવં મિત્રં શત્રુસાધારણાચ્ચલમ્ ।
07.9.44chd ન કસ્યચિદ્ ઉદાસીનં દ્વયોરુભયભાવિ તત્
07.9.45ab વિજિગીષોરમિત્રં યન્ મિત્રં અન્તર્ધિતાં ગતમ્ ।
07.9.45chd ઉપકારેઽનિવિષ્ટં વાઽશક્તં વાઽનુપકારિ તત્
07.9.46ab પ્રિયં પરસ્ય વા રક્ષ્યં પૂજ્યં સમ્બદ્ધં એવ વા ।
07.9.46chd અનુગૃહ્ણાતિ યન્ મિત્રં શત્રુસાધારણં હિ તત્
07.9.47ab પ્રકૃષ્ટભૌમં સન્તુષ્ટં બલવચ્ચાલસં ચ યત્ ।
07.9.47chd ઉદાસીનં ભવત્યેતદ્ વ્યસનાદ્ અવમાનિતમ્
07.9.48ab અરેર્નેતુશ્ચ યદ્ વૃદ્ધિં દૌર્બલ્યાદ્ અનુવર્તતે ।
07.9.48chd ઉભયસ્યાપ્યવિદ્વિષ્ટં વિદ્યાદ્ ઉભયભાવિ તત્
07.9.49ab કારણાકારણધ્વસ્તં કારણાકારણાગતમ્ ।
07.9.49chd યો મિત્રં સમુપેક્ષેત સ મૃત્યું ઉપગૂહતિ
07.9.50 ક્ષિપ્રં અલ્પો લાભશ્ચિરાન્ મહાન્ ઇતિ વા ક્ષિપ્રં અલ્પો લાભઃ કાર્યદેશકાલસંવાદકઃ શ્રેયાન્ ઇત્યાચાર્યાઃ
07.9.51 ન ઇતિ કૌટિલ્યઃ
07.9.52 ચિરાદ્ અવિનિપાતી બીજસધર્મા મહામ્લ્લાભઃ શ્રેયાન્, વિપર્યયે પૂર્વઃ
07.9.53ab એવં દૃષ્ટ્વા ધ્રુવે લાભે લાભાંશે ચ ગુણ ઉદયમ્ ।
07.9.53chd સ્વાર્થસિદ્ધિપરો યાયાત્ સંહિતઃ સામવાયિકૈઃ (ઇતિ)

Chapt . મિત્રહિરણ્યભૂમિકર્મસન્ધયઃ, તત્ર ભૂમિસન્ધિઃ

07.10.01 ત્વં ચાહં ચ ભૂમિં લભાવહે ઇતિ ભૂમિસન્ધિઃ
07.10.02 તયોર્યઃ પ્રત્યુપસ્થિતાર્થઃ સમ્પન્નાં ભૂમિં અવાપ્નોતિ સોઽતિસન્ધત્તે
07.10.03 તુલ્યે સમ્પન્નાલાભે યો બલવન્તં આક્રમ્ય ભૂમિં અવાપ્નોતિ સોઽતિસન્ધત્તે
07.10.04 ભૂમિલાભં શત્રુકર્શનં પ્રતાપં ચ હિ પ્રાપ્નોતિ

07.10.05 દુર્બલાદ્ભૂમિલાભે સત્યં સૌકર્યં ભવતિ

07.10.06 દુર્બલ એવ ચ ભૂમિલાભઃ, તત્સામન્તશ્ચ મિત્રં અમિત્રભાવં ગચ્છતિ

07.10.07 તુલ્યે બલીયસ્ત્વે યઃ સ્થિતશત્રું ઉત્પાટ્ય ભૂમિં અવાપ્નોતિ સોઽતિસન્ધત્તે

07.10.08 દુર્ગાવાપ્તિર્હિ સ્વભૂમિરક્ષણં અમિત્રાટવીપ્રતિષેધં ચ કરોતિ

07.10.09 ચલામિત્રાદ્ભૂમિલાભે શક્યસામન્તતો વિશેષઃ

07.10.10 દુર્બલસામન્તા હિ ક્ષિપ્રાપ્યાયનયોગક્ષેમા ભવતિ

07.10.11 વિપરીતા બલવત્ સામન્તા કોશદણ્ડાવચ્છેદની ચ ભૂમિર્ભવતિ

07.10.12 સમ્પન્ના નિત્યામિત્રા મન્દગુણા વા ભૂમિરનિત્યામિત્રા ઇતિ સમ્પન્ના નિત્યામિત્રા શ્રેયસી ભૂમિઃ સમ્પન્ના હિ કોશદણ્ડૌ સમ્પાદયતિ, તૌ ચામિત્રપ્રતિઘાતકૌ ઇત્યાચાર્યાઃ

07.10.13 ન ઇતિ કૌટિલ્યઃ

07.10.14 નિત્યામિત્રાલાભે ભૂયાન્ શત્રુલાભો ભવતિ

07.10.15 નિત્યશ્ચ શત્રુરુપકૃતે ચાપકૃતે ચ શત્રુરેવ ભવતિ, અનિત્યઃ તુ શત્રુરુપકારાદ્ અનપકારાદ્ વા શામ્યતિ

07.10.16 યસ્યા હિ ભૂમેર્બહુદુર્ગાશ્ચોરગણૈર્મ્લેચ્છાટવીભિર્વા નિત્યાવિરહિતાઃ પ્રત્યન્તાઃ સા નિત્યામિત્રા, વિપર્યયે ત્વનિત્યામિત્રા

07.10.17 અલ્પા પ્રત્યાસન્ના મહતી વ્યવહિતા વા ભૂમિરિતિ અલ્પા પ્રત્યાસન્ના શ્રેયસી

07.10.18 સુખા હિ પ્રાપ્તું પાલયિતું અભિસારયિતું ચ ભવતિ

07.10.19 વિપરીતા વ્યવહિતા

07.10.20 વ્યવહિતયોરપિ દણ્ડધારણાઽઽત્મધારણા વા ભૂમિરિતિ આત્મધારણા શ્રેયસી

07.10.21 સા હિ સ્વસમુત્થાભ્યાં કોશદણ્ડાભ્યાં ધાર્યતે

07.10.22 વિપરીતા દણ્ડધારણા દણ્ડસ્થાનમ્

07.10.23 બાલિશાત્ પ્રાજ્ઞાદ્ વા ભૂમિલાભ ઇતિ બાલિશાદ્ભૂમિલાભઃ શ્રેયાન્

07.10.24 સુપ્રાપ્યાઽનુપાલ્યા હિ ભવતિ, અપ્રત્યાદેયા ચ

07.10.25 વિપરીતા પ્રાજ્ઞાદ્ અનુરક્તા

07.10.26 પીડનીય ઉચ્છેદનીયયોરુચ્છેદનીયાદ્ ભૂમિલાભઃ શ્રેયાન્

07.10.27 ઉચ્છેદનીયો હ્યનપાશ્રયો દુર્બલાપાશ્રયો વાઽભિયુક્તઃ કોશદણ્ડાવાદાયાપસર્તુકામઃ પ્રકૃતિભિઃ ત્યજ્યતે, ન પીડનીયો દુર્ગમિત્રપ્રતિષ્ટબ્ધઃ

07.10.28 દુર્ગપ્રતિષ્ટબ્ધયોરપિ સ્થલનદીદુર્ગીયાભ્યાં સ્થલદુર્ગીયાદ્ ભૂમિલાભઃ શ્રેયાન્

07.10.29 સ્થાલેયં હિ સુરોધાવમર્દાવસ્કન્દં અનિહ્શ્રાવિશત્રુ ચ

07.10.30 નદીદુર્ગં તુ દ્વિગુણક્લેશકરં, ઉદકં ચ પાતવ્યં વૃત્તિકરં ચામિત્રસ્ય

07.10.31 નદીપર્વતદુર્ગીયાભ્યાં નદીદુર્ગીયાદ્ બ્ભૂમિલાભઃ શ્રેયાન્

07.10.32 નદીદુર્ગં હિ હસ્તિસ્તમ્ભસઙ્ક્રમસેતુબન્ધનૌભિઃ સાધ્યં અનિત્યગામ્ભીર્યં અવસ્રાવ્યુદકં ચ

07.10.33 પાર્વતં તુ સ્વ્।આરક્ષં દુરુપરોધિ કૃચ્છ્રારોહણં, ભગ્ને ચ એકસ્મિન્ન સર્વવધઃ, શિલાવૃક્ષપ્રમોક્ષશ્ચ મહાઽપકારિણામ્

07.10.34 નિમ્નસ્થલયોધિભ્યો નિમ્નયોધિભ્યો ભૂમિલાભઃ શ્રેયાન્

07.10.35 નિમ્નયોધિનો હ્યુપરુદ્ધદેશકાલાઃ, સ્થલયોધિનઃ તુ સર્વદેશકાલયોધિનઃ

07.10.36 ખનકાકાશયોધિભ્યઃ ખનકેભ્યો ભૂમિલાભઃ શ્રેયાન્

07.10.37 ખનકા હિ ખાતેન શસ્ત્રેણ ચ ઉભયથા યુધ્યન્તે, શસ્ત્રેણ એવાકાશયોધિનઃ

07.10.38ab એવંવિધ્યેભ્યઃ પૃથિવીં લભમાનોઽર્થશાસ્ત્રવિત્ ।

07.10.38chd સંહિતેભ્યઃ પરેભ્યશ્ચ વિશેષં અધિગચ્છતિ (ઇતિ)

Chapt . મિત્રહિરણ્યભૂમિકર્મસંધયઃ - તત્ર અનવસિતસંધિઃ

07.11.01 ત્વં ચાહં ચ શૂન્યં નિવેશયાવહે ઇત્યનવસિતસન્ધિઃ

07.11.02 તયોર્યઃ પ્રત્યુપસ્થિતાર્થો યથા ઉક્તગુણાં ભૂમિં નિવેશયતિ સોઽતિસન્ધત્તે

07.11.03 તત્રાપિ સ્થલં ઔદકં વા ઇતિ મહતઃ સ્થલાદ્ અલ્પં ઔદકં શ્રેયઃ, સાતત્યાદ્ અવસ્થિતત્વાચ્ચ ફલાનામ્

07.11.04 સ્થલયોરપિ પ્રભૂતપૂર્વાપરસસ્યં અલ્પવર્ષપાકં અસક્તારમ્ભં શ્રેયઃ

07.11.05 ઔદકયોરપિ ધાન્યવાપં અધાન્યવાપાત્શ્રેયઃ

07.11.06 તયોરલ્પબહુત્વે ધાન્યકાન્તાદ્ અલ્પાન્ મહદ્ અધાન્યકાન્તં શ્રેયઃ

07.11.07 મહત્યવકાશે હિ સ્થાલ્યાશ્ચાનૂપ્યાશ્ચોષધયો ભવન્તિ

07.11.08 દુર્ગાદીનિ ચ કર્માણિ પ્રભૂત્યેન ક્રિયન્તે

07.11.09 કૃત્રિમા હિ ભૂમિગુણાઃ

07.11.10 ખનિધાન્યભોગયોઃ ખનિભોગઃ કોશકરઃ, ધાન્યભોગઃ કોશકોષ્ઠાગારકરઃ

07.11.11 ધાન્યમૂલા હિ દુર્ગાદીનાં કર્મણાં આરમ્ભાઃ

07.11.12 મહાવિષયવિક્રયો વા ખનિભોગઃ શ્રેયાન્

07.11.13 દ્રવ્યહસ્તિવનભોગયોર્દ્રવ્યવનભોગઃ સર્વકર્મણાં યોનિઃ પ્રભૂતનિધાનક્ષમશ્ચ, વિપરીતો હસ્તિવનભોગઃ ઇત્યાચાર્યાઃ

07.11.14 ન ઇતિ કૌટિલ્યઃ

07.11.15 શક્યં દ્રવ્યવનં અનેકં અનેકસ્યાં ભૂમૌ વાપયિતું, ન હસ્તિવનમ્

07.11.16 હસ્તિપ્રધાનો હિ પરાનીકવધ ઇતિ

07.11.17 વારિસ્થલપથભોગયોરનિત્યો વારિપથભોગઃ, નિત્યઃ સ્થલપથભોગઃ

07.11.18 ભિન્નમનુષ્યા શ્રેણીમનુષ્યા વા ભૂમિરિતિ ભિન્નમનુષ્યા શ્રેયસી

07.11.19 ભિન્નમનુષ્યા ભોગ્યા ભવતિ, અનુપજાપ્યા ચાન્યેષાં, અનાપત્સહા તુ

07.11.20 વિપરીતા શ્રેણીમનુષ્યા, કોપે મહાદોષા

07.11.21 તસ્યાં ચાતુર્વર્ણ્યનિવેશે સર્વભોગસહત્વાદ્ અવરવર્ણપ્રાયા શ્રેયસી, બાહુલ્યાદ્ ધ્રુવત્વાચ્ચ કૃષ્યાઃ કર્ષકવતી, કૃષ્યાશ્ચાન્યેષાં ચારમ્ભાણાં પ્રયોજકત્વાત્ ગોરક્ષકવતી, પણ્યનિચય।ઋણાનુગ્રહાદ્ આઢ્યવણિગ્વતી

07.11.22 ભૂમિગુણાનાં અપાશ્રયઃ શ્રેયાન્
07.11.23 દુર્ગાપાશ્રયા પુરુષાપાશ્રયા વા ભૂમિરિતિ પુરુષાપાશ્રયા શ્રેયસી
07.11.24 પુરુષવદ્ ધિ રાજ્યમ્
07.11.25 અપુરુષા ગૌર્વન્ધ્યેવ કિં દુહીત
07.11.26 મહાક્ષયવ્યયનિવેશાં તુ ભૂમિં અવામુકામઃ પૂર્વં એવ ક્રેતારં પણેત દુર્બલં અરાજબીજિનં નિરુત્સાહં અપક્ષં અન્યાયવૃત્તિં વ્યસનિનં દૈવપ્રમાણં યત્કિંચનકારિણં વા
07.11.27 મહાક્ષયવ્યયનિવેશાયાં હિ ભૂમૌ દુર્બલો રાજબીજી નિવિષ્ટઃ સગન્ધાભિઃ પ્રકૃતિભિઃ સહ ક્ષયવ્યયેનાવસીદતિ
07.11.28 બલવાન્ અરાજબીજી ક્ષયવ્યયભયાદ્ અસગન્ધાભિઃ પ્રકૃતિભિઃ ત્યજ્યતે
07.11.29 નિરુત્સાહઃ તુ દણ્ડવાન્ અપિ દણ્ડસ્યાપ્રણેતા સદણ્ડઃ ક્ષયવ્યયેનાવભજ્યતે
07.11.30 કોશવાન્ અપ્યપક્ષઃ ક્ષયવ્યયાનુગ્રહહીનત્વાન્ન કુતશ્ચિત્ પ્રાપ્નોતિ
07.11.31 અન્યાયવૃત્તિર્નિવિષ્ટં અપ્યુત્થાપયેત્
07.11.32 સ કથં અનિવિષ્ટં નિવેશયેત્
07.11.33 તેન વ્યસની વ્યાખ્યાતઃ
07.11.34 દૈવપ્રમાણો માનુષહીનો નિરારમ્ભો વિપન્નકર્મારમ્ભો વાઽવસીદતિ
07.11.35 યત્કિંચનકારી ન કિંચિદ્ આસાદયતિ
07.11.36 સ ચ એષાં પાપિષ્ઠતમો ભવતિ
07.11.37 યત્કિંચિદ્ । આરભમાણો હિ વિજિગીષોઃ કદાચિચ્છિદ્રં આસાદયેદ્ ઇત્યાચાર્યાઃ
07.11.38 યથા છિદ્રં તથા વિનાશં અપ્યાસાદયેદ્ ઇતિ કૌટિલ્યઃ
07.11.39 તેષાં અલાભે યથા પાર્ષ્ણિગ્રાહ ઉપગ્રહે વક્ષ્યામઃ તથા ભૂમિં અવસ્થાપયેત્
07.11.40 ઇત્યભિહિતસન્ધિઃ
07.11.41 ગુણવતીં આદેયાં વા ભૂમિં બલવતા ક્રયેણ યાચિતઃ સન્ધિં અવસ્થાપ્ય દદ્યાત્
07.11.42 ઇત્યનિભૃતસન્ધિઃ
07.11.43 સમેન વા યાચિતઃ કારણં અવેક્ષ્ય દદ્યાત્ પ્રત્યાદેયા મે ભૂમિર્વશ્યા વા, અનયા પ્રતિબદ્ધઃ પરો મે વશ્યો ભવિષ્યતિ ભૂમિવિક્રયાદ્ વા મિત્રહિરણ્યલાભઃ કાર્યસામર્થ્યકરો મે ભવિષ્યતિ ઇતિ
07.11.44 તેન હીનઃ ક્રેતા વ્યાખ્યાતઃ
07.11.45ab એવં મિત્રં હિરણ્યં ચ સજનાં અજનાં ચ ગામ્ ।
07.11.45chd લભમાનોઽતિસન્ધત્તે શાસ્ત્રવિત્ સામવાયિકાન્ (ઇતિ)

Chapt . મિત્રહિરણ્યભૂમિકર્મસંધયઃ, તત્ર કર્મસંધિઃ

07.12.01 ત્વં ચાહં ચ દુર્ગં કારયાવહે ઇતિ કર્મસન્ધિઃ
07.12.02 તયોર્યો દૈવકૃતં અવિષહ્યં અલ્પવ્યયારમ્ભં દુર્ગં કારયતિ સોઽતિસન્ધત્તે
07.12.03 તત્રાપિ સ્થલનદીપર્વતદુર્ગાણાં ઉત્તર ઉત્તરં શ્રેયઃ

07.12.04 સેતુબન્ધયોરપ્યાહાર્ય ઉદકાત્ સહ ઉદકઃ શ્રેયાન્

07.12.05 સહ ઉદકયોરપિ પ્રભૂતવાપસ્થાનઃ શ્રેયાન્

07.12.06 દ્રવ્યવનયોરપિ યો મહત્સારવદ્દ્રવ્યાટવીકં વિષયાન્તે નદીમાતૃકં દ્રવ્યવનં છેદયતિ સોઽતિસન્ધત્તે

07.12.07 નદીમાતૃકં હિ સ્વ્।આજીવં અપાશ્રયશ્ચાપદિ ભવતિ

07.12.08 હસ્તિવનયોરપિ યો બહુશૂરમૃગં દુર્બલપ્રતિવેશંઽનન્તાવક્લેશિ વિષયાન્તે હસ્તિવનં બધ્નાતિ સોઽતિસન્ધત્તે

07.12.09 તત્રાપિ બહુકુણ્ઠાલ્પશૂરયોઃ અલ્પશૂરં શ્રેયઃ, શૂરેષુ હિ યુદ્ધં, અલ્પાઃ શૂરા બહૂન્ અશૂરાન્ ભઞ્જન્તિ, તે ભગ્નાઃ સ્વસૈન્યાવઘાતિનો ભવન્તિ ઇત્યાચાર્યાઃ

07.12.10 ન ઇતિ કૌટિલ્યઃ

07.12.11 કુણ્ઠા બહવઃ શ્રેયાંસઃ, સ્કન્ધવિનિયોગાદ્ અનેકં કર્મ કુર્વાણાઃ સ્વેષાં અપાશ્રયો યુદ્ધે, પરેષાં દુર્ધર્ષા વિભીષણાશ્ચ

07.12.12 બહુષુ હિ કુણ્ઠેષુ વિનયકર્મણા શક્યં શૌર્યં આધાતું, ન ત્વેવાલ્પેષુ શૂરેષુ બહુત્વં ઇતિ

07.12.13 ખન્યોરપિ યઃ પ્રભૂતસારાં અદુર્ગમાર્ગાં અલ્પવ્યયારમ્ભાં ખનિં ખાનયતિ, સોઽતિસન્ધત્તે

07.12.14 તત્રાપિ મહાસારં અલ્પં અલ્પસારં વા પ્રભૂતં ઇતિ મહાસારં અલ્પં શ્રેયઃ, વજ્રમણિમુક્તાપ્રવાલહેમરૂપ્યધાતુર્હિ પ્રભૂતં અલ્પસારં અત્યર્ઘેણ ગ્રસતે ઇત્યાચાર્યાઃ

07.12.15 ન ઇતિ કૌટિલ્યઃ

07.12.16 ચિરાદ્ અલ્પો મહાસારસ્ય ક્રેતા વિદ્યતે, પ્રભૂતઃ સાતત્યાદ્ અલ્પસારસ્ય

07.12.17 એતેન વણિક્પથો વ્યાખ્યાતઃ

07.12.18 તત્રાપિ વારિસ્થલપથયોર્વારિપથઃ શ્રેયાન્, અલ્પવ્યયવ્યાયામઃ પ્રભૂતપણ્ય ઉદયશ્ચ ઇત્યાચાર્યાઃ

07.12.19 ન ઇતિ કૌટિલ્યઃ

07.12.20 સમ્રુદ્ધગતિરસાર્વકાલિકઃ પ્રકૃષ્ટભયયોનિર્નિષ્પ્રતીકારશ્ચ વારિપથઃ, વિપરીતઃ સ્થલપથઃ

07.12.21 વારિપથે તુ કૂલસમ્યાનપથયોઃ કૂલપથઃ પણ્યપત્તનબાહુલ્યાત્શ્રેયાન્, નદીપથો વા, સાતત્યાદ્ વિષહ્યાબાધત્વાચ્ચ

07.12.22 સ્થલપથેઽપિ હૈમવતો દક્ષિણાપથાત્શ્રેયાન્, હસ્ત્ય્ઽશ્વગન્ધદન્તાજિનરૂપ્યસુવર્ણપણ્યાઃ સારવત્તરાઃ ઇત્યાચાર્યાઃ

07.12.23 ન ઇતિ કૌટિલ્યઃ

07.12.24 કમ્બલાજિનાશ્વપણ્યવર્જાઃ શઙ્ખવજ્રમણિમુક્તાસુવર્ણપણ્યાશ્ચ પ્રભૂતતરા દક્ષિણાપથે

07.12.25 દક્ષિણાપથેઽપિ બહુખનિઃ સારપણ્યઃ પ્રસિદ્ધગતિરલ્પવ્યયવ્યાયામો વા વણિક્પથઃ શ્રેયાન્, પ્રભૂતવિષયો વા ફલ્ગુપુણ્યઃ

07.12.26 તેન પૂર્વઃ પશ્ચિમશ્ચ વણિક્પથો વ્યાખ્યાતઃ

07.12.27 તત્રાપિ ચક્રપાદપથયોશ્ચક્રપથો વિપુલારમ્ભત્વાત્શ્રેયાન્, દેશકાલસમ્ભાવનો વા ખર ઉષ્ટ્રપથઃ

07.12.28 આભ્યાં અંસપથો વ્યાખ્યાતઃ

07.12.29 પરકર્મ ઉદયો નેતુઃ ક્ષયો વૃદ્ધિર્વિપર્યયે

07.12.30 તુલ્યે કર્મપથે સ્થાનં જ્ઞેયં સ્વં વિજિગીષુણા

07.12.31 અલ્પાગમાતિવ્યયતા ક્ષયો વૃદ્ધિર્વિપર્યયે

07.12.32 સમાયવ્યયતા સ્થાનં કર્મસુ જ્ઞેયં આત્મનઃ

07.12.33 તસ્માદ્ અલ્પવ્યયારમ્ભં દુર્ગાદિષુ મહા ઉદયમ્

07.12.34 કર્મ લબ્ધ્વા વિશિષ્ટઃ સ્યાદ્ ઇત્યુક્તાઃ કર્મસન્ધયઃ (ઇતિ)

Chapt . પાર્ષ્ણિગ્રાહ્ચિન્તા

07.13.01 સંહત્યારિવિજિગીષ્વોરમિત્રયોઃ પરાભિયોગિનોઃ પાર્ષ્ણિં ગૃહ્ણતોર્યઃ શક્તિસમ્પન્નસ્ય પાર્ષ્ણિં ગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.13.02 શક્તિસમ્પન્નો હ્યમિત્રં ઉચ્છિદ્ય પાર્ષ્ણિગ્રાહં ઉચ્છિન્દ્યાત્, ન હીનશક્તિરલબ્ધલાભઃ

07.13.03 શક્તિસામ્યે યો વિપુલારમ્ભસ્ય પાર્ષ્ણિં ગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.13.04 વિપુલારમ્ભો હ્યમિત્રં ઉચ્છિદ્ય પાર્ષ્ણિગ્રાહં ઉચ્છિન્દ્યાત્, નાલ્પારમ્ભઃ સક્તચક્રઃ

07.13.05 આરમ્ભસામ્યે યઃ સર્વસન્દોહેન પ્રયાતસ્ય પાર્ષ્ણિં ગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.13.06 શૂન્યમૂલો હ્યસ્ય સુકરો ભવતિ, નૈકદેશબલપ્રયાતઃ કૃતપાર્ષ્ણિપ્રતિવિધાનઃ

07.13.07 બલ ઉપાદાનસામ્યે યશ્ચલામિત્રં પ્રયાતસ્ય પાર્ષ્ણિં ગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.13.08 ચલામિત્રં પ્રયાતો હિ સુખેનાવાપ્તસિદ્ધિઃ પાર્ષ્ણિગ્રાહં ઉચ્છિન્દ્યાત્, ન સ્થિતામિત્રં પ્રયાતઃ

07.13.09 અસૌ હિ દુર્ગપ્રતિહતઃ પાર્ષ્ણિગ્રાહે ચ પ્રતિનિવૃત્તઃ સ્થિતેનામિત્રેણાવગૃહ્યતે

07.13.10 તેન પૂર્વે વ્યાખ્યાતાઃ

07.13.11 શત્રુસામ્યે યો ધાર્મિકાભિયોગિનઃ પાર્ષ્ણિં ગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.13.12 ધાર્મિકાભિયોગી હિ સ્વેષાં પરેષાં ચ દ્વેષ્યો ભવતિ, અધાર્મિકાભિયોગી સમ્પ્રિયઃ

07.13.13 તેન મૂલહરતાદાત્વિકકદર્યાભિયોગિનાં પાર્ષ્ણિગ્રહણં વ્યાખ્યાતમ્

07.13.14 મિત્રાભિયોગિનોઃ પાર્ષ્ણિગ્રહણે ત એવ હેતવઃ

07.13.15 મિત્રં અમિત્રં ચાભિયુઞ્જાનયોર્યો મિત્રાભિયોગિનઃ પાર્ષ્ણિં ગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.13.16 મિત્રાભિયોગી હિ સુખેનાવાપ્તસિદ્ધિઃ પાર્ષ્ણિગ્રાહં ઉચ્છિન્દ્યાત્

07.13.17 સુકરો હિ મિત્રેણ સન્ધિર્નામિત્રેણ

07.13.18 મિત્રં અમિત્રં ચ ઉદ્ધરતોર્યોઽમિત્ર ઉદ્ધારિણઃ પાર્ષ્ણિં ગૃહ્ણાતિ સોઽતિસન્ધત્તે

07.13.19 વૃદ્ધમિત્રો હ્યમિત્ર ઉદ્ધારી પાર્ષ્ણિગ્રાહં ઉચ્છિન્દ્યાત્, ન ઇતરઃ સ્વપક્ષ ઉપઘાતી

07.13.20 તયોરલબ્ધલાભાપગમને યસ્યામિત્રો મહતો લાભાદ્ વિયુક્તઃ ક્ષયવ્યયાધિકો વા સ પાર્ષ્ણિગ્રાહોઽતિસન્ધત્તે

07.13.21 લબ્ધલાભાપગમને યસ્યામિત્રો લાભેન શક્ત્યા હીનઃ સ પાર્ષ્ણિગ્રાહોઽતિસન્ધત્તે, યસ્ય વા યાતવ્યઃ શત્રોર્વિગ્રહાપકારસમર્થઃ સ્યાત્

07.13.22 પાર્ષ્ણિગ્રાહયોરપિ યઃ શક્યારમ્ભબલ ઉપાદાનાધિકઃ સ્થિતશત્રુઃ પાર્શ્વસ્થાયી વા સોઽતિસન્ધત્તે

07.13.23 પાર્શ્વસ્થાયી હિ યાતવ્યાભિસારો મૂલાબાધકશ્ચ ભવતિ, મૂલાબાધક એવ પશ્ચાત્સ્થાયી
07.13.24ab પાર્ષ્ણિગ્રાહાઃ ત્રયો જ્ઞેયાઃ શત્રોશ્ચેષ્ટાનિરોધકાઃ ।
07.13.24chd સામન્તઃ પૃષ્ઠતો વર્ગઃ પ્રતિવેશૌ ચ પાર્શ્વયોઃ
07.13.25ab અરેર્નેતુશ્ચ મધ્યસ્થો દુર્બલોઽન્તર્ધિરુચ્યતે ।
07.13.25chd પ્રતિઘાતો બલવતો દુર્ગાટવ્યૢઽપસારવાન્
07.13.26 મધ્યમં ત્વરિવિજિગીષ્વોર્લિપ્સમાનયોર્મધ્યમસ્ય પાર્ષ્ણિં ગૃહ્ણતોર્લબ્ધલાભાપગમને યો મધ્યમં મિત્રાદ્ વિયોજયત્યમિત્રં ચ મિત્રં આપ્નોતિ સોઽતિસન્ધત્તે
07.13.27 સન્ધેયશ્ચ શત્રુરુપકુર્વાણો, ન મિત્રં મિત્રભાવાદ્ ઉત્ક્રાન્તમ્
07.13.28 તેન ઉદાસીનલિપ્સા વ્યાખ્યાતા
07.13.29 પાર્ષ્ણિગ્રહણાભિયાનયોઃ તુ મન્ત્રયુદ્ધાદ્ અભ્યુચ્ચયઃ
07.13.30 વ્યાયામયુદ્ધે હિ ક્ષયવ્યયાભ્યાં ઉભયોરવૃદ્ધિઃ
07.13.31 જિત્વાઽપિ હિ ક્ષિણદણ્ડકોશઃ પરાજિતો ભવતિ ઇત્યાચાર્યાઃ
07.13.32 ન ઇતિ કૌટિલ્યઃ
07.13.33 સુમહતાઽપિ ક્ષયવ્યયેન શત્રુવિનાશોઽભ્યુપગન્તવ્યઃ
07.13.34 તુલ્યે ક્ષયવ્યયે યઃ પુરસ્તાદ્ દૂષ્યબલં ઘાતયિત્વા નિહ્શલ્યઃ પશ્ચાદ્ વશ્યબલો યુધ્યેત સોઽતિસન્ધત્તે
07.13.35 દ્વયોરપિ પુરસ્તાદ્ દૂષ્યબલઘાતિનોર્યો બહુલતરં શક્તિમત્તરં અત્યન્તદૂષ્યં ચ ઘાતયેત્ સોઽતિસન્ધત્તે
07.13.36 તેનામિત્રાટવીબલઘાતો વ્યાખ્યાતઃ
07.13.37ab પાર્ષ્ણિગ્રાહોઽભિયોક્તા વા યાતવ્યો વા યદા ભવેત્ ।
07.13.37chd વિજિગીષુઃ તદા તત્ર નેત્રં એતત્ સમાચરેત્
07.13.38ab પાર્ષ્ણિગ્રાહો ભવેન્નેતા શત્રોર્મિત્રાભિયોગિનઃ ।
07.13.38chd વિગ્રાહ્ય પૂર્વં આક્રન્દં પાર્ષ્ણિગ્રાહાભિસારિણા
07.13.39ab આક્રન્દેનાભિયુઞ્જાનઃ પાર્ષ્ણિગ્રાહં નિવારયેત્ ।
07.13.39chd તથાઽઽક્રન્દાભિસારેણ પાર્ષ્ણિગ્રાહાભિસારિણમ્
07.13.40ab અરિમિત્રેણ મિત્રં ચ પુરસ્તાદ્ અવઘટ્ટયેત્ ।
07.13.40chd મિત્રમિત્રં અરેશ્ચાપિ મિત્રમિત્રેણ વારયેત્
07.13.41ab મિત્રેણ ગ્રાહયેત્ પાર્ષ્ણિં અભિયુક્તોઽભિયોગિનઃ ।
07.13.41chd મિત્રમિત્રેણ ચાક્રન્દં પાર્ષ્ણિગ્રાહાન્નિવારયેત્
07.13.42ab એવં મણ્ડલં આત્માર્થં વિજિગીષુર્નિવેશયેત્ ।
07.13.42chd પૃષ્ઠતશ્ચ પુરસ્તાચ્ચ મિત્રપ્રકૃતિસમ્પદા
07.13.43ab કૃત્સ્ને ચ મણ્ડલે નિત્યં દૂતાન્ ગૂઢાંશ્ચ વાસયેત્ ।
07.13.43chd મિત્રભૂતઃ સપત્નાનાં હત્વા હત્વા ચ સંવૃતઃ
07.13.44ab અસંવૃતસ્ય કાર્યાણિ પ્રાપ્તાન્યપિ વિશેષતઃ ।

07.13.44chd નિહ્સંશયં વિપદ્યન્તે ભિન્નપ્લવ ઇવ ઉદધૌ (ઇતિ)

Chapt . હીનશક્તિપૂરણમ્

07.14.01 સામવાયિકૈરેવં અભિયુક્તો વિજિગીષુર્યઃ તેષાં પ્રધાનઃ તં બ્રૂયાત્ ત્વયા મે સન્ધિઃ, ઇદં હિરણ્યં, અહં ચ મિત્રં, દ્વિગુણા તે વૃદ્ધિઃ, નાર્હસ્યાત્મક્ષયેણ મિત્રમુખાન્ અમિત્રાન્ વર્ધયિતું, એતે હિ વૃદ્ધાઃ ત્વાં એવ પરિભવિષ્યન્તિ ઇતિ

07.14.02 ભેદં વા બ્રૂયાત્ અનપકારો યથાઽહં એતૈઃ સમ્ભૂયાભિયુક્તઃ તથા ત્વાં અપ્યેતે સંહિતબલાઃ સ્વસ્થા વ્યસને વાઽભિયોક્ષ્યન્તે, બલં હિ ચિત્તં વિકરોતિ, તદ્ એષાં વિઘાતય ઇતિ

07.14.03 ભિન્નેષુ પ્રધાનં ઉપગૃહ્ય હીનેષુ વિક્રમયેત્, હીનાન્ અનુગ્રાહ્ય વા પ્રધાને, યથા વા શ્રેયોઽભિમન્યેત તથા

07.14.04 વૈરં વા પરૈર્ગ્રાહયિત્વા વિસંવાદયેત્

07.14.05 ફલભૂયસ્ત્વેન વા પ્રધાનં ઉપજાપ્ય સન્ધિં કારયેત્

07.14.06 અથ ઉભયવેતનાઃ ફલભૂયસ્ત્વં દર્શયન્તઃ સામવાયિકાન્ અતિસંહિતાઃ સ્થ ઇત્યુદ્દૂષયેયુઃ

07.14.07 દુષ્ટેષુ સન્ધિં દૂષયેત્

07.14.08 અથ ઉભયવેતના ભૂયો ભેદં એષાં કુર્યુઃ એવં તદ્ યદ્ અસ્માભિર્દર્શિતમ્ ઇતિ

07.14.09 ભિન્નેષ્વન્યતમ ઉપગ્રહેણ ચેષ્ટેત

07.14.10 પ્રધાનાભાવે સામવાયિકાનાં ઉત્સાહયિતારં સ્થિરકર્માણં અનુરક્તપ્રકૃક્તિં લોભાદ્ ભયાદ્ વા સઙ્ઘાતં ઉપાગતં વિજિગીષોર્ભીતં રાજ્યપ્રતિસમ્બદ્ધં મિત્રં ચલામિત્રં વા પૂર્વાન્ ઉત્તરાભાવે સાધયેત્ - ઉત્સાહયિતારં આત્મનિસર્ગેણ, સ્થિરકર્માણં સાન્ત્વપ્રણિપાતેન, અનુરક્તપ્રકૃતિં કન્યાદાનયાપનાભ્યાં, લુબ્ધં અંશદ્વૈગુણ્યેન, ભીતં એભ્યઃ કોશદણ્ડાનુગ્રહેણ, સ્વતો ભીતં વિશ્વાસ્ય પ્રતિભૂપ્રદાનેન, રાજ્યપ્રતિસમ્બદ્ધં એકીભાવ ઉપગમનેન, મિત્રં ઉભયતઃ પ્રિયહિતાભ્યાં, ઉપકારત્યાગેન વા, ચલામિત્રં અવધૃતં અનપકાર ઉપકારાભ્યામ્

07.14.11 યો વા યથાઽયોગં ભજેત તં તથા સાધયેત્, સામદાનભેદદણ્ડૈર્વા યથાઽઽપત્સુ વ્યાખ્યાસ્યામઃ

07.14.12 વ્યસન ઉપઘાતત્વરિતો વા કોશદણ્ડાભ્યાં દેશે કાલે કાર્યે વાઽવધૃતં સન્ધિં ઉપેયાત્

07.14.13 કૃતસન્ધિર્હીનં આત્માનં પ્રતિકુર્વીત

07.14.14 પક્ષે હીનો બન્ધુમિત્રપક્ષં કુર્વીત, દુર્ગં અવિષહ્યં વા

07.14.15 દુર્ગમિત્રપ્રતિષ્ટબ્ધો હિ સ્વેષાં પરેષાં ચ પૂજ્યો ભવતિ

07.14.16 મન્ત્રશક્તિહીનઃ પ્રાજ્ઞપુરુષ ઉપચયં વિદ્યાવૃદ્ધસમ્યોગં વા કુર્વીત

07.14.17 તથા હિ સદ્યઃ શ્રેયઃ પ્રાપ્નોતિ

07.14.18 પ્રભાવહીનઃ પ્રકૃતિયોગક્ષેમસિદ્ધૌ યતેત

07.14.19 જનપદઃ સર્વકર્મણાં યોનિઃ, તતઃ પ્રભાવઃ

07.14.20 તસ્ય સ્થાનં આત્મનશ્ચાપદિ દુર્ગમ્

07.14.21 સેતુબન્ધઃ સસ્યાનાં યોનિઃ

07.14.22 નિત્યાનુષક્તો હિ વર્ષગુણલાભઃ સેતુવાપેષુ

07.14.23 વણિક્પથઃ પરાતિસન્ધાનસ્ય યોનિઃ

07.14.24 વણિક્પથેન હિ દણ્ડગૂઢપુરુષાતિનયનં શસ્ત્રાવરણયાનવાહનક્રયશ્ચ ક્રિયતે, પ્રવેશો નિર્ણયનં ચ

07.14.25 ખનિઃ સઙ્ગ્રામ ઉપકરણાનાં યોનિઃ, દ્રવ્યવનં દુર્ગકર્મણાં યાનરથયોશ્ચ, હસ્તિવનં હસ્તિનાં, ગવાશ્વખર ઉષ્ટ્રાણાં ચ વ્રજઃ

07.14.26 તેષાં અલાભે બન્ધુમિત્રકુલેભ્યઃ સમાર્જનમ્

07.14.27 ઉત્સાહહીનઃ શ્રેણીપ્રવીરપુરુષાણાં ચોરગણાટવિકમ્લેચ્છજાતીનાં પરાપકારિણાં ગૂઢપુરુષાણાં ચ યથાલાભ્ભં ઉપચયં કુર્વીત

07.14.28 પરમિશ્રાપ્રતીકારં આબલીયસં વા પરેષુ પ્રયુઞ્જીત

07.14.29ab એવં પક્ષેણ મન્ત્રેણ દ્રવ્યેણ ચ બલેન ચ ।

07.14.29chd સમ્પન્નઃ પ્રતિનિર્ગચ્છેત્ પરાવગ્રહં આત્મનઃ (ઇતિ)

Chapt . વિગૃહ્ય ઉપરોધહેતવઃ - દણ્ડ ઉપનતવૃત્તમ્

07.15.01 દુર્બલો રાજા બલવતાઽભિયુક્તઃ તદ્વિશિષ્ટબલં આશ્રયેત યં ઇતરો મન્ત્રશક્ત્યા નાતિસન્દધ્યાત્

07.15.02 તુલ્યમન્ત્રશક્તીનાં આયત્તસમ્પદો વૃદ્ધસમ્યોગાદ્ વા વિશેષઃ

07.15.03 વિશિષ્ટબલાભાવે સમબલૈઃ તુલ્યબલસઙ્ઘૈર્વા બલવતઃ સમ્ભૂય તિષ્ઠેદ્ યાન્ન મન્ત્રપ્રભાવશક્તિભ્યાં અતિસન્દધ્યાત્

07.15.04 તુલ્યમન્ત્રપ્રભાવશક્તીનાં વિપુલારમ્ભતો વિશેષઃ

07.15.05 સમબલાભાવે હીનબલૈઃ શુચિભિરુત્સાહિભિઃ પ્રત્યનીકભૂતૈર્બલવતઃ સમ્ભૂય તિષ્ઠેદ્ યાન્ન મન્ત્રપ્રભાવ ઉત્સાહશક્તિભિરતિસન્દધ્યાત્

07.15.06 તુલ્ય ઉત્સાહશક્તીનાં સ્વયુદ્ધભૂમિલાભાદ્ વિશેષઃ

07.15.07 તુલ્યભૂમીનાં સ્વયુદ્ધકાલલાભાદ્ વિશેષઃ

07.15.08 તુલ્યદેશકાલાનાં યુગ્યશસ્ત્રાવરણતો વિશેષઃ

07.15.09 સહાયાભાવે દુર્ગં આશ્રયેત યત્રામિત્રઃ પ્રભૂતસૈન્યોઽપિ ભક્તયવસ ઇન્ધન ઉદક ઉપરોધં ન કુર્યાત્ સ્વયં ચ ક્ષયવ્યયાભ્યાં યુજ્યેત

07.15.10 તુલ્યદુર્ગાણાં નિચયાપસારતો વિશેષઃ

07.15.11 નિચયાપસારસમ્પન્નં હિ મનુષ્યદુર્ગં ઇચ્છેદ્ ઇતિ કૌટિલ્યઃ

07.15.12a તદ્ એભિઃ કાર્ણૈરાશ્રયેત - પાર્ષ્ણિગ્રાહં આસારં મધ્યમં ઉદાસીનં વા પ્રતિપાદયિષ્યામિ, સામન્તાટવિકતત્કુલીનાપરુદ્ધાનાં અન્યતમેનાસ્ય રાજ્યં હારયિષ્યામિ ઘાતયિષ્યામિ વા -

07.15.12b કૃત્યપક્ષ ઉપગ્રહેણ વાઽસ્ય દુર્ગે રાષ્ટ્રે સ્કન્ધાવારે વા કોપં સમુત્થાપયિષ્યામિ, શસ્ત્રાગ્નિરસપ્રણિધાનૈરૌપનિષદિકૈર્વા યથા ઇષ્ટં આસન્નં હનિષ્યામિ -

07.15.12ch સ્વયંઽધિષ્ઠિતેન વા યોગપ્રણિધાનેન ક્ષયવ્યયં એનં ઉપનેષ્યામિ, ક્ષયવ્યયપ્રવાસ ઉપતપ્તે વાઽસ્ય મિત્રવર્ગે સૈન્યે વા ક્રમેણ ઉપજાપં પ્રાપ્સ્યામિ -

07.15.12d વીવધાસારપ્રસારવધેન વાડસ્ય સ્કન્ધાવારાવગ્રહં કરિષ્યામિ, દણ્ડ ઉપનયેન વાડસ્ય રન્ધ્રં ઉત્થાપ્ય સર્વસન્દોહેન પ્રહરિષ્યામિ, પ્રતિહત ઉત્સાહેન વા યથા ઇષ્ટ સન્ધિં અવાપ્સ્યામિ, મયિ પ્રતિબદ્ધસ્ય વા સર્વતઃ કોપાઃ સમુત્થાસ્યન્તિ -

07.15.12e નિરાસારં વાડસ્ય મૂલં મિત્રાટવીદણ્ડૈરુદ્ઘાતયિષ્યામિ, મહતો વા દેશસ્ય યોગક્ષેમં ઇહસ્થઃ પાલયિષ્યામિ, સ્વવિક્ષિપ્તં મિત્રવિક્ષિપ્તં વા મે સૈન્યં ઇહસ્થસ્ય એકસ્થં અવિષહ્યં ભવિષ્યતિ, નિમ્નખાતરાત્રિયુદ્ધવિશારદં વા મે સૈન્યં પથ્યાબાધમુક્તં આસન્ને કર્મ કરિષ્યતિ -

07.15.12f વિરુદ્ધદેશકાલં ઇહાગતો વા સ્વયં એવ ક્ષયવ્યયાભ્યાં ન ભવિષ્યતિ, મહાક્ષયવ્યયાભિગમ્યોડયં દેશો દુર્ગાટવ્યૃડપસારબાહુલ્યાત્ -

07.15.12g પરેષાં વ્યાધિપ્રાયઃ સૈન્યવ્યાયામાનાં અલબ્ધભૌમશ્ચ, તં આપદ્ગતઃ પ્રવેક્ષ્યતિ, પ્રવિષ્ટો વા ન નિર્ગમિષ્યતિ ઇતિ

07.15.13 કારણાભાવે બલસમુચ્છ્રયે વા પરસ્ય દુર્ગં ઉન્મુચ્યાપગચ્છેત્

07.15.14 અગ્નિપતઙ્ગવદ્ અમિત્રે વા પ્રવિશેત્

07.15.15 અન્યતરસિદ્ધિર્હિ ત્યક્તાત્મનો ભવતિ ઇત્યાચાર્યાઃ

07.15.16 ન ઇતિ કૌટિલ્યઃ

07.15.17 સન્ધેયતાં આત્મનઃ પરસ્ય ચ ઉપલભ્ય સન્દધીત

07.15.18 વિપર્યયે વિક્રમેણ સન્ધિં અપસારં વા લિપ્સેત

07.15.19 સન્ધેયસ્ય વા દૂતં પ્રેષયેત્

07.15.20 તેન વા પ્રેષિતં અર્થમાનાભ્યાં સત્કૃત્ય બ્રૂયાત્ ઇદં રાજ્ઞઃ પણ્યાગારં, ઇદં દેવીકુમારાણાં, દેવીકુમારવચનાત્, ઇદં રાજ્યં અહં ચ ત્વદ્ડર્પણઃ ઇતિ

07.15.21 લબ્ધસંશ્રયઃ સમયાચારિકવદ્ ભર્તરિ વર્તેત

07.15.22 દુર્ગાદીનિ ચ કર્માણિ આવાહવિવાહપુત્રાભિષેકાશ્વપણ્યહસ્તિગ્રહણસત્રયાત્રાવિહારગમનાનિ ચાનુજ્ઞાતઃ કુર્વીત

07.15.23 સ્વભૂમ્યૃડવસ્થિતપ્રકૃતિસન્ધિં ઉપઘાતં અપસૃતેષુ વા સર્વં અનુજ્ઞાતઃ કુર્વીત

07.15.24 દુષ્ટપૌરજાનપદો વા ન્યાયવૃત્તિરન્યાં ભૂમિં યાચેત

07.15.25 દૂષ્યવદ્ ઉપાંશુદણ્ડેન વા પ્રતિકુર્વીત

07.15.26 ઉચિતાં વા મિત્રાદ્ ભૂમિં દીયમાનાં ન પ્રતિગૃહ્ણીયાત્

07.15.27 મન્ત્રિપુરોહિતસેનાપતિયુવરાજાનાં અન્યતમં અદૃશ્યમાને ભર્તરિ પશ્યેત્, યથાશક્તિ ચ ઉપકુર્યાત્

07.15.28 દૈવતસ્વસ્તિવાચનેષુ તત્પરા આશિષો વાચયેત્

07.15.29 સર્વત્રાત્મનિસર્ગં ગુણં બ્રૂયાત્

07.15.30ab સમ્યુક્તબલવત્સેવી વિરુદ્ધઃ શઙ્કિતાદિભિઃ ।

07.15.30chd વર્તેત દણ્ડ ઉપનતો ભર્તર્યેવં અવસ્થિતઃ (ઇતિ)

Chapt . દણ્ડ ઉપનાયિવૃત્તમ્

07.16.01 અનુજ્ઞાતસન્ધિપણ ઉદ્વેગકરં બલવાન્ વિજિગીષમાણો યતઃ સ્વભૂમિઃ સ્વ। ઋતુવૃત્તિશ્ચ સ્વસૈન્યાનાં, અદુર્ગાપસારઃ શત્રુર્ઽપાર્ષ્ણિરનાસારશ્ચ, તતો યાયાત્

07.16.02 વિપર્યયે કૃતપ્રતીકારો યાયાત્

07.16.03 સામદાનાભ્યાં દુર્બલાન્ ઉપનમયેત્, ભેદદણ્ડાભ્યાં બલવતઃ

07.16.04 નિયોગવિકલ્પસમુચ્ચયૈશ્ચ ઉપાયાનાં અનન્તર એકાન્તરાઃ પ્રકૃતીઃ સાધયેત્

07.16.05 ગ્રામારણ્ય ઉપજીવિવ્રજવણિક્પથાનુપાલનં ઉજ્ઝિતાપસૃતાપકારિણાં ચાર્પણં ઇતિ સાન્ત્વં આચરેત્

07.16.06 ભૂમિદ્રવ્યકન્યાદાનં અભયસ્ય ચ ઇતિ દાનં આચરેત્

07.16.07 સામન્તાટવિકતત્કુલીનાપરુદ્ધાનાં અન્યતમ ઉપગ્રહેણ કોશદણ્ડભૂમિદાયયાચનં ઇતિ ભેદં આચરેત્

07.16.08 પ્રકાશકૂટતૂષ્ણીંયુદ્ધદુર્ગલમ્ભ ઉપાયૈરમિત્રપ્રગ્રહણં ઇતિ દણ્ડં આચરેત્

07.16.09 એવં ઉત્સાહવતો દણ્ડ ઉપકારિણઃ સ્થાપયેત્, સ્વપ્રભાવવતઃ કોશ ઉપકારિણઃ, પ્રજ્ઞાવતો ભૂમ્ય્। ઉપકારિણઃ

07.16.10 તેષાં પણ્યપત્તનગ્રામખનિસઞ્જાતેન રત્નસારફલ્ગુકુપ્યેન દ્રવ્યહસ્તિવનવ્રજસમુત્થેન યાનવાહનેન વા યદ્ બહુશ ઉપકરોતિ તચ્ચિત્રભોગમ્

07.16.11 યદ્ દણ્ડેન કોશેન વા મહદ્ ઉપકરોતિ તન્ મહાભોગમ્

07.16.12 યદ્ દણ્ડકોશભૂમીભિરુપકરોતિ તત્ સર્વભોગમ્

07.16.13 યદ્ અમિત્રં એકતઃ પ્રતિકરોતિ તદ્ એકતોભોગિ

07.16.14 યદ્ અમિત્રં આસારં ચ ઉભયતઃ પ્રતિકરોતિ તદ્ ઉભયતોભોગિ

07.16.15 યદ્ અમિત્રાસારપ્રતિવેશાટવિકાન્ સર્વતઃ પ્રતિકરોતિ તત્ સર્વતોભોગિ

07.16.16a પાર્ષ્ણિગ્રાહશ્ચાટવિકઃ શત્રુમુખ્યઃ શત્રુર્વા ભૂમિદાનસાધ્યઃ કશ્ચિદ્ આસાદ્યેત, નિર્ગુણયા ભૂમ્યા એનં ઉપગ્રાહયેત્, અપ્રતિસમ્બદ્ધયા દુર્ગસ્થં, નિરુપજીવ્યયાઽઽટવિકં -

07.16.16b પ્રત્યાદેયયા તત્કુલીનં શત્રોઃ, અપચ્છિન્નયા શત્રોરપરુદ્ધં નિત્યામિત્રયા શ્રેણીબલં, બલવત્સામન્તયા સંહતબલં, ઉભાભ્યાં યુદ્ધે પ્રતિલોમં, -

07.16.16ch અલબ્ધવ્યાયામયા ઉત્સાહિનં, શૂન્યયાઽરિપક્ષીયં, કર્શિતયાઽપવાહિતં, મહાક્ષયવ્યયનિવેશયા ગતપ્રત્યાગતં, અનપાશ્રયયા પ્રત્યપસૃતં, પરેણાનધિવાસ્યયા સ્વયં એવ ભર્તારં ઉપગ્રાહયેત્

07.16.17 તેષાં મહા ઉપકારં નિર્વિકારં ચાનુવર્તયેત્

07.16.18 પ્રતિલોમં ઉપાંશુના સાધયેત્

07.16.19 ઉપકારિણં ઉપકારશક્ત્યા તોષયેત્

07.16.20 પ્રયાસતશ્ચાર્થમાનૌ કુર્યાદ્, વ્યસનેષુ ચાનુગ્રહમ્

07.16.21 સ્વયં। આગતાનાં યથા ઇષ્ટદર્શનં પ્રતિવિધાનં ચ કુર્યાત્

07.16.22 પરિભવ ઉપઘાતકુત્સાતિવાદાંશ્ચ એષુ ન પ્રયુઞ્જીત

07.16.23 દત્ત્વા ચાભયં પિતા ઇવાનુગૃહ્ણીયાત્

07.16.24 યશ્ચાસ્યાપકુર્યાત્ તદ્ દોષં અભિવિખ્યાપ્ય પ્રકાશં એનં ઘાતયેત્

07.16.25 પર ઉદ્વેગકારણાદ્ વા દાણ્ડકર્મિકવચ્ચેષ્ટેત

07.16.26 ન ચ હતસ્ય ભૂમિદ્રવ્યપુત્રદારાન્ અભિમન્યેત

07.16.27 કુલ્યાન્ અપ્યસ્ય સ્વેષુ પાત્રેષુ સ્થાપયેત્

07.16.28 કર્મણિ મૃતસ્ય પુત્રં રાજ્યે સ્થાપયેત્

07.16.29 એવં અસ્ય દણ્ડ ઉપનતાઃ પુત્રપૌત્રાન્ અનુવર્તન્તે

07.16.30 યઃ તુ ઉપનતાન્ હત્વા બદ્ધ્વા વા ભૂમિદ્રવ્યપુત્રદારાન્ અભિમન્યેત તસ્ય ઉદ્વિગ્નં મણ્ડલં અભાવાય ઉત્તિષ્ઠતે

07.16.31 યે ચાસ્યામાત્યાઃ સ્વભૂમિષ્વાયત્તાઃ તે ચાસ્ય ઉદ્વિગ્ના મણ્ડલં આશ્રયન્તે

07.16.32 સ્વયં વા રાજ્યં પ્રાણાન્ વાઽસ્યાભિમન્યન્તે

07.16.33ab સ્વભૂમિષુ ચ રાજાનઃ તસ્માત્ સામ્નાઽનુપાલિતાઃ ।

07.16.33chd ભવન્ત્યનુગુણા રાજ્ઞઃ પુત્રપૌત્રાનુવર્તિનઃ (ઇતિ)

Chapt . સંધિકર્મ -સમાધિમોક્ષઃ

07.17.01 શમઃ સન્ધિઃ સમાધિરિત્યેકોઽર્થઃ

07.17.02 રાજ્ઞાં વિશ્વાસ ઉપગમઃ શમઃ સન્ધિઃ સમાધિરિતિ

07.17.03 સત્યં શપથો વા ચલઃ સન્ધિઃ, પ્રતિભૂઃ પ્રતિગ્રહો વા સ્થાવરઃ ઇત્યાચાર્યાઃ

07.17.04 ન ઇતિ કૌટિલ્યઃ

07.17.05 સત્યં શપથો વા પરત્ર ઇહ ચ સ્થાવરઃ સન્ધિઃ, ઇહાર્થ એવ પ્રતિભૂઃ પ્રતિગ્રહો વા બલાપેક્ષઃ

07.17.06 સંહિતાઃ સ્મઃ ઇતિ સત્યસન્ધાઃ પૂર્વે રાજાનઃ સત્યેન સન્દધિરે

07.17.07 તસ્યાતિક્રમે શપથેન અગ્ન્ય્।ઉદકસીતાપ્રાકારલોષ્ટહસ્તિસ્કન્ધાશ્વપૃષ્ટરથ ઉપસ્થશસ્ત્રરત્નબીજગન્ધરસસુવર્ણહિરણ્ હન્ચુરેતાનિ ત્યજેયુશ્ચ એનં યઃ શપથં અતિક્રામેત્ ઇતિ

07.17.08 શપથાતિક્રમે મહતાં તપસ્વિનાં મુખ્યાનાં વા પ્રાતિભાવ્યબન્ધઃ પ્રતિભૂઃ

07.17.09 તસ્મિન્ યઃ પરાવગ્રહસમર્થાન્ પ્રતિભુવો ગૃહ્ણાતિ, સોઽતિસન્ધત્તે

07.17.10 વિપરીતોઽતિસન્ધીયતે

07.17.11 બન્ધુમુખ્યપ્રગ્રહઃ પ્રતિગ્રહઃ

07.17.12 તસ્મિન્ યો દૂષ્યામાત્યં દૂષ્યાપત્યં વા દદાતિ, સોઽતિસન્ધત્તે

07.17.13 વિપરીતોઽતિસન્ધીયતે

07.17.14 પ્રતિગ્રહગ્રહણવિશ્વસ્તસ્ય હિ પરશ્છિદ્રેષુ નિરપેક્ષઃ પ્રહરતિ

07.17.15 અપત્યસમાધૌ તુ કન્યાપુત્રદાને દદત્ તુ કન્યાં અતિસન્ધત્તે

07.17.16 કન્યા હ્યદાયાદા પરેષાં એવાર્થાયાક્લેશ્યા(?) ચ

07.17.17 વિપરીતઃ પુત્રઃ

07.17.18 પુત્રયોરપિ યો જાત્યં પ્રાજ્ઞં શૂરં કૃતાસ્ત્રં એકપુત્રં વા દદાતિ સોઽતિસન્ધીયતે

07.17.19 વિપરીતોઽતિસન્ધત્તે

07.17.20 જાત્યાદ્ અજાત્યો હિ લુપ્તદાયાદસન્તાનત્વાદ્ આધાતું શ્રેયાન્, પ્રાજ્ઞાદ્ અપ્રાજ્ઞો મન્ત્રશક્તિલોપાત્, શૂરાદ્ અશૂર ઉત્સાહશક્તિલોપાત્, કૃતાસ્ત્રાદ્ અકૃતાસ્ત્રઃ પ્રહર્તવ્યસમ્પલ્લોપાત્, એકપુત્રાદ્ અનેકપુત્રો નિરપેક્ષત્વાત્

07.17.21 જાત્યપ્રાજ્ઞયોર્જાત્યં અપ્રાજ્ઞં ઐશ્વર્યપ્રકૃતિરનુવર્તતે, પ્રાજ્ઞં અજાત્યં મન્ત્રાધિકારઃ

07.17.22 મન્ત્રાધિકારેઽપિ વૃદ્ધસમ્યોગાજ્ જાત્યઃ પ્રાજ્ઞં અતિસન્ધત્તે

07.17.23 પ્રાજ્ઞશૂરયોઃ પ્રાજ્ઞં અશૂરં મતિકર્મણાં યોગોઽનુવર્તતે, શૂરં અપ્રાજ્ઞં વિક્રમાધિકારઃ

07.17.24 વિક્રમાધિકારેઽપિ હસ્તિનં ઇવ લુબ્ધકઃ પ્રાજ્ઞઃ શૂરં અતિસન્ધત્તેશ્

07.17.25 શૂરકૃતાસ્ત્રયોઃ શૂરં અકૃતાસ્ત્રં વિક્રમવ્યવસાયોઽનુવર્તતે, કૃતાસ્ત્રં અશૂરં લક્ષ્યલમ્ભાધિકારઃ

07.17.26 લક્ષ્યલમ્ભાધિકારેઽપિ સ્થૈર્યપ્રતિપત્ત્ય્ઽસમ્મોષૈઃ શૂરઃ કૃતાસ્ત્રં અતિસન્ધત્તે

07.17.27 બહ્વ્।એકપુત્રયોર્બહુપુત્ર એકં દત્ત્વા શેષપ્રતિષ્ટબ્ધઃ સન્ધિં અતિક્રામતિ, ન ઇતરઃ

07.17.28 પુત્રસર્વસ્વદાને સન્ધિશ્ચેત્ પુત્રફલતો વિશેષઃ

07.17.29 સમફલયોઃ શક્તપ્રજનનતો વિશેષઃ

07.17.30 શક્તપ્રજનનયોરપ્યુપસ્થિતપ્રજનનતો વિશેષઃ

07.17.31 શક્તિમત્યેકપુત્રે તુ લુપ્તપુત્ર ઉત્પત્તિરાત્માનં આદધ્યાત્, ન ચ એકપુત્રં ઇતિ

07.17.32 અભ્યુચ્ચીયમાનઃ સમાધિમોક્ષં કારયેત્

07.17.33 કુમારાસન્નાઃ સત્રિણઃ કારુશિલ્પિવ્યઞ્જનાઃ કર્માણિ કુર્વાણાઃ સુરુઙ્ગયા રાત્રાવુપખાનયિત્વા કુમારં અપહરેયુઃ

07.17.34 નટનર્તકગાયનવાદકવાગ્જીવનકુશીલવપ્લવકસૌભિકા વા પૂર્વપ્રણિહિતાઃ પરં ઉપતિષ્ઠેરન્

07.17.35 તે કુમારં પરમ્પરયા ઉપતિષ્ઠેરન્

07.17.36 તેષાં અનિયતકાલપ્રવેશસ્થાનનિર્ગમનાનિ સ્થાપયેત્

07.17.37 તતઃ તદ્વ્યઞ્જનો વા રાત્રૌ પ્રતિષ્ઠેત

07.17.38 તેન રૂપાજીવા ભાર્યાવ્યઞ્જનાશ્ચ વ્યાખ્યાતાઃ

07.17.39 તેષાં વા તૂર્યભાણ્ડફેલાં ગૃહીત્વા નિર્ગચ્છેત્

07.17.40 સૂદારાલિકસ્નાપકસંવાહકાસ્તરકકલ્પકપ્રસાધક ઉદકપરિચારકૈર્વા દ્રવ્યવસ્ત્રભાણ્ડફેલાશયનાસનસમ્ભોગૈર્નિર્હ્રિયેત

07.17.41 પરિચારકચ્છદ્મના વા કિઞ્ચિદ્ અરૂપવેલાયાં આદાય નિર્ગચ્છેત્, સુરુઙ્ગામુખેન વા નિશા ઉપહારેણ

07.17.42 તોયાશયે વા વારુણં યોગં આતિષ્ઠેત્

07.17.43 વૈદેહકવ્યઞ્જના વા પક્વાન્નફલવ્યવહારેણારક્ષિષુ રસં ઉપચારયેયુઃ

07.17.44 દૈવત ઉપહારશ્રાદ્ધપ્રહવણનિમિત્તં આરક્ષિષુ મદનયોગયુક્તં અન્નપાનં રસં વા પ્રયુજ્યાપગચ્છેત્, આરક્ષકપ્રોત્સાહનેન વા

07.17.45 નાગરકકુશીલવચિકિત્સકાપૂપિકવ્યઞ્જના વા રાત્રૌ સમૃદ્ધગૃહાણ્યાદીપયેયુઃ આરક્ષિણાં વા

07.17.46 વૈદેહકવ્યઞ્જના વા પણ્યસંસ્થાં આદીપયેયુઃ

07.17.47 અન્યદ્ વા શરીરં નિક્ષિપ્ય સ્વગૃહં આદીપયેદ્ અનુપાતભયાત્

07.17.48 તતઃ સન્ધિચ્છેદખાતસુરુઙ્ગાભિરપગચ્છેત્

07.17.49 કાચકુમ્ભભાણ્ડભારવ્યઞ્જનો વા રાત્રૌ પ્રતિષ્ઠેત

07.17.50 મુણ્ડજટિલાનાં પ્રવાસનાન્યનુપ્રવિષ્ટો વા રાત્રૌ તદ્વ્યઞ્જનઃ પ્રતિષ્ઠેત, વિરૂપવ્યાધિકરણારણ્યચરચ્છદ્મનાં અન્યતમેન વા

07.17.51 પ્રેતવ્યઞ્જનો વા ગૂઢૈર્નિર્હ્રિયેત

07.17.52 પ્રેતં વા સ્ત્રીવેષેણાનુગચ્છેત્

07.17.53 વનચરવ્યઞ્જનાશ્ચ એનં અન્યતો યાન્તં અન્યતોઽપદિશેયુઃ

07.17.54 તતોઽન્યતો ગચ્છેત્

07.17.55 ચક્રચરાણાં વા શકટવાટૈરપગચ્છેત્

07.17.56 આસન્ને ચાનુપાતે સત્રં વા ગૃહ્ણીયાત્

07.17.57 સત્રાભાવે હિરણ્યં રસવિદ્ધં વા ભક્ષ્યજાતં ઉભયતઃપન્થાનં ઉત્સૃજેત્

07.17.58 તતોઽન્યતોઽપગચ્છેત્

07.17.59 ગૃહીતો વા સામાદિભિરનુપાતં અતિસન્દધ્યાત્, રસવિદ્ધેન વા પથ્ય્ઽદનેન

07.17.60 વારુણયોગાગ્નિદાહેષુ વા શરીરં અન્યદ્ આધાય શત્રું અભિયુઞ્જીત પુત્રો મે ત્વયા હતઃ ઇતિ

07.17.61a ઉપાત્તચ્છન્નશસ્ત્રો વા રાત્રૌ વિક્રમ્ય રક્ષિષુ

07.17.61b શીઘ્રપાતૈરપસરેદ્ ગૂઢપ્રણિહિતૈઃ સહ  (ઇતિ)

Chapt .   મધ્યમચરિતં - ઉદાસીનચરિતં - મણ્ડલચરિતમ્

07.18.01 મધ્યમસ્યાત્મા તૃતીયા પઞ્ચમી ચ પ્રકૃતી પ્રકૃતયઃ

07.18.02 દ્વિતીયા ચતુર્થી ષષ્ઠી ચ વિકૃતયઃ

07.18.03 તચ્ચેદ્ ઉભયં મધ્યમોઽનુગૃહ્ણીયાત્, વિજિગીષુર્મધ્યમાનુલોમઃ સ્યાત્

07.18.04 ન ચેદ્ અનુગૃહ્ણીયાત્, પ્રકૃત્ય્ઽનુલોમઃ સ્યાત્

07.18.05 મધ્મશ્ચેદ્ વિજિગીષોર્મિત્રં મિત્રભાવિ લિપ્સેત, મિત્રસ્યાત્મનશ્ચ મિત્રાણ્યુત્થાપ્ય મધ્યમાચ્ચ મિત્રાણિ ભેદયિત્વા મિત્રં ત્રાયેત

07.18.06 મણ્ડલં વા પ્રોત્સાહયેત્ અતિપ્રવૃદ્ધોઽયં મધ્યમઃ સર્વેષાં નો વિનાશાયાભ્યુત્થિતઃ, સમ્ભૂયાસ્ય યાત્રાં વિહનામ ઇતિ

07.18.07 તચ્ચેન્ મણ્ડલં અનુગૃહ્ણીયાત્, મધ્યમાવગ્રહેણાત્માનં ઉપબૃંહયેત્

07.18.08 ન ચેદ્ અનુગૃહ્ણીયાત્, કોશદણ્ડાભ્યાં મિત્રં અનુગૃહ્ય યે મધ્યમદ્વેષિણો રાજાનઃ પરસ્પરાનુગૃહીતા વા બહવઃ તિષ્ઠેયુઃ, એકસિદ્ધૌ વા બહવઃ સિધ્યેયુઃ, પરસ્પરાદ્ વા શઙ્કિતા ન ઉત્તિષ્ઠેરન્, તેષાં પ્રધાનં એકં આસન્નં વા સામદાનાભ્યાં લભેત

07.18.09 દ્વિગુણો દ્વિતીયં ત્રિગુનઃ તૃતીયમ્

07.18.10 એવં અભ્યુચ્ચિતો મધ્યમં અવગૃહ્ણીયાત્

07.18.11 દેશકાલાતિપત્તૌ વા સન્ધાય મધ્યમેન મિત્રસ્ય સાચિવ્યં કુર્યાત્, દૂષ્યેષુ વા કર્મસન્ધિમ્

07.18.12 કર્શનીયં વાઽસ્ય મિત્રં મધ્યમો લિપ્સેત, પ્રતિસ્તમ્ભયેદ્ એનં અહં ત્વા ત્રાયેય ઇતિ આ કર્શનાત્

07.18.13 કર્શિતં એનં ત્રાયેત

07.18.14 ઉચ્છેદનીયં વાઽસ્ય મિત્રં મધ્યમો લિપ્સેત, કર્શિતં એનં ત્રાયેત મધ્યમવૃદ્ધિભયાત્

07.18.15 ઉચ્છિન્નં વા ભૂમ્ય્ઽનુગ્રહેણ હસ્તે કુર્યાદ્ અન્યત્રાપસારભયાત્

07.18.16 કર્શનીય ઉચ્છેદનીયયોશ્ચેન્ મિત્રાણિ મધ્યમસ્ય સાચિવ્યકરાણિ સ્યુઃ, પુરુષાન્તરેણ સન્ધીયેત

07.18.17 વિજિગીષોર્વા તયોર્મિત્રાણ્યવગ્રહસમર્થાનિ સ્યુઃ, સન્ધિં ઉપેયાત્

07.18.18 અમિત્રં વાઽસ્ય મધ્યમો લિપ્સેત, સન્ધિં ઉપેયાત્

07.18.19 એવં સ્વાર્થશ્ચ કૃતો ભવતિ મધ્યમસ્ય પ્રિયં ચ

07.18.20 મધ્યમશ્ચેત્ સ્વમિત્રં મિત્રભાવિ લિપ્સેત, પુરુષાન્તરેણ સન્દધ્યાત્

07.18.21 સાપેક્ષં વા નાર્હસિ મિત્રં ઉચ્છેત્તુમ્ ઇતિ વારયેત્

07.18.22 ઉપેક્ષેત વા મણ્ડલં અસ્ય કુપ્યતુ સ્વપક્ષવધાત્ ઇતિ

07.18.23 અમિત્રં આત્મનો વા મધ્યમો લિપ્સેત, કોશદણ્ડાભ્યાં એનં અદૃશ્યમાનોઽનુગૃહ્ણીયાત્

07.18.24 ઉદાસીનં વા મધ્યમો લિપ્સેત, અસ્મૈ સાહાય્યં દદ્યાદ્ ઉદાસીનાદ્ ભિદ્યતામ્ ઇતિ

07.18.25 મધ્યમ ઉદાસીનયોર્યો મણ્ડલસ્યાભિપ્રેતઃ તં આશ્રયેત

07.18.26 મધ્યમચરિતેન ઉદાસીનચરિતં વ્યાખ્યાતમ્

07.18.27 ઉદાસીનશ્ચેન્ મધ્યમં લિપ્સેત, યતઃ શત્રું અતિસન્દધ્યાન્ મિત્રસ્ય ઉપકારં કુર્યાદ્ ઉદાસીનં વા દણ્ડ ઉપકારિણં લભેત તતઃ પરિણમેત

07.18.28 એવં ઉપબૃહ્યાત્માનં અરિપ્રકૃતિં કર્શયેન્ મિત્રપ્રકૃતિં ચ ઉપગૃહ્ણીયાત્

07.18.29a સત્યપ્યમિત્રભાવે તસ્યાનાત્મવાન્નિત્યાપકારી શત્રુઃ શત્રુસંહિતઃ પાર્ષ્ણિગ્રાહો વા વ્યસની યાતવ્યો વ્યસને વા નેતુરભિયોક્તા ઇત્યરિભાવિનઃ, એકાર્થાભિપ્રયાતઃ પૃથગ્ઽર્થાભિપ્રયાતઃ સમ્ભૂયયાત્રિકઃ સંહિતપ્રયાણિકઃ સ્વાર્થાભિપ્રયાતઃ સામુત્થાયિકઃ કોશદણ્ડયોરન્યતરસ્ય ક્રેતા વિક્રેતા વા દ્વૈધીભાવિક ઇતિ મિત્રભાવિનઃ, -

07.18.29b સામન્તો બલવતઃ પ્રતિઘાતોઽન્તર્ધિઃ પ્રતિવેશો વા બલવતઃ પાર્ષ્ણિગ્રાહો વા સ્વયં ઉપનતઃ પ્રતાપ ઉપનતો વા દણ્ડ ઉપનત ઇતિ ભૃત્યભાવિનઃ સામન્તાઃ

07.18.30 તૈર્ભૂમ્ય્। એકાન્તરા વ્યાખ્યાતાઃ

07.18.31ab તેષાં શત્રુવિરોધે યન્ મિત્રં એકાર્થતાં વ્રજેત્ ।

07.18.31chd શક્ત્યા તદ્ઽનુગૃહ્ણીયાદ્ વિષહેત યયા પરમ્

07.18.32ab પ્રસાધ્ય શત્રું યન્ મિત્રં વૃદ્ધં ગચ્છેદ્ અવશ્યતામ્ ।

07.18.32chd સામન્ત એકાન્તરાભ્યાં તત્પ્રકૃતિભ્યાં વિરોધયેત્

07.18.33ab તત્કુલીનાપરુદ્ધાભ્યાં ભૂમિં વા તસ્ય હારયેત્ ।

07.18.33chd યથા વાઽનુગ્રહાપેક્ષં વશ્યં તિષ્ઠેત્ તથા ચરેત્

07.18.34ab ન ઉપકુર્યાદ્ અમિત્રં વા ગચ્છેદ્ યદ્ અતિકર્શિતમ્ ।

07.18.34chd તદ્ અહીનં અવૃદ્ધં ચ સ્થાપયેન્ મિત્રં અર્થવિત્

07.18.35ab અર્થયુક્ત્યા ચલં મિત્રં સન્ધિં યદ્ ઉપગચ્છતિ ।
07.18.35chd તસ્યાપગમને હેતું વિહન્યાન્ન ચલેદ્ યથા
07.18.36ab અરિસાધારણં યદ્ વા તિષ્ઠેત્ તદ્ અરિતઃ શઠમ્ ।
07.18.36chd ભેદયેદ્ ભિન્નં ઉચ્છિન્દ્યાત્ તતઃ શત્રું અનન્તરમ્
07.18.37ab ઉદાસીનં ચ યત્ તિષ્ઠેત્ સામન્તૈઃ તદ્ વિરોધયેત્ ।
07.18.37chd તતો વિગ્રહસન્તપ્તં ઉપકારે નિવેશયેત્
07.18.38ab અમિત્રં વિજિગીષું ચ યત્ સઞ્ચરતિ દુર્બલમ્ ।
07.18.38chd તદ્ બલેનાનુગૃહ્ણીયાદ્ યથા સ્યાન્ન પરાન્મુખમ્
07.18.39ab અપનીય તતોઽન્યસ્યાં ભૂમૌ વા સન્નિવેશયેત્ ।
07.18.39chd નિવેશ્ય પૂર્વં તત્રાન્યદ્ દણ્ડાનુગ્રહહેતુના
07.18.40ab અપકુર્યાત્ સમર્થં વા ન ઉપકુર્યાદ્ યદ્ આપદિ ।
07.18.40chd ઉચ્છિન્દ્યાદ્ એવ તન્મિત્રં વિશ્વસ્યાઙ્કં ઉપસ્થિતમ્
07.18.41ab મિત્રવ્યસનતો વાઽરિરુત્તિષ્ઠેદ્ યોઽનવગ્રહઃ ।
07.18.41chd મિત્રેણ એવ ભવેત્ સાધ્યશ્છાદિતવ્યસનેન સઃ
07.18.41ab અમિત્રવ્યસનાન્ મિત્રં ઉત્થિતં યદ્ વિરજ્યતિ ।
07.18.41chd અરિવ્યસનસિદ્ધ્યા તત્શત્રુણા એવ પ્રસિધ્યતિ
07.18.42ab વૃદ્ધિં ક્ષયં ચ સ્થાનં ચ કર્શન ઉચ્છેદનં તથા
07.18.42chd સર્વ ઉપાયાન્ સમાદધ્યાદ્ એતાન્ યશ્ચાર્થશાસ્ત્રવિત્ ।
07.18.43ab એવં અન્યોન્યસઞ્ચારં ષાડ્ગુણ્યં યોઽનુપશ્યતિ
07.18.43chd સ બુદ્ધિનિગલૈર્બદ્ધૈરિષ્ટં ક્રીડતિ પાર્થિવૈઃ (ઇતિ)

Book .

Chapt . પ્રકૃતિવ્યસનવર્ગઃ

08.1.01 વ્યસનયૌગપદ્યે સૌકર્યતો યાતવ્યં રક્ષિતવ્યં વા ઇતિ વ્યસનચિન્તા
08.1.02 દૈવં માનુષં વા પ્રકૃતિવ્યસનં અનયાપનયાભ્યાં સમ્ભવતિ
08.1.03 ગુણપ્રાતિલોમ્યં અભાવઃ પ્રદોષઃ પ્રસઙ્ગઃ પીડા વા વ્યસનમ્
08.1.04 વ્યસ્યત્યેનં શ્રેયસ ઇતિ વ્યસનમ્
08.1.05 સ્વામ્યમાત્યજનપદદુર્ગકોશદણ્ડમિત્રવ્યસનાનાં પૂર્વં પૂર્વં ગરીયઃ ઇત્યાચાર્યાઃ
08.1.06 ન ઇતિ ભરદ્વાજઃ
08.1.07 સ્વામ્યમાત્યવ્યસનયોરમાત્યવ્યસનં ગરીયઃ
08.1.08 મન્ત્રો મન્ત્રફલાવાપ્તિઃ કર્માનુષ્ઠાનં આયવ્યયકર્મ દણ્ડપ્રણયનં અમિત્રાટવીપ્રતિષેધો રાજ્યરક્ષણં વ્યસનપ્રતીકારઃ કુમારરક્ષણં અભિષેકશ્ચ કુમારાણાં આયત્તં અમાત્યેષુ
08.1.09 તેષાં અભાવે તદ્ઽભાવઃ, છિન્નપક્ષસ્ય ઇવ રાજ્ઞશ્ચેષ્ટાનાશશ્ચ

08.1.10 વ્યસનેષુ ચાસન્નઃ પર ઉપજાપઃ

08.1.11 વૈગુણ્યે ચ પ્રાણાબાધઃ પ્રાણાન્તિકચરત્વાદ્ રાજ્ઞઃ ઇતિ

08.1.12 ન ઇતિ કૌટિલ્યઃ

08.1.13 મન્ત્રિપુરોહિતાદિભૃત્યવર્ગં અધ્યક્ષપ્રચારં પુરુષદ્રવ્યપ્રકૃતિવ્યસનપ્રતીકારં એધનં ચ રાજા એવ કરોતિ

08.1.14 વ્યસનિષુ વાઽમાત્યેષ્વન્યાન્ અવ્યસનિનઃ કરોતિ

08.1.15 પૂજ્યપૂજને દૂષ્યાવગ્રહે ચ નિત્યયુક્તઃ તિષ્ઠતિ

08.1.16 સ્વામી ચ સમ્પન્નઃ સ્વસમ્પદ્ભિઃ પ્રકૃતીઃ સમ્પાદયતિ

08.1.17 સ યત્શીલઃ તત્શીલાઃ પ્રકૃતયો ભવન્તિ, ઉત્થાને પ્રમાદે ચ તદ્ । આયત્તત્વાત્

08.1.18 તત્કૂટસ્થાનીયો હિ સ્વામી ઇતિ

08.1.19 અમાત્યજનપદવ્યસનયોર્જનપદવ્યસનં ગરીયઃ ઇતિ વિશાલાક્ષઃ

08.1.20 કોશો દણ્ડઃ કુપ્યં વિષ્ટિર્વાહનં નિચયાશ્ચ જનપદાદ્ ઉત્તિષ્ઠન્તે

08.1.21 તેષાં અભાવો જનપદાભાવે, સ્વામ્યઽમાત્યયોશ્ચાનન્તરઃ ઇતિ

08.1.22 ન ઇતિ કૌટિલ્યઃ

08.1.23 અમાત્યમૂલાઃ સર્વારમ્ભાઃ - જનપદસ્ય કર્મસિદ્ધયઃ સ્વતઃ પરતશ્ચ યોગક્ષેમસાધનં વ્યસનપ્રતીકારઃ શૂન્યનિવેશ ઉપચયૌ દણ્ડકરાનુગ્રહશ્ચ ઇતિ

08.1.24 જનપદદુર્ગવ્યસનયોર્દુર્ગવ્યસનમ્ ઇતિ પારાશરાઃ

08.1.25 દુર્ગે હિ કોશદણ્ડ ઉત્પત્તિરાપદિ સ્થાનં ચ જનપદસ્ય

08.1.26 શક્તિમત્તરાશ્ચ પૌરા જાનપદેભ્યો નિત્યાશ્ચાપદિ સહાયા રાજ્ઞઃ

08.1.27 જાનપદાઃ ત્વમિત્રસાધારણાઃ ઇતિ

08.1.28 ન ઇતિ કૌટિલ્યઃ

08.1.29 જનપદમૂલા દુર્ગકોશદણ્ડસેતુવાર્ત્તાઽઽરમ્ભાઃ

08.1.30 શૌર્યં સ્થૈર્યં દાક્ષ્યં બાહુલ્યં ચ જાનપદેષુ

08.1.31 પર્વતાન્તર્દ્વીપાશ્ચ દુર્ગા નાધ્યુષ્યન્તે જનપદાભાવાત્

08.1.32 કર્ષકપ્રાયે તુ દુર્ગવ્યસનં, આયુધીયપ્રાયે તુ જનપદે જનપદવ્યસનં ઇતિ

08.1.33 દુર્ગકોશવ્યસનયોઃ કોશવ્યસનમ્ ઇતિ પિશુનઃ

08.1.34 કોશમૂલો હિ દુર્ગસંસ્કારો દુર્ગરક્ષણં જનપદમિત્રામિત્રનિગ્રહો દેશાન્તરિતાનાં ઉત્સાહનં દણ્ડબલવ્યવહારશ્ચ

08.1.35 દુર્ગઃ કોશાદ્ ઉપજાપ્યઃ પરેષામ્

08.1.36 કોશં આદાય ચ વ્યસને શક્યં અપયાતું, ન દુર્ગમ્ ઇતિ

08.1.37 ન ઇતિ કૌટિલ્યઃ

08.1.38 દુર્ગાર્પણઃ કોશો દણ્ડઃ તૂષ્ણીંયુદ્ધં સ્વપક્ષનિગ્રહો દણ્ડબલવ્યવહાર આસારપ્રતિગ્રહઃ પરચક્રાટવીપ્રતિષેધશ્ચ

08.1.39 દુર્ગાભાવે ચ કોશઃ પરેષામ્

08.1.40 દૃશ્યતે હિ દુર્ગવતાં અનુચ્છિત્તિરિતિ

08.1.41 કોશદણ્ડવ્યસનયોર્દણ્ડવ્યસનમ્ ઇતિ કૌણપદન્તઃ

08.1.42 દણ્ડમૂલો હિ મિત્રામિત્રનિગ્રહઃ પરદણ્ડ ઉત્સાહનં સ્વદણ્ડપ્રતિગ્રહશ્ચ

08.1.43 દણ્ડાભાવે ચ ધ્રુવઃ કોશવિનાશઃ

08.1.44 કોશાભાવે ચ શક્યઃ કુપ્યેન ભૂમ્યા પરભૂમિસ્વયઙ્ગ્રાહેણ વા દણ્ડઃ પિણ્ડયિતું, દણ્ડવતા ચ કોશઃ

08.1.45 સ્વામિનશ્ચાસન્નવૃત્તિત્વાદ્ અમાત્યસધર્મા દણ્ડઃ ઇતિ

08.1.46 ન ઇતિ કૌટિલ્યઃ

08.1.47 કોશમૂલો હિ દણ્ડઃ

08.1.48 કોશાભાવે દણ્ડઃ પરં ગચ્છતિ, સ્વામિનં વા હન્તિ

08.1.49 સર્વાભિયોગકરશ્ચ કોશો ધર્મકામહેતુઃ

08.1.50 દેશકાલકાર્યવશેન તુ કોશદણ્ડયોરન્યતરઃ પ્રમાણીભવતિ

08.1.51 લમ્ભપાલનો હિ દણ્ડઃ કોશસ્ય, કોશઃ કોશસ્ય દણ્ડસ્ય ચ ભવતિ

08.1.52 સર્વદ્રવ્યપ્રયોજકત્વાત્ કોશવ્યસનં ગરીય ઇતિ

08.1.53 દણ્ડમિત્રવ્યસનયોર્મિત્રવ્યસનમ્ ઇતિ વાતવ્યાધિઃ

08.1.54 મિત્રં અભૃતં વ્યવહિતં ચ કર્મ કરોતિ, પાર્ષ્ણિગ્રાહં આસારં અમિત્રં આટવિકં ચ પ્રતિકરોતિ, કોશદણ્ડભૂમિભિશ્ચ ઉપકરોતિ વ્યસનાવસ્થાયોગમ્ ઇતિ

08.1.55 ન ઇતિ કૌટિલ્યઃ

08.1.56 દણ્ડવતો મિત્રં મિત્રભાવે તિષ્ઠતિ, અમિત્રો વા મિત્રભાવે

08.1.57 દણ્ડમિત્રયોઃ તુ સાધારણે કાર્યે સારતઃ સ્વયુદ્ધદેશકાલલાભાદ્ વિશેષઃ

08.1.58 શીઘ્રાભિયાને ત્વમિત્રાટવિકાનભ્યન્તરકોપે ચ ન મિત્રં વિદ્યતે

08.1.59 વ્યસનયૌગપદ્યે પરવૃદ્ધૌ ચ મિત્રં અર્થયુક્તૌ તિષ્ઠતિ

08.1.60 ઇતિ પ્રકૃતિવ્યસનસમ્પ્રધારણં ઉક્તમ્

08.1.61ab પ્રકૃત્યવયવાનાં તુ વ્યસનસ્ય વિશેષતઃ ।

08.1.61chd બહુભાવોઽનુરાગો વા સારો વા કાર્યસાધકઃ

08.1.62ab દ્વયોઃ તુ વ્યસને તુલ્યે વિશેષો ગુણતઃ ક્ષયાત્ ।

08.1.62chd શેષપ્રકૃતિસાદ્ગુણ્યં યદિ સ્યાન્નાવિધેયકમ્

08.1.63ab શેષપ્રકૃતિનાશઃ તુ યત્ર એકવ્યસનાદ્ ભવેત્ ।

08.1.63chd વ્યસનં તદ્ ગરીયઃ સ્યાત્ પ્રધાનસ્ય ઇતરસ્ય વા (ઇતિ)

Chapt . રાજરાજ્યયોર્વ્યસનચિન્તા

08.2.01 રાજા રાજ્યં ઇતિ પ્રકૃતિસઙ્ક્ષેપઃ

08.2.02 રાજ્ઞોઽભ્યન્તરો બાહ્યો વા કોપ ઇતિ

08.2.03 અહિભયાદ્ અભ્યન્તરઃ કોપો બાહ્યકોપાત્ પાપીયાન્, અન્તર્ઽમાત્યકોપશ્ચાન્તઃકોપાત્

08.2.04 તસ્માત્ કોશદણ્ડશક્તિં આત્મસંસ્થાં કુર્વીત

08.2.05 દ્વૈરાજ્યવૈરાજ્યયોર્દ્વૈરાજ્યં અન્યોન્યપક્ષદ્વેષાનુરાગાભ્યાં પરસ્પરસઙ્ઘર્ષેણ વા વિનશ્યતિ, વૈરાજ્યં તુ પ્રકૃતિચિત્તગ્રહણાપેક્ષિ યથાસ્થિતં અન્યૈર્ભુજ્યતે ઇત્યાચાર્યાઃ

08.2.06 ન ઇતિ કૌટિલ્યઃ

08.2.07 પિતાપુત્રયોર્ભ્રાત્રોર્વા દ્વૈરાજ્યં તુલ્યયોગક્ષેમં અમાત્યાવગ્રહં વર્તયતિ

08.2.08 વૈરાજ્યં તુ જીવતઃ પરસ્યાચ્છિદ્ય ન એતન્ મમ ઇતિ મન્યમાનઃ કર્શયતિ, અપવાહયતિ, પણ્યં વા કરોતિ, વિરક્તં વા પરિત્યજ્યાપગચ્છતિ ઇતિ

08.2.09 અન્ધશ્ચલિતશાસ્ત્રો વા રાજા ઇતિ અશાસ્ત્રચક્ષુરન્ધો યત્કિઞ્ચનકારી દૃઢાભિનિવેશી પરપ્રણેયો વા રાજ્યં અન્યાયેન ઉપહન્તિ, ચલિતશાસ્ત્રઃ તુ યત્ર શાસ્ત્રાચ્ચલિતમતિર્ભવતિ શક્યાનુનયો ભવતિ ઇત્યાચાર્યાઃ

08.2.10 ન ઇતિ કૌટિલ્યઃ

08.2.11 અન્ધો રાજા શક્યતે સહાયસમ્પદા યત્ર તત્ર વા પર્યવસ્થાપયિતુમ્

08.2.12 ચલિતશાસ્ત્રઃ તુ શાસ્ત્રાદ્ અન્યથાઽભિનિવિષ્ટબુદ્ધિરન્યાયેન રાજ્યં આત્માનં ચ ઉપહન્તિ ઇતિ

08.2.13 વ્યાધિતો નવો વા રાજા ઇતિ વ્યાધિતો રાજા રાજ્ય ઉપઘાતં અમાત્યમૂલં પ્રાણાબાધં વા રાજ્યમૂલં અવાપ્નોતિ, નવઃ તુ રાજા સ્વધર્માનુગ્રહપરિહારદાનમાનકર્મભિઃ પ્રકૃતિરઞ્જન ઉપકારૈશ્ચરતિ ઇત્યાચાર્યાઃ

08.2.14 ન ઇતિ કૌટિલ્યઃ

08.2.15 વ્યાધિતો રાજા યથાપ્રવૃત્તં રાજપ્રણિધિં અનુવર્તયતિ

08.2.16 નવઃ તુ રાજા બલાવર્જિતં મમ ઇદં રાજ્યમ્ ઇતિ યથા ઇષ્ટં અનવગ્રહશ્ચરતિ

08.2.17 સામુત્થાયિકૈરવગૃહીતો વા રાજ્ય ઉપઘાતં મર્ષયતિ

08.2.18 પ્રકૃતિષ્વરૂઢઃ સુખં ઉચ્છેત્તું ભવતિ ઇતિ

08.2.19 વ્યાધિતે વિશેષઃ પાપરોગ્યપાપરોગી ચ

08.2.20 નવેઽપ્યભિજાતોઽનભિજાત ઇતિ

08.2.21 દુર્બલોઽભિજાતો બલવાન્ અનભિજાતો રાજા ઇતિ દુર્બલસ્યાભિજાતસ્ય ઉપજાપં દૌર્બલ્યાપેક્ષાઃ પ્રકૃતયઃ કૃચ્છ્રેણ ઉપગચ્છન્તિ, બલવતશ્ચાનભિજાતસ્ય બલાપેક્ષાઃ સુખેન ઇત્યાચાર્યાઃ

08.2.22 ન ઇતિ કૌટિલ્યઃ

08.2.23 દુર્બલં અભિજાતં પ્રકૃતયઃ સ્વયં ઉપનમન્તિ, જાત્યં ઐશ્વર્યપ્રકૃતિરનુવર્તત ઇતિ

08.2.24 બલવતશ્ચાનભિજાતસ્ય ઉપજાપં વિસંવાદયન્તિ, અનુરાગે સાર્વગુણ્યં ઇતિ

08.2.25 પ્રયાસવધાત્ સસ્યવધો મુષ્ટિવધાત્ પાપીયાન્, નિરાજીવત્વાદ્ અવૃષ્ટિરતિવૃષ્ટિતઃ

08.2.26ab દ્વયોર્દ્વયોર્વ્યસનયોઃ પ્રકૃતીનાં બલાબલમ્ ।

08.2.26chd પારમ્પર્યક્રમેણ ઉક્તં યાને સ્થાને ચ કારણમ્ (ઇતિ)

Chapt . પુરુષવ્યસનવર્ગઃ

08.3.01 અવિદ્યાવિનયઃ પુરુષવ્યસનહેતુઃ

08.3.02 અવિનીતો હિ વ્યસનદોષાન્ન પશ્યતિ

08.3.03 તાન્ ઉપદેક્ષ્યામઃ

08.3.04 કોપજઃ ત્રિવર્ગઃ, કામજશ્ચતુર્વર્ગઃ

08.3.05 તયોઃ કોપો ગરીયાન્

08.3.06 સર્વત્ર હિ કોપશ્ચરતિ

08.3.07 પ્રાયશશ્ચ કોપવશા રાજાનઃ પ્રકૃતિકોપૈર્હતાઃ શ્રૂયન્તે, કામવશાઃ ક્ષયનિમિત્તં અરિવ્યાધિભિરિતિ

08.3.08 ન ઇતિ ભારદ્વાજઃ

08.3.09 સત્પુરુષાચારઃ કોપો વૈરયાતનં અવજ્ઞાવધો ભીતમનુષ્યતા ચ

08.3.10 નિત્યશ્ચ કોપેન સમ્બન્ધઃ પાપપ્રતિષેધાર્થઃ

08.3.11 કામઃ સિદ્ધિલાભઃ સાન્ત્વં ત્યાગશીલતા સમ્પ્રિયભાવશ્ચ

08.3.12 નિત્યશ્ચ કામેન સમ્બન્ધઃ કૃતકર્મણઃ ફલ ઉપભોગાર્થઃ ઇતિ

08.3.13 ન ઇતિ કૌટિલ્યઃ

08.3.14 દ્વેષ્યતા શત્રુવેદનં દુઃખાસઙ્ગશ્ચ કોપઃ

08.3.15 પરિભવો દ્રવ્યનાશઃ પાટચ્ચરદ્યૂતકારલુબ્ધકગાયનવાદકૈશ્ચાનર્થ્યૈઃ સમ્યોગઃ કામઃ

08.3.16 તયોઃ પરિભવાદ્ દ્વેષ્યતા ગરીયસી

08.3.17 પરિભૂતઃ સ્વૈઃ પરૈશ્ચાવગૃહ્યતે, દ્વેષ્યઃ સમુચ્છિદ્યત ઇતિ

08.3.18 દ્રવ્યનાશાત્શત્રુવેદનં ગરીયઃ

08.3.19 દ્રવ્યનાશઃ કોશાબાધકઃ, શત્રુવેદનં પ્રાણાબાધકં ઇતિ

08.3.20 અનર્થ્યસમ્યોગાદ્ દુઃખસમ્યોગો ગરીયાન્

08.3.21 અનર્થ્યસમ્યોગો મુહૂર્તપ્રતીકારો, દીર્ઘક્લેશકરો દુઃખાનાં આસઙ્ગ ઇતિ

08.3.22 તસ્માત્ કોપો ગરીયાન્

08.3.23 વાક્પારુષ્યં અર્થદૂષણં દણ્ડપારુષ્યં ઇતિ

08.3.24 વાક્પારુષ્યાર્થદૂષણયોર્વાક્પારુષ્યં ગરીયઃ ઇતિ વિશાલાક્ષઃ

08.3.25 પરુષમુક્તો હિ તેજસ્વી તેજસા પ્રત્યારોહતિ

08.3.26 દુરુક્તશલ્યં હૃદિ નિખાતં તેજઃસન્દીપનં ઇન્દ્રિય ઉપતાપિ ચ ઇતિ

08.3.27 ન ઇતિ કૌટિલ્યઃ

08.3.28 અર્થપૂજા વાક્શલ્યં અપહન્તિ, વૃત્તિવિલોપઃ ત્વર્થદૂષણમ્

08.3.29 અદાનં આદાનં વિનાશઃ પરિત્યાગો વાઽર્થસ્ય ઇત્યર્થદૂષણમ્

08.3.30 અર્થદૂષણદણ્ડપારુષ્યયોરર્થદૂષણં ગરીયઃ ઇતિ પારાશરાઃ

08.3.31 અર્થમૂલૌ ધર્મકામૌ

08.3.32 અર્થપ્રતિબદ્ધશ્ચ લોકો વર્તતે

08.3.33 તસ્ય ઉપઘાતો ગરીયાન્ ઇતિ

08.3.34 ન ઇતિ કૌટિલ્યઃ

08.3.35 સુમહતાઽપ્યર્થેન ન કશ્ચન શરીરવિનાશં ઇચ્છેત્

08.3.36 દણ્ડપારુષ્યાચ્ચ તં એવ દોષં અન્યેભ્યઃ પ્રાપ્નોતિ

08.3.37 ઇતિ કોપજઃ ત્રિવર્ગઃ

08.3.38 કામજઃ તુ મૃગયા દ્યૂતં સ્ત્રિયઃ પાનં ઇતિ ચતુર્વર્ગઃ

08.3.39 તસ્ય મૃગયાદ્યૂતયોર્મૃગયા ગરીયસી ઇતિ પિશુનઃ

08.3.40 સ્તેનામિત્રવ્યાલદાવપ્રસ્ખલનભયદિન્મોહાઃ ક્ષુત્પિપાસે ચ પ્રાણાબાધઃ તસ્યામ્

08.3.41 દ્યૂતે તુ જિતં એવાક્ષવિદુષા યથા જયત્સેનદુર્યોધનાભ્યામ્ ઇતિ

08.3.42 ન ઇત્યૌટિલ્યઃ

08.3.43 તયોરપ્યન્યતરપરાજયોઽસ્તિ ઇતિ નલયુધિષ્ઠિરાભ્યાં વ્યાખ્યાતમ્

08.3.44 તદ્ એવ વિજિતદ્રવ્યં આમિષં વૈરાનુબન્ધશ્ચ

08.3.45 સતોઽર્થસ્ય વિપ્રતિપત્તિરસતશ્ચાર્જનં અપ્રતિભુક્તનાશો મૂત્રપુરીષધારણબુભુક્ષાઽઽદિભિશ્ચ વ્યાધિલાભ ઇતિ દ્યૂતદોષાઃ

08.3.46 મૃગયાયાં તુ વ્યાયામઃ શ્લેષ્મપિત્તમેદઃસ્વેદનાશશ્ચલે સ્થિતે ચ કાયે લક્ષપરિચયઃ કોપભયસ્થાનેષુ ચ મૃગાણાં ચિત્તજ્ઞાનં અનિત્યયાનં ચ ઇતિ

08.3.47 દ્યૂતસ્ત્રીવ્યસનયોઃ કૈતવવ્યસનમ્ ઇતિ કૌણપદન્તઃ

08.3.48 સાતત્યેન હિ નિશિ પ્રદીપે માતરિ ચ મૃતાયાં દીવ્યત્યેવ કિતવઃ

08.3.49 કૃચ્છ્રે ચ પ્રતિપૃષ્ટઃ કુપ્યતિ

08.3.50 સ્ત્રીવ્યસને તુ સ્નાનપ્રતિકર્મભોજનભૂમિષુ ભવત્યેવ ધર્માર્થપરિપ્રશ્નઃ

08.3.51 શક્યા ચ સ્ત્રી રાજહિતેનિયોક્તું, ઉપાંશુદણ્ડેન વ્યાધિના વા વ્યાવર્તયિતું અવસ્રાવયિતું વા ઇતિ

08.3.52 ન ઇતિ કૌટિલ્યઃ

08.3.53 સપ્રત્યાદેયં દ્યૂતં નિષ્પ્રત્યાદેયં સ્ત્રીવ્યસનમ્

08.3.54 અદર્શનં કાર્યનિર્વેદઃ કાલાતિપાતનાદ્ અનર્થો ધર્મલોપશ્ચ તન્ત્રદૌર્બલ્યં પાનાનુબન્ધશ્ચ ઇતિ

08.3.55 સ્ત્રીપાનવ્યસનયોઃ સ્ત્રીવ્યસનમ્ ઇતિ વાતવ્યાધિઃ

08.3.56 સ્ત્રીષુ હિ બાલિશ્યં અનેકવિધં નિશાન્તપ્રણિધૌ વ્યાખ્યાતમ્

08.3.57 પાને તુ શબ્દાદીનાં ઇન્દ્રિયાર્થાનાં ઉપભોગઃ પ્રીતિદાનં પરિજનપૂજનં કર્મશ્રમવધશ્ચ ઇતિ

08.3.58 ન ઇતિ કૌટિલ્યઃ

08.3.59 સ્ત્રીવ્યસને ભવત્યપત્ય ઉત્પત્તિરાત્મરક્ષણં ચાન્તર્દારેષુ, વિપર્યયો વા બાહ્યેષુ, અગમ્યેષુ સર્વ ઉચ્છિત્તિઃ

08.3.60 તદ્ ઉભયં પાનવ્યસને

08.3.61 પાનસમ્પત્ - સંજ્ઞાનાશોઽનુન્મત્તસ્ય ઉન્મત્તત્વં અપ્રેતસ્ય પ્રેતત્વં કૌપીનદર્શનં શ્રુતપ્રજ્ઞાપ્રાણવિત્તમિત્રહાનિઃ સદ્ભિર્વિયોગોઽનર્થ્યસમ્યોગઃ તન્ત્રીગીતનૈપુણ્યેષુ ચાર્થઘ્નેષુ પ્રસઙ્ગ ઇતિ

08.3.62 દ્યૂતમદ્યયોર્દ્યૂતમ્

08.3.63 એકેષાં પણનિમિત્તો જયઃ પરાજયો વા પ્રાણિષુ નિશ્ચેતનેષુ વા પક્ષદ્વૈધેન પ્રકૃતિકોપં કરોતિ

08.3.64 વિશેષતશ્ચ સઙ્ઘાનાં સઙ્ઘધર્મિણાં ચ રાજકુલાનાં દ્યૂતનિમિત્તો ભેદઃ તન્નિમિત્તો વિનાશ ઇત્યસત્પ્રગ્રહઃ પાપિષ્ઠતમો વ્યસનાનાં તન્ત્રદૌર્બલ્યાદ્ ઇતિ

08.3.65ab અસતાં પ્રગ્રહઃ કામઃ કોપશ્ચાવગ્રહઃ સતામ્ ।

08.3.65chd વ્યસનં દોષબાહુલ્યાદ્ અત્યન્તં ઉભયં મતમ્

08.3.66ab તસ્માત્ કોપં ચ કામં ચ વ્યસનારમ્ભં આત્મવાન્ ।

08.3.66chd પરિત્યજેન્ મૂલહરં વૃદ્ધસેવી જિત ઇન્દ્રિયઃ (ઇતિ)

Chapt . પીડનવર્ગઃ - સ્તમ્ભવર્ગઃ - કોશસંગવર્ગઃ

08.4.01 દૈવપીડનં - અગ્નિરુદકં વ્યાધિર્દુર્ભિક્ષં મરક ઇતિ

08.4.02 અગ્ન્ય્। ઉદકયોરગ્નિપીડનં અપ્રતિકાર્યં સર્વદાહિ ચ, શક્યાપગમનં તાર્યાબાધં ઉદકપીડનમ્ ઇત્યાચાર્યાઃ

08.4.03 ન ઇત્ કૌટિલ્યઃ

08.4.04 અગ્નિર્ગ્રામં અર્ધગ્રામં વા દહતિ, ઉદકવેગઃ તુ ગ્રામશતપ્રવાહી ઇતિ

08.4.05 વ્યાધિદુર્ભિક્ષયોર્વ્યાધિઃ પ્રેતવ્યાધિત ઉપસૃષ્ટપરિચારકવ્યાયામ ઉપરોધેન કર્માણ્યુપહન્તિ, દુર્ભિક્ષં પુનરકર્મ ઉપઘાતિ હિરણ્યપશુકરદાયિ ચ ઇત્યાચાર્યાઃ

08.4.06 ન ઇતિ કૌટિલ્યઃ

08.4.07 એકદેશપીડનો વ્યાધિઃ શક્યપ્રતીકારશ્ચ, સર્વદેશપીડનં દુર્ભિક્ષં પ્રાણિનાં અજીવનાય ઇતિ

08.4.08 તેન મરકો વ્યાખ્યાતઃ

08.4.09 ક્ષુદ્રકમુખ્યક્ષયયોઃ ક્ષુદ્રકક્ષયઃ કર્મણાં અયોગક્ષેમં કરોતિ, મુખ્યક્ષયઃ કર્માનુષ્ઠાન ઉપરોધધર્મા ઇત્યાચાર્યાઃ

08.4.10 ન ઇતિ કૌટિલ્યઃ

08.4.11 શક્યઃ ક્ષુદ્રકક્ષયઃ પ્રતિસન્ધાતું બાહુલ્યાત્ ક્ષુદ્રકાણાં, ન મુખ્યક્ષયઃ

08.4.12 સહસ્રેષુ હિ મુખ્યો ભવત્યેકો ન વા સત્ત્વપ્રજ્ઞાઽઽધિક્યાત્ તદ્। આશ્રયત્વાત્ ક્ષુદ્રકાણાં ઇતિ

08.4.13 સ્વચક્રપરચક્રયોઃ સ્વચક્રં અતિમાત્રાભ્યાં દણ્ડકરાભ્યાં પીડયત્યશક્યં ચ વારયિતું, પરચક્રં તુ શક્યં પ્રૈયોદ્ધું ઉપસારેણ સન્ધિના વા મોક્ષયિતુમ્ ઇત્યાચાર્યાઃ

08.4.14 ન ઇતિ કૌટિલ્યઃ

08.4.15 સ્વચક્રપીડનં પ્રકૃતિપુરુષમુખ્ય ઉપગ્રહવિઘાતાભ્યાં શક્યતે વારયિતું એકદેશં વા પીડયતિ, સર્વદેશપીડનં તુ પરચક્રં વિલોપઘાતદાહવિધ્વંસનાપવાહનૈઃ પીડયતિ ઇતિ

08.4.16 પ્રકૃતિરાજવિવાદયોઃ પ્રકૃતિવિવાદઃ પ્રકૃતીનાં ભેદકઃ પરાભિયોગાન્ આવહતિ, રાજવિવાદઃ તુ પ્રકૃતીનાં દ્વિગુણભક્તવેતનપરિહારકરો ભવતિ ઇત્યાચાર્યાઃ

08.4.17 ન ઇતિ કૌટિલ્યઃ

08.4.18 શક્યઃ પ્રકૃતિવિવાદઃ પ્રકૃતિમુખ્ય ઉપગ્રહેણ કલહસ્થાનાપનયનેન વા વારયિતુમ્

08.4.19 વિવદમાનાઃ તુ પ્રકૃતયઃ પરસ્પરસઙ્ઘર્ષેણ ઉપકુર્વન્તિ

08.4.20 રાજવિવાદઃ તુ પીડન ઉચ્છેદનાય પ્રકૃતીનાં દ્વિગુણવ્યાયામસાધ્ય ઇતિ

08.4.21 દેશરાજવિહારયોર્દેશવિહારઃ ત્રૈકાલ્યેન કર્મફલ ઉપઘાતં કરોતિ, રાજવિહારઃ તુ કારુશિલ્પિકુશીલવવાગ્જીવનરૂપાજીવા ઉપકારં કરોતિ ઇત્યાચાર્યાઃ

08.4.22 ન ઇતિ કૌટિલ્યઃ

08.4.23 દેશવિહારઃ કર્મશ્રમં અવધાડર્થં અલ્પં ભક્ષયતિ ભક્ષયિત્વા ચ ભૂયઃ કર્મસુ યોગં ગચ્છતિ, રાજવિહારઃ તુ સ્વયં વલ્લભૈશ્ચ સ્વયઙ્ગ્રાહપ્રણયપણ્યાગારકાર્ય ઉપગ્રહૈઃ પીડયતિ ઇતિ

08.4.24 સુભગાકુમારયોઃ કુમારઃ સ્વયં વલ્લભૈશ્ચ સ્વયઙ્ગ્રાહપ્રણયપણ્યાગારકાર્ય ઉપગ્રહૈઃ પીડયતિ, સુભગા વિલાસ ઉપભોગેન ઇત્યાચાર્યાઃ

08.4.25 ન ઇતિ કૌટિલ્યઃ

08.4.26 શક્યઃ કુમારો મન્ત્રિપુરોહિતાભ્યાં વારયિતું, ન સુભગા બાલિશ્યાદ્ અનર્થ્યજનસમ્યોગાચ્ચ ઇતિ

08.4.27 શ્રેણીમુખ્યયોઃ શ્રેણી બાહુલ્યાદ્ અનવગ્રહા સ્તેયસાહસાભ્યાં પીડયતિ, મુખ્યઃ કાર્યાનુગ્રહવિઘાતાભ્યામ્ ઇત્યાચાર્યાઃ

08.4.28 ન ઇતિ કૌટિલ્યઃ

08.4.29 સુવ્યાવર્ત્યા શ્રેણી સમાનશીલવ્યસનત્વાત્, શ્રેણીમુખ્ય એકદેશ ઉપગ્રહેણ વા

08.4.30 સ્તમ્ભયુક્તો મુખ્યઃ પરપ્રાણદ્રવ્ય ઉપઘાતાભ્યાં પીડયતિ ઇતિ

08.4.31 સમ્નિધાતૃસમાહર્ત્રોઃ સમ્નિધાતા કૃતવિદૂષણાત્યયાભ્યાં પીડયતિ, સમાહર્તા કરણાધિષ્ઠિતઃ પ્રદિષ્ટફલ ઉપભોગી ભવતિ ઇત્યાચાર્યાઃ

08.4.32 ન ઇતિ કૌટિલ્યઃ

08.4.33 સમ્નિધાતા કૃતાવસ્થં અન્યૈઃ કોશપ્રવેશ્યં પ્રતિગૃહ્ણાતિ, સમાહર્તા તુ પૂર્વં અર્થં આત્મનઃ કૃત્વા પશ્ચાદ્ રાજાર્થં કરોતિ પ્રણાશયતિ વા, પરસ્વાદાને ચ સ્વપ્રત્યયશ્ચરતિ ઇતિ

08.4.34 અન્તપાલવૈદેહકયોરન્તપાલશ્ચોરપ્રસર્ગદેયાત્યાદાનાભ્યાં વણિક્પથં પીડયતિ, વૈદેહકાઃ તુ પણ્ય।પ્રતિપણ્યાનુગ્રહૈઃ પ્રસાધયન્તિ ઇત્યાચાર્યાઃ

08.4.35 ન ઇતિ કૌટિલ્યઃ

08.4.36 અન્તપાલઃ પણ્યસમ્પાતાનુગ્રહેણ વર્તયતિ, વૈદેહકાઃ તુ સમ્ભૂય પણ્યાનાં ઉત્કર્ષાપકર્ષં કુર્વાણાઃ પણે પણશતં કુમ્ભે કુમ્ભશતં ઇત્યાજીવન્તિ

08.4.37 અભિજાત ઉપરુદ્ધા ભૂમિઃ પશુવ્રજ ઉપરુદ્ધા વા ઇતિ અભિજાત ઉપરુદ્ધા ભૂમિઃ મહાફલાડપ્યાયુધીય ઉપકારિણી ન ક્ષમા મોક્ષયિતું વ્યસનાબાધભયાત્, પશુવ્રજ ઉપરુદ્ધા તુ કૃષિયોગ્યા ક્ષમા મોક્ષયિતુમ્

08.4.38 વિવીતં હિ ક્ષેત્રેણ બાધ્યતે ઇત્યાચાર્યાઃ

08.4.39 ન ઇતિ કૌટિલ્યઃ

08.4.40 અભિજાત ઉપરુદ્ધા ભૂમિરત્યન્તમહા ઉપકારાડપિ ક્ષમા મોક્ષયિતું વ્યસનાબાધભયાત્, પશુવ્રજ ઉપરુદ્ધા તુ કોશવાહન ઉપકારિણી ન ક્ષમા મોક્ષયિતું, અન્યત્ર સસ્યવાપ ઉપરોધાદ્ ઇતિ

08.4.41 પ્રતિરોધકાટવિકયોઃ પ્રતિરોધકા રાત્રિસત્ત્રચરાઃ શરીરાક્રમિણો નિત્યાઃ શતસહસ્રાહપારિણઃ પ્રધાનકોપકાશ્ચ વ્યવહિતાઃ પ્રત્યન્તરારણ્યચરાશ્ચાટવિકાઃ પ્રકાશા દૃસ્યાશ્ચરન્તિ, એકદેશઘાતકાશ્ચ ઇત્યાચાર્યાઃ

08.4.42 ન ઇતિ કૌટિલ્યઃ

08.4.43 પ્રતિરોધકાઃ પ્રમત્તસ્યાપરહન્તિ, અલ્પાઃ કુણ્ઠાઃ સુખા જ્ઞાતું ગ્રહીતું ચ, સ્વદેશસ્થાઃ પ્રભૂતા વિક્રાન્તાશ્ચાટવિકાઃ પ્રકાશયોદિનોઽપહર્તારો હન્તારશ્ચ દેશાનાં રાજસધર્માણ ઇતિ

08.4.44 મૃગહસ્તિવનયોઃ મૃગાઃ પ્રભૂતાઃ પ્રભૂતમાંસચર્મ ઉપકારિણો મન્દગ્રાસાવક્લેશિનઃ સુનિયમ્યાશ્ચ

08.4.45 વિપરીતા હસ્તિનો ગૃહ્યમાણા દુષ્ટાશ્ચ દેશવિનાશાય ઇતિ

08.4.46 સ્વપરસ્થાનીય ઉપકારયોઃ સ્વસ્થાનીય ઉપકારો ધાન્યપશુહિરણ્યકુપ્ય ઉપકારો જાનપદાનાં આપદ્યાત્મધારણઃ

08.4.47 વિપરીતઃ પરસ્થાનીય ઉપકારઃ

08.4.48 ઇતિ પીડનાનિ - આભ્યન્તરો મુખ્યસ્તમ્ભો બાહ્યોઽમિત્રાટવીસ્તમ્ભઃ ઇતિ સ્તમ્ભવર્ગહ્

08.4.49 તાભ્યાં પીડનૈર્યથા ઉક્તૈશ્ચ પીડિતઃ, સક્તો મુખ્યેષુ, પરિહાર ઉપહતઃ, પ્રકીર્ણો, મિથ્યાસંહૃતઃ, સામન્તાટવીહૃત ઇતિ કોશસઙ્ગવર્ગઃ

08.4.50ab પીડનાનાં અનુત્પત્તાવુત્પન્નાનાં ચ વારણે ।

08.4.50chd યતેત દેશવૃદ્ધ્યઽર્થં નાશે ચ સ્તમ્ભસઙ્ગયોઃ (ઇતિ)

Chapt . બલવ્યસનવર્ગઃ - મિત્રવ્યસનવર્ગઃ

08.5.01 બલવ્યસનાનિ - અમાનિતં, વિમાનિતં, અભૃતં, વ્યાધિતં, નવાગતં, દૂરાયાતં, પરિશ્રાન્તં, પરિક્ષીણં, પ્રતિહતં, હતાગ્રવેગં, અનૃતુપ્રાપ્તં, અભૂમિપ્રાપ્તં, આશાનિર્વેદિ, પરિસૃપ્તં, કલત્રગર્ભિ, અન્તઃશલ્યં, કુપિતમૂલં, ભિન્નગર્ભં, અપસૃતં, અતિક્ષિપ્તં, ઉપનિવિષ્ટં, સમાપ્તં, ઉપરુદ્ધં, પરિક્ષિપ્તં, છિન્નધાન્યપુરુષવીવધં, સ્વવિક્ષિપ્તં, મિત્રવિક્ષિપ્તં, દૂષ્યયુક્તં, દુષ્ટપાર્ષ્ણિગ્રાહં, શૂન્યમૂલં, અસ્વામિસંહતં, ભિન્નકૂટં, અન્ધં ઇતિ

08.5.02 તેષાં અમાનિતવિમાનિતાનિયતયોરમાનિતં કૃતાર્થમાનં યુધ્યેત, ન વિમાનિતં અન્તઃકોપમ્

08.5.03 અભૃતવ્યાધિતયોરભૃતં તદાત્વકૃતવેતનં યુધ્યેત, ન વ્યાધિતં અકર્મણ્યમ્

08.5.04 નવાગતદૂરાયાતયોર્નવાગતં અન્યત ઉપલબ્ધદેશં અનવમિશ્રં યુધ્યેત, ન દૂરાયતં આયતગતપરિક્લેશમ્

08.5.05 પરિશ્રાન્તપરિક્ષીણયોઃ પરિશ્રાન્તં સ્નાનભોજનસ્વપ્નલબ્ધવિશ્રામં યુધ્યેત, ન પરિક્ષીણં અન્યત્રાહવે ક્ષીણયુગ્યપુરુષમ્

08.5.06 પ્રતિહતહતાગ્રવેગયોઃ પ્રતિહતં અગ્રપાતભગ્નં પ્રવીરપુરુષસંહતં યુધ્યેત, ન હતાગ્રવેગં અગ્રપાતહતવીરમ્

08.5.07 અનૃત્વ્ઽભૂમિપ્રાપ્તયોરનૃતુપ્રાપ્તં યથ। ઋતુયુગ્યશસ્ત્રાવરણં યુધ્યેત, નાભૂમિપ્રાપ્તં અવરુદ્ધપ્રસારવ્યાયામમ્

08.5.08 આશાનિર્વેદિપરિસૃપ્તયોરાશાનિર્વેદિ લબ્ધાભિપ્રાયં યુધ્યેત, ન પરિસૃપ્તં અપસૃતમુખ્યમ્

08.5.09 કલત્રગર્ભ્યઽન્તઃશલ્યયોઃ કલત્રગર્ભિ ઉન્મુચ્ય કલત્રં યુધ્યેત, નાન્તઃશલ્યં અન્તરમિત્રમ્

08.5.10 કુપિતમૂલભિન્નગર્ભયોઃ કુપિતમૂલં પ્રશમિતકોપં સામાદિભિર્યુધ્યેત, ન ભિન્નગર્ભં અન્યોન્યસ્માદ્ ભિન્નમ્

08.5.11 અપસૃતાતિક્ષિપ્તયોરપસૃતં એકરાજ્યાતિક્રાન્તં મન્ત્રવ્યાયામાભ્યાં સત્ત્રમિત્રાપાશ્રયં યુધ્યેત, નાતિક્ષિપ્તં અનેકરાજ્યાતિક્રાન્તં બહ્। આબાધત્વાત્

08.5.12 ઉપનિવિષ્ટસમાપ્તયોરુપનિવિષ્ટં પૃથગ્યાનસ્થાનં અતિસન્ધાયારિં યુધ્યેત, ન સમાપ્તં અરિણા એકસ્થાનયાનમ્

08.5.13 ઉપરુદ્ધપરિક્ષિપ્તયોરુપરુદ્ધં અન્યતો નિષ્ક્રમ્ય ઉપરોદ્ધારં પ્રતિયુધ્યેત, ન પરિક્ષિપ્તં સર્વતઃ પ્રતિરુદ્ધમ્
08.5.14 છિન્નધાન્યપુરુષવીવધયોઃ છિન્નધાન્યં અન્યતો ધાન્યં આનીય જઙ્ગમસ્થાવરાહારં વા યુધ્યેત, ન છિન્નપુરુષવીવધં અનભિસારમ્
08.5.15 સ્વવિક્ષિપ્તમિત્રવિક્ષિપ્તયોઃ સ્વવિક્ષિપ્તં સ્વભૂમૌ વિક્ષિપ્તં સૈન્યં આપદિ શક્યં આવાહયિતું, ન મિત્રવિક્ષિપ્તં વિપ્રકૃષ્ટદેશકાલત્વાત્
08.5.16 દૂષ્યયુક્તદુષ્ટપાર્ષ્ણિગ્રાહયોર્દૂષ્યયુક્તં આપ્તપુરુષાધિષ્ઠિતં અસંહતં યુધ્યેત, ન દુષ્ટપાર્ષ્ણિગ્રાહં પૃષ્ઠાભિઘાતત્રસ્તમ્
08.5.17 શૂન્યમૂલાસ્વામિસંહતયોઃ શૂન્યમૂલં કૃતપૌરજાનપદારક્ષં સર્વસન્દોહેન યુધ્યેત, નાસ્વામિસંહતં રાજસેનાપતિહીનમ્
08.5.18 ભિન્નકૂટાન્ધયોર્ભિન્નકૂટં અન્યાધિષ્ઠિતં યુધ્યેત, નાન્ધં અદેશિકં - ઇતિ
08.5.19ab દોષશુદ્ધિર્બલાવાપઃ સત્રસ્થાનાતિસંહિતમ્ ।
08.5.19chd સન્ધિશ્ચ ઉત્તરપક્ષસ્ય બલવ્યસનસાધનમ્
08.5.20ab રક્ષેત્ સ્વદણ્ડં વ્યસને શત્રુભ્યો નિત્યં ઉત્થિતઃ ।
08.5.20chd પ્રહરેદ્ દણ્ડરન્ધ્રેષુ શત્રૂણાં નિત્યં ઉત્થિતઃ
08.5.21ab યતો નિમિત્તં વ્યસનં પ્રકૃતીનાં અવાપ્નુયાત્ ।
08.5.21chd પ્રાગ્ એવ પ્રતિકુર્વીત તન્નિમિત્તં અતન્દ્રિતઃ ।
08.5.22ab અભિયાતં સ્વયં મિત્રં સમ્ભૂયાન્યવશેન વા
08.5.22chd પરિત્યક્તં અશક્ત્યા વા લોભેન પ્રણયેન વા ।
08.5.23ab વિક્રીતં અભિયુઞ્જાને સઙ્ગ્રામે વાऽપવર્તિના
08.5.23chd દ્વૈધીભાવેન વાऽમિત્રં યાસ્યતા વાऽન્યં અન્યતઃ ।
08.5.24ab પૃથગ્ વા સહયાને વા વિશ્વાસેનાતિસંહિતમ્
08.5.24chd ભયાવમાનાલસ્યૈર્વા વ્યસનાન્ન પ્રમોક્ષિતમ્ ।
08.5.25ab અવરુદ્ધં સ્વભૂમિભ્યઃ સમીપાદ્ વા ભયાદ્ ગતમ્
08.5.25chd આચ્છેદનાદ્ અદાનાદ્ વા દત્ત્વા વાऽપ્યવમાનિતમ્ ।
08.5.26ab અત્યાહારિતં અર્થં વા સ્વયં પરમુખેન વા
08.5.26chd અતિભારે નિયુક્તં વા ભઙ્ક્ત્વા પરં ઉપસ્થિતમ્ ।
08.5.27ab ઉપેક્ષિતં અશક્ત્યા વા પ્રાર્થયિત્વા વિરોધિતમ્
08.5.27chd કૃચ્છ્રેણ સાધ્યતે મિત્રં સિદ્ધં ચાશુ વિરજ્યતિ ।
08.5.28ab કૃતપ્રયાસં માન્યં વા મોહાન્ મિત્રં અમાનિતમ્ ।
08.5.28chd માનિતં વા ન સદૃશં શક્તિતો વા નિવારિતમ્
08.5.29ab મિત્ર ઉપઘાતત્રસ્તં વા શઙ્કિતં વાऽરિસંહિતાત્ ।
08.5.29chd દૂષ્યૈર્વા ભેદિતું મિત્રં સાધ્યં સિદ્ધં ચ તિષ્ઠતિ

08.5.30ab તસ્માન્ન ઉત્પાદયેદ્ એનાન્ દોષાન્ મિત્ર ઉપઘાતકાન્ ।

08.5.30chd ઉત્પન્નાન્ વા પ્રશમયેદ્ ગુણૈર્દોષ ઉપઘાતિભિઃ (ઇતિ)

Book .

Chapt . શક્તિદેશકાલબલાબલજ્ઞાનં - યાત્રાકાલાઃ

09.1.01 વિજિગીષુરાત્મનઃ પરસ્ય ચ બલાબલં શક્તિદેશકાલયાત્રાકાલબલસમુદ્દાનકાલપશ્ચાત્કોપક્ષયવ્યયલાભાપદાં જ્ઞાત્વા વિશિષ્ટબલો યાયાત્, અન્યથાઽઽસીત

09.1.02 ઉત્સાહપ્રભાવયોરુત્સાહઃ શ્રેયાન્

09.1.03 સ્વયં હિ રાજા શૂરો બલવાન્ અરોગઃ કૃતાસ્ત્રો દણ્ડદ્વિતીયોઽપિ શક્તઃ પ્રભાવવન્તં રાજાનં જેતુમ્

09.1.04 અલ્પોઽપિ ચાસ્ય દણ્ડઃ તેજસા કૃત્યકરો ભવતિ

09.1.05 નિરુત્સાહઃ તુ પ્રભાવવાન્ રાજા વિક્રમાભિપન્નો નશ્યતિ ઇત્યાચાર્યાઃ

09.1.06 ન ઇતિ કૌટિલ્યઃ

09.1.07 પ્રભાવવાન્ ઉત્સાહવન્તં રાજાનં પ્રભાવેનાતિસન્ધત્તે તદ્વિશિષ્ટં અન્યં રાજાનં આવાહ્ય ભૃત્વા ક્રીત્વા પ્રવીરપુરુષાન્

09.1.08 પ્રભૂતપ્રભાવહયહસ્તિરથ ઉપકરણસમ્પન્નશ્ચાસ્ય દણ્ડઃ સર્વત્રાપ્રતિહતશ્ચરતિ

09.1.09 ઉત્સાહવતશ્ચ પ્રભાવવન્તો જિત્વા ક્રીત્વા ચ સ્ત્રિયો બાલાઃ પઙ્ગવોઽન્ધાશ્ચ પૃથિવીં જિગ્યુરિતિ

09.1.10 પ્રભાવમન્ત્રયોઃ પ્રભાવઃ શ્રેયાન્

09.1.11 મન્ત્રશક્તિસમ્પન્નો હિ વન્ધ્યબુદ્ધિરપ્રભાવો ભવતિ

09.1.12 મન્ત્રકર્મ ચાસ્ય નિશ્ચિતં અપ્રભાવો ગર્ભધાન્યં અવૃષ્ટિરિવ ઉપહન્તિ ઇત્યાચાર્યાઃ

09.1.13 ન ઇતિ કૌટિલ્યઃ

09.1.14 મન્ત્રશક્તિઃ શ્રેયસી

09.1.15 પ્રજ્ઞાશાસ્ત્રચક્ષુર્હિ રાજાઽલ્પેનાપિ પ્રયત્નેન મન્ત્રં આધાતું શક્તઃ પરાન્ ઉત્સાહપ્રભાવવતશ્ચ સામાદિભિર્યોગ ઉપનિષદ્ભ્યાં ચાતિસન્ધાતુમ્

09.1.16 એવં ઉત્સાહપ્રભાવમન્ત્રશક્તીનાં ઉત્તર ઉત્તરાધિકોઽતિસન્ધત્તે

09.1.17 દેશઃ પૃથિવી

09.1.18 તસ્યાં હિમવત્સમુદ્રાન્તરં ઉદીચીનં યોજનસહસ્રપરિમાણં તિર્યક્ ચક્રવર્તિક્ષેત્રમ્

09.1.19 તત્રારણ્યો ગ્રામ્યઃ પર્વત ઔદકો ભૌમઃ સમો વિષમ ઇતિ વિશેષાઃ

09.1.20 તેષુ યથાસ્વબલવૃદ્ધિકરં કર્મ પ્રયુઞ્જીત

09.1.21 યત્રાત્મનઃ સૈન્યવ્યાયામાનાં ભૂમિઃ, અભૂમિઃ પરસ્ય, સ ઉત્તમો દેશઃ, વિપરીતોઽધમઃ, સાધારણો મધ્યમઃ

09.1.22 કાલઃ શીત ઉષ્ણવર્ષાત્મા

09.1.23 તસ્ય રાત્રિરહઃ પક્ષો માસ ઋતુરયનં સંવત્સરો યુગં ઇતિ વિશેષાઃ

09.1.24 તેષુ યથાસ્વબલવૃદ્ધિકરં કર્મપ્રયુઞ્જીત

09.1.25 યત્રાત્મનઃ સૈન્યવ્યાયામાનાં ઋતુઃ અનૃતુઃ પરસ્ય, સ ઉત્તમઃ કાલઃ, વિપરીતોઽધમઃ, સાધારણો મધ્યમઃ

09.1.26 શક્તિદેશકાલાનાં તુ શક્તિઃ શ્રેયસી ઇત્યાચાર્યાઃ

09.1.27 શક્તિમાન્ હિ નિમ્નસ્થલવતો દેશસ્ય શીત ઉષ્ણવર્ષવતશ્ચ કાલસ્ય શક્તઃ પ્રતીકારે ભવતિ

09.1.28 દેશઃ શ્રેયાન્ ઇત્યેકે

09.1.29 સ્થલગતો હિ શ્વા નક્રં વિકર્ષતિ, નિમ્નગતો નક્રઃ શ્વાનમ્ ઇતિ

09.1.30 કાલઃ શ્રેયાન્ ઇત્યેકે

09.1.31 દિવા કાકઃ કૌશિકં હન્તિ, રાત્રૌ કૌશિકઃ કાકમ્ ઇતિ

09.1.32 ન ઇતિ કૌટિલ્યઃ

09.1.33 પરસ્પરસાધકા હિ શક્તિદેશકાલાઃ

09.1.34 તૈરભ્યુચ્ચિતઃ તૃતીયં ચતુર્થં વા દણ્ડસ્યાંશં મૂલે પાર્ષ્ણ્યાં પ્રત્યન્તાટવીષુ ચ રક્ષા વિધાય કાર્યસાધનસહં કોશદણ્ડં ચાદાય ક્ષીણપુરાણભક્તં અગૃહીતનવભક્તં અસંસ્કૃતદુર્ગમમિત્રં વાર્ષિકં ચાસ્ય સસ્યં હૈમનં ચ મુષ્ટિં ઉપહન્તું માર્ગશીર્ષીં યાત્રાં યાયાત્

09.1.35 હૈમાનં ચાસ્ય સસ્યં વાસન્તિકં ચ મુષ્ટિં ઉપહન્તું ચૈત્રીં યાત્રાં યાયાત્

09.1.36 ક્ષીણકૃણકાષ્ઠ ઉદકં અસંસ્કૃતદુર્ગમમિત્રં વાસન્તિકં ચાસ્ય સસ્યં વાર્ષિકીં ચ મુષ્ટિં ઉપહન્તું જ્યેષ્ઠામૂલીયાં યાત્રાં યાયાત્

09.1.37 અત્યુષ્ણં અલ્પયવસ ઇન્ધન ઉદકં વા દેશં હેમન્તે યાયાત્

09.1.38 તુષારદુર્દિનં અગાધનિમ્નપ્રાયં ગહનતૃણવૃક્ષં વા દેશં ગ્રીષ્મે યાયાત્

09.1.39 સ્વસૈન્યવ્યાયામયોગ્યં પરસ્યાયોગ્યં વર્ષતિ યાયાત્

09.1.40 માર્ગશીર્ષીં તૈષીં ચાન્તરેણ દીર્ઘકાલાં યાત્રાં યાયાત્, ચૈત્રીં વૈશાખીં ચાન્તરેણ મધ્યમકાલાં, જ્યેષ્ઠામૂલીયાં આષાઢીં ચાન્તરેણ હ્રસ્વકાલાં, ઉપોષિષ્યન્ વ્યસને ચતુર્થીમ્

09.1.41 વ્યસનાભિયાનં વિગૃહ્યયાને વ્યાખ્યાતમ્

09.1.42 પ્રાયશશ્ચાચાર્યાઃ પરવ્યસને યાતવ્યમ્ ઇત્યુપદિશન્તિ

09.1.43 શક્ત્ય્। ઉદયે યાતવ્યં અનૈકાન્તિકત્વાદ્ વ્યસનાનાં ઇતિ કૌટિલ્યઃ

09.1.44 યદા વા પ્રયાતઃ કર્શયિતું ઉચ્છેતું વા શક્નુયાદ્ અમિત્રં તદા યાયાત્

09.1.45 અત્યુષ્ણ ઉપક્ષીણે કાલે હસ્તિબલપ્રાયો યાયાત્

09.1.46 હસ્તિનો હ્યન્તઃસ્વેદાઃ કુષ્ઠિનો ભવન્તિ

09.1.47 અનવગાહમાનાઃ તોયં અપિબન્તશ્ચાન્તર્ઽવક્ષારાચ્ચાન્ધીભવન્તિ

09.1.48 તસ્માત્ પ્રભૂત ઉદકે દેશે વર્ષતિ ચ હસ્તિબલપ્રાયો યાયાત્

09.1.49 વિપર્યયે ખર ઉષ્ટ્રાશ્વબલપ્રાયો દેશં અલ્પવર્ષપઙ્કમ્

09.1.50 વર્ષતિ મરુપ્રાયં ચતુર્ઽઙ્ગબલો યાયાત્

09.1.51 સમવિષમનિમ્નસ્થલહ્રસ્વદીર્ઘવશેન વાઽધ્વનો યાત્રાં વિભજેત્

09.1.52ab સર્વા વા હ્રસ્વકાલાઃ સ્યુર્યાતવ્યાઃ કાર્યલાઘવાત્ ।

09.1.52chd દીર્ઘાઃ કાર્યગુરુત્વાદ્ વા વર્ષાવાસઃ પરત્ર ચ  (ઇતિ)

Chapt . બલ ઉપાદાનકાલાઃ -સન્નાહગુણાઃ -પ્રતિબલકર્મ

09.2.01 મૌલભૃતકશ્રેણીમિત્રામિત્રાટવીબલાનાં સમુદ્દાનકાલાઃ

09.2.02 મૂલરક્ષણાદ્ અતિરિક્તં મૌલબલં, અત્યાવાપયુક્તા વા મૌલા મૂલે વિકુર્વીરન્, બહુલાનુરક્તમૌલબલઃ સારબલો વા પ્રતિયોદ્ધા, વ્યાયામેન યોદ્ધવ્યં, પ્રકૃષ્ટેઽધ્વનિ કાલે વા ક્ષયવ્યયસહત્વાન્ મૌલાનાં, બહુલાનુરક્તસમ્પાતે ચ યાતવ્યસ્ય ઉપજાપભયાદ્ અન્યસૈન્યાનાં ભૃતાદીનાં અવિશ્વાસે, બલક્ષયે વા સર્વસૈન્યાનાં - ઇતિ મૌલબલકાલઃ

09.2.03 પ્રભૂતં મે ભૃતબલં અલ્પં ચ મૌલબલમણ્ પરસ્યાલ્પં વિરક્તં વા મૌલબલં, ફલ્ગુપ્રાયં અસારં વા ભૃતસૈન્યમણ્ મન્ત્રેણ યોદ્ધવ્યં અલ્પવ્યાયામેનણ્ હ્રસ્વો દેશઃ કાલો વા તનુક્ષયવ્યયઙ્ અલ્પાવાપં શાન્ત ઉપજાપં વિશ્વસ્તં વા મે સૈન્યમણ્ પરસ્યાલ્પઃ પ્રસારો હન્તવ્યઙ્ - ઇતિ ભૃતબલકાલઃ

09.2.04 પ્રભૂતં મે શ્રેણીબલં, શક્યં મૂલે યાત્રાયાં ચાધાતુમણ્ હ્રસ્વઃ પ્રવાસઃ, શ્રેણીબલપ્રાયઃ પ્રતિયોદ્ધા મન્ત્રવ્યાયામાભ્યાં પ્રતિયોદ્ધુકામઃ, દણ્ડબલવ્યવહારઃ - ઇતિ શ્રેણીબલકાલઃ

09.2.05 પ્રભૂતં મે મિત્રબલં શક્યં મૂલે યાત્રાયાં ચાધાતુમણ્ અલ્પઃ પ્રવાસો મન્ત્રયુદ્ધાચ્ચ ભૂયો વ્યાયામયુદ્ધમણ્ મિત્રબલેન વા પૂર્વં અટવીં નગરસ્થાનં આસારં વા યોધયિત્વા પશ્ચાત્ સ્વબલેન યોદ્ધયિષ્યામિણ્ મિત્રસાધારણં વા મે કાર્યમણ્ મિત્રાયત્તા વા મે કાર્યસિદ્ધિઙ્ આસન્નં અનુગ્રાહ્યં વા મે મિત્રમણ્ અત્યાવાપં વાઽસ્ય સાદયિષ્યામિ - ઇતિ મિત્રબલકાલઃ

09.2.06 પ્રભૂતં મે શત્રુબલં, શત્રુબલેન યોધયિષ્યામિ નગરસ્થાનં અટવીં વા, તત્ર મે શ્વવરાહયોઃ કલહે ચણ્ડાલસ્ય ઇવાન્યતરસિદ્ધિર્ભવિષ્યતિણ્ આસારાણાં અટવીનાં વા કણ્ટકમર્દનં એતત્ કરિષ્યામિણ્ - અત્યુપચિતં વા કોપભયાન્નિત્યં આસન્નં અરિબલં વાસયેદ્, અન્યત્રાભ્યન્તરકોપશઙ્કાયાઃ - શત્રુયુદ્ધાવરયુદ્ધકાલશ્ચ - ઇત્યમિત્રબલકાલઃ

09.2.07 તેનાટવીબલકાલો વ્યાખ્યાતઃ

09.2.08 માર્ગાદિશિકં, પરભૂમિયોગ્યં, અરિયુદ્ધપ્રતિલોમં, અટવીબલપ્રાયઃ શત્રુર્વા, બિલ્વં બિલ્વેન હન્યતામણ્ અલ્પઃ પ્રસારો હન્તવ્યઃ - ઇત્યટવીબલકાલઃ

09.2.09 સૈન્યં અનેકં અનેકસ્થં ઉક્તં અનુક્તં વા વિલોપાર્થં યદ્ ઉત્તિષ્ઠતિ તદ્ ઔત્સાહિકં - અભક્તવેતનં વિલોપવિષ્ટિપ્રતાપકરં ભેદ્યં પરેષાં, અભેદ્યં તુલ્યદેશજાતિશિલ્પપ્રાયં સંહતં મહત્ ઇતિ બલ ઉપાદાનકાલાહ્

09.2.10 તેષાં કુપ્યભૃતં અમિત્રાટવીબલં વિલોપભૃતં વા કુર્યાત્

09.2.11 અમિત્રસ્ય વા બલકાલે પ્રત્યુત્પન્ને શત્રુબલં અવગૃહ્ણીયાત્, અન્યત્ર વા પ્રેષયેત્, અફલં વા કુર્યાત્, વિક્ષિપ્તં વા વાસયેત્, કાલે વાઽતિક્રાન્તે વિસૃજેત્

09.2.12 પરસ્ય ચ એતદ્ બલસમુદ્દાનં વિઘાતયેત્, આત્મનઃ સમ્પાદયેત્

09.2.13 પૂર્વં પૂર્વં ચ એષાં શ્રેયઃ સન્નાહયિતુમ્

09.2.14 તદ્ભાવભાવિત્વાન્નિત્યસત્કારાનુગમાચ્ચ મૌલબલં ભૃતબલાત્શ્રેયઃ

09.2.15 નિત્યાનન્તરં ક્ષિપ્ર ઉત્થાયિ વશ્યં વ ભૃતબલં શ્રેણીબલાત્શ્રેયઃ

09.2.16 જાનપદં એકાર્થ ઉપગતં તુલ્યસઙ્ઘર્ષામર્ષસિદ્ધિલાભં ચ શ્રેણીબલં મિત્રબલાત્શ્રેયઃ

09.2.17 અપરિમિતદેશકાલં એકાર્થ ઉપગમાચ્ચ મિત્રબલં અમિત્રબલાત્શ્રેયઃ

09.2.18 આર્યાધિષ્ઠિતં અમિત્રબલં અટવીબલાત્શ્રેયઃ
09.2.19 તદ્ ઉભયં વિલોપાર્થમ્
09.2.20 અવિલોપે વ્યસને ચ તાભ્યાં અહિભયં સ્યાત્
09.2.21 બ્રાહ્મણક્ષત્રિયવૈશ્યશૂદ્રસૈન્યાનાં તેજઃપ્રાધાન્યાત્ પૂર્વં પૂર્વં શ્રેયઃ સન્નાહયિતુમ્ ઇત્યાચાર્યાઃ
09.2.22 ન ઇતિ કૌટિલ્યઃ
09.2.23 પ્રણિપાતેન બ્રાહ્મણબલં પરોઽભિહારયેત્
09.2.24 પ્રહરણવિદ્યાવિનીતં તુ ક્ષત્રિયબલં શ્રેયઃ, બહુલસારં વા વૈશ્યશૂદ્રબલં ઇતિ
09.2.25 તસ્માદ્ એવમ્બલઃ પરઃ, તસ્ય એતત્ પ્રતિબલં ઇતિ બલસમુદ્દાનં કુર્યાત્
09.2.26 હસ્તિયન્ત્રશકટગર્ભકુન્તપ્રાસહાટકવેણુશલ્યવદ્ હસ્તિબલસ્ય પ્રતિબલમ્
09.2.27 તદ્ એવ પાષાણલગુડાવરણાઙ્કુશકચગ્રહણીપ્રાયં રથબલસ્ય પ્રતિબલમ્
09.2.28 તદ્ એવાશ્વાનાં પ્રતિબલં, વર્મિણો વા હસ્તિનોઽશ્વા વા વર્મિણઃ
09.2.29 કવચિનો રથા આવરણિનઃ પત્તયશ્ચ ચતુર્ઽઙ્ગબલસ્ય પ્રતિબલમ્
09.2.30ab એવં બલસમુદ્દાનં પરસૈન્યનિવારણમ્ ।
09.2.30chd વિભવેન સ્વસૈન્યાનાં કુર્યાદ્ અઙ્ગવિકલ્પશઃ (ઇતિ)

Chapt . પશ્ચાત્કોપચિન્તા - બાહ્યાભ્યન્તરપ્રકૃતિકોપપ્રતીકારઃ

09.3.01 અલ્પઃ પશ્ચાત્કોપો મહાન્ પુરસ્તાલ્લાભ ઇતિ અલ્પઃ પશ્ચાત્કોપો ગરીયાન્
09.3.02 અલ્પં પશ્ચાત્કોપં પ્રયાતસ્સ્ય દૂષ્યામિત્રાટવિકા હિ સર્વતઃ સમેધયન્તિ, પ્રકૃતિકોપો વા
09.3.03 લબ્ધં અપિ ચ મહાન્તં પુરસ્તાલ્લાહં એવમ્ભૂતે ભૃત્યમિત્રક્ષયવ્યયા ગ્રસન્તે
09.3.04 તસ્માત્ સહસ્ર એકીયઃ પુરસ્તાલ્લાભસ્યાયોગઃ શત એકીયો વા પશ્ચાત્કોપ ઇતિ ન યાયાત્
09.3.05 સૂચીમુખા હ્યનર્થા ઇતિ લોકપ્રવાદઃ
09.3.06 પશ્ચાત્કોપે સામદાનભેદદણ્ડાન્ પ્રયુઞ્જીત
09.3.07 પુરસ્તાલ્લાભે સેનાપતિં કુમારં વા દણ્ડચારિણં કુર્વીત
09.3.08 બલવાન્ વા રાજા પશ્ચાત્કોપાવગ્રહસમર્થઃ પુરસ્તાલ્લાભં આદાતું યાયાત્
09.3.09 અભ્યન્તરકોપશઙ્કાયાં શઙ્કિતાન્ આદાય યાયાત્, બાહ્યકોપશઙ્કાયાં વા પુત્રદારં એષામ્
09.3.10 અભ્યન્તરાવગ્રહં કૃત્વા શૂન્યપાલં અનેકબલવર્ગં અનેકમુખ્યં ચ સ્થાપયિત્વા યાયાત્, ન વા યાયાત્
09.3.11 અભ્યન્તરકોપો બાહ્યકોપાત્ પાપીયાન્ ઇત્યુક્તં પુરસ્તાત્
09.3.12 મન્ત્રપુરોહિતસેનાપતિયુવરાજાનાં અન્યતમકોપોઽભ્યન્તરકોપઃ
09.3.13 તં આત્મદોષત્યાગેન પરશક્ત્યઽપરાધવશેન વા સાધયેત્
09.3.14 મહાઽપરાધેઽપિ પુરોહિતે સમ્રોધનં અવસ્રાવણં વા સિદ્ધિઃ, યુવરાજે સમ્રોધનં નિગ્રહો વા ગુણવત્યન્યસ્મિન્ સતિ પુત્રે
09.3.15 પુત્રં ભ્રાતરં અન્યં વા કુલ્યં રાજગ્રાહિણં ઉત્સાહેન સાધયેત્, ઉત્સાહાભાવે ગૃહીતાનુવર્તનસન્ધિકર્મભ્યાં અરિસન્ધાનભયાત્

09.3.16 અન્યેભ્યઃ તદ્વિધેભ્યો વા ભૂમિદાનૈર્વિશ્વાસયેદ્ એનમ્
09.3.17 તદ્વિશિષ્ટં સ્વયઙ્ગ્રાહં દણ્ડં વા પ્રેષયેત્, સામન્તાટવિકાન્ વા, તૈર્વિગૃહીતં અતિસન્દધ્યાત્
09.3.18 અપરુદ્ધાદાનં પારગ્રામિકં વા યોગં આતિષ્ઠેત્
09.3.19 એતેન મન્ત્રસેનાપતી વ્યાખ્યાતૌ
09.3.20 મન્ત્ર્|આદિવર્જાનાં અન્તર્ડમાત્યાનાં અન્યતમકોપોડન્તર્ડમાત્યકોપઃ
09.3.21 તત્રાપિ યથાડર્હં ઉપાયાન્ પ્રયુઞ્જીત
09.3.22 રાષ્ટ્રમુખ્યાન્તપાલાટવિકદણ્ડ ઉપનતાનાં અન્યતમકોપો બાહ્યકોપઃ
09.3.23 તં અન્યોન્યેનાવગ્રાહયેત્
09.3.24 અતિદુર્ગપ્રતિષ્ટબ્ધં વા સામન્તાટવિકતત્કુલીનાપરુદ્ધાનાં અન્યતમેનાવગ્રાહયેત્
09.3.25 મિત્રેણ ઉપગ્રાહયેદ્ વા યથા નામિત્રં ગચ્છેત્
09.3.26 અમિત્રાદ્ વા સત્ત્રી ભેદયેદ્ એનં - અયં ત્વા યોગપુરુષં મન્યમાનો ભર્તર્યેવ વિક્રમયિષ્યતિ, અવાપ્તાર્થો દણ્ડચારિણં અમિત્રાટવિકેષુ કૃચ્છ્રે વા પ્રયાસે યોક્ષ્યતિ, વિપુત્રદારં અન્તે વા વાસયિષ્યતિ
09.3.27 પ્રતિહતવિક્રમં ત્વાં ભર્તર્યણ્યં કરિષ્યતિ, ત્વયા વા સન્ધિં કૃત્વા ભર્તારં એવ પ્રસાદયિષ્યતિ
09.3.28 મિત્રં ઉપકૃષ્ટં વાડસ્ય ગચ્છ ઇતિ
09.3.29 પ્રતિપન્નં ઇષ્ટાભિપ્રાયૈઃ પૂજયેત્
09.3.30 અપ્રતિપન્નસ્ય સંશ્રયં ભેદયેદ્ અસૌ તે યોગપુરુષઃ પ્રણિહિતઃ ઇતિ
09.3.31 સત્ત્રી ચ એનં અભિત્યક્તશાસનૈર્ઘાતયેત્, ગૂઢપુરુષૈર્વા
09.3.32 સહપ્રસ્થાયિનો વાડસ્ય પ્રવીરપુરુષાન્ યથાડભિપ્રાયકરણેનાવાહયેત્
09.3.33 તેન પ્રણિહિતાન્ સત્ત્રી બ્રૂયાત્
09.3.34 ઇતિ સિદ્ધિઃ
09.3.35 પરસ્ય ચ એનાન્ કોપાન્ ઉત્થાપયેત્, આત્મનશ્ચ શમયેત્
09.3.36 યઃ કોપં કર્તું શમયિતું વા શક્તઃ તત્ર ઉપજાપઃ કાર્યઃ
09.3.37 યઃ સત્યસન્ધઃ શક્તઃ કર્મણિ ફલાવાપ્તૌ ચાનુગ્રહીતું વિનિપાતે ચ ત્રાતું તત્ર પ્રતિજાપઃ કાર્યઃ, તર્કયિતવ્યશ્ચ કલ્યાણબુદ્ધિરુતાહો શઠ ઇતિ
09.3.38 શઠો હિ બાહ્યોડભ્યન્તરં એવં ઉપજપતિ - ભર્તારં ચેદ્ હત્વા માં પ્રતિપાદયિષ્યતિ શત્રુવધો ભૂમિલાભશ્ચ મે દ્વિવિધો લાભો ભવિષ્યતિ, અથ વા શત્રુરેનં આહનિષ્યતિ ઇતિ હતબન્ધુપક્ષઃ તુલ્યદોષદણ્ડેન ઉદ્વિગ્નશ્ચ મે ભૂયાન્ અકૃત્યપક્ષો ભવિષ્યતિ, તદ્વિધે વાડન્યસ્મિન્ન્ અપિ શઙ્કિતો ભવિષ્યતિ, અન્યં અન્યં ચાસ્ય મુખ્યં અભિત્યક્તશાસનેન ઘાતયિષ્યામિ ઇતિ
09.3.39 અભ્યન્તરો વા શઠો બાહ્યં એવં ઉપજપતિ - કોશં અસ્ય હરિષ્યામિ, દણ્ડં વાડસ્ય હનિષ્યામિ, દુષ્ટં વા ભર્તારં અનેન ઘાતયિષ્યામિ, પ્રતિપન્નં બાહ્યં અમિત્રાટવિકેષુ વિક્રમયિષ્યામિ ચક્રં અસ્ય સજ્યતાં, વૈરં અસ્ય પ્રસજ્યતાં, તતઃ સ્વાધીનો મે ભવિષ્યતિ, તતો ભર્તારં એવ પ્રસાદયિષ્યામિ, સ્વયં વા રાજ્યં ગ્રહીષ્યામિણ્ બદ્ધ્વા

વા બાહ્યભૂમિં ભર્તૃભૂમિં ચ ઉભયં અવાપ્સ્યામિ, વિરુદ્ધં વાઽઽવાહયિત્વા બાહ્યં વિશ્વસ્તં ઘાતયિષ્યામિ, શૂન્યં વાઽસ્ય મૂલં હરિષ્યામિ ઇતિ

09.3.40 કલ્યાણબુદ્ધિઃ તુ સહજીવ્યર્થં ઉપજપતિ

09.3.41 કલ્યાણબુદ્ધિના સન્દધીત, શઠં તથા ઇતિ પ્રતિગૃહ્યાતિસન્દધ્યાત્ - ઇતિ

09.3.42ab એવં ઉપલભ્ય - પરે પરેભ્યઃ સ્વે સ્વેભ્યઃ સ્વે પરેભ્યઃ સ્વતઃ પરે ।

09.3.42chd રક્ષ્યાઃ સ્વેભ્યઃ પરેભ્યશ્ચ નિત્યં આત્મા વિપશ્ચિતા (ઇતિ)

Chapt . ક્ષયવ્યયલાભવિપરિમર્શઃ

09.4.01 યુગ્યપુરુષાપચયઃ ક્ષયઃ

09.4.02 હિરણ્યધાન્યાપચયો વ્યયઃ

09.4.03 તાભ્યાં બહુગુણવિશિષ્ટે લાભે યાયાત્

09.4.04 આદેયઃ પ્રત્યાદેયઃ પ્રસાદકઃ પ્રકોપકો હ્રસ્વકાલઃ તનુક્ષયોઽલ્પવ્યયો મહાન્ વૃદ્ધ્ય્।ઉદયઃ કલ્યો ધર્મ્યઃ પુરોગશ્ચ ઇતિ લાભસમ્પત્

09.4.05 સુપ્રાપ્યાનુપાલ્યઃ પરેષાં અપ્રત્યાદેય ઇત્યાદેયઃ

09.4.06 વિપર્યયે પ્રત્યાદેયઃ

09.4.07 તં આદદાનઃ તત્રસ્થો વા વિનાશં પ્રાપ્નોતિ

09.4.08 યદિ વા પશ્યેત્ પ્રત્યાદેયં આદાય કોશદણ્ડનિચયરક્ષાવિધાનાન્યવસ્રાવયિષ્યામિ, ખનિદ્રવ્યહસ્તિવનસેતુબન્ધવણિક્પ ઉદ્ધૃતસારાન્ કરિષ્યામિ, પ્રકૃતીરસ્ય કર્શયિષ્યામિ, અપવાહયિષ્યામિ, આયોગેનારાધયિષ્યામિ વા, તાઃ પરં પ્રતિયોગેન કોપયિષ્યતિ, પ્રતિપક્ષે વાઽસ્ય પણ્યં એનં કરિષ્યામિ, મિત્રં અપરુદ્ધં વાઽસ્ય પ્રતિપાદયિષ્યામિ, મિત્રસ્ય સ્વસ્ય વા દેશસ્ય પીડાં અત્રસ્થઃ તસ્કરેભ્યઃ પરેભ્યશ્ચ પ્રતિકરિષ્યામિ, મિત્રં આશ્રયં વાઽસ્ય વૈગુણ્યં ગ્રાહયિષ્યામિ, તદ્ અમિત્રવિરક્તં તત્કુલીનં પ્રતિપત્સ્યતે, સત્કૃત્ય વાઽસ્મૈ ભૂમિં દાસ્યામિ ઇતિ સંહિતસમુત્થિતં મિત્રં મે ચિરાય ભવિષ્યતિ ઇતિ પ્રત્યાદેયં અપિ લાભં આદદીત

09.4.09 ઇત્યાદેયપ્રત્યાદેયૌ વ્યાખ્યાતૌ

09.4.10 અધાર્મિકાદ્ ધાર્મિકસ્ય લાભો લભ્યમાનઃ સ્વેષાં પરેષાં ચ પ્રસાદકો ભવતિ

09.4.11 વિપરીતઃ પ્રકોપક ઇતિ

09.4.12 મન્ત્રિણાં ઉપદેશાલ્લાભોઽલભ્યમાનઃ કોપકો ભવતિ અયં અસ્માભિઃ ક્ષયવ્યયૌ ગ્રાહિતઃ ઇતિ

09.4.13 દૂષ્યમન્ત્રિણાં અનાદરાલ્લાભો લભ્યમાનઃ કોપકો ભવતિ સિદ્ધાર્થોઽયં અસ્માન્ વિનાશયિષ્યતિ ઇતિ

09.4.14 વિપરીતઃ પ્રસાદકઃ

09.4.15 ઇતિ પ્રસાદકકોપકૌ વ્યાખ્યાતૌ

09.4.16 ગમનમાત્રસાધ્યત્વાદ્ હ્રસ્વકાલઃ

09.4.17 મન્ત્રસાધ્યત્વાત્ તનુક્ષયઃ

09.4.18 ભક્તમાત્રવ્યયત્વાદ્ અલ્પવ્યયઃ

09.4.19 તદાત્વવૈપુલ્યાન્ મહાન્

09.4.20 અર્થાનુબન્ધકત્વાદ્ વૃદ્ધ્ય્।ઉદયઃ

09.4.21 નિરાબાધકત્વાત્ કલ્યઃ

09.4.22 પ્રશસ્ત ઉપાદાનાદ્ ધર્મ્યઃ

09.4.23 સામવાયિકાનાં અનિર્બન્ધગામિત્વાત્ પુરોગઃ - ઇતિ

09.4.24 તુલ્યે લાભે દેશકાલૌ શક્ત્ય્।ઉપાયૌ પ્રિયાપ્રિયૌ જવાજવૌ સામીપ્યવિપ્રકર્ષૌ તદાત્વાનુબન્ધૌ સારત્વસાતત્યે બાહુલ્યબાહુગુણ્યે ચ વિમૃશ્ય બહુગુણયુક્તં લાભં આદદીત

09.4.25 લાભવિઘ્નાઃ - કામઃ કોપઃ સાધ્વસં કારુણ્યં હ્રીરનાર્યભાવો માનઃ સાનુક્રોશતા પરલોકાપેક્ષા ધાર્મિકત્વં અત્યાગિત્વં દૈન્યં અસૂયા હસ્તગતાવમાનો દૌરાત્મ્યં અવિશ્વાસો ભયં અપ્રતીકારઃ શીત ઉષ્ણવર્ષાણાં આક્ષમ્યં મઙ્ગલતિથિનક્ષત્ર ઇષ્ટિત્વં ઇતિ

09.4.26ab નક્ષત્રં અતિ પૃચ્છન્તં બાલં અર્થોઽતિવર્તતે ।

09.4.26chd અર્થો હ્યર્થસ્ય નક્ષત્રં કિં કરિષ્યન્તિ તારકાઃ

09.4.27ab નાધનાઃ પ્રાપ્નુવન્ત્યર્થાન્નરા યત્નશતૈરપિ ।

09.4.27chd અર્થૈરર્થા પ્રબધ્યન્તે ગજાઃ પ્રજિગજૈરિવ (ઇતિ)

Chapt . બાહ્યાભ્યન્તરાશ્વાપદઃ

09.5.01 સન્ધ્ય્।આદીનાં અયથા ઉદ્દેશાવસ્થાપનં અપનયઃ

09.5.02 તસ્માદ્ આપદઃ સમ્ભવન્તિ

09.5.03 બાહ્ય ઉત્પત્તિરભ્યન્તરપ્રતિજાપા, અભ્યન્તર ઉત્પત્તિર્બાહ્યપ્રતિજાપા, બાહ્ય ઉત્પત્તિર્બાહ્યપ્રતિજાપા, અભ્યન્તર ઉત્પત્તિરભ્યન્તરપ્રતિજાપા - ઇત્યાપદઃ

09.5.04 યત્ર બાહ્યા અભ્યન્તરાનુપજપન્તિ, અભ્યન્તરા વા બાહ્યાન્, તત્ર ઉભયયોગે પ્રતિજપતઃ સિદ્ધિર્વિશેષવતી

09.5.05 સુવ્યાજા હિ પ્રતિજપિતારો ભવન્તિ, ન ઉપજપિતારઃ

09.5.06 તેષુ પ્રશાન્તેષુ નાન્યાન્શક્નુયુરુપજપિતું ઉપજપિતારઃ

09.5.07 કૃચ્છ્ર ઉપજાપા હિ બાહ્યાનાં અભ્યન્તરાઃ તેષાં ઇતરે વા

09.5.08 મહતશ્ચ પ્રયત્નસ્ય વધઃ પરેષાં, અર્થાનુબન્ધશ્ચાત્મન ઇતિ

09.5.09 અભ્યન્તરેષુ પ્રતિજપત્સુ સામદાને પ્રયુઞ્જીત

09.5.10 સ્થાનમાનકર્મ સાન્ત્વમ્

09.5.11 અનુગ્રહપરિહારૌ કર્મસ્વાયોગો વા દાનમ્

09.5.12 બાહ્યેષુ પ્રતિજપત્સુ ભેદદણ્ડૌ પ્રયુઞ્જીત

09.5.13 સત્ત્રિણો મિત્રવ્યઞ્જના વા બાહ્યાનાં ચારં એષાં બ્રૂયુઃ અયં વો રાજા દૂષ્યવ્યઞ્જનૈરતિસન્ધાતુકામઃ, બુધ્યધ્વમ્ ઇતિ

09.5.14 દૂષ્યેષુ વા દૂષ્યવ્યઞ્જનાઃ પ્રણિહિતા દૂષ્યાન્ બાહ્યૈર્ભેદયેયુઃ, બાહ્યાન્ વા દૂષ્યૈઃ

09.5.15 દૂષ્યાન્ અનુપ્રવિષ્ટા વા તીક્ષ્ણાઃ શસ્ત્રરસાભ્યાં હન્યુઃ

09.5.16 આહૂય વા બાહ્યાન્ ઘાતયેયુઃ
09.5.17 યત્ર બાહ્યા બાહ્યાન્ ઉપજપન્તિ, અભ્યન્તરાન્ અભ્યન્તરા વા, તત્ર એકાન્તયોગ ઉપજપિતુઃ સિદ્ધિર્વિશેષવતી
09.5.18 દોષશુદ્ધૌ હિ દૂષ્યા ન વિદ્યન્તે
09.5.19 દૂષ્યશુદ્ધૌ હિ દોષઃ પુનરન્યાન્ દૂષયતિ
09.5.20 તસ્માદ્ બાહ્યેષુ ઉપજપત્સુ ભેદદણ્ડૌ પ્રયુઞ્જીત
09.5.21 સત્ત્રિણો મિત્રવ્યઞ્જના વા બ્રૂયુઃ અયં વો રાજા સ્વયં આદાતુકામઃ, વિગૃહીતાઃ સ્થાનેન રાજ્ઞા, બુધ્યધ્વમ્ ઇતિ
09.5.22 પ્રતિજપિતુર્વા દૂતદણ્ડાન્ અનુપ્રવિષ્ટાઃ તીક્ષ્ણાઃ શસ્ત્રરસાદિભિરેષાં છિદ્રેષુ પ્રહરેયુઃ
09.5.23 તતઃ સત્ત્રિણઃ પ્રતિજપિતારં અભિશંસેયુઃ
09.5.24 અભ્યન્તરાન્ અભ્યન્તરેષુ ઉપજપત્સુ યથાઽર્હં ઉપાયં પ્રયુઞ્જીત
09.5.25 તુષ્ટલિઙ્ગં અતુષ્ટં વિપરીતં વા સામ પ્રયુઞ્જીત
09.5.26 શૌચસામર્થ્યાપદેશેન વ્યસનાભ્યુદયાવેક્ષણેન વા પ્રતિપૂજનં ઇતિ દાનમ્
09.5.27 મિત્રવ્યઞ્જનો વા બ્રૂયાદ્ એતાન્ ચિત્તજ્ઞાનાર્થં ઉપધાસ્યતિ વો રાજા, તદ્ અસ્યાખ્યાતવ્યં ઇતિ
09.5.28 પરસ્પરાદ્ વા ભેદયેદ્ એનાન્ અસૌ ચાસૌ ચ વો રાજન્યેવં ઉપજપતિ - ઇતિ ભેદઃ
09.5.29 દાણ્ડકર્મિકવચ્ચ દણ્ડઃ
09.5.30 એતાસાં ચતસૃણાં આપદાં અભ્યન્તરાં એવ પૂર્વં સાધયેત્
09.5.31 અહિભયાદ્ અભ્યન્તરકોપો બાહ્યકોપાત્ પાપીયાન્ ઇત્યુક્તં પુરસ્તાદ્
09.5.32ab પૂર્વાં પૂર્વાં વિજાનીયાલ્લઘ્વીં આપદં આપદામ્ ।
09.5.32chd ઉત્થિતાં બલવદ્ભ્યો વા ગુર્વીં લઘ્વીં વિપર્યયે (ઇતિ)
Chapt . દૂષ્યશત્રુસમ્યુક્તાઃ <Apadah>
09.6.01 દૂષ્યેભ્યઃ શત્રુભ્યશ્ચ દ્વિવિધા શુદ્ધા
09.6.02 દૂષ્યશુદ્ધાયાં પૌરેષુ જાનપદેષુ વા દણ્ડવર્જાન્ ઉપાયાન્ પ્રયુઞ્જીત
09.6.03 દણ્ડો હિ મહાજને ક્ષેપ્તું અશક્યઃ
09.6.04 ક્ષિપ્તો વા તં ચાર્થં ન કુર્યાત્, અન્યં ચાનર્થં ઉત્પાદયેત્
09.6.05 મુખ્યેષુ ત્વેષાં દાણ્ડકર્મિકવચ્ચેષ્ટેત
09.6.06 શત્રુશુદ્ધાયાં યતઃ શત્રુઃ પ્રધાનઃ કાર્યો વા તતઃ સામાદિભિઃ સિદ્ધિં લિપ્સેત
09.6.07 સ્વામિન્યાયત્તા પ્રધાનસિદ્ધિઃ, મન્ત્રિષ્વાયત્તાઽઽયત્તસિદ્ધિઃ, ઉભયાયત્તા પ્રધાનાયત્તસિદ્ધિઃ
09.6.08 દૂષ્યાદૂષ્યાણાં આમિશ્રિતત્વાદ્ આમિશ્રા
09.6.09 આમિશ્રાયાં અદૂષ્યતઃ સિદ્ધિઃ
09.6.10 આલમ્બનાભાવે હ્યાલમ્બિતા ન વિદ્યન્તે
09.6.11 મિત્રામિત્રાણાં એકીભાવાત્ પરમિશ્રા

09.6.12 પરમિશ્રાયાં મિત્રતઃ સિદ્ધિઃ
09.6.13 સુકરો હિ મિત્રેણ સન્ધિઃ, નામિત્રેણ ઇતિ
09.6.14 મિત્રં ચેન્ન સન્ધિં ઇચ્છેદ્ અભીક્ષ્ણં ઉપજપેત્
09.6.15 તતઃ સત્રિભિરમિત્રાદ્ ભેદયિત્વા મિત્રં લભેત
09.6.16 મિત્રસઙ્ઘસ્ય વા યોઽન્તસ્થાયી તં લભેત
09.6.17 અન્તસ્થાયિનિ લબ્ધે મધ્યસ્થાયિનો ભિદ્યન્તે
09.6.18 મધ્યસ્થાયિનં વા લભેત
09.6.19 મધ્યસ્થાયિનિ લબ્ધે નાન્તસ્થાયિનઃ સંહન્યન્તે
09.6.20 યથા ચ એષાં આશ્રયભેદઃ તાન્ ઉપાયાન્ પ્રયુઞ્જીત
09.6.21 ધાર્મિકં જાતિકુલશ્રુતવૃત્તસ્તવેન સમ્બન્ધેન પૂર્વેષાં ત્રૈકાલ્ય ઉપકારાન્ અપકારાભ્યાં વા સાન્ત્વયેત્
09.6.22 નિવૃત્ત ઉત્સાહં વિગ્રહશ્રાન્તં પ્રતિહત ઉપાયં ક્ષયવ્યયાભ્યાં પ્રવાસેન ચ ઉપતપ્તં શૌચેનાન્યં લિપ્સમાનં અન્યસ્માદ્ વા શઙ્કમાનં મૈત્રીપ્રધાનં વા કલ્યાણબુદ્ધિં સામ્ના સાધયેત્
09.6.23 લુબ્ધં ક્ષીણં વા તપસ્વિમુખ્યાવસ્થાપનાપૂર્વં દાનેન સાધયેત્
09.6.24 તત્ પઞ્ચવિધં - દેયવિસર્ગો ગૃહીતાનુવર્તનં આત્તપ્રતિદાનં સ્વદ્રવ્યદાનં અપૂર્વં પરસ્વેષુ સ્વયઙ્ગ્રાહદાનં ચ
09.6.25 ઇતિ દાનકર્મ
09.6.26 પરસ્પરદ્વેષવૈરભૂમિહરણશઙ્કિતં અતોઽન્યતમેન ભેદયેત્
09.6.27 ભીરું વા પ્રતિઘાતેન કૃતસન્ધિરેષ ત્વયિ કર્મકરિષ્યતિ, મિત્રં અસ્ય નિસૃષ્ટં, સન્ધૌ વા નાભ્યન્તરઃ ઇતિ
09.6.28 યસ્ય વા સ્વદેશાદ્ અન્યદેશાદ્ વા પણ્યાનિ પણ્યાગારતયાઽઽગચ્છેયુઃ તાનિ અસ્ય યાતવ્યાલ્લબ્ધાનિ ઇતિ સત્રિણશ્ચારયેયુઃ
09.6.29 બહુલીભૂતે શાસનં અભિત્યક્તેન પ્રેષયેત્ એતત્ તે પણ્યં પણ્યાગારં વા મયા તે પ્રેષિતં, સામવાયિકેષુ વિક્રમસ્વ, અપગચ્છ વા, તતઃ પણશેષં અવાપ્સ્યસિ ઇતિ
09.6.30 તતઃ સત્રિણઃ પરેષુ ગ્રાહયેયુઃ એતદ્ અરિપ્રદત્તમ્ ઇતિ
09.6.31 શત્રુપ્રખ્યાતં વા પણ્યં અવિજ્ઞાતં વિજિગીષું ગચ્છેત્
09.6.32 તદ્ અસ્ય વૈદેહકવ્યઞ્જનાઃ શત્રુમુખ્યેષુ વિક્રીણીરન્
09.6.33 તતઃ સત્રિણઃ પરેષુ ગ્રાહયેયુઃ એતત્ પણ્યં અરિપ્રદત્તમ્ ઇતિ
09.6.34 મહાઽપરાધાન્ અર્થમાનાભ્યાં ઉપગૃહ્ય વા શસ્ત્રરસાગ્નિભિરમિત્રે પ્રણિદધ્યાત્
09.6.35 અથ એકં અમાત્યં નિષ્પાતયેત્
09.6.36 તસ્ય પુત્રદારં ઉપગૃહ્ય રાત્રૌ હતં ઇતિ ખ્યાપયેત્
09.6.37 અથામાત્યઃ શત્રોઃ તાન્ એક એકશઃ પ્રરૂપયેત્
09.6.38 તે ચેદ્ યથા ઉક્તં કુર્યુર્ન ચ એનાન્ ગ્રાહયેત્
09.6.39 અશક્તિમતો વા ગ્રાહયેત્
09.6.40 આપ્તભાવ ઉપગતો મુખ્યાદ્ અસ્યાત્માનં રક્ષણીયં કથયેત્

09.6.41 અથામિત્રશાસનં મુખ્ય ઉપઘાતાય પ્રેષિતં ઉભયવેતનો ગ્રાહયેત્

09.6.42 ઉત્સાહશક્તિમતો વા પ્રેષયેત્ અમુષ્ય રાજ્યં ગૃહાણ, યથાઽસ્થિતો નઃ સન્ધિઃ ઇતિ

09.6.43 તતઃ સત્રિણઃ પરેષુ ગ્રાહયેયુઃ

09.6.44 એકસ્ય સ્કન્ધાવારં વીવધં આસારં વા ઘાતયેયુઃ

09.6.45 ઇતરેષુ મૈત્રીં બ્રુવાણાઃ ત્વં એતેષાં ઘાતયિતવ્યઃ ઇત્યુપજપેયુઃ

09.6.46 યસ્ય વા પ્રવીરપુરુષો હસ્તી હયો વા મ્રિયેત ગૂઢપુરુષૈર્હન્યેત હ્રિયેત વા સત્રિણઃ પરસ્પર ઉપહતં બ્રૂયુઃ

09.6.47 તતઃ શાસનં અભિશસ્તસ્ય પ્રેષયેત્ ભૂયઃ કુરુ તતઃ પણશીર્ષં અવાપ્સ્યસિ ઇતિ

09.6.48 તદ્ ઉભયવેતના ગ્રાહયેયુઃ

09.6.49 ભિન્નેષ્વન્યતમં લભેત

09.6.50 તેન સેનાપતિકુમારદણ્ડચારિણો વ્યાખ્યાતાઃ

09.6.51 સાન્ઘિકં ચ ભેદં પ્રયુઞ્જીત

09.6.52 ઇતિ ભેદકર્મ

09.6.53 તીક્ષ્ણં ઉત્સાહિનં વ્યસનિનં સ્થિતશત્રું વા ગૂઢપુરુષાઃ શસ્ત્રાગ્નિરસાદિભિઃ સાધયેયુઃ, સૌકર્યતો વા તેષાં અન્યતમઃ

09.6.54 તીક્ષ્ણો હ્યેકઃ શસ્ત્રરસાગ્નિભિઃ સાધયેત્

09.6.55 અયં સર્વસન્દોહકર્મ વિશિષ્ટં વા કરોતિ

09.6.56 ઇત્યુપાયચતુર્વર્ગઃ

09.6.57 પૂર્વઃ પૂર્વશ્ચાસ્ય લઘિષ્ઠઃ

09.6.58 સાન્ત્વં એકગુણમ્

09.6.59 દાનં દ્વિગુણં સાન્ત્વપૂર્વમ્

09.6.60 ભેદઃ ત્રિગુણઃ સાન્ત્વદાનપૂર્વઃ

09.6.61 દણ્ડશ્ચતુર્ગુણઃ સાન્ત્વદાનભેદપૂર્વઃ

09.6.62 ઇત્યભિયુઞ્જાનેષુ ઉક્તમ્

09.6.63 સ્વભૂમિષ્ઠેષુ તુ ત એવ ઉપાયાઃ

09.6.64 વિશેષઃ તુ

09.6.65 સ્વભૂમિષ્ઠાનાં અન્યતમસ્ય પણ્યાગારૈરભિજ્ઞાતાન્ દૂતમુખ્યાન્ અભીક્ષ્ણં પ્રેષયેત્

09.6.66 ત એનં સન્ધૌ પરહિંસાયાં વા યોજયેયુઃ

09.6.67 અપ્રતિપદ્યમાનં કૃતો નઃ સન્ધિઃ ઇત્યાવેદયેયુઃ

09.6.68 તં ઇતરેષાં ઉભયવેતનાઃ સઙ્ક્રામયેયુઃ અયં વો રાજા દુષ્ટઃ ઇતિ

09.6.69 યસ્ય વા યસ્માદ્ ભયં વૈરં દ્વેષો વા તં તસ્માદ્ ભેદયેયુઃ અયં તે શત્રુણા સન્ધત્તે, પુરા ત્વાં અતિસન્ધત્તે, ક્ષિપ્રતરં સન્ધીયસ્વ, નિગ્રહે ચાસ્ય પ્રયતસ્વ ઇતિ

09.6.70 આવાહવિવાહાભ્યાં વા કૃત્વા સમ્યોગં અસમ્યુક્તાન્ ભેદયેત્

09.6.71 સામન્તાટવિકતત્કુલીનાપરુદ્ધૈશ્ચ એષાં રાજ્યાનિ ઘાતયેત્, સાર્થવ્રજાટવીર્વા, દણ્ડં વાઽભિસૃતમ્

09.6.72 પરસ્પરાપાશ્રયાશ્ચ એષાં જાતિસઙ્ઘાશ્છિદ્રેષુ પ્રહરેયુઃ, ગૂઢાશ્ચાગ્નિરસશસ્ત્રેણ

09.6.73ab વીતંસગિલવચ્ચારીન્ યોગૈરાચરિતૈઃ શઠઃ ।

09.6.73chd ઘાતયેત્ પરમિશ્રાયાં વિશ્વાસેનામિષેણ ચ (ઇતિ)

Chapt . અર્થાનર્થસંશયયુક્તાઃ <Apadah> - તાસાં ઉપાયવિકલ્પજાઃ સિદ્ધયઃ

09.7.01 કામાદિરુત્સેકઃ સ્વાઃ પ્રકૃતીઃ કોપયતિ, અપનયો બાહ્યાઃ

09.7.02 તદ્ ઉભયં આસુરી વૃત્તિઃ

09.7.03 સ્વજનવિકારઃ કોપઃ

09.7.04 પરવૃદ્ધિહેતુષુ આપદ્ઽર્થોઽનર્થઃ સંશય ઇતિ

09.7.05 યોઽર્થઃ શત્રુવૃદ્ધિં અપ્રાપ્તઃ કરોતિ, પ્રાપ્તઃ પ્રત્યાદેયઃ પરેષાં ભવતિ, પ્રાપ્યમાણો વા ક્ષયવ્યય ઉદયો ભવતિ, સ ભવત્યાપદ્ઽર્થઃ

09.7.06 યથા સામન્તાનાં આમિષભૂતઃ સામન્તવ્યસનજો લાભઃ, શત્રુપ્રાર્થિતો વા સ્વભાવાધિગમ્યો લાભઃ, પશ્ચાત્ કોપેન પાર્ષ્ણિગ્રાહેણ વા વિગૃહીતઃ પુરસ્તાલ્લાભઃ, મિત્ર ઉચ્છેદેન સન્ધિવ્યતિક્રમેણ વા મણ્ડલવિરુદ્ધો લાભઃ ઇત્યાપદ્ઽર્થઃ

09.7.07 સ્વતઃ પરતો વા ભય ઉત્પત્તિરિત્યનર્થઃ

09.7.08 તયોઃ અર્થો ન વા ઇતિ, અનર્થો ન વા ઇતિ, અર્થોઽનર્થ ઇતિ, અનર્થોઽર્થ ઇતિ સંશયઃ

09.7.09 શત્રુમિત્રં ઉત્સાહયિતું અર્થો ન વા ઇતિ સંશયઃ

09.7.10 શત્રુબલં અર્થમાનાભ્યાં આવાહયિતું અનર્થો ન વા ઇતિ સંશયઃ

09.7.11 બલવત્સામન્તાં ભૂમિં આદાતું અર્થોઽનર્થ ઇતિ સંશયઃ

09.7.12 જાયસા સમ્ભૂયયાનં અનર્થોઽર્થ ઇતિ સંશયઃ

09.7.13 તેષાં અર્થસંશયં ઉપગચ્છેત્

09.7.14 અર્થોઽર્થાનુબન્ધઃ, અર્થો નિરનુબન્ધઃ, અર્થોઽનર્થાનુબન્ધઃ, અનર્થોઽર્થાનુબન્ધઃ, અનર્થો નિરનુબન્ધઃ, અનર્થોઽનર્થાનુબન્ધઃ ઇત્યનુબન્ધષડ્વર્ગઃ

09.7.15 શત્રું ઉત્પાટ્ય પાર્ષ્ણિગ્રાહાદાનં અર્થોઽનર્થાનુબન્ધઃ

09.7.16 ઉદાસીનસ્ય દણ્ડાનુગ્રહઃ ફલેન અર્થો નિરનુબન્ધઃ

09.7.17 પરસ્યાન્તર્ । ઉચ્છેદનં અર્થોઽનર્થાનુબન્ધઃ

09.7.18 શત્રુપ્રતિવેશસ્યાનુગ્રહઃ કોશદણ્ડાભ્યાં અનર્થોઽનર્થાનુબન્ધઃ

09.7.19 હીનશક્તિં ઉત્સાહ્ય નિવૃત્તિરનર્થો નિરનુબન્ધઃ

09.7.20 જ્યાયાંસં ઉત્થાપ્ય નિવૃત્તિરનર્થોઽનર્થાનુબન્ધઃ

09.7.21 તેષાં પૂર્વઃ પૂર્વઃ શ્રેયાન્ ઉપસમ્પ્રાપ્તુમ્

09.7.22 ઇતિ કાર્યાવસ્થાપનમ્

09.7.23 સમન્તતો યુગપદ્ઽર્થ ઉત્પત્તિઃ સમન્તતોઽર્થાપદ્ ભવતિ

09.7.24 સા એવ પાર્ષ્ણિગ્રાહવિગૃહીતા સમન્તતોઽર્થસંશયાપદ્ ભવતિ

09.7.25 તયોર્મિત્રાક્રન્દ ઉપગ્રહાત્ સિદ્ધિઃ

09.7.26 સમન્તતઃ શત્રુભ્યો ભય ઉત્પત્તિઃ સમન્તોઽનર્થાપદ્ ભવતિ

09.7.27 સા એવ મિત્રવિગૃહીતા સમન્તતોઽનર્થસંશયાપદ્ ભવતિ

09.7.28 તયોશ્ચલામિત્રાક્રન્દ ઉપગ્રહાત્ સિદ્ધિઃ, પરમિશ્રાપ્રતીકારો વા

09.7.29 ઇતો લાભ ઇતરતો લાભ ઇત્યુભયતોઽર્થાપદ્ ભવતિ

09.7.30 તસ્યાં સમન્તતોઽર્થાયાં ચ લાભગુણયુક્તં અર્થં આદાતું યાયાત્

09.7.31 તુલ્યે લાભગુણે પ્રધાનં આસન્નં અનતિપાતિનં ઊનો વા યેન ભવેત્ તં આદાતું યાયાત્

09.7.32 ઇતોઽનર્થ ઇતરતોઽનર્થ ઇત્યુભયતોઽનર્થાપત્

09.7.33 તસ્યાં સમન્તતોઽનર્થાયાં ચ મિત્રેભ્યઃ સિદ્ધિં લિપ્સેત

09.7.34 મિત્રાભાવે પ્રકૃતીનાં લઘીયસ્ય એકતોઽનર્થાં સાધયેત્, ઉભયતોઽનર્થાં જ્યાયસ્યા, સમન્તતોઽનર્થાં મૂલેન પ્રતિકુર્યાત્

09.7.35 અશક્યે સર્વં ઉત્સૃજ્યાપગચ્છેત્

09.7.36 દૃષ્ટા હિ જીવતઃ પુનર્।આવૃત્તિર્યથા સુયાત્રા ઉદયનાભ્યામ્

09.7.37 ઇતો લાભ ઇતરતો રાજ્યાભિમર્શ ઇત્યુભયતોઽર્થાનર્થાપદ્ ભવતિ

09.7.38 તસ્યાં અનર્થસાધકો યોઽર્થઃ તં આદાતું યાયાત્

09.7.39 અન્યથા હિ રાજ્યાભિમર્શં વારયેત્

09.7.40 એતયા સમન્તતોઽર્થાનર્થાપદ્ વ્યાખ્યાતા

09.7.41 ઇતોઽનર્થ ઇતરતોઽર્થસંશય ઇત્યુભયતોઽનર્થાર્થસંશયા

09.7.42 તસ્યાં પૂર્વં અનર્થં સાધયેત્, તત્સિદ્ધાવર્થસંશયમ્

09.7.43 એતયા સમન્તતોઽનર્થાર્થસંશયા વ્યાખ્યાતા

09.7.44 ઇતોઽર્થ ઇતરતોઽનર્થસંશય ઇત્યુભયતોઽર્થાનર્થસંશયાપદ્

09.7.45 એતયા સમન્તતોઽર્થાનર્થસંશયા વ્યાખ્યાતા

09.7.46 તસ્યાં પૂર્વાં પૂર્વાં પ્રકૃતીનાં અનર્થસંશયાન્ મોક્ષયિતું યતેત

09.7.47 શ્રેયો હિ મિત્રં અનર્થસંશયે તિષ્ઠન્ન દણ્ડઃ, દણ્ડો વા ન કોશ ઇતિ

09.7.48 સમગ્રમોક્ષણાભાવે પ્રકૃતીનાં અવયવાન્ મોક્ષયિતું યતેત

09.7.49 તત્ર પુરુષપ્રકૃતીનાં બહુલં અનુરક્તં વા તીક્ષ્ણલુબ્ધવર્જં, દ્રવ્યપ્રકૃતીનાં સારં મહા ઉપકારં વા

09.7.50 સન્ધિનાઽઽસનેન દ્વૈધીભાવેન વા લઘૂનિ, વિપર્યયૈર્ગુરૂણિ

09.7.51 ક્ષયસ્થાનવૃદ્ધીનાં ચ ઉત્તર ઉત્તરં લિપ્સેત

09.7.52 પ્રાતિલોમ્યેન વા ક્ષયાદીનાં આયત્યાં વિશેષં પશ્યેત્

09.7.53 ઇતિ દેશાવસ્થાપનમ્

09.7.54 એતેન યાત્રાઽઽદિમધ્યાન્તેષ્વર્થાનર્થસંશયાનાં ઉપસમ્પ્રાપ્તિર્વ્યાખ્યાતા

09.7.55 નિરન્તરયોગિત્વાચ્ચાર્થાનર્થસંશયાનાં યાત્રાઽઽદાવર્થઃ શ્રેયાન્ ઉપસમ્પ્રાપ્તું પાર્ષ્ણિગ્રાહાસારપ્રતિઘાતે ક્ષયવ્યયપ્રવાસપ્રત્યાદેયે મૂલરક્ષણેષુ ચ ભવતિ

09.7.56 તથાઽનર્થઃ સંશયો વા સ્વભૂમિષ્ઠસ્ય વિષહ્યો ભવતિ

09.7.57 એતેન યાત્રામધ્યેઽર્થાનર્થસંશયાનાં ઉપસમ્પ્રાપ્તિર્વ્યાખ્યાતા

09.7.58 યાત્રાઽન્તે તુ કર્શનીયં ઉચ્છેદનીયં વા કર્શયિત્વા ઉચ્છિદ્ય વાઽર્થઃ શ્રેયાન્ ઉપસમ્પ્રાપ્તું નાનર્થઃ સંશયો વા પરાબાધભયાત્

09.7.59 સામવાયિકાનાં અપુરોગસ્ય તુ યાત્રામધ્યાન્તગોઽનર્થઃ સંશયો વા શ્રેયાન્ ઉપસમ્પ્રાપ્તું અનિર્બન્ધગામિત્વાત્

09.7.60 અર્થો ધર્મઃ કામ ઇત્યર્થત્રિવર્ગઃ

09.7.61 તસ્ય પૂર્વઃ પૂર્વઃ શ્રેયાન્ ઉપસમ્પ્રાપ્તુમ્

09.7.62 અનર્થોઽધર્મઃ શોક ઇત્યનર્થત્રિવર્ગઃ

09.7.63 તસ્ય પૂર્વઃ પૂર્વઃ શ્રેયાન્ પ્રતિકર્તુમ્

09.7.64 અર્થોઽનર્થ ઇતિ, ધર્મોઽધર્મ ઇતિ, કામઃ શોક ઇતિ સંશયત્રિવર્ગઃ

09.7.65 તસ્ય ઉત્તરપક્ષસિદ્ધૌ પૂર્વપક્ષઃ શ્રેયાન્ ઉપસમ્પ્રાપ્તુમ્

09.7.66 ઇતિ કાલાવસ્થાપનમ્

09.7.67 ઇત્યાપદઃ - તાસાં સિદ્ધિઃ

09.7.68 પુત્રભ્રાતૃબન્ધુષુ સામદાનાભ્યાં સિદ્ધિરનુરૂપા, પૌરજાનપદદણ્ડમુખ્યેષુ દાનભેદાભ્યાં, સામન્તાટવિકેષુ ભેદદણ્ડાભ્યામ્

09.7.69 એષાઽનુલોમા, વિપર્યયે પ્રતિલોમા

09.7.70 મિત્રામિત્રેષુ વ્યામિશ્રા સિદ્ધિઃ

09.7.71 પરસ્પરસાધકા હ્યુપાયાઃ

09.7.72 શત્રોઃ શઙ્કિતામાત્યેષુ સાન્ત્વં પ્રયુક્તં શેષપ્રયોગં નિવર્તયતિ, દૂષ્યામાત્યેષુ દાનં, સઙ્ઘાતેષુ ભેદઃ, શક્તિમત્સુ દણ્ડ ઇતિ

09.7.73 ગુરુલાઘવયોગાચ્ચાપદાં નિયોગવિકલ્પસમુચ્ચયા ભવન્તિ

09.7.74 અનેન એવ ઉપાયેન નાન્યેન ઇતિ નિયોગઃ

09.7.75 અનેન વાઽન્યેન વા ઇતિ વિકલ્પઃ

09.7.76 અનેનાન્યેન ચ ઇતિ સમુચ્ચયઃ

09.7.77 તેષાં એકયોગાશ્ચત્વારઃ ત્રિયોગાશ્ચ, દ્વિયોગાઃ ષટ્, એકશ્ચતુર્યોગઃ

09.7.78 ઇતિ પઞ્ચદશ ઉપાયાઃ

09.7.79 તાવન્તઃ પ્રતિલોમાઃ

09.7.80 તેષાં એકેન ઉપાયેન સિદ્ધિરેકસિદ્ધિઃ, દ્વાભ્યાં દ્વિસિદ્ધિઃ, ત્રિભિઃ ત્રિસિદ્ધિઃ, ચતુર્ભિશ્ચતુઃસિદ્ધિરિતિ

09.7.81 ધર્મમૂલત્વાત્ કામફલત્વાચ્ચાર્થસ્ય ધર્માર્થકામાનુબન્ધા યાऽર્થસ્ય સિદ્ધિઃ સા સર્વાર્થસિદ્ધિઃ <iti siddhayah>
09.7.82 દૈવાદ્ અગ્નિરુદકં વ્યાધિઃ પ્રમારો વિદ્રવો દુર્ભિક્ષં આસુરી સૃષ્ટિરિત્યાપદઃ
09.7.83 તાસાં દૈવતબ્રાહ્મણપ્રણિપાતતઃ સિદ્ધિઃ
09.7.84ab અતિવૃષ્ટિરવૃષ્ટિર્વા સૃષ્ટિર્વા યાऽऽસુરી ભવેત્ ।
09.7.84chd તસ્યાં આથર્વણં કર્મ સિદ્ધારમ્ભાશ્ચ સિદ્ધયઃ (ઇતિ)

Book .

Chapt . સ્કન્ધાવારનિવેશઃ

10.1.01 વાસ્તુકપ્રશસ્તે વાસ્તુનિ નાયકવર્ધકિ મૌહૂર્તિકાઃ સ્કન્ધાવારં, વૃત્તં દીર્ઘં ચતુરશ્રં વા ભૂમિવશેન વા, ચતુર્દ્વારં ષટ્પથં નવસંસ્થાનં માપયેયુઃ ખાતવપ્રસાલદ્વારાટ્ટાલકસમ્પન્નં ભયે સ્થાને ચ
10.1.02 મધ્યમસ્ય ઉત્તરે નવભાગે રાજવાસ્તુકં ધનુઃશતાયામં અર્ધવિસ્તારં, પશ્ચિમાર્ધે તસ્યાન્તઃપુરમ્
10.1.03 અન્તર્વંશિકસૈન્યં ચાન્તે નિવિશેત
10.1.04 પુરસ્તાદ્ ઉપસ્થાનં, દક્ષિણતઃ કોશશાસનકાર્યકરણાનિ, વામતો રાજાઉપવાહ્યાનાં હસ્ત્યશ્વરથાનાં સ્થાનમ્
10.1.05 અતો ધનુઃશતાન્તરાશ્ચત્વારઃ શકટમેથીપ્રતતિસ્તમ્ભસાલપરિક્ષેપાઃ
10.1.06 પ્રથમે પુરસ્તાન્ મન્ત્રિપુરોહિતૌ, દણિષણતઃ કોષ્ઠાગારં મહાનસં ચ, વામતઃ કુપ્યાયુધાગારમ્
10.1.07 દ્વિતીયે મૌલભૃતાનાં સ્થાનં અશ્વરથાનાં સેનાપતેશ્ચ
10.1.08 તૃતીયે હસ્તિનઃ શ્રેણ્યઃ પ્રશાસ્તા ચ
10.1.09 ચતુર્થે વિષ્ટિર્નાયકો મિત્રામિત્રાટવીબલં સ્વપુરુષાધિષ્ઠિતમ્
10.1.10 વણિજો રૂપાજીવાશ્ચાનુમહાપથમ્
10.1.11 બાહ્યતો લુબ્ધકશ્વગણિનઃ સતૂર્યાગ્નયઃ, ગૂઢાશ્ચારક્ષાઃ
10.1.12 શત્રૂણાં આપાતે કૂપકૂટાવપાતકણ્ટકિનીશ્ચ સ્થાપયેત્
10.1.13 અષ્ટાદશવર્ગાણાં આરક્ષવિપર્યાસં કારયેત્
10.1.14 દિવાયામં ચ કારયેદ્ અપસર્પજ્ઞાનાર્થમ્
10.1.15 વિવાદસૌરિકસમાજદ્યૂતવારણં ચ કારયેત્, મુદ્રારક્ષણં ચ
10.1.16 સેનાનિવૃત્તં આયુધીયં અશાસનં શૂન્યપાલો બધ્નીયાત્
10.1.17ab પુરસ્તાદ્ અધ્વનઃ સમ્યક્પ્રશાસ્તા રક્ષણાનિ ચ ।
10.1.17chd યાયાદ્ વર્ધકિવિષ્ટિભ્યાં ઉદકાનિ ચ કારયેત્ (ઇતિ)

Chapt . સ્કન્ધાવારપ્રયાણં - બલવ્યસનાવસ્કન્દકાલરક્ષણમ્

10.2.01 ગ્રામારણ્યાનાં અધ્વનિ નિવેશાન્ યવસ ઇન્ધન ઉદકવશેન પરિસઙ્ખ્યાય સ્થાનાસનગમનકાલં ચ યાત્રાં યાયાત્
10.2.02 તત્પ્રતીકારદ્વિગુણં ભક્ત ઉપકરણં વાહયેત્

10.2.03 અશક્તો વા સૈન્યેષ્વાયોજયેત્, અન્તરેષુ વા નિચિનુયાત્

10.2.04 પુરસ્તાન્નાયકઃ, મધ્યે કલત્રં સ્વામી ચ, પાર્શ્વયોરશ્વા બાહુ। ઉત્સારઃ, ચક્રાન્તેષુ હસ્તિનઃ પ્રસારવૃદ્ધિર્વા, પશ્ચાત્ સેનાપતિર્યાયાત્ નિવિશેત

10.2.05 સર્વતો વનાજીવઃ પ્રસારઃ

10.2.06 સ્વદેશાદ્ અન્વાયતિર્વીવધઃ

10.2.07 મિત્રબલં આસારઃ

10.2.08 કલત્રસ્થાનં અપસારઃ

10.2.09 પુરસ્તાદ્ અધ્યાઘાતે મકરેણ યાયાત્, પશ્ચાત્શકટેન, પાર્શ્વયોર્વજ્રેણ, સમન્તતઃ સર્વતોભદ્રેણ, એકાયને સૂચ્યા

10.2.10 પથિદ્વૈધીભાવે સ્વભૂમિતો યાયાત્

10.2.11 અભૂમિષ્ઠાનાં હિ સ્વભૂમિષ્ઠા યુદ્ધે પ્રતિલોમા ભવન્તિ

10.2.12 યોજનં અધમા, અધ્યર્ધં મધ્યમા, દ્વિયોજનં ઉત્તમા, સમ્ભાવ્યા વા ગતિઃ

10.2.13 આશ્રયકારી સમ્પન્નઘાતી પાર્ષ્ણિરાસારો મધ્યમ ઉદાસીનો વા પ્રતિકર્તવ્યઃ, સઙ્કટો માર્ગઃ શોધયિતવ્યઃ, કોશો દણ્ડો મિત્રામિત્રાટવીબલં વિષ્ટિ। ઋતુર્વા પ્રતીક્ષ્યાઃ, કૃતદુર્ગકર્મનિચયરક્ષાક્ષયઃ ક્રીતબલનિર્વેદો મિત્રબલનિર્વેદશ્ચાગમિષ્યતિ, ઉપજપિતારો વા નાતિત્વરયન્તિ, શત્રુરભિપ્રાયં વા પૂરયિષ્યતિ, ઇતિ શનૈર્યાયાત્, વિપર્યયે શીઘ્રમ્

10.2.14 હસ્તિસ્તમ્ભસઙ્ક્રમસેતુબન્ધનૌકાષ્ઠવેણુસઙ્ઘાતૈરલાબુચર્મકરણ્ડદૃતિપ્લવગણ્ડિકાવેણિકાભિશ્ચ ઉદકાનિ તારયેત્

10.2.15 તીર્થાભિગ્રહે હસ્ત્યઽશ્વૈરન્યતો રાત્રાવુત્તાર્ય સત્રં ગૃહ્ણીયાત્

10.2.16 અનુદકે ચક્રિચતુષ્પદં ચાધ્વપ્રમાણેન શક્ત્યા ઉદકં વાહયેત્

10.2.17 દીર્ઘકાન્તારં અનુદકં યવસ ઇન્ધન ઉદકહીનં વા કૃચ્છ્રાધ્વાનં અભિયોગપ્રસ્કન્નં ક્ષુત્પિપાસાઽધ્વક્લાન્તં પઙ્કતોયગમ્ભીરાણાં વા નદીદરીશૈલાનાં ઉદ્યાનાપયાને વ્યાસક્તં એકાયનમાર્ગે શૈલવિષમે સઙ્કટે વા બહુલીભૂતં નિવેશે પ્રસ્થિતે વિસન્નાહં ભોજનવ્યાસક્તં આયતગતપરિશ્રાન્તં અવસુપ્તં વ્યાધિમરકદુર્ભિક્ષપીડિતં વ્યાધિતપત્ત્યઽશ્વદ્વિપં અભૂમિષ્ઠં વા બલવ્યસનેષુ વા સ્વસૈન્યં રક્ષેત્, પરસૈન્યં ચાભિહન્યાત્

10.2.18 એકાયનમાર્ગપ્રયાતસ્ય સેનાનિશ્ચારગ્રાસાહારશય્યાપ્રસ્તારાગ્નિનિધાનધ્વજાયુધસઙ્ખ્યાનેન પરબલજ્ઞાનમ્

10.2.19 તદાઽઽત્માનો ગૂહયેત્

10.2.20ab પાર્વતં વનદુર્ગં વા સાપસારપ્રતિગ્રહમ્ ।

10.2.20chd સ્વભુમૌ પૃષ્ઠતઃ કૃત્વા યુધ્યેત નિવિશેત ચ (ઇતિ)

Chapt . કૂટયુદ્ધવિકલ્પાઃ - સ્વસૈન્ય ઉત્સાહનં - સ્વબલાન્યબલવ્યાયોગઃ

10.3.01 બલવિશિષ્ટઃ કૃત ઉપજાપઃ પ્રતિવિહિત। ઋતુઃ સ્વભૂમ્યાં પ્રકાશયુદ્ધં ઉપેયાત્

10.3.02 વિપર્યયે કૂટયુદ્ધમ્

10.3.03 બલવ્યસનાવસ્કન્દકાલેષુ પરં અભિહન્યાત્, અભૂમિષ્ઠં વા સ્વભૂમિષ્ઠઃ, પ્રકૃતિપ્રગ્રહો વા સ્વભૂમિષ્ઠમ્
10.3.04 દૂષ્યામિત્રાટવીબલૈર્વા ભઙ્ગં દત્ત્વા વિભૂમિપ્રાપ્તં હન્યાત્
10.3.05 સંહતાનીકં હસ્તિભિર્ભેદયેત્
10.3.06 પૂર્વં ભઙ્ગપ્રદાનેનાનુપ્રલીનં ભિન્નં અભિન્નઃ પ્રતિનિવૃત્ય હન્યાત્
10.3.07 પુરસ્તાદ્ અભિહત્ય પ્રચલં વિમુખં વા પૃષ્ઠતો હસ્ત્યશ્વેનાભિહન્યાત્
10.3.08 પૃષ્ઠતોઽભિહત્યા પ્રચલં વિમુખં વા પુરસ્તાત્ સારબલેનાભિહન્યાત્
10.3.09 તાભ્યાં પાર્શ્વાભિગાતૌ વ્યાખ્યાતૌ
10.3.10 યતો વા દૂષ્યફલ્ગુબલં તતોઽભિહન્યાત્
10.3.11 પુરસ્તાદ્ વિષમાયાં પૃષ્ઠતોઽભિહન્યાત્
10.3.12 પૃષ્ઠતો વિષમાયાં પુરસ્તાદ્ અભિહન્યાત્
10.3.13 પાર્શ્વતો વિષમાયાં ઇતરતોઽભિહન્યાત્
10.3.14 દૂષ્યામિત્રાટવીબલૈર્વા પૂર્વં યોધયિત્વા શ્રાન્તં અશ્રાન્તઃ પરં અભિહન્યાત્
10.3.15 દૂષ્યબલેન વા સ્વયં ભઙ્ગં દત્ત્વા જિતમ્ ઇતિ વિશ્વસ્તં અવિશ્વસ્તઃ સત્ત્રાપાશ્રયોઽભિહન્યાત્
10.3.16 સાર્થવ્રજસ્કન્ધાવારસંવાહવિલોપપ્રમત્તં અપ્રમત્તોઽભિહન્યાત્
10.3.17 ફલ્ગુબલાવચ્છન્નસારબલો વા પરવીરાન્ અનુપ્રવિશ્ય હન્યાત્
10.3.18 ગોગ્રહણેન શ્વાપદવધેન વા પરવીરાન્ આકૃષ્ય સત્ત્રચ્છન્નોઽભિહન્યાત્
10.3.19 રાત્રાવવસ્કન્દેન જાગરયિત્વા નિદ્રાક્લાન્તાન્ અવસુપ્તાન્ વા દિવા હન્યાત્
10.3.20 સપાદચર્મકોશૈર્વા હસ્તિભિઃ સૌપ્તિકં દદ્યાત્
10.3.21 અહઃસન્નાહપરિશ્રાન્તાન્ અપરાહ્ણેઽભિહન્યાત્
10.3.22 શુષ્કચર્મવૃત્તશર્કરાકોશકૈર્ગોમહિષ ઉષ્ટ્રયૂથૈર્વા ત્રસ્નુભિરકૃતહસ્ત્યશ્વં ભિન્નં અભિન્નઃ પ્રતિનિવૃત્તં હન્યાત્
10.3.23 પ્રતિસૂર્યવાતં વા સર્વં અભિહન્યાત્
10.3.24 ધાન્વનવનસઙ્કટપઙ્કશૈલનિમ્નવિષમનાવો ગાવઃ શકટવ્યૂહો નીહારો રાત્રિરિતિ સત્ત્રાણિ
10.3.25 પૂર્વે ચ પ્રહરણકાલાઃ કૂટયુદ્ધહેતવઃ
10.3.26 સઙ્ગ્રામઃ તુ નિર્દિષ્ટદેશકાલો ધર્મિષ્ઠઃ
10.3.27 સંહત્ય દણ્ડં બ્રૂયાત્ તુલ્યવેતનોઽસ્મિ, ભવદ્ભિઃ સહ ભોગ્યં ઇદં રાજ્યં, મયાઽભિહિતૈઃ પરોઽભિહન્તવ્યઃ ઇતિ
10.3.28 વેદેષ્વપ્યનુશ્રૂયતે સમાપ્તદક્ષિણાનાં યજ્ઞાનાં અવભૃથેષુ સા તે ગતિર્યા શૂરાણામ્ ઇતિ
10.3.29 અપિ ઇહ શ્લોકૌ ભવતઃ
10.3.30ab યાન્ યજ્ઞસઙ્ઘૈઃ તપસા ચ વિપ્રાઃ સ્વર્ગ એષિણઃ પાત્રચયૈશ્ચ યાન્તિ ।
10.3.30chd ક્ષણેન તાન્ અપ્યતિયાન્તિ શૂરાઃ પ્રાણાન્ સુયુદ્ધેષુ પરિત્યજન્તઃ
10.3.31ab નવં શરાવં સલિલસ્ય પૂર્ણં સુસંસ્કૃતં દર્ભકૃત ઉત્તરીયમ્ ।
10.3.31chd તત્ તસ્ય મા ભૂન્નરકં ચ ગચ્છેદ્ યો ભર્તૃપિણ્ડસ્ય કૃતે ન યુધ્યેત્ - ઇતિ

10.3.32 મન્ત્રિપુરોહિતાભ્યાં ઉત્સાહયેદ્ યોધાન્ વ્યૂહસમ્પદા

10.3.33 કાર્તાન્તિકાદિશ્ચાસ્ય વર્ગઃ સર્વજ્ઞદૈવતસમ્યોગખ્યાપનાભ્યાં સ્વપક્ષં ઉદ્ધર્ષયેત્, પરપક્ષં ચ ઉદ્વેજયેત્

10.3.34 શ્વો યુદ્ધમ્ ઇતિ કૃત ઉપવાસઃ શસ્ત્રવાહનં ચાનુશયીત

10.3.35 અથર્વભિશ્ચ જુહુયાત્

10.3.36 વિજયયુક્તાઃ સ્વર્ગીયાશ્ચાશિષો વાચયેત્

10.3.37 બ્રાહ્મણેભ્યશ્ચાત્માનં અતિસૃજેત્

10.3.38 શૌર્યશિલ્પાભિજનાનુરાગયુક્તં અર્થમાનાભ્યાં અવિસંવાદિતં અનીકગર્ભં કુર્વીત

10.3.39 પિતૃપુત્રભ્રાતૃકાણાં આયુધીયાનાં અધ્વજં મુણ્ડાનીકં રાજસ્થાનમ્

10.3.40 હસ્તી રથો વા રાજવાહનં અશ્વાનુબન્ધઃ

10.3.41 યત્ પ્રાયસૈન્યો યત્ર વા વિનીતઃ સ્યાત્ ત્(અદ્) અધિરોહયેત્

10.3.42 રાજવ્યઞ્જનો વ્યૂહાધિષ્ઠાનં આયોજ્યઃ

10.3.43 સૂતમાગધાઃ શૂરાણાં સ્વર્ગં અસ્વર્ગં ભીરૂણાં જાતિસઙ્ઘકુલકર્મવૃત્તસ્તવં ચ યોધાનાં વર્ણયેયુઃ

10.3.44 પુરોહિતપુરુષાઃ કૃત્યાભિચારં બ્રૂયુઃ, યન્ત્રિકવર્ધકિમૌહૂર્તિકાઃ સ્વકર્મસિદ્ધિં અસિદ્ધિં પરેષામ્

10.3.45 સેનાપતિરર્થમાનાભ્યાં અભિસંસ્કૃતં અનીકં આભાષેત - શતસાહસ્રો રાજવધઃ, પઞ્ચાશત્સાહસ્રઃ સેનાપતિકુમારવધઃ, દશસાહસ્રઃ પ્રવીરમુખ્યવધઃ, પઞ્ચસાહસ્રો હસ્તિરથવધઃ, સાહસ્રોઽશ્વવધઃ, શત્યઃ પત્તિમુખ્યવધઃ, શિરો વિંશતિકં ભોગદ્વૈગુણ્યં સ્વયઙ્ગ્રાહશ્ચ ઇતિ

10.3.46 તદ્ એષાં દશવર્ગાધિપતયો વિદ્યુઃ

10.3.47 ચિકિત્સકાઃ શસ્ત્રયન્ત્રાગદસ્નેહવસ્ત્રહસ્તાઃ સ્ત્રિયશ્ચાન્નપાનરક્ષિણ્યઃ પુરુષાણાં ઉદ્ધર્ષણીયાઃ પૃષ્ઠતઃ તિષ્ઠેયુઃ

10.3.48 અદક્ષિણામુખં પૃષ્ઠતઃસૂર્યં અનુલોમવાતં અનીકં સ્વભૂમૌ વ્યૂહેત

10.3.49 પરભૂમિવ્યૂહે ચાશ્વાંશ્ચારયેયુઃ

10.3.50 યત્ર સ્થાનં પ્રજવશ્ચાભૂમિર્વ્યૂહસ્ય તત્ર સ્થિતઃ પ્રજવિતશ્ચ ઉભયથા જીયેત

વિપર્યયે જયતિ, ઉભયથા સ્થાને પ્રજવે ચ

10.3.52 સમા વિષમા વ્યામિશ્રા વા ભૂમિરિતિ પુરસ્તાત્ પાર્શ્વાભ્યાં પશ્ચાચ્ચ જ્ઞેયા

10.3.53 સમાયાં દણ્ડમણ્ડલવ્યૂહાઃ, વિષમાયાં ભોગાસંહતવ્યૂહાઃ, વ્યામિશ્રાયાં વિષમવ્યૂહાઃ

10.3.54 વિશિષ્ટબલં ભઙ્ક્ત્વા સન્ધિં યાચેત

10.3.55 સમબલેન યાચિતઃ સન્દધીત

10.3.56 હીનં અનુહન્યાત્, ન ત્વેવ સ્વભૂમિપ્રાપ્તં ત્યક્તાત્માનં વા

10.3.57ab પુનર્ । આવર્તમાનસ્ય નિરાશસ્ય ચ જીવિતે ।

10.3.57chd અધાર્યો જાયતે વેગઃ તસ્માદ્ ભગ્નં ન પીડયેત્ (ઇતિ)

Chapt . યુદ્ધભૂમયઃ - પત્ત્યશ્વરથહસ્તિકર્માણિ

10.4.01 સ્વભૂમિઃ પત્ત્યશ્વરથદ્વિપાનાં ઇષ્ટા યુદ્ધે નિવેશે ચ

10.4.02 ધાન્વનવનનિમ્નસ્થલયોધિનાં ખનકાકાશદિવારાત્રિયોધિનાં ચ પુરુષાણાં નાદેયપાર્વતાનૂપસારસાનાં ચ હસ્તિનાં અશ્વાનાં ચ યથાસ્વં ઇષ્ટા યુદ્ધભૂમયઃ કાલાશ્ચ

10.4.03 સમા સ્થિરાઽભિકાશા નિરુત્ખાતિન્યચક્રખુરાઽનક્ષગ્રાહિણ્યવૃક્ષગુલ્મવ્રતતીસ્તમ્ભકેદારશ્વભ્રવલ્મીકસિકતાપઙ્કભઙ્ગુ

દરણહીના ચ રથભૂમિઃ, હસ્ત્ય્ઽશ્વયોર્મનુષ્યાણાં ચ સમે વિષમે હિતા યુદ્ધે નિવેશે ચ

10.4.04 અણ્વ્ઽશ્મવૃક્ષા હ્રસ્વલઙ્ઘનીયશ્વભ્રા મન્દદરણદોષા ચાશ્વભૂમિઃ

10.4.05 સ્થૂલસ્થાણ્વશ્મવૃક્ષવ્રતતીવલ્મીકગુલ્મા પદાતિભૂમિઃ

10.4.06 ગમ્યશૈલનિમ્નવિષમા મર્દનીયવૃક્ષા છેદનીયવ્રતતી પઙ્કભઙ્ગુરા દરણહીના ચ હસ્તિભૂમિઃ

10.4.07 અકણ્ટકિન્યબહુવિષમા પ્રત્યાસારવતી ઇતિ પદાતીનાં અતિશયઃ

10.4.08 દ્વિગુણપ્રત્યાસારા કર્દમ ઉદકખઞ્જનહીના નિહ્શર્કરા ઇતિ વાજિનાં અતિશયઃ

10.4.09 પાંસુકર્દમ ઉદકનલશરાધાનવતી શ્વદણ્ષ્ટ્રહીના મહાવૃક્ષશાખાઘાતવિયુક્તા ઇતિ હસ્તિનાં અતિશયઃ

10.4.10 તોયાશયાપાશ્રયવતી નિરુત્ખાતિની કેદારહીના વ્યાવર્તનસમર્થા ઇતિ રથાનાં અતિશયઃ

10.4.11 ઉક્તા સર્વેષાં ભૂમિઃ

10.4.12 એતયા સર્વબલનિવેશા યુદ્ધાનિ ચ વ્યાખ્યાતાનિ ભવન્તિ

10.4.13 ભૂમિવાસવનવિચયોઽવિષમતોયતીર્થવાતરશ્મિગ્રહણં વીવધાસારયોર્ઘાતો રક્ષા વા વિશુદ્ધિઃ સ્થાપના ચ બલસ્ય પ્રસારવૃદ્ધિર્બાહુ। ઉત્સારઃ પૂર્વપ્રહારો વ્યાવેશનં વ્યાવેધનં આશ્વાસો ગ્રહણં મોક્ષણં માર્ગાનુસારવિનિમયઃ કોશકુમારાભિહરણં જઘનકોટ્ય્ઽભિઘાતો હીનાનુસારણં અનુયાનં સમાજકર્મ ઇત્યશ્વકર્માણિ

10.4.14 પુરોયાનં અકૃતમાર્ગવાસતીર્થકર્મ બાહુ। ઉત્સારઃ તોયતરણાવતરણે સ્થાનગમનાવતરણં વિષમસમ્બાધપ્રવેશોઽગ્નિદાનશમનં એકાઙ્ગવિજયો ભિન્નસન્ધાનં અભિન્નભેદનં વ્યસને ત્રાણં અભિઘાતો વિભીષિકા ત્રાસનંઽઉદાર્યં ગ્રહણં મોક્ષણં સાલદ્વારાટ્ટાલકભઞ્જનં કોશવાહનાપવાહનં ઇતિ હસ્તિકર્માણિ

10.4.15 સ્વબલરક્ષા ચતુર્ઽઙ્ગબલપ્રતિષેધઃ સઙ્ગ્રામે ગ્રહણં મોક્ષણં ભિન્નસન્ધાનં અભિન્નભેદનં ત્રાસનં ઔદાર્યં ભીમઘોષશ્ચ ઇતિ રથકર્માણિ

10.4.16 સર્વદેશકાલશસ્ત્રવહનં વ્યાયામશ્ચ ઇતિ પદાતિકર્માણિ

10.4.17 શિબિરમાર્ગસેતુકૂપતીર્થશોધનકર્મ યન્ત્રાયુધાવરણ ઉપકરણગ્રાસવહનં આયોધનાચ્ચ પ્રહરણાવરણપ્રતિવિદ્ધાપનયનં ઇતિ વિષ્ટિકર્માણિ

10.4.18ab કુર્યાદ્ ગવાશ્વવ્યાયોગં રથેષ્વલ્પહયો નૃપઃ ।

10.4.18chd ખર ઉષ્ટ્રશકટાનાં વા ગર્ભં અલ્પગજઃ તથા (ઇતિ)

Chapt . પક્ષકક્ષ ઉરસ્યાનાં બલાગ્રતો વ્યૂહવિભાગઃ - સારફલ્ગુબલવિભાગઃ - પત્ત્ય્ઽશ્વરથહસ્તિયુદ્ધાનિ

10.5.01 પઞ્ચધનુઃશતાપકૃષ્ટં દુર્ગં અવસ્થાપ્ય યુદ્ધં ઉપેયાત્, ભૂમિવશેન વા

10.5.02 વિભક્તમુખ્યાં અચક્ષુર્વિષયે મોક્ષયિત્વા સેનાં સેનાપતિનાયકૌ વ્યૂહેયાતામ્

10.5.03 શમાન્તરં પત્તિં સ્થાપયેત્, ત્રિશમાન્તરં અશ્વં, પઞ્ચશમાન્તરં રથં હસ્તિનં વા

10.5.04 દ્વિગુણાન્તરં ત્રિગુણાન્તરં વા વ્યૂહેત

10.5.05 એવં યથાસુખં અસમ્બાધં યુધ્યેત

10.5.06 પઞ્ચારત્નિ ધનુઃ

10.5.07 તસ્મિન્ ધન્વિનં સ્થાપયેત્, ત્રિધનુષ્યશ્વં, પઞ્ચધનુષિ રથં હસ્તિનં વા

10.5.08 પઞ્ચધનુરનીકસન્ધિઃ પક્ષકક્ષ ઉરસ્યાનામ્

10.5.09 અશ્વસ્ય ત્રયઃ પુરુષાઃ પ્રતિયોદ્ધારઃ

10.5.10 પઞ્ચદશ રથસ્ય હસ્તિનો વા, પઞ્ચ ચાશ્વાઃ

10.5.11 તાવન્તઃ પાદગોપા વાજિરથદ્વિપાનાં વિધેયાઃ

10.5.12 ત્રીણિ ત્રિકાણ્યનીકં રથાનાં ઉરસ્યં સ્થાપયેત્, તાવત્ કક્ષં પક્ષં ચ ઉભયતઃ

10.5.13 પઞ્ચચત્વારિંશદ્ એવં રથા રથવ્યૂહે ભવન્તિ, દ્વે શતે પઞ્ચવિંશતિશ્ચાશ્વાઃ, ષટ્શતાનિ પઞ્ચસપ્તતિશ્ચ પુરુષાઃ પ્રતિયોધારઃ, તાવન્તઃ પાદગોપાઃ

10.5.14 એષ સમવ્યૂહઃ

10.5.15 તસ્ય દ્વિરથ ઉત્તરા વૃદ્ધિરા એકવિંશતિરથાદ્ ઇતિ

10.5.16 એવં ઓજા દશ સમવ્યૂહપ્રકૃતયો ભવન્તિ

10.5.17 પક્ષકક્ષ ઉરસ્યાનાં મિથો વિષમસઙ્ખ્યાને વિષમવ્યૂહઃ

10.5.18 તસ્યાપિ દ્વિરથ ઉત્તરા વૃદ્ધિરા એકવિંશતિરથાદ્ ઇતિ

10.5.19 એવં ઓજા દશ વિષમવ્યૂહપ્રકૃતયો ભવન્તિ

10.5.20 અતઃ સૈન્યાનાં વ્યૂહશેષં આવાપઃ કાર્યઃ

10.5.21 રથાનાં દ્વૌ ત્રિભાગાવઙ્ગેષ્વાવાપયેત્, શેષં ઉરસ્યં સ્થાપયેત્

10.5.22 એવં ત્રિભાગ ઊનો રથાનાં આવાપઃ કાર્યઃ

10.5.23 તેન હસ્તિનાં અશ્વાનાં આવાપો વ્યાખ્યાતઃ

10.5.24 યાવદ્ઽશ્વરથદ્વિપાનાં યુદ્ધસમ્બાધનં ન કુર્યાત્ તાવદ્ આવાપઃ કાર્યઃ

10.5.25 દણ્ડબાહુલ્યં આવાપઃ

10.5.26 પત્તિબાહુલ્યં પ્રત્યાપાવઃ

10.5.27 એકાઙ્ગબાહુલ્યં અન્વાવાપઃ

10.5.28 દૂષ્યબાહુલ્યં અત્યાવાપઃ

10.5.29 પરાવાપાત્ પ્રત્યાવાપાચ્ચ ચતુર્ગુણાદ્ આઽષ્ટગુણાદ્ ઇતિ વા વિભવતઃ સૈન્યાનાં આવાપઃ

10.5.30 રથવ્યૂહેન હસ્તિવ્યૂહો વ્યાખ્યાતઃ

10.5.31 વ્યામિશ્રો વા હસ્તિરથાશ્વાનાં - ચક્રાન્તેષુ હસ્તિનઃ પાર્શ્વયોરશ્વા રથા ઉરસ્યે

10.5.32 હસ્તિનાં ઉરસ્યં રથાનાં કક્ષાવશ્વાનાં પક્ષાવિતિ મધ્યભેદી

10.5.33 વિપરીતોઽન્તભેદી

10.5.34 હસ્તિનાં એવ તુ શુદ્ધઃ - સાન્નાહ્યાનાં ઉરસ્યં ઔપવાહ્યાનાં જઘનં વ્યાલાનાં કોટ્યાવિતિ

10.5.35 અશ્વવ્યૂહો - વર્મિણાં ઉરસ્યં શુદ્ધાનાં કક્ષપક્ષાવિતિ

10.5.36 પત્તિવ્યૂહઃ - પુરસ્તાદ્ આવરણિનઃ પૃષ્ઠતો ધન્વિનઃ

10.5.37 ઇતિ શુદ્ધાઃ

10.5.38 પત્તયઃ પક્ષયોરશ્વાઃ પાર્શ્વયોઃ હસ્તિનઃ પૃષ્ઠતો રથાઃ પુરસ્તાત્, પરવ્યૂહવશેન વા વિપર્યાસઃ

10.5.39 ઇતિ દ્વ્ય્ઽઙ્ગબલવિભાગઃ

10.5.40 તેન ત્ર્ઽઙ્ગબલવિભાગો વ્યાખ્યાતઃ

10.5.41 દણ્ડસમ્પત્ સારબલં પુંસાં

10.5.42 હસ્ત્ય્ઽશ્વયોર્વિશેષઃ કુલં જાતિઃ સત્ત્વં વયઃસ્થતા પ્રાણો વર્ષ્મ જવઃ તેજઃ શિલ્પં સ્તૈર્યં ઉદગ્રતા વિધેયત્વં સુવ્યઞ્જનાચારતા ઇતિ

10.5.43 પત્ત્ય્ઽશ્વરથદ્વિપાનાં સારત્રિભાગં ઉરસ્યં સ્થાપયેત્, દ્વૌ ત્રિભાગૌ કક્ષં પક્ષં ચ ઉભયતઃ, અનુલોમં અનુસારં, પ્રતિલોમં તૃતીયસારં, ફલ્ગુ પ્રતિલોમમ્

10.5.44 એવં સર્વં ઉપયોગં ગમયેત્

10.5.45 ફલ્ગુબલં અન્તેષ્વવધાય વેગાભિહૂલિકો ભવતિ

10.5.46 સારબલં અગ્રતઃ કૃત્વા કોટીષ્વનુસારં કુર્યાત્, જઘને તૃતિયિયસારં, મધ્યે ફલ્ગુબલમ્

10.5.47 એવં એતત્ સહિષ્ણુ ભવતિ

10.5.48 વ્યૂહં તુ સ્થાપયિત્વા પક્ષકક્ષ ઉરસ્યાનાં એકેન દ્વાભ્યાં વા પ્રહરેત્, શેષૈઃ પ્રતિગૃહ્ણીયાત્

10.5.49 યત્ પરસ્ય દુર્બલં વીતહસ્ત્ય્ઽશ્વં દૂષ્યામાત્યં કૃત ઉપજાપં વા તત્પ્રભૂતસારેણાભિહન્યાત્

10.5.50 યદ્ વા પરસ્ય સારિષ્ઠં તદ્દ્વિગુણસારેણાભિહન્યાત્

10.5.51 યદ્ અઙ્ગં અલ્પસારં આત્મનઃ તદ્ બહુના ઉપચિનુયાત્

10.5.52 યતઃ પરસ્યાપચયઃ તતોઽભ્યાશે વ્યૂહેત, યતોત્ વા ભયં સ્યાત્

10.5.53 અભિસૃતં પરિસૃતં અતિસૃતં અપસૃતં ઉન્મથ્યાવધાનં વલયો ગોમૂત્રિકા મણ્ડલં પ્રકીર્ણિકા વ્યાવૃત્તપૃષ્ઠં અનુવંશં અગ્રતઃ પાર્શ્વાભ્યાં પૃષ્ઠતો ભગ્નરક્ષા ભગ્નાનુપાત ઇત્યશ્વયુદ્ધાનિ

10.5.54 પ્રકીર્ણિકાવર્જાન્યેતાન્યેવ ચતુર્ણાં અઙ્ગાનાં વ્યસ્તસમસ્તાનાં વા ઘાતઃ, પક્ષકક્ષ ઉરસ્યાનાં ચ પ્રભઞ્જનં અવસ્કન્દઃ સૌપ્તિકં ચ ઇતિ હસિત્યુદ્ધાનિ

10.5.55 ઉન્મથ્યાવધાનવર્જાન્યેતાન્યેવ સ્વભૂમાવભિયાનાપયાનસ્થિતયુદ્ધાનિ ઇતિ રથયુદ્ધાનિ

10.5.56 સર્વદેશકાલપ્રહરણં ઉપાંશુદણ્ડશ્ચ ઇતિ પત્તિયુદ્ધાનિ

10.5.57ab એતેન વિધિના વ્યૂહાન્ ઓજાન્ યુગ્માંશ્ચ કારયેત્ ।

10.5.57chd વિભવો યાવદ્ અઙ્ગાનાં ચતુર્ણાં સદૃશો ભવેત્

10.5.58ab દ્વે શતે ધનુષાં ગત્વા રાજા તિષ્ઠેત્ પ્રતિગ્રહે ।

10.5.58chd ભિન્નસઙ્ઘાતનં તસ્માન્ન યુધ્યેતાપ્રતિગ્રહઃ (ઇતિ)

Chapt . દણ્ડભોગમણ્ડલાસંહતવ્યૂહવ્યૂહનં - તસ્ય પ્રતિવ્યૂહસ્થાનમ્

10.6.01 પક્ષાવુરસ્યં પ્રતિગ્રહ ઇત્યૌશનસો વ્યૂહવિભાગઃ

10.6.02 પક્ષૌ કક્ષાવુરસ્ય્ં પ્રતિગ્રહ ઇતિ બાર્હસ્પત્યઃ

10.6.03 પ્રપક્ષકક્ષ ઉરસ્યા ઉભયોઃ દણ્ડભોગમણ્ડલાસંહતાઃ પ્રકૃતિવ્યૂહાઃ

10.6.04 તત્ર તિર્યગ્વૃત્તિર્દણ્ડઃ

10.6.05 સમસ્તાનાં અન્વાવૃત્તિર્ભોગઃ

10.6.06 સરતાં સર્વતોવૃત્તિર્મણ્ડલઃ

10.6.07 સ્થિતાનાં પૃથગ્ડનીકવૃત્તિરસંહતઃ

10.6.08 પક્ષકક્ષ ઉરસ્યૈઃ સમં વર્તમાનો દણ્ડઃ

10.6.09 સ કક્ષાતિક્રાન્તઃ પ્રદરઃ

10.6.10 સ એવ પક્ષકક્ષાભ્યાં પ્રતિક્રાન્તો દૃઢકઃ

10.6.11 સ એવાતિક્રાન્તઃ પક્ષાભ્યાં અસહ્યઃ

10.6.12 પક્ષાવવસ્થાપ્ય ઉરસ્યાતિક્રાન્તઃ શ્યેનઃ

10.6.13 વિપર્યયે ચાપં ચાપકુકુષિઃ પ્રતિષ્ઠઃ સુપ્રતિષ્ઠશ્ચ

10.6.14 ચાપપક્ષઃ સઞ્જયઃ

10.6.15 સ એવ ઉરસ્યાતિક્રાન્તો વિજયઃ

10.6.16 સ્થૂલકર્ણપક્ષઃ સ્થૂણાકર્ણઃ

10.6.17 દ્વિગુણપક્ષસ્થૂણો વિશાલવિજયઃ

10.6.18 ત્ર્ય્ડભિક્રાન્તપક્ષશ્ચમૂમુખઃ

10.6.19 વિપર્યયે ઝષાસ્યઃ

10.6.20 ઊર્ધ્વરાજિર્દણ્ડઃ સૂચી

10.6.21 દ્વૌ દણ્ડૌ વલયઃ

10.6.22 ચત્વારો દુર્જયઃ

10.6.23 ઇતિ દણ્ડવ્યૂહાઃ

10.6.24 પક્ષકક્ષ ઉરસ્યૈર્વિષમં વર્તમાનો ભોગઃ

10.6.25 સ સર્પસારી ગોમૂત્રિકા વા

10.6.26 સ યુગ્મ ઉરસ્યો દણ્ડપક્ષઃ શકટઃ

10.6.27 વિપર્યયે મકરઃ

10.6.28 હસ્ત્ય્ડશ્વરથૈર્વ્યતિકીર્ણઃ શકટઃ પારિપતન્તકઃ

10.6.29 ઇતિ ભોગવ્યૂહાઃ

10.6.30 પક્ષકક્ષ ઉરસ્યાનાં એકીભાવે મણ્ડલઃ

10.6.31 સ સર્વતોમુખઃ સર્વતોભદ્રઃ

10.6.32 અષ્ટાનીકો દુર્જયઃ

10.6.33 ઇતિ મણ્ડલવ્યૂહાઃ

10.6.34 પક્ષકક્ષ ઉરસ્યાનાં અસંહતાદ્ અસંહતઃ

10.6.35 સ પઞ્ચાનીકાનાં આકૃતિસ્થાપનાદ્ વજ્રો ગોધા વા

10.6.36 ચતુર્ણાં ઉદ્ધાનકઃ કાકપદી વા

10.6.37 ત્રયાણાં અર્ધચન્દ્રકઃ કર્કટકશ઼ૃઙ્ગી વા

10.6.38 ઇત્યસંહતવ્યૂહાઃ

10.6.39 રથ ઉરસ્યો હસ્તિકક્ષોઽશ્વપૃષ્ઠોઽરિષ્ટઃ

10.6.40 પત્તયોઽશ્વા રથા હસ્તિનશ્ચાનુપૃષ્ઠં અચલઃ

10.6.41 હસ્તિનોઽશ્વા રથાઃ પત્તયશ્ચાનુપૃષ્ઠં અપ્રતિહતઃ

10.6.42 તેષાં પ્રદરં દૃઢકેન ઘાતયેત્, દૃઢકં અસહ્યેન, શ્યેનં ચાપેન, પ્રતિષ્ઠં સુપ્રતિષ્ઠેન, સઞ્જયં વિજયેન, સ્થૂણાકર્ણં વિશાલવિજયેન, પારિપતન્તકં સર્વતોભદ્રેણ

10.6.43 દુર્જયેન સર્વાન્ પ્રતિવ્યૂહેત

10.6.44 પત્ત્યઽશ્વરથદ્વિપાનાં પૂર્વં પૂર્વં ઉત્તરેણ ઘાતયેત્, હીનાઙ્ગં અધિકાઙ્ગેન ચ ઇતિ

10.6.45 અઙ્ગદશકસ્ય એકઃ પતિઃ પતિકઃ, પતિકદશકસ્ય એકઃ સેનાપતિઃ, તદ્દશકસ્ય એકો નાયક ઇતિ

10.6.46 સ તૂર્યઘોષધ્વજપતાકાભિર્વ્યૂહાઙ્ગાનાં સંજ્ઞાઃ સ્થાપયેદ્ અઙ્ગવિભાગે સઙ્ઘાતે સ્થાને ગમને વ્યાવર્તને પ્રહરણે ચ

10.6.47 સમે વ્યૂહે દેશકાલસારયોગાત્ સિદ્ધિઃ

10.6.48ab યન્ત્રૈરુપનિષદ્યોગૈઃ તીક્ષ્ણૈર્વ્યાસક્તઘાતિભિઃ ।

10.6.48chd માયાભિર્દેવસમ્યોગૈઃ શકટૈર્હસ્તિભીષણૈઃ

10.6.49ab દૂષ્યપ્રકોપૈર્ગોયૂથૈઃ સ્કન્ધાવારપ્રદીપનૈઃ ।

10.6.49chd કોટીજઘનઘાતૈર્વા દૂતવ્યઞ્જનભેદનૈઃ

10.6.50ab દુર્ગં દગ્ધં હૃતં વા તે કોપઃ કુલ્યઃ સમુત્થિતઃ ।

10.6.50chd શત્રુરાટવિકો વા ઇતિ પરસ્ય ઉદ્વેગં આચરેત્

10.6.51ab એકં હન્યાન્ન વા હન્યાદ્ ઇષુઃ ક્ષિપ્તો ધનુષ્મતા ।

10.6.51chd પ્રજ્ઞાનેન તુ મતિઃ ક્ષિપ્તા હન્યાદ્ ગર્ભગતાન્ અપિ (ઇતિ)

Book .

Chapt . ભેદ ઉપાદાનાનિ - ઉપાંશુદણ્ડાઃ

11.1.01 સઙ્ઘલાભો દણ્ડમિત્રલાભાનાં ઉત્તમઃ

11.1.02 સઙ્ઘા હિ સંહતત્વાદ્ અધૃષ્યાઃ પરેષામ્

11.1.03 તાન્ અનુગુણાન્ ભુઞ્જીત સામદાનાભ્યાં, વિગુણાન્ ભેદદણ્ડાભ્યામ્

11.1.04 કામ્બોજસુરાષ્ટ્રક્ષત્રિયશ્રેણ્ય્।આદયો વાર્ત્તશસ્ત્ર ઉપજીવિનઃ

11.1.05 લિચ્છિવિકવૃજિકમલ્લકમદ્રકકુકુરકુરુપાઞ્ચાલાદયો રાજશબ્દ ઉપજીવિનઃ

11.1.06 સર્વેષાં આસન્નાઃ સત્ત્રિણઃ સઙ્ઘાનાં પરસ્પરન્યઙ્ગદ્વેષવૈરકલહસ્થાનાન્યુપલભ્ય ક્રમાભિનીતં ભેદં ઉપચારયેયુઃ અસૌ ત્વા વિજલ્પતિ ઇતિ

11.1.07 એવં ઉભયતોબદ્ધરોષાણાં વિદ્યાશિલ્પદ્યૂતવૈહારિકેષ્વાચાર્યવ્યઞ્જના બાલકલહાન્ ઉત્પાદયેયુઃ

11.1.08 વેશશૌણ્ડિકેષુ વા પ્રતિલોમપ્રશંસાભિઃ સઙ્ઘમુખ્યમનુષ્યાણાં તીક્ષ્ણાઃ કલહાન્ ઉત્પાદયેયુઃ, કૃત્યપક્ષ ઉપગ્રહેણ વા

11.1.09 કુમારકાન્ વિશિષ્ટચ્છિન્દિકયા હીનચ્છિન્દિકાન્ ઉત્સાહયેયુઃ

11.1.10 વિશિષ્ટાનાં ચ એકપાત્રં વિવાહં વા હીનેભ્યો વારયેયુઃ

11.1.11 હીનાન્ વા વિશિષ્ટૈરેકપાત્રે વિવાહે વા યોજયેયુઃ

11.1.12 અવહીનાન્ વા તુલ્યભાવ ઉપગમને કુલતઃ પૌરુષતઃ સ્થાનવિપર્યાસતો વા

11.1.13 વ્યવહારં અવસ્થિતં વા પ્રતિલોમસ્થાપનેન નિશામયેયુઃ

11.1.14 વિવાદપદેષુ વા દ્રવ્યપશુમનુષ્યાભિઘાતેન રાત્રૌ તીક્ષ્ણાઃ કલહાન્ ઉત્પાદયેયુઃ

11.1.15 સર્વેષુ ચ કલહસ્થાનેષુ હીનપક્ષં રાજા કોશદણ્ડાભ્યાં ઉપગૃહ્ય પ્રતિપક્ષવધે યોજયેત્

11.1.16 ભિન્નાન્ અપવાહયેદ્ વા

11.1.17 ભૂમૌ ચ એષાં પઞ્ચકુલીં દશકુલીં વા કૃષ્યાયાં નિવેશયેત્

11.1.18 એકસ્થા હિ શસ્ત્રગ્રહણસમર્થાઃ સ્યુઃ

11.1.19 સમવાયે ચ એષાં અત્યયં સ્થાપયેત્

11.1.20 રાજશબ્દિભિરવરુદ્ધં અવક્ષિપ્તં વા કુલ્યં અભિજાતં રાજપુત્રત્વે સ્થાપયેત્

11.1.21 કાર્તાન્તિકાદિશ્ચાસ્ય વર્ગો રાજલક્ષણ્યતાં સઙ્ઘેષુ પ્રકાશયેત્

11.1.22 સઙ્ઘમુખ્યાંશ્ચ ધર્મિષ્ઠાન્ ઉપજપેત્ સ્વધર્મં અમુષ્ય રાજ્ઞઃ પુત્રે ભ્રાતરિ વા પ્રતિપદ્યધ્વમ્ ઇતિ

11.1.23 પ્રતિપન્નેષુ કૃત્યપક્ષ ઉપગ્રહાર્થં અર્થં દણ્ડં ચ પ્રેષયેત્

11.1.24 વિક્રમકાલે શૌણ્ડિકવ્યઞ્જનાઃ પુત્રદારપ્રેતાપદેશેન નૈષેચનિકમ્ ઇતિ મદનરસયુક્તાન્ મદ્યકુમ્ભાન્શતશઃ પ્રયચ્છેયુઃ

11.1.25 ચૈત્યદૈવતદ્વારરક્ષાસ્થાનેષુ ચ સત્રિણઃ સમયકર્મનિક્ષેપં સહિરણ્યાભિજ્ઞાનમુદ્રાણિ હિરણ્યભાજનાનિ ચ પ્રરૂપયેયુઃ

11.1.26 દૃશ્યમાનેષુ ચ સઙ્ઘેષુ રાજકીયાઃ ઇત્યાવેદયેયુઃ

11.1.27 અથાવસ્કન્દં દદ્યાત્

11.1.28 સઙ્ઘાનાં વા વાહનહિરણ્યે કાલિકે ગૃહીત્વા સઙ્ઘમુખ્યાય પ્રખ્યાતં દ્રવ્યં પ્રયચ્છેત્

11.1.29 તદ્ એષાં યાચિતે દત્તં અમુષ્મૈ મુખ્યાય ઇતિ બ્રૂયાત્

11.1.30 એતેન સ્કન્ધાવારાટવીભેદો વ્યાખ્યાતઃ

11.1.31 સઙ્ઘમુખ્યપુત્રં આત્મસમ્ભાવિતં વા સત્રી ગ્રાહયેત્ અમુષ્ય રાજ્ઞઃ પુત્રઃ ત્વં, શત્રુભયાદ્ ઇહ ન્યસ્તોઽસિ ઇતિ

11.1.32 પ્રતિપન્નં રાજા કોશદણ્ડાભ્યાં ઉપગૃહ્ય સઙ્ઘેષુ વિક્રમયેત્

11.1.33 અવાપ્તાર્થઃ તં અપિ પ્રવાસયેત્

11.1.34 બન્ધકીપોષકાઃ પ્લવકનટનર્તકસૌભિકા વા પ્રણિહિતાઃ સ્ત્રીભિઃ પરમરૂપયૌવનાભિઃ સઙ્ઘમુખ્યાન્ ઉન્માદયેયુઃ

11.1.35 જાતકામાનાં અન્યતમસ્ય પ્રત્યયં કૃત્વાઽન્યત્ર ગમનેન પ્રસભહરણેન વા કલહાન્ ઉત્પાદયેયુઃ

11.1.36 કલહે તીક્ષ્ણાઃ કર્મ કુર્યુઃ હતોઽયં ઇત્થં કામુકઃ ઇતિ

11.1.37 વિસંવાદિતં વા મર્ષયમાણં અભિસૃત્ય સ્ત્રી બ્રૂયાત્ અસૌ માં મુખ્યઃ ત્વયિ જાતકામાં બાધતે, તસ્મિઞ્જીવતિ ન ઇહ સ્થાસ્યામિ ઇતિ ઘાતં અસ્ય પ્રયોજયેત્

11.1.38 પ્રસહ્યાપહૃતા વા વનાન્તે ક્રિડાગૃહે વાઽપહર્તારં રાત્રૌ તીક્ષ્ણેન ઘાતયેત્, સ્વયં વા રસેન

11.1.39 તતઃ પ્રકાશયેત્ અમુના મે પ્રિયો હતઃ ઇતિ

11.1.40 જાતકામં વા સિદ્ધવ્યઞ્જનઃ સાંવદનિકીભિરૌષધીભિઃ સંવાસ્ય રસેનાતિસન્ધાયાપગચ્છેત્

11.1.41 તસ્મિન્ન્ અપક્રાન્તે સત્રિણઃ પરપ્રયોગં અભિશંસેયુઃ

11.1.42 આઢ્યવિધવા ગૂઢાજીવા યોગસ્ત્રિયો વા દાયનિક્ષેપાર્થં વિવદમાનાઃ સઙ્ઘમુખ્યાન્ ઉન્માદયેયુઃ, અદિતિકૌશિકસ્ત્રિયો નર્તકીગાયના વા

11.1.43 પ્રતિપન્નાન્ ગૂઢવેશ્મસુ રાત્રિસમાગમપ્રવિષ્ટાંઃ તીક્ષ્ણા હન્યુર્બદ્ધ્વા હરેયુર્વા

11.1.44 સત્રી વા સ્ત્રીલોલુપં સઙ્ઘમુખ્યં પ્રરૂપયેત્ અમુષ્મિન્ ગ્રામે દરિદ્રકુલ્લં અપસૃતં, તસ્ય સ્ત્રી રાજાર્હા, ગૃહાણ એનામ્ ઇતિ

11.1.45 ગૃહીતાયાં અર્ધમાસાનન્તરં સિદ્ધવ્યઞ્જનો દૂષ્યસઙ્ઘમુખ્યમધ્યે પ્રક્રોશેત્ અસૌ મે મુખ્યો ભાર્યાં સ્નુષાં ભગિનીં દુહિતરં વાઽધિચરતિ ઇતિ

11.1.46 તં ચેત્ સઙ્ઘો નિગૃહ્ણીયાત્, રાજા એનં ઉપગૃહ્ય વિગુણેષુ વિક્રમયેત્

11.1.47 અનિગૃહીતે સિદ્ધવ્યઞ્જનં રાત્રૌ તીક્ષ્ણાઃ પ્રવાસયેયુઃ

11.1.48 તતઃ તદ્વ્યઞ્જનાઃ પ્રક્રોશેયુઃ અસૌ બ્રહ્મહા બ્રાહ્મણીજારશ્ચ ઇતિ

11.1.49 કાર્તાન્તિકવ્યઞ્જનો વા કન્યાં અન્યેન વૃતાં અન્યસ્ય પ્રરૂપયેત્ અમુષ્ય કન્યા રાજપત્ની રાજપ્રસવિની ચ ભવિષ્યતિ, સર્વસ્વેન પ્રસહ્ય વા એનાં લભસ્વ ઇતિ

11.1.50 અલભ્યમાનાયાં પરપક્ષં ઉદ્ધર્ષયેત્

11.1.51 લબ્ધાયાં સિદ્ધઃ કલહઃ

11.1.52 ભિક્ષુકી વા પ્રિયભાર્યં મુખ્યં બ્રૂયાત્ અસૌ તે મુખ્યો યૌવન ઉત્સિક્તો ભાર્યાયાં માં પ્રાહિણોત્, તસ્યાહં ભયાલ્લેખ્યં આભરણં ગૃહીત્વાઽઽગતાઽસ્મિ, નિર્દોષા તે ભાર્યા, ગૂઢં અસ્મિન્ પ્રતિકર્તવ્યં, અહં અપિ તાવત્ પ્રતિપત્સ્યામિ ઇતિ

11.1.53 એવં।આદિષુ કલહસ્થાનેષુ સ્વયં ઉત્પન્ને વા કલહે તીક્ષ્ણૈરુત્પાદિતે વા હીનપક્ષં રાજા કોશદણ્ડાભ્યાં ઉપગૃહ્ય વિગુણેષુ વિક્રમયેદ્ અપવાહયેદ્ વા

11.1.54 સઙ્ઘેષ્વેવં એકરાજો વર્તેત

11.1.55 સઙ્ઘાશ્ચાપ્યેવં એકરાજાદ્ એતેભ્યોઽતિસઙ્ઘાન્ એભ્યો રક્ષયેયુઃ

11.1.56ab સઙ્ઘમુખ્યશ્ચ સઙ્ઘેષુ ન્યાયવૃત્તિર્હિતઃ પ્રિયઃ ।

11.1.56chd દાન્તો યુક્તજનઃ તિષ્ઠેત્ સર્વચિત્તાનુવર્તકઃ (ઇતિ)

Book .

Chapt . દૂતકર્મ

12.1.01 બલીયસાઽભિયુક્તો દુર્બલઃ સર્વત્રાનુપ્રણતો વેતસધર્મા તિષ્ઠેત્

12.1.02 ઇન્દ્રસ્ય હિ સ પ્રણમતિ યો બલીયસો નમતિ ઇતિ ભારદ્વાજઃ

12.1.03 સર્વસન્દોહેન બલાનાં યુધ્યેત

12.1.04 પરાક્રમો હિ વ્યસનં અપહન્તિ

12.1.05 સ્વધર્મશ્ચ એષ ક્ષત્રિયસ્ય, યુદ્ધે જયઃ પરાજયો વા ઇતિ વિશાલાક્ષઃ

12.1.06 ન ઇતિ કૌટિલ્યઃ

12.1.07 સર્વત્રાનુપ્રણતઃ કુલૈડક ઇવ નિરાશો જીવિતે વસતિ

12.1.08 યુધ્યમાનશ્ચાલ્પસૈન્યઃ સમુદ્રં ઇવાપ્લવોઽવગાહમાનઃ સીદતિ

12.1.09 તદ્વિશિષ્ટં તુ રાજાનં આશ્રિતો દુર્ગં અવિષહ્યં વા ચેષ્ટેત

12.1.10 ત્રયોઽભિયોક્તારો ધર્મલોભાસુરવિજયિન ઇતિ

12.1.11 તેષાં અભ્યવપત્ત્યા ધર્મવિજયી તુષ્યતિ

12.1.12 તં અભ્યવપદ્યેત, પરેષાં અપિ ભયાત્

12.1.13 ભૂમિદ્રવ્યહરણેન લોભવિજયી તુષ્યતિ

12.1.14 તં અર્થેનાભ્યવપદ્યેત

12.1.15 ભૂમિદ્રવ્યપુત્રદારપ્રાણહરણેનાસુરવિજયી

12.1.16 તં ભૂમિદ્રવ્યાભ્યાં ઉપગૃહ્યાગ્રાહ્યઃ પ્રતિકુર્વીત

12.1.17 તેષાં અન્યતમં ઉત્તિષ્ઠમાનં સન્ધિના મન્ત્રયુદ્ધેન કૂટયુદ્ધેન વા પ્રતિવ્યૂહેત

12.1.18 શત્રુપક્ષં અસ્ય સામદાનાભ્યાં, સ્વપક્ષં ભેદદણ્ડાભ્યામ્

12.1.19 દુર્ગં રાષ્ટ્રં સ્કન્ધાવારં વાઽસ્ય ગૂઢાઃ શસ્ત્રરસાગ્નિભિઃ સાધયેયુઃ

12.1.20 સર્વતઃ પાર્ષ્ણિં અસ્ય ગ્રાહયેત્

12.1.21 અટવીભિર્વા રાજ્યં ઘાતયેત્, તત્કુલીનાપરુદ્ધાભ્યાં વા હારયેત્

12.1.22 અપકારાન્તેષુ ચાસ્ય દૂટં પ્રેષયેત્

12.1.23 અનપકૃત્ય વા સન્ધાનમ્

12.1.24 તથાઽપ્યભિપ્રયાન્તં કોશદણ્ડયોઃ પાદ ઉત્તરં અહોરાત્ર ઉત્તરં વા સન્ધિં યાચેત

12.1.25 સ ચેદ્ દણ્ડસન્ધિં યાચેત, કુણ્ઠં અસ્મૈ હસ્ત્યઽશ્વં દદ્યાદ્, ઉત્સાહિતં વા ગરયુક્તમ્

12.1.26 પુરુષસન્ધિં યાચેત, દૂષ્યામિત્રાટવીબલં અસ્મૈ દદ્યાદ્ યોગપુરુષાધિષ્ઠિતમ્

12.1.27 તથા કુર્યાદ્ યથા ઉભયવિનાશઃ સ્યાત્

12.1.28 તીક્ષ્ણબલં વાઽસ્મૈ દદ્યાદ્ યદ્ અવમાનિતં વિકુર્વીત, મૌલં અનુરક્તં વા યદ્ અસ્ય વ્યસનેઽપકુર્યાત્

12.1.29 કોશસન્ધિં યાચેત, સારં અસ્મૈ દદ્યાદ્ યસ્ય ક્રેતારં નાધિગચ્છેત્, કુપ્યં અયુદ્ધયોગ્યં વા

12.1.30 ભૂમિસન્ધિં યાચેત, પ્રત્યાદેયાં નિત્યામિત્રાં અનપાશ્રયાં મહાક્ષયવ્યયનિવેશાં વાઽસ્મૈ ભૂમિં દદ્યાત્

12.1.31 સર્વસ્વેન વા રાજધાનીવર્જેન સન્ધિં યાચેત બલીયસઃ

12.1.32ab યત્ પ્રસહ્ય હરેદ્ અન્યઃ તત્ પ્રયચ્છેદ્ ઉપાયતઃ ।
12.1.32chd રક્ષેત્ સ્વદેહં ન ધનં કા હ્યનિત્યે ધને દયા (ઇતિ)

Chapt . મન્ત્રયુદ્ધ

12.2.01 સ ચેત્ સન્ધૌ નાવતિષ્ઠેત, બ્રૂયાદ્ એનં - ઇમે શત્રુષડ્વર્ગવશગા રાજાનો વિનષ્ટાઃ, તેષાં અનાત્મવતાં નાર્હસિ માર્ગં અનુગન્તુમ્

12.2.02 ધર્મં અર્થં ચાવેક્ષસ્વ

12.2.03 મિત્રમુખા હ્યમિત્રાઃ તે યે ત્વા સાહસં અધર્મં અર્થાતિક્રમં ચ ગ્રાહયન્તિ

12.2.04 શૂરૈઃ ત્યક્તાત્મભિઃ સહ યોદ્ધું સાહસં, જનક્ષયં ઉભયતઃ કર્તું અધર્મઃ, દૃષ્ટં અર્થં મિત્રં અદુષ્ટં ચ ત્યક્તું અર્થાતિક્રમઃ

12.2.05 મિત્રવાંશ્ચ સ રાજા, ભૂયશ્ચ એતેનાર્થેન મિત્રાણ્યુદ્યોજયિષ્યતિ યાનિ ત્વા સર્વતોઽભિયાસ્યન્તિ

12.2.06 ન ચ મધ્યમ ઉદાસીનયોર્મણ્ડલસ્ય વા પરિત્યક્તઃ, ભવાંઃ તુ પરિત્યક્તઃ યત્ત્વા સમુદ્યુક્તં ઉપપ્રેક્ષન્તે ભૂયઃ ક્ષયવ્યયાભ્યાં યુજ્યતાં, મિત્રાચ્ચ ભિદ્યતાં, અથ એનં પરિત્યક્તમૂલં સુખેન ઉચ્છેત્સ્યામઃ ઇતિ

12.2.07 સ ભવાન્નાર્હતિ મિત્રમુખાનાં અમિત્રાણાં શ્રોતું, મિત્રાણ્યુદ્વેજયિતું અમિત્રાંશ્ચ શ્રેયસા યોક્તું, પ્રાણસંશયં અનર્થં ચ ઉપગન્તુમ્ ઇતિ યચ્છેત્

12.2.08 તથાઽપિ પ્રતિષ્ઠમાનસ્ય પ્રકૃતિકોપં અસ્ય કારયેદ્ યથા સઙ્ઘવૃત્તે વ્યાખ્યાતં યોગવામને ચ

12.2.09 તીક્ષ્ણરસદપ્રયોગં ચ

12.2.10 યદ્ ઉક્તં આત્મરક્ષિતકે રક્ષ્યં તત્ર તીક્ષ્ણાન્ રસદાંશ્ચ પ્રયુઞ્જીત

12.2.11 બન્ધકીપોષકાઃ પરમરૂપયૌવનાભિઃ સ્ત્રીભિઃ સેનામુખ્યાન્ ઉન્માદયેયુઃ

12.2.12 બહૂનાં એકસ્યાં દ્વયોર્વા મુખ્યયોઃ કામે જાતે તીક્ષ્ણાઃ કલહાન્ ઉત્પાદયેયુઃ

12.2.13 કલહે પરાજિતપક્ષં પરત્રાપગમને યાત્રાસાહાય્યદાને વા ભર્તુર્યોજયેયુઃ

12.2.14 કામવશાન્ વા સિદ્ધવ્યઞ્જનાઃ સાંવદનિકીભિરોષધીભિરતિસન્ધાનાય મુખ્યેષુ રસં દાપયેયુઃ

12.2.15 વૈદેહકવ્યઞ્જને વા રાજમહિષ્યાઃ સુભગાયાઃ પ્રેષ્યાં આસન્નાં કામનિમિત્તં અર્થેનાભિવૃષ્ય પરિત્યજેત્

12.2.16 તસ્ય એવ પરિચારકવ્યઞ્જન ઉપદિષ્ટઃ સિદ્ધવ્યઞ્જનઃ સાંવદનિકીં ઓષધીં દદ્યાત્ વૈદેહકશરીરેઽવધાતવ્યા ઇતિ

12.2.17 સિદ્ધે સુભગાયા અપ્યેનં યોગં ઉપદિશેત્ રાજશરીરેઽવધાતવ્યા ઇતિ

12.2.18 તતો રસેનાતિસન્દધ્યાત્

12.2.19 કાર્તાન્તિકવ્યઞ્જનો વા મહામાત્રં રાજલક્ષણસમ્પન્નમ્ ક્રમાભિનીતં બ્રૂયાત્

12.2.20 ભાર્યાં અસ્ય ભિક્ષુકી રાજપત્ની રાજપ્રસવિની વા ભવિષ્યસિ ઇતિ

12.2.21 ભાર્યાવ્યઞ્જના વા મહામાત્રં બ્રૂયાત્ રાજા કિલ માં અવરોધયિષ્યતિ, તવાન્તિકાય પત્રલેખ્યં આભરણં ચ ઇદં પરિવ્રાજિકયાઽઽહૃતમ્ ઇતિ

12.2.22 સૂદારાલિકવ્યઞ્જનો વા રસપ્રયોગાર્થં રાજવચનં અર્થં ચાસ્ય લોભનીયં અભિનયેત્

12.2.23 તદ્ અસ્ય વૈદેહકવ્યઞ્જનઃ પ્રતિસન્દધ્યાત્, કાર્યસિદ્ધિં ચ બ્રૂયાત્

12.2.24 એવં એકેન દ્વાભ્યાં ત્રિભિરિત્યુપાયૈરેક એકં અસ્ય મહામાત્રં વિક્રમાયાપગમનાય વા યોજયેત્ - ઇતિ

12.2.25 દુર્ગેષુ ચાસ્ય શૂન્યપાલાસન્નાઃ સત્રિણઃ પૌરજાનપદેષુ મૈત્રીનિમિત્તં આવેદયેયુઃ - શૂન્યપાલેન ઉક્તા યોધાશ્ચાધિકરણસ્થાશ્ચ કૃચ્છ્રગતો રાજા જીવન્ આગમિષ્યતિ, ન વા, પ્રસહ્ય વિત્તં આર્જયધ્વં, અમિત્રાંશ્ચ હત ઇતિ

12.2.26 બહુલીભૂતે તીક્ષ્ણાઃ પૌરાન્નિશાસ્વાહારયેયુઃ, મુખ્યાંશ્ચાભિહન્યુઃ એવં ક્રિયન્તે યે શૂન્યપાલસ્ય ન શુશ્રૂષન્તે ઇતિ

12.2.27 શૂન્યપાલસ્થાનેષુ ચ સશોણિતાનિ શસ્ત્રવિત્તબન્ધનાન્યુત્સૃજેયુઃ

12.2.28 તતઃ સત્રિણઃ શૂન્યપાલો ઘાતયતિ વિલોપયતિ ચ ઇત્યાવેદયેયુઃ

12.2.29 એવં જાનપદાન્ સમાહર્તુર્ભેદયેયુઃ

12.2.30 સમાહર્તૃપુરુષાંઃ તુ ગ્રામમધ્યેષુ રાત્રૌ તીક્ષ્ણા હત્વા બ્રૂયુઃ એવં ક્રિયન્તે યે જનપદં અધર્મેણ બાધન્તે ઇતિ

12.2.31 સમુત્પન્ને દોષે શૂન્યપાલં સમાહર્તારં વા પ્રકૃતિકોપેન ઘાતયેયુઃ

12.2.32 તત્કુલીનં અપરુદ્ધં વા પ્રતિપાદયેયુઃ

12.2.33ab અન્તઃપુરપુરદ્વારં દ્રવ્યધાન્યપરિગ્રહાન્ ।

12.2.33chd દહેયુઃ તાંશ્ચ હન્યુર્વા બ્રૂયુરસ્યાર્તવાદિનઃ (ઇતિ)

Chapt . સેનામુખ્યવધહ્<dvitIyo bhAgah> - મણ્ડલપ્રોત્સાહનમ્

12.3.01 રાજ્ઞો રાજવલ્લભાનાં ચાસન્નાઃ સત્રિણઃ પત્ત્યઽશ્વરથદ્વિપમુખ્યાનાં રાજા ક્રુદ્ધઃ ઇતિ સુહૃદ્વિશ્વાસેન મિત્રસ્થાનીયેષુ કથયેયુઃ

12.3.02 બહુલીભૂતે તીક્ષ્ણાઃ કૃતરાત્રિચારપ્રતીકારા ગૃહેષુ સ્વામિવચનેનાગમ્યતામ્ ઇતિ બ્રૂયુઃ

12.3.03 તાન્નિર્ગચ્છત એવાભિહન્યુઃ, સ્વામિસન્દેશઃ ઇતિ ચાસન્નાન્ બ્રૂયુઃ

12.3.04 યે ચાપ્રવાસિતાઃ તાન્ સત્રિણો બ્રૂયુઃ એતત્ તદ્ યદ્ અસ્માભિઃ કથિતં, જીવિતુકામેનાપક્રાન્તવ્યમ્ ઇતિ

12.3.05 યેભ્યશ્ચ રાજા યાચિતો ન દદાતિ તાન્ સત્રિણો બ્રૂયુઃ - ઉક્તઃ શૂન્યપાલો રાજ્ઞા અયાચ્યં અર્થં અસૌ ચાસૌ ચ મા યાચતે, મયા પ્રત્યાખ્યાતાઃ શત્રુસંહિતાઃ, તેષાં ઉદ્ધરણે પ્રયતસ્વ ઇતિ

12.3.06 તતઃ પૂર્વવદ્ આચરેત્

12.3.07 યેભ્યશ્ચ રાજા યાચિતો દદાતિ તાન્ સત્રિણો બ્રૂયુઃ - ઉક્તઃ શૂન્યપાલો રાજ્ઞા અયાચ્યં અર્થં અસૌ ચાસૌ ચ મા યાચતે, તેભ્યો મયા સોઽર્થો વિશ્વાસાર્થં દત્તઃ, શત્રુસંહિતાઃ, તેષાં ઉદ્ધરણે પ્રયતસ્વ ઇતિ

12.3.08 તતઃ પૂર્વવદ્ આચરેત્

12.3.09 યે ચ એનં યાચ્યં અર્થં ન યાચન્તે તાન્ સત્રિણો બ્રૂયુઃ - ઉક્તઃ શૂન્યપાલો રાજ્ઞા યાચ્યં અર્થં અસૌ ચાસૌ ચ મા ન યાચતે, કિં અન્યત્ સ્વદોષશઙ્કિતત્વાત્, તેષાં ઉદ્ધરણે પ્રયતસ્વ ઇતિ

12.3.10 તતઃ પૂર્વવદ્ આચરેત્

12.3.11 એતેન સર્વઃ કૃત્યપક્ષો વ્યાખ્યાતઃ

12.3.12 પ્રત્યાસન્નો વા રાજાનં સત્રી ગ્રાહયેત્ અસૌ ચાસૌ ચ તે મહામાત્રઃ શત્રુપુરુષૈઃ સમ્ભાષતે ઇતિ

12.3.13 પ્રતિપન્ને દૂષ્યાન્ અસ્ય શાસનહરાન્ દર્શયેત્ એતત્ તત્ ઇતિ

12.3.14 સેનામુખ્યપ્રકૃતિપુરુષાન્ વા ભૂમ્યા હિરણ્યેન વા લોભયિત્વા સ્વેષુ વિક્રમયેદ્ અપવાહયેદ્ વા

12.3.15 યોઽસ્ય પુત્રઃ સમીપે દુર્ગે વા પ્રતિવસતિ તં સત્ત્રિણા ઉપજાપયેત્ આત્મસમ્પન્નતરઃ ત્વં પુત્રઃ, તથાઽપ્યન્તર્હિતઃ, તત્કિં ઉપેક્ષસે વિક્રમ્ય ગૃહાણ, પુરા ત્વા યુવરાજો વિનાશયતિ ઇતિ
12.3.16 તત્કુલીનં અપરુદ્ધં વા હિરણ્યેન પ્રતિલોભ્ય બ્રૂયાત્ અન્તર્બલં પ્રત્યન્તસ્કન્ધં અન્તં વાઽસ્ય પ્રમૃદ્નીહિ ઇતિ
12.3.17 આટવિકાન્ અર્થમાનાભ્યાં ઉપગૃહ્ય રાજ્યં અસ્ય ઘાતયેત્
12.3.18 પાર્ષ્ણિગ્રાહં વાઽસ્ય બ્રૂયાત્ એષ ખલુ રાજા માં ઉચ્છિદ્ય ત્વાં ઉચ્છેત્સ્યતિ, પાર્ષ્ણિં અસ્ય ગૃહાણ, ત્વયિ નિવૃત્તસ્યાહં પાર્ષ્ણિં ગ્રહીષ્યામિ ઇતિ
12.3.19 મિત્રાણિ વાઽસ્ય બ્રૂયાત્ અહં વઃ સેતુઃ, મયિ વિભિન્ને સર્વાન્ એષ વો રાજા પ્લાવયિષ્યતિ, સમ્ભૂય વાઽસ્ય યાત્રાં વિહનામ ઇતિ
12.3.20 તત્સંહતાનાં અસંહતાનાં ચ પ્રેષયેત્ એષ ખલુ રાજા માં ઉત્પાટ્ય ભવત્સુ કર્મ કરિષ્યતિ, બુધ્યધ્વં, અહં વઃ શ્રેયાન્ અભ્યુપપત્તુમ્ ઇતિ
12.3.21ab મધ્યમસ્ય પ્રહિણુયાદ્ ઉદાસીનસ્ય વા પુનઃ ।
12.3.21chd યથાઽઽસન્નસ્ય મોક્ષાર્થં સર્વસ્વેન તદ્ઽર્પણમ્ (ઇતિ)

Chapt . શસ્ત્રાગ્નિરસપ્રણિધયઃ - વીવધાસારપ્રસારવધઃ

12.4.01 યે ચાસ્ય દુર્ગેષુ વૈદેહકવ્યઞ્જનાઃ, ગ્રામેસુ ગૃહપતિકવ્યઞ્જનાઃ, જનપદસન્ધિષુ ગોરક્ષકતાપસવ્યઞ્જનાઃ, તે સામન્તાટવિકતત્કુલીનાપરુદ્ધાનાં પણ્યાગારપૂર્વં પ્રેષયેયુઃ અયં દેશો હાર્યઃ ઇતિ
12.4.02 આગતાંશ્ચ એષાં દુર્ગે ગૂઢપુરુષાન્ અર્થમાનાભ્યાં અભિસત્કૃત્ય પ્રકૃતિચ્છિદ્રાણિ પ્રદર્શયેયુઃ
12.4.03 તેષુ તૈઃ સહ પ્રહરેયુઃ
12.4.04 સ્કન્ધાવારે વાઽસ્ય શૌણ્ડિકવ્યઞ્જનઃ પુત્રં અભિત્યક્તં સ્થાપયિત્વાઽવસ્કન્દકાલે રસેન પ્રવાસયિત્વા નૈષેચનિકમ્ ઇતિ મદનરસયુક્તાન્ મદ્યકુમ્ભાન્શતશઃ પ્રયચ્છેત્
12.4.05 શુદ્ધં વા મદ્યં પાદ્યં વા મદ્યં દદ્યાદ્ એકં અહઃ, ઉત્તરં રસ્સિદ્ધં પ્રયચ્છેત્
12.4.06 શુદ્ધં વા મદ્યં દણ્ડમુખ્યેભ્યઃ પ્રદાય મદકાલે રસસિદ્ધં પ્રયચ્છેત્
12.4.07 દણ્ડમુખ્યવ્યઞ્જનો વા પુત્રં અભિત્યક્તં ઇતિ સમાનમ્
12.4.08 પાક્વમાંસિકાઉદનિકાઉણ્ડિકાપૂપિકવ્યઞ્જના વા પણ્યવિશેષં અવઘોષયિત્વા પરસ્પરસઙ્ઘર્ષેણ કાલિકં સમર્ઘતરં ઇતિ વા પરાન્ આહૂય રસેન સ્વપણ્યાન્યપચારયેયુઃ
12.4.09 સુરાક્ષીરદધિસર્પિસ્તૈલાનિ વા તદ્વ્યવહર્તૃહસ્તેષુ ગૃહીતા સ્ત્રિયો બાલાશ્ચ રસયુક્તેષુ સ્વભાજનેષુ પરિકિરેયુઃ
12.4.10 અનેનાર્ઘેણ, વિશિષ્ટં વા ભૂયો દીયતામ્ ઇતિ તત્ર એવાવાકિરેયુઃ
12.4.11 એતાન્યેવ વૈદેહકવ્યઞ્જનાઃ, પણ્યવિરેયેણાહર્તારો વા
12.4.12 હસ્ત્યઽશ્વાનાં વિધાયવસેષુ રસં આસન્ના દદ્યુઃ
12.4.13 કર્મકરવ્યઞ્જના વા રસાક્તં યવસં ઉદકં વા વિક્રીણીરન્
12.4.14 ચિરસંસૃષ્ટા વા ગોવાણિજકા ગવાં અજાવીનાં વા યૂથાન્યવસ્કન્દકાલેષુ પરેષાં મોહસ્થાનેષુ પ્રમુઞ્ચેયુઃ, અશ્વખર ઉષ્ટ્રમહિષાદીનાં દુષ્ટાંશ્ચ

12.4.15 તદ્વ્યઞ્જના વા ચુચ્છુન્દરીશોણિતાક્તાક્ષાન્

12.4.16 લુબ્ધકવ્યઞ્જના વા વ્યાલમૃગાન્ પઞ્જરેભ્યઃ પ્રમુઞ્ચેયુઃ, સર્પગ્રાહા વા સર્પાન્ ઉગ્રવિષાન્, હસ્તિજીવિનો વા હસ્તિનઃ

12.4.17 અગ્નિજીવિનો વાઽગ્નિં અવસૃજેયુઃ

12.4.18 ગૂઢપુરુષા વા વિમુખાન્ પત્ત્યઽશ્વરથદ્વિપમુખ્યાન્ અભિહન્યુઃ, આદીપયેયુર્વા મુખ્યાવાસાન્

12.4.19 દૂષ્યામિત્રાટવિકવ્યઞ્જનાઃ પ્રણિહિતાઃ પૃષ્ઠાભિઘાતં અવસ્કન્દપ્રતિગ્રહં વા કુર્યુઃ

12.4.20 વનગૂઢા વા પ્રત્યન્તસ્કન્ધં ઉપનિષ્કૃષ્યાભિહન્યુઃ, એકાયને વીવધાસારપ્રસારાન્ વા

12.4.21 સસઙ્કેતં વા રાત્રિયુદ્ધે ભૂરિતૂર્યં આહત્ય બ્રૂયુઃ અનુપ્રવિષ્ટાઃ સ્મો, લબ્ધં રાજ્યમ્ ઇતિ

12.4.22 રાજાવાસં અનુપ્રવિષ્ટા વા સઙ્કુલેષુ રાજાનં હન્યુઃ

12.4.23 સર્વતો વા પ્રયાતં એન(?એવ?) મ્લેચ્છાટવિકદણ્ટચારિણઃ સત્રાપાશ્રયાઃ સ્તમ્ભવાટાપાશ્રયા વા હન્યુઃ

12.4.24 લુબ્ધકવ્યઞ્જના વાઽવસ્કન્દસઙ્કુલેષુ ગૂઢયુદ્ધહેતુભિરભિહન્યુઃ

12.4.25 એકાયને વા શૈલસ્તમ્ભવાટખઞ્જનાન્તર્। ઉદકે વા સ્વભૂમિબલેનાભિહન્યુઃ

12.4.26 નદીસરસ્તટાકસેતુબન્ધભેદવેગેન વા પ્લાવયેયુઃ

12.4.27 ધાન્વનવનદુર્ગનિમ્નદુર્ગસ્થં વા યોગાગ્નિધૂમાભ્યાં નાશયેયુઃ

12.4.28 સઙ્કટગતં અગ્નિના, ધાન્વનગતં ધૂમેન, નિધાનગતં રસેન, તોયાવગાઢં દુષ્ટગ્રાહૈરુદકચરણૈર્વા તીક્ષ્ણાઃ સાધયેયુઃ, આદીપ્તાવાસાન્નિષ્પતન્તં વા

12.4.29ab યોગવામનયોગાભ્યાં યોગેનાન્યતમેન વા ।

12.4.29chd અમિત્રં અતિસન્દધ્યાત્ સક્તં ઉક્તાસુ ભૂમિષુ (ઇતિ)

Chapt . યોગાતિસંધાનં - દણ્ડાતિસંધાનં - એકવિજયઃ

12.5.01 દૈવતેજ્યાયામ્(દેવતા ઇજ્યાયામ્?) યાત્રાયાં અમિત્રસ્ય બહૂનિ પૂજાઽઽગમસ્થાનાનિ ભક્તિતઃ

12.5.02 તત્રાસ્ય યોગં ઉબ્જયેત્

12.5.03 દેવતાગૃહપ્રવિષ્ટસ્ય ઉપરિ યન્ત્રમોક્ષણેન ગૂઢભિત્તિં શિલાં વા પાતયેત્

12.5.04 શિલાશસ્ત્રવર્ષં ઉત્તમાગારાત્, કપાટં અવપાતિતં વા, ભિત્તિપ્રણિહિતં એકદેશબદ્ધં વા પરિઘં મોક્ષયેત્

12.5.05 દેવતાદેહધ્વજપ્રહરણાનિ વાઽસ્ય ઉપરિષ્ટાત્ પાતયેત્

12.5.06 સ્થાનાસનગમનભૂમિષુ વાઽસ્ય ગોમયપ્રદેહેન ગન્ધ ઉદકપ્રસેકેન વા રસં અતિચારયેત્, પુષ્પચૂર્ણ ઉપહારેણ વા

12.5.07 ગન્ધપ્રતિચ્છન્નં વાઽસ્ય તીક્ષ્ણં ધૂમં અતિનયેત્

12.5.08 શૂલકૂપં અવપાતનં વા શયનાસનસ્યાધસ્તાદ્ યન્ત્રબદ્ધતલં એનં કીલમોક્ષણેન પ્રવેશયેત્

12.5.09 પ્રત્યાસન્ને વાઽમિત્રે જનપદાજ્ જનં અવરોધક્ષમં અતિનયેત્

12.5.10 દુર્ગાચ્ચાનવરોધક્ષમં અપનયેત્, પ્રત્યાદેયં અરિવિષયં વા પ્રેષયેત્

12.5.11 જનપદં ચ એકસ્થં શૈલવનનદીદુર્ગેષ્વટવીવ્યવહિતેષુ વા પુત્રભ્રાતૃપરિગૃહીતં સ્થાપયેત્

12.5.12 ઉપરોધહેતવો દણ્ડ ઉપનતવૃત્તે વ્યાખ્યાતાઃ

12.5.13 તૃણકાષ્ઠં આયોજનાદ્ દાહયેત્

12.5.14 ઉદકાનિ ચ દૂષયેત્, અવસ્રાવયેચ્ચ

12.5.15 કૂપકૂટાવપાતકણ્ટકિનીશ્ચ બહિરુબ્જયેત્

12.5.16 સુરુઙ્ગાં અમિત્રસ્થાને બહુમુખીં કૃત્વા નિચયમુખ્યાન્ અભિહારયેત્, અમિત્રં વા

12.5.17 પરપ્રયુક્તાયાં વા સુરુઙ્ગાયાં પરિખાં ઉદકાન્તિકીં ખાનયેત્, કૂપશાલાં અનુસાલં વા

12.5.18 તોયકુમ્ભાન્ કાંસ્યભાણ્ડાનિ વા શઙ્કાસ્થાનેષુ સ્થાપયેત્ ખાતાભિજ્ઞાનાર્થમ્

12.5.19 જ્ઞાતે સુરુઙ્ગાપથે પ્રતિસુરુઙ્ગાં કારયેત્

12.5.20 મધ્યે ભિત્ત્વા ધૂમં ઉદકં વા પ્રયચ્છેત્

12.5.21 પ્રતિવિહિતદુર્ગો વા મૂલે દાયાદ્<am> કૃત્વા પ્રતિલોમાં અસ્ય દિશં ગચ્છેત્, યતો વા મિત્રૈર્બન્ધુભિરાટવિકૈર્વા સંસૃજ્યેત પરસ્યામિત્રૈર્દૂષ્યૈર્વા મહદ્ભિઃ, યતો વા ગતોઽસ્ય મિત્રૈર્વિયોગં કુર્યાત્ પાર્ષ્ણિં વા ગૃહ્ણીયાત્ રાજ્યં વાઽસ્ય હારયેત્ વીવધાસારપ્રસારાન્ વા વારયેત્, યતો વા શક્નુયાદ્ આક્ષિકવદ્ અપક્ષેપેણાસ્ય પ્રહર્તું, યતો વા સ્વં રાજ્યં ત્રાયેત મૂલસ્ય ઉપચયં વા કુર્યાત્

12.5.22 યતઃ સન્ધિં અભિપ્રેતં લભેત તતો વા ગચ્છેત્

12.5.23 સહપ્રસ્થાયિનો વાઽસ્ય પ્રેષયેયુઃ અયં તે શત્રુરસ્માકં હસ્તગતઃ, પણ્યં વિપ્રકારં વાઽપદિશ્ય હિરણ્યં અન્તઃસારબલં ચ પ્રેષય યસ્ય એનં અર્પયેમ બદ્ધં પ્રવાસિતં વા ઇતિ

12.5.24 પ્રતિપન્ને હિરણ્યં સારબલં ચાદદીત

12.5.25 અન્તપાલો વા દુર્ગસમ્પ્રદાને બલ એકદેશં અતિનીય વિશ્વસ્તં ઘાતયેત્

12.5.26 જનપદં એકસ્થં વા ઘાતયિતું અમિત્રાનીકં આવાહયેત્

12.5.27 તદ્ અવરુદ્ધદેશં અતિનીય વિશ્વસ્તં ઘાતયેત્

12.5.28 મિત્રવ્યઞ્જનો વા બાહ્યસ્ય પ્રેષયેત્ ક્ષીણં અસ્મિન્ દુર્ગે ધાન્યં સ્નેહાઃ ક્ષારો લવણં વા, તદ્ અમુષ્મિન્ દેશે કાલે ચ પ્રવેક્ષ્યતિ, તદ્ ઉપગૃહાણ ઇતિ

12.5.29 તતો રસવિદ્ધં ધાન્યં સ્નેહં ક્ષારં લવણં વા દૂષ્યામિત્રાટવિકાઃ પ્રવેશયેયુઃ, અન્યે વાઽભિત્યક્તાઃ

12.5.30 તેન સર્વભાણ્ડવીવધગ્રહણં વ્યાખ્યાતમ્

12.5.31 સન્ધિં વા કૃત્વા હિરણ્ય એકદેશં અસ્મૈ દદ્યાત્, વિલમ્બમાનઃ શેષમ્

12.5.32 તતો રક્ષાવિધાનાન્યવસ્રાવયેત્

12.5.33 અગ્નિરસશસ્ત્રૈર્વા પ્રહરેત્

12.5.34 હિરણ્યપ્રતિગ્રાહિણો વાઽસ્ય વલ્લભાન્ અનુગૃહ્ણીયાત્

12.5.35 પરિક્ષીણો વાઽસ્મૈ દુર્ગં દત્ત્વા નિર્ગચ્છેત્

12.5.36 સુરુઙ્ગયા કુક્ષિપ્રદરેણ વા પ્રાકારભેદેન નિર્ગચ્છેત્

12.5.37 રાત્રાવવસ્કન્દં દત્ત્વા સિદ્ધઃ તિષ્ઠેત્, અસિદ્ધઃ પાર્શ્વેનાપગચ્છેત્

12.5.38 પાષણ્ડચ્છદ્મના મન્દપરિવારો નિર્ગચ્છેત્

12.5.39 પ્રેતવ્યઞ્જનો વા ગૂઢૈર્નિહ્રિયેત

12.5.40 સ્ત્રીવેષધારી વા પ્રેતં અનુગચ્છેત્

12.5.41 દૈવત ઉપહારશ્રાદ્ધપ્રહવણેષુ વા રસવિદ્ધં અન્નપાનં અવસૃજ્ય

12.5.42 કૃત ઉપજાપો દૂષ્યવ્યઞ્જનૈર્નિષ્પત્ય ગૂઢસૈન્યોઽભિહન્યાત્

12.5.43 એવં ગૃહીતદુર્ગો વા પ્રાશ્યપ્રાશં ચૈત્યં ઉપસ્થાપ્ય દૈવતપ્રતિમાચ્છિદ્રં પ્રવિશ્યાસીત, ગૂઢભિત્તિં વા, દૈવતપ્રતિમાયુક્તં વા ભૂમિગૃહમ્

12.5.44 વિસ્મૃતે સુરુઙ્ગયા રાત્રૌ રાજાવાસં અનુપ્રવિશ્ય સુપ્તં અમિત્રં હન્યાત્

12.5.45 યન્ત્રવિશ્લેષણં વા વિશ્લેષ્યાધસ્તાદ્ અવપાતયેત્

12.5.46 રસાગ્નિયોગેનાવલિપ્તં ગૃહં જતુગૃહં વાઽધિશયાનં અમિત્રં આદીપયેત્

12.5.47 પ્રમદવનવિહારાણાં અન્યતમે વા વિહારસ્થાને પ્રમત્તં ભૂમિગૃહસુરુઙ્ગાગૂઢભિત્તિપ્રવિષ્ટાઃ તીક્ષ્ણા હન્યુઃ, ગૂઢપ્રણિહિતા વા રસેન

12.5.48 સ્વપતો વા નિરુદ્ધે દેશે ગૂઢાઃ સ્ત્રિયઃ સર્પરસાગ્નિધૂમાન્ ઉપરિ મુઞ્ચેયુઃ

12.5.49 પ્રત્યુત્પન્ને વા કારણે યદ્ યદ્ ઉપપદ્યેત તત્ તદ્ અમિત્રેઽન્તઃપુરગતે ગૂઢસઞ્ચારઃ પ્રયુઞ્જીત

12.5.50 તતો ગૂઢં એવાપગચ્છેત્, સ્વજનસંજ્ઞાં ચ પ્રરૂપયેત્

12.5.51ab દ્વાઃસ્થાન્ વર્ષધરાંશ્ચાન્યાન્નિગૂઢ ઉપહિતાન્ પરે ।

12.5.51chd તૂર્યસંજ્ઞાભિરાહૂય દ્વિષત્શેષાણિ ઘાતયેત્ (ઇતિ)

Book .

Chapt . ઉપજાપઃ

13.1.01 વિજિગીષુઃ પરગ્રામં અવાપ્તુકામઃ સર્વજ્ઞદૈવતસમ્યોગખ્યાપનાભ્યાં સ્વપક્ષં ઉદ્ધર્ષયેત્, પરપક્ષં ચ ઉદ્વેજયેત્

13.1.02 સર્વજ્ઞખ્યાપનં તુ - ગૃહગુહ્યપ્રવૃત્તિજ્ઞાનેન પ્રત્યાદેશો મુખ્યાનાં, કણ્ટકશોધનાપસર્પાવગમેન પ્રકાશનં રાજદ્વિષ્ટકારિણાં, વિજ્ઞાપ્ય ઉપાયનખ્યાપનં અદૃષ્ટસંસર્ગવિદ્યાસંજ્ઞાઽઽદિભિઃ, વિદેશપ્રવૃત્તિજ્ઞાનં તદ્ અહરેવ ગૃહકપોતેન મુદ્રાસમ્યુક્તેન

13.1.03 દૈવતસમ્યોગખ્યાપનં તુ - સુરુઙ્ગામુખેનાગ્નિચૈત્યદૈવતપ્રતિમાચ્છિદ્રાન્ અનુપ્રવિષ્ટૈરગ્નિચૈત્યદૈવતવ્યઞ્જનૈઃ સમ્ભાષણં પૂજનં ચ, ઉદકાદ્ ઉત્થિતૈર્વા નાગવરુણવ્યઞ્જનૈઃ સમ્ભાષણં પૂજનં ચ, રાત્રાવન્તર્।ઉદકે સમુદ્રવાલુકાકોશં પ્રણિધાયાગ્નિમાલાદર્શનં, શિલાશિક્યાવગૃહીતે પ્લવકે સ્થાનં, ઉદકબસ્તિના જરાયુણા વા શિરોઽવગૂઢનાસઃ પૃષતાન્ત્રકુલીરનક્રશિંશુમાર ઉદ્રવસાભિર્વા શતપાક્યં તૈલં નસ્તઃ પ્રયોગઃ

13.1.04 તેન રાત્રિગણશ્ચરતિ

13.1.05 ઇત્યુદકચરણાનિ

13.1.06 તૈર્વરુણનાગકન્યાવાક્યક્રિયા સમ્ભાષણં ચ, કોપસ્થાનેષુ મુખાદ્ અગ્નિધૂમ ઉત્સર્ગઃ

13.1.07 તદ્ અસ્ય સ્વવિષયે કાર્તાન્તિકનૈમિત્તિકમૌહૂર્તિકપૌરાણિક ઇક્ષણિકગૂઢપુરુષાઃ સાચિવ્યકરાઃ તદ્દર્શિનશ્ચ પ્રકાશયેયુઃ

13.1.08 પરસ્ય વિષયે દૈવતદર્શનં દિવ્યકોશદણ્ડ ઉત્પત્તિં ચાસ્ય બ્રૂયુઃ

13.1.09 દૈવતપ્રશ્નનિમિત્તવાયસાઙ્ગવિદ્યાસ્વપ્નમૃગપક્ષિવ્યાહારેષુ ચાસ્ય વિજયં બ્રૂયુઃ, વિપરીતં અમિત્રસ્ય

13.1.10 સદુન્દુભિં ઉલ્કાં ચ પરસ્ય નક્ષત્રે દર્શયેયુઃ

13.1.11 પરસ્ય મુખ્યાન્ મિત્રત્વેન ઉપદિશન્તો દૂતવ્યઞ્જનાઃ સ્વામિસત્કારં બ્રૂયુઃ, સ્વપક્ષબલાધાનં પરપક્ષપ્રતિઘાતં ચ

13.1.12 તુલ્યયોગક્ષેમં અમાત્યાનાં આયુધીયાનાં ચ કથયેયુઃ

13.1.13 તેષુ વ્યસનાભ્યુદયાવેક્ષણં અપત્યપૂજનં ચ પ્રયુઞ્જીત

13.1.14 તેન પરપક્ષં ઉત્સાહયેદ્ યથા ઉક્તં પુરસ્તાત્

13.1.15 ભૂયશ્ચ વક્ષ્યામઃ

13.1.16 સાધારણગર્દભેન દક્ષાન્, લકુટશાખાહનનાભ્યાં દણ્ડચારિણઃ, કુલ એડકેન ચ ઉદ્વિગ્નાન્, અશનિવર્ષેણ વિમાનિતાન્, વિદુલેનાવકેશિના વાયસપિણ્ડેન કૈતવજમેઘેન ઇતિ વિહતાશાન્ દુર્ભગાલઙ્કારેણ દ્વેષિણા ઇતિ પૂજાફલાન્, વ્યાઘ્રચર્મણા મૃત્યુકૂટેન ચ ઉપહિતાન્, પીલુવિખાદનેન કરકયોષ્ટ્ર્યા ગર્દભીક્ષીરાડભિમન્થનેન ઇતિ ધ્રુવ ઉપકારિણ ઇતિ

13.1.17 પ્રતિપન્નાન્ અર્થમાનાભ્યાં યોજયેત્

13.1.18 દ્રવ્યભક્તચ્છિદ્રેષુ ચ એનાન્ દ્રવ્યભક્તદાનૈરનુગૃહ્ણીયાત્

13.1.19 અપ્રતિગૃહ્ણતાં સ્ત્રીકુમારાલઙ્કારાન્ અભિહરેયુઃ

13.1.20 દુર્ભિક્ષસ્તેનાટવ્ય્।ઉપઘાતેષુ ચ પૌરજાનપદાન્ ઉત્સાહયન્તઃ સત્ત્રિણો બ્રૂયુઃ રાજાનં અનુગ્રહં યાચામહે નિરનુગ્રહાઃ પરત્ર ગચ્છામઃ ઇતિ

13.1.21ab તથા ઇતિ પ્રતિપન્નેષુ દ્રવ્યધાન્યાન્યપરિગ્રહૈઃ ।

13.1.21chd સાચિવ્યં કાર્યં ઇત્યેતદ્ ઉપજાપાદ્ ભૂતં મહત્ (ઇતિ)

Chapt . યોગવામનમ્

13.2.01 મુણ્ડો જટિલો વા પર્વતગુહાવાસી ચતુર્વર્ષશતાયુર્બ્રુવાણઃ પ્રભૂતજટિલાન્તેવાસી નગરાભ્યાશે તિષ્ઠેત્

13.2.02 શિષ્યાશ્ચાસ્ય મૂલફલ ઉપગમનૈરમાત્યાન્ રાજાનં ચ ભગવદ્દર્શનાય યોજયેયુઃ

13.2.03 સમાગતાશ્ચ રાજ્ઞા પૂર્વરાજદેશાભિજ્ઞાનાનિ કથયેત્, શતે શતે ચ વર્ષાણાં પૂર્ણેઽહં અગ્નિં પ્રવિશ્ય પુનર્બાલો ભવામિ, તદ્ ઇહ ભવત્ સમીપે ચતુર્થં અગ્નિં પ્રવેક્ષ્યામિ, અવશ્યં મે ભવાન્ માનયિતવ્યઃ, ત્રીન્ વરાન્ વૃણીષ્ણ(વૃષીષ્વ) ઇતિ

13.2.04 પ્રતિપન્નં બ્રૂયાત્ સપ્તરાત્રં ઇહ સપુત્રદારેણ પ્રેક્ષાપ્રહવણપૂર્વં વસ્તવ્યમ્ ઇતિ

13.2.05 વસન્તં અવસ્કન્દેત

13.2.06 મુણ્ડો વા જટિલો વા સ્થાનિકવ્યઞ્જનઃ પ્રભૂતજટિલાન્તેવાસી વસ્તશોણિતદિગ્ધાં વેણુશલાકાં સુવર્ણચૂર્ણેનાવલિપ્ય વલ્મીકે નિદધ્યાદ્ ઉપજિહ્વિકાનુસરણાર્થં, સ્વર્ણનાલિકાં વા

13.2.07 તતઃ સત્ત્રી રાજ્ઞઃ કથયેત્ અસૌ સિદ્ધઃ પુષ્પિતં નિધિં જાનાતિ ઇતિ

13.2.08 સ રાજ્ઞા પૃષ્ટઃ તથા ઇતિ બ્રૂયાત્, તચ્ચાભિજ્ઞાનં દર્શયેત્, ભૂયો વા હિરણ્યં અન્તર્।આધાય

13.2.09 બ્રૂયાચ્ચ એનં નાગરક્ષિતોઽયં નિધિઃ પ્રણિપાતસાધ્યઃ ઇતિ

13.2.10 પ્રતિપન્નં બ્રૂયાત્ સપ્તરાત્રમ્ ઇતિ સમાનમ્

13.2.11 સ્થાનિકવ્યઞ્જનં વા રાત્રૌ તેજનાગ્નિયુક્તં એકાન્તે તિષ્ઠન્તં સત્રિણઃ ક્રમાભીનીતં રાજ્ઞઃ કથયેયુઃ અસૌ સિદ્ધઃ સામેધિકઃ ઇતિ

13.2.12 તં રાજા યં અર્થં યાચેત તં અસ્ય કરિષ્યમાણઃ સપ્તરાત્રમ્ ઇતિ સમાનમ્

13.2.13 સિદ્ધવ્યઞ્જનો વા રાજાનં જમ્ભકવિદ્યાભિઃ પ્રલોભયેત્

13.2.14 તં રાજા ઇતિ સમાનમ્

13.2.15 સિદ્ધવ્યઞ્જનો વા દેશદેવતાં અભ્યર્હિતાં આશ્રિત્ય પ્રહવણૈરભીક્ષ્ણં પ્રકૃતિમુખ્યાન્ અભિસંવાસ્ય ક્રમેણ રાજાનં અતિસન્દધ્યાત્

13.2.16 જટિલવ્યઞ્જનં અન્તર્।ઉદકવાસિનં વા સર્વશ્વેતં તટસુરુઙ્ગાભૂમિગૃહાપસરણં વરુણં નાગરાજં વા સત્રિણઃ ક્રમાભિનીતં રાજ્ઞઃ કથયેયુઃ

13.2.17 તં રાજા ઇતિ સમાનમ્

13.2.18 જનપદાન્તેવાસી સિદ્ધવ્યઞ્જનો વા રાજાનં શત્રુદર્શનાય યોજયેત્

13.2.19 પ્રતિપન્નં બિમ્બં કૃત્વા શત્રું આવાહયિત્વા નિરુદ્ધે દેશે ઘાતયેત્

13.2.20 અશ્વપણ્ય ઉપયાતા વૈદેહકવ્યઞ્જનાઃ પણ્ય ઉપાયનનિમિત્તં આહૂય રાજાનં પણ્યપરીક્ષાયાં આસક્તં અશ્વવ્યતિકીર્ણં વા હન્યુઃ, અશ્વૈશ્ચ પ્રહરેયુઃ

13.2.21 નગરાભ્યાશે વા ચૈત્યં આરુહ્ય રાત્રૌ તીક્ષ્ણાઃ કુમ્ભેષુ નાલીન્ વા વિદુલાનિ ધમન્તઃ સ્વામિનો મુખ્યાનાં વા માંસાનિ ભક્ષયિષ્યામઃ, પૂજા નો વર્તતામ્ ઇત્યવ્યક્તં બ્રૂયુઃ

13.2.22 તદ્ એષાં નૈમિત્તિકમૌહૂર્તિકવ્યઞ્જનાઃ ખ્યાપયેયુઃ

13.2.23 મઙ્ગલ્યે વા હ્રદે તટાકમધ્યે વા રાત્રૌ તેજનતૈલાભ્યક્તા નાગરૂપિણઃ શક્તિમુસલાન્યયોમયાનિ નિષ્પેષયન્તઃ તથૈવ બ્રૂયુઃ

13.2.24 ઋક્ષચર્મકઞ્ચુકિનો વાઽગ્નિધૂમ ઉત્સર્ગયુક્તા રક્ષોરૂપં વહન્તઃ ત્રિરપસવ્યં નગરં કુર્વાણાઃ શ્વસૃગાલવાશિતાન્તરેષુ તથૈવ બ્રૂયુઃ

13.2.25 ચૈત્યદૈવતપ્રતિમાં વા તેજનતૈલેનાભ્રપટલચ્છન્નેનાગ્નિના વા રાત્રૌ પ્રજ્વાલ્ય તથૈવ બ્રૂયુઃ

13.2.26 તદ્ અન્યે ખ્યાપયેયુઃ

13.2.27 દૈવતપ્રતિમાનાં અભ્યર્હિતાનાં વા શોણિતેન પ્રસ્રાવં અતિમાત્રં કુર્યુઃ

13.2.28 તદ્ અન્યે દેવરુધિરસંસ્રાવે સઙ્ગ્રામે પરાજયં બ્રૂયુઃ

13.2.29 સન્ધિરાત્રિષુ શ્મશાનપ્રમુખે વા ચૈત્યં ઊર્ધ્વભક્ષિતૈર્મનુષ્યૈઃ પ્રરૂપયેયુઃ

13.2.30 તતો રક્ષોરૂપી મનુષ્યકં યાચેત

13.2.31 યશ્ચાત્ર શૂરવાદિકોઽન્યતમો વા દ્રષ્ટું આગચ્છેત્ તં અન્યે લોહમુસલૈર્હન્યુઃ, યથા રક્ષોભિર્હત ઇતિ જ્ઞાયેત

13.2.32 તદ્ અદ્ભુતં રાજ્ઞઃ તદ્દર્શિનઃ સત્રિણશ્ચ કથયેયુઃ

13.2.33 તતો નૈમિતિત્કમૌહૂર્તિકવ્યઞ્જનાઃ શાન્તિં પ્રાયશ્ચિત્તં બ્રૂયુઃ અન્યથા મહદ્ અકુશલં રાજ્ઞો દેશસ્ય ચ ઇતિ

13.2.34 પ્રતિપન્નં એતેષુ સપ્તરાત્રં એક એકમન્ત્રબલિહોમં સ્વયં રાજ્ઞા કર્તવ્યમ્ ઇતિ બ્રૂયુઃ

13.2.35 તતઃ સમાનમ્

13.2.36 એતાન્ વા યોગાન્ આત્મનિ દર્શયિત્વા પ્રતિકુર્વીત પરેષાં ઉપદેશાર્થમ્

13.2.37 તતઃ પ્રયોજયેદ્ યોગાન્

13.2.38 યોગદર્શનપ્રતીકારેણ વા કોશાભિસંહરણં કુર્યાત્

13.2.39 હસ્તિકામં વા નાગવનપાલા હસ્તિના લક્ષણ્યેન પ્રલોભયેયુઃ

13.2.40 પ્રતિપન્નં ગહનં એકાયનં વાઽતિનીય ઘાતયેયુઃ, બદ્ધ્વા વાઽપહરેયુઃ

13.2.41 તેન મૃગયાકામો વ્યાખ્યાતઃ

13.2.42 દ્રવ્યસ્ત્રીલોલુપં આઢ્યવિધવાભિર્વા પરમરૂપયૌવનાભિઃ સ્ત્રીભિર્દાયનિક્ષેપાર્થં ઉપનીતાભિઃ સત્રિણઃ પ્રલોભયેયુઃ

13.2.43 પ્રતિપન્નં રાત્રૌ સત્રચ્છન્નાઃ સમાગમે શસ્ત્રરસાભ્યાં ઘાતયેયુઃ

13.2.44 સિદ્ધપ્રવ્રજિતચૈત્યસ્તૂપદૈવતપ્રતિમાનાં અભીક્ષ્ણાભિગમનેષુ વા ભૂમિગૃહસુરુઙ્ગાગૂઢભિત્તિપ્રવિષ્ટાઃ તીક્ષ્ણાઃ પરં અભિહન્યુઃ

13.2.45ab યેષુ દેશેષુ યાઃ પ્રેક્ષાઃ પ્રેક્ષતે પાર્થિવઃ સ્વયમ્ ।

13.2.45chd યાત્રાવિહારે રમતે યત્ર ક્રીડતિ વાઽમ્ભસિ

13.2.46ab ધિગ્। ઉક્ત્ય્। આદિષુ સર્વેષુ યજ્ઞપ્રહવણેષુ વા ।

13.2.46chd સૂતિકાપ્રેતરોગેષુ પ્રીતિશોકભયેષુ વા ।

13.2.47ab પ્રમાદં યાતિ યસ્મિન્ વા વિશ્વાસાત્ સ્વજન ઉત્સવે

13.2.47chd યત્રાસ્યારક્ષિસઞ્ચારો દુર્દિને સઙ્કુલેષુ વા ।

13.2.48ab વિપ્રસ્થાને પ્રદીપ્તે વા પ્રવિષ્ટે નિર્જનેઽપિ વા ।

13.2.48chd વસ્ત્રાભરણમાલ્યાનાં ફેલાભિઃ શયનાસનૈઃ

13.2.49ab મદ્યભોજનફેલાભિઃ તૂર્યૈર્વાઽભિગતાઃ સહ ।

13.2.49chd પ્રહરેયુરરિં તીક્ષ્ણાઃ પૂર્વપ્રણિહિતૈઃ સહ (ઇતિ)

13.2.50ab યથૈવ પ્રવિશેયુશ્ચ દ્વિષતઃ સત્રહેતુભિઃ ।

13.2.50chd તથૈવ ચાપગચ્છેયુરિત્યુક્તં યોગવામનમ્

Chapt . અપસર્પપ્રણિધિઃ

13.3.01 શ્રેણીમુખ્યં આપ્તં નિષ્પાતયેત્

13.3.02 સ પરં આશ્રિત્ય પક્ષાપદેશેન સ્વવિષયાત્ સાચિવ્યકરસહાય ઉપાદાનં કુર્વીત

13.3.03 કૃતાપસર્પ ઉપચયો વા પરં અનુમાન્ય સ્વામિનો દૂષ્યગ્રામં વીતહસ્ત્યશ્વં દૂષ્યામાત્યં દણ્ડં આક્રન્દં વા હત્વા પરસ્ય પ્રેષયેત્

13.3.04 જનપદ એકદેશં શ્રેણીં અટવીં વા સહાય ઉપાદાનાર્થં સંશ્રયેત

13.3.05 વિશ્વાસં ઉપગતઃ સ્વામિનઃ પ્રેષયેત્

13.3.06 તતઃ સ્વામી હસ્તિબન્ધનં અટવીઘાતં વાઽપદિશ્ય ગૂઢં એવ પ્રહરેત્

13.3.07 એતેનામાત્યાટવિકા વ્યાખ્યાતાઃ

13.3.08 શત્રુણા મૈત્રીં કૃત્વાઽમાત્યાન્ અવક્ષિપેત્

13.3.09 તે તત્શત્રોઃ પ્રેષયેયુઃ ભર્તારં નઃ પ્રસાદય ઇતિ

13.3.10 સ યં દૂતં પ્રેષયેત્, તં ઉપાલભેત ભર્તા તે માં અમાત્યૈર્ભેદયતિ, ન ચ પુનરિહાગન્તવ્યમ્ ઇતિ

13.3.11 અથ એકં અમાત્યં નિષ્પાતયેત્

13.3.12 સ પરં આશ્રિત્ય યોગાપસર્પાપરક્તદૂષ્યાન્ અશક્તિમતઃ સ્તેનાટવિકાન્ ઉભય ઉપઘાતકાન્ વા પરસ્ય ઉપહરેત્

13.3.13 આપ્તભાવ ઉપગતઃ પ્રવીરપુરુષ ઉપઘાતં અસ્ય ઉપહરેદ્ અન્તપાલં આટવિકં દણ્ડચારિણં વા દૃઢં અસૌ ચાસૌ ચ તે શત્રુણા સન્ધત્તે ઇતિ

13.3.14 અથ પશ્ચાદ્ અભિત્યક્તશાસનૈરેનાન્ ઘાતયેત્

13.3.15  દણ્ડબલવ્યવહારેણ વા શત્રું ઉદ્યોજ્ય ઘાતયેત્

13.3.16 કૃત્યપક્ષ ઉપગ્રહેણ વા પરસ્યામિત્રં રાજાનં આત્મન્યપકારયિત્વાઽભિયુઞ્જીત

13.3.17 તતઃ પરસ્ય પ્રેષયેત્ અસૌ તે વૈરી મમાપકરોતિ, તં એહિ સમ્ભૂય હનિષ્યાવઃ, ભૂમૌ હિરણ્યે વા તે પરિગ્રહઃ ઇતિ

13.3.18 પ્રતિપન્નં અભિસત્કૃત્યાગતં અવસ્કન્દેન પ્રકાશયુદ્ધેન વા શત્રુણા ઘાતયેત્

13.3.19 અભિવિશ્વાસનાર્થં ભૂમિદાનપુત્રાભિષેકરક્ષાઽપદેશેન વા ગ્રાહયેત્

13.3.20 અવિષહ્યં ઉપાંશુદણ્ડેન વા ઘાતયેત્

13.3.21 સ ચેદ્ દણ્ડં દદ્યાન્ન સ્વયં આગચ્છેત્ તં અસ્ય વૈરિણા ઘાતયેત્

13.3.22 દણ્ડેન વા પ્રયાતું ઇચ્છેન્ન વિજિગીષુણા તથાઽપ્યેનં ઉભયતઃસમ્પીડનેન ઘાતયેત્

13.3.23 અવિશ્વસ્તો વા પ્રત્યેકશો યાતું ઇચ્છેદ્ રાજ્ય એકદેશં વા યાતવ્યસ્યાદાતુકામઃ, તથાઽપ્યેનં વૈરિણા સર્વસન્દોહેન વા ઘાતયેત્

13.3.24 વૈરિણા વા સક્તસ્ય દણ્ડ ઉપનયેન મૂલં અન્યતો હારયેત્

13.3.25 શત્રુભૂમ્યા વા મિત્રં પણેત, મિત્રભૂમ્યા વા શત્રુમ્

13.3.26 તતઃ શત્રુભૂમિલિપ્સાયાં મિત્રેણાત્મન્યપકારયિત્વાઽભિયુઞ્જીત - ઇતિ સમાનાઃ પૂર્વેણ સર્વ એવ યોગાઃ

13.3.27 શત્રું વા મિત્રભૂમિલિપ્સાયાં પ્રતિપન્નં દણ્ડેનાનુગૃહ્ણીયાત્

13.3.28 તતો મિત્રગતં અતિસન્દધ્યાત્

13.3.29 કૃતપ્રતિવિધાનો વા વ્યસનં આત્મનો દર્શયિત્વા મિત્રેણામિત્રં ઉત્સાહયિત્વાઽઽત્માનં અભિયોજયેત્

13.3.30 તતઃ સમ્પીડનેન ઘાતયેત્, જીવગ્રાહેણ વા રાજ્યવિનિમયં કારયેત્

13.3.31 મિત્રેણાશ્રિતશ્ચેત્શત્રુરગ્રાહ્યે સ્થાતું ઇચ્છેત્ સામન્તાદિભિર્મૂલં અસ્ય હારયેત્

13.3.32 દણ્ડેન વા ત્રાતું ઇછેત્ તં અસ્ય ઘાતયેત્

13.3.33 તૌ ચેન્ન ભિદ્યેયાતાં પ્રકાશં એવાન્યોન્યભૂમ્યા પણેત

13.3.34 તતઃ પરસ્પરં મિત્રવ્યઞ્જના વા ઉભયવેતના વા દૂતાન્ પ્રેષયેયુઃ અયં તે રાજા ભૂમિં લિપ્સતે શત્રુસંહિતઃ ઇતિ

13.3.35 તયોરન્યતરો જાતાશઙ્કારોષઃ, પૂર્વવચ્ચેષ્ટેત

13.3.36 દુર્ગરાષ્ટ્રદણ્ડમુખ્યાન્ વા કૃત્યપક્ષહેતુભિરભિવિખ્યાપ્ય પ્રવ્રાજયેત્

13.3.37 તે યુદ્ધાવસ્કન્દાવરોધવ્યસનેષુ શત્રું અતિસન્દધ્યુઃ

13.3.38 ભેદં વાઽસ્ય સ્વવર્ગેભ્યઃ કુર્યુઃ

13.3.39 અભિત્યક્તશાસનૈઃ પ્રતિસમાનયેયુઃ

13.3.40 લુબ્ધકવ્યઞ્જના વા માંસવિક્રયેણ દ્વાઃસ્થા દૌવારિકાપાશ્રયાશ્ચોરાભ્યાગમં પરસ્ય દ્વિઃ ત્રિરિતિ નિવેદ્ય લબ્ધપ્રત્યયા ભર્તુરનીકં દ્વિધા નિવેશ્ય ગ્રામવધેઽવસ્કન્દે ચ દ્વિષતો બ્રૂયુઃ આસન્નશ્ચોરગણઃ, મહાંશ્ચાક્રન્દઃ, પ્રભૂતં સૈન્યં આગચ્છતુ ઇતિ

13.3.41 તદ્ અર્પયિત્વા ગ્રામઘાતદણ્ડસ્ય સૈન્યં ઇતરદ્ આદાય રાત્રૌ દુર્ગદ્વારેષુ બ્રૂયુઃ હતશ્ચોરગણઃ, સિદ્ધયાત્રં ઇદં સૈન્યં આગતં, દ્વારં અપાવ્રિયતામ્ ઇતિ

13.3.42 પૂર્વપ્રણિહિતા વા દ્વારાણિ દદ્યુઃ

13.3.43 તૈઃ સહ પ્રહરેયુઃ

13.3.44 કારુશિલ્પિપાષણ્ડકુશીલવવૈદેહકવ્યઞ્જનાન્ આયુધીયાન્ વ્વા પરદુર્ગે પ્રણિદધ્યાત્

13.3.45 તેષાં ગૃહપતિકવ્યઞ્જનાઃ કાષ્ઠતૃણધાન્યપણ્યશકટૈઃ પ્રહરણાવરણાન્યભિહરેયુઃ, દેવધ્વજપ્રતિમાભિર્વા

13.3.46 તતઃ તદ્વ્યઞ્જનાઃ પ્રમત્તવધં અવસ્કન્દપ્રતિગ્રહં અભિપ્રહરણં પૃષ્ઠતઃ શઙ્ખદુન્દુભિશબ્દેન વા પ્રવિષ્ટમ્ ઇત્યાવેદયેયુઃ

13.3.47 પ્રાકારદ્વારાટ્ટાલકદાનં અનીકભેદં ઘાતં વા કુર્યુઃ

13.3.48 સાર્થગણવાસિભિરાતિવાહિકૈઃ કન્યાવાહિકૈરશ્વપણ્યવ્યવહારિભિરુપકરણહારકૈર્ધાન્યક્રેતૃવિક્રેતૃભિર્વા પ્રવ્રજિતલિઙ્ગિભિર્દૂતૈશ્ચ દણ્ડાતિનયનં, સન્ધિકર્મવિશ્વાસનાર્થમ્

13.3.49 ઇતિ રાજાપસર્પાઃ

13.3.50 એત એવાટવીનાં અપસર્પાઃ કણ્ટકશોધન ઉક્તાશ્ચ

13.3.51 વ્રજં અટવ્યા્ આસન્નં અપસર્પાઃ સાર્થં વા ચોરૈર્ઘાતયેયુઃ

13.3.52 કૃતસઙ્કેતં અન્નપાનં ચાત્ર મદનરસવિદ્ધં વા કૃત્વાઽપગચ્છેયુઃ

13.3.53 ગોપાલકવૈદેહકાશ્ચ તતશ્ચોરાન્ ગૃહીતલોપ્ત્રભારાન્ મદનરસવિકારકાલેઽવસ્કન્દયેયુઃ

13.3.54 સઙ્કર્ષણદૈવતીયો વા મુણ્ડજટિલવ્યઞ્જનઃ પ્રહવણકર્મણા મદનરસયોગેનાતિસન્દધ્યાત્

13.3.55 અથાવસ્કન્દં દદ્યાત્

13.3.56 શૌણ્ડિકવ્યઞ્જનો વા દૈવતપ્રેતકાર્ય ઉત્સવસમાજેષ્વાટવિકાન્ સુરાવિક્રય ઉપાયનનિમિત્તં મદનરસયોગેનાતિસન્દધ્યાત્

13.3.57 અથાવસ્કન્દં દદ્યાત્

13.3.58ab ગ્રામઘાતપ્રવિષ્ટાં વા વિક્ષિપ્ય બહુધાઽટવીમ્ ।

13.3.58chd ઘાતયેદ્ ઇતિ ચોરાણાં અપસર્પાઃ પ્રકીર્તિતાઃ (ઇતિ)

Chapt . પર્યુપાસનકર્મ - અવમર્દઃ

13.4.01 કર્શનપૂર્વં પર્યુપાસનકર્મ

13.4.02 જનપદં યથાનિવિષ્ટં અભયે સ્થાપયેત્

13.4.03 ઉત્થિતં અનુગ્રહપરિહારાભ્યાં નિવેષયેત્, અન્યત્રાપસરતઃ

13.4.04 સઙ્ગ્રામાદ્ અન્યસ્યાં ભૂમૌ નિવેશયેત્, એકસ્યાં વા વાસયેત્

13.4.05 ન હ્યજનો જનપદો રાજ્યં અજનપદં વા ભવતિ ઇતિ કૌટિલ્યઃ

13.4.06 વિષમસ્થસ્ય મુષ્ટિં સસ્યં વા હન્યાદ્, વીવધપ્રસારૌ ચ

13.4.07ab પ્રસારવીવધચ્છેદાન્ મુષ્ટિસસ્યવધાદ્ અપિ ।

13.4.07chd વમનાદ્ ગૂઢઘાતાચ્ચ જાયતે પ્રકૃતિક્ષયઃ

13.4.08 પ્રભૂતગુણબદ્ધ(વદ્ધ) અન્યકુપ્યયન્ત્રશસ્ત્રાવરણવિષ્ટિરશ્મિસમગ્રં મે સૈન્યં, ઋતુશ્ચ પુરસ્તાત્, અપર્તુઃ પરસ્ય, વ્યાધિદુર્ભિક્ષનિચયરક્ષાક્ષયઃ ક્રીતબલનિર્વેદો મિત્રબલનિર્વેદશ્ચ ઇતિ પર્યુપાસીત

13.4.09 કૃત્વા સ્કન્ધાવારસ્ય રક્ષાં વીવધાસારયોઃ પથશ્ચ, પરિક્ષિપ્ય દુર્ગં ખાતસાલાભ્યાં, દૂષયિત્વા ઉદકં, અવસ્રાવ્ય પરિખાઃ સમ્પૂરયિત્વા વા, સુરુઙ્ગાબલકુટિકાભ્યાં વપ્રપ્રાકારૌ હારયેત્, દારં ચ ગુડેન

13.4.10 નિમ્નં વા પાંસુમાલયાઽઽચ્છાદયેત્

13.4.11 બહુલારક્ષં યન્ત્રૈર્ઘાતયેત્

13.4.12 નિષ્કિરાદ્ ઉપનિષ્કૃષ્યાશ્વૈશ્ચ પ્રહરેયુઃ

13.4.13 વિક્રમાન્તરેષુ ચ નિયોગવિકલ્પસમુચ્ચયૈશ્ચ ઉપાયાનાં સિદ્ધિં લિપ્સેત

13.4.14 દુર્ગવાસિનઃ શ્યેનકાકનપ્તૃભાસશુકસારિક ઉલૂકકપોતાન્ ગ્રાહયિત્વા પુચ્છેષ્વગ્નિયોગયુક્તાન્ પરદુર્ગે વિસૃજેત્

13.4.15 અપકૃષ્ટસ્કન્ધાવારાદ્ ઉચ્છ્રિતધ્વજધન્વારક્ષો વા માનુષેણાગ્નિના પરદુર્ગં આદીપયેત્

13.4.16 ગૂઢપુર્ષાશ્ચાન્તર્દુર્ગપાલકા નકુલવાનરબિડાલશુનાં પુચ્છેષ્વગ્નિયોગં આધાય કાણ્ડનિચયરક્ષાવિધાનવેશ્મસુ વિસૃજેયુઃ

13.4.17 શુષ્કમત્સ્યાનાં ઉદરેષ્વગ્નિં આધાય વલ્લૂરે વા વાયસ ઉપહારેણ વયોભિર્હારયેયુઃ

13.4.18 સરલદેવદારુપૂતિતૃણગુગ્ગુલુશ્રીવેષ્ટકસર્જરસલાક્ષાગુલિકાઃ ખર ઉષ્ટ્રાજાવીનાં લેણ્ડં ચાગ્નિધારણમ્

13.4.19 પ્રિયાલચૂર્ણં અવલ્ગુજમષીમધુ। ઉચ્છિષ્ટં અશ્વખર ઉષ્ટ્રગોલેણ્ડં ઇત્યેષ ક્ષેપ્યોઽગ્નિયોગઃ

13.4.20 સર્વલોહચૂર્ણં અગ્નિવર્ણં વા કુમ્ભીસીસત્રપુચૂર્ણં વા પારિભદ્રકપલાશપુષ્પકેશમષીતૈલમધુ। ઉચ્છિષ્ટકશ્રીવેષ્ટકયુક્તોઽગ્નિ વિશ્વાસઘાતી વા

13.4.21 તેનાવલિપ્તઃ શણત્રપુસવલ્કવેષ્ટિતો બાણ ઇત્યગ્નિયોગઃ

13.4.22 ન ત્વેવ વિદ્યમાને પરાક્રમેઽગ્નિં અવસૃજેત્

13.4.23 અવિશ્વાસ્યો હ્યગ્નિર્દૈવપીડનં ચ, અપ્રતિસઙ્ખ્યાતપ્રાણિધાન્યપશુહિરણ્યકુપ્યદ્રવ્યક્ષયકરઃ

13.4.24 ક્ષીણનિચયં ચાવાપ્તં અપિ રાજ્યં ક્ષયાય એવ ભવતિ ઇતિ પર્યુપાસનકર્મ

13.4.25 સર્વારમ્ભ ઉપકરણવિષ્ટિસમ્પન્નોઽસ્મિ, વ્યાધિતઃ પર ઉપધાવિરુદ્ધપ્રકૃતિરકૃતદુર્ગકર્મનિચયો વા, નિરાસારઃ સાસારો વા પુરા મિત્રૈઃ સન્ધત્તે ઇત્યવમર્દકાલઃ

13.4.26 સ્વયં અગ્નૌ જાતે સમુત્થાપિતે વા પ્રહવણે પ્રેક્ષાઽનીકદર્શનસઙ્ગસૌરિકકલહેષુ નિત્યયુદ્ધશ્રાન્તબલે બહુલયુદ્ધપ્રતિવિદ્ધપ્રેતપુરુષે જાગરણક્લાન્તસુપ્તજને દુર્દિને નદીવેગે વા નીહારસમ્પ્લવે વાઽવમૃદ્નીયાત્

13.4.27 સ્કન્ધાવારં ઉત્સૃજ્ય વા વનગૂઢઃ શત્રું નિષ્ક્રાન્તં ઘાતયેત્

13.4.28 મિત્રાસારમુખ્યવ્યઞ્જનો વા સમ્રુદ્ધેન મૈત્રીં કૃત્વા દૂતં અભિત્યક્તં પ્રેષયેત્ - ઇદં તે છિદ્રં, ઇમે દૂષ્યાઃ સમ્રોદ્ધુર્વા છિદ્રં, અયં તે કૃત્યપક્ષઃ ઇતિ

13.4.29 તં પ્રતિદૂતં આદાય નિર્ગચ્છન્તં વિજિગીષુર્ગૃહીત્વા દોષં અભિવિખ્યાપ્ય પ્રવાસ્ય અપગચ્છેત્

13.4.30 તતો મિત્રાસારવ્યઞ્જનો વા સમ્રુદ્ધં બ્રૂયાત્ માં ત્રાતું ઉપનિર્ગચ્છ, મયા વા સહ સમ્રોદ્ધારં જહિ ઇતિ

13.4.31 પ્રતિપન્નં ઉભયતઃસમ્પીડનેન ઘાતયેત્, જીવગ્રાહેણ વા રાજ્યવિનિમયં કારયેત્

13.4.32 નગરં વાઽસ્ય પ્રમૃદ્નીયાત્

13.4.33 સારબલં વાઽસ્ય વમયિત્વાઽભિહન્યાત્

13.4.34 તેન દણ્ડ ઉપનતાટવિકા વ્યાખ્યાતાઃ

13.4.35 દણ્ડ ઉપનતાટવિકયોરન્યતરો વા સમ્રુદ્ધસ્ય પ્રેષયેત્ - અયં સમ્રોદ્ધા વ્યાધિતઃ, પાર્ષ્ણિગ્રાહેણાભિયુક્તઃ, છિદ્રં અન્યદ્ ઉત્થિતં, અન્યસ્યાં ભૂમાવપયાતુકામઃ ઇતિ

13.4.36 પ્રતિપન્ને સમ્રોદ્ધા સ્કન્ધાવારં આદીપ્યાપયાયાત્

13.4.37 તતઃ પૂર્વવદ્ આચરેત્

13.4.38 પણ્યસમ્પાતં વા કૃત્વા પણ્યેન એનં રસવિદ્ધેનાતિસન્દધ્યાત્

13.4.39 આસારવ્યઞ્જનો વા સમ્રુદ્ધસ્ય દૂતં પ્રેષયેત્ - મયા બાહ્યં અભિહતં ઉપનિર્ગચ્છાભિહન્તુમ્ ઇતિ

13.4.40 પ્રતિપન્નં પૂર્વવદ્ આચરેત્

13.4.41 મિત્રં બન્ધું વાઽપદિશ્ય યોગપુરુષાઃ શાસનમુદ્રાહસ્તાઃ પ્રવિશ્ય દુર્ગં ગ્રાહયેયુઃ

13.4.42 આસારવ્યઞ્જનો વા સમ્રુદ્ધસ્ય પ્રેષયેત્ - અમુષ્મિન્ દેશે કાલે ચ સ્કન્ધાવારં અભિહનિષ્યામિ, યુષ્માભિરપિ યોદ્ધવ્યમ્ ઇતિ

13.4.43 પ્રતિપન્નં યથા ઉક્તં અભ્યાઘાતસઙ્કુલં દર્શયિત્વા રાત્રૌ દુર્ગાન્નિષ્ક્રાન્તં ઘાતયેત્

13.4.44 યદ્ વા મિત્રં આવાહયેદ્ આટવ્વિકં વા, તં ઉત્સાહયેત્ વિક્રમ્ય સમ્રુદ્ધે ભૂમિં અસ્ય પ્રતિપદ્યસ્વ ઇતિ

13.4.45 વિક્રાન્તં પ્રકૃતિભિર્દૂષ્યમુખ્ય ઉપગ્રહેણ વા ઘાતયેત્, સ્વયં વા રસેન મિત્રઘાતકોઽયમ્ ઇત્યવાપ્તાર્થઃ

13.4.46 વિક્રમિતુકામં વા મિત્રવ્યઞ્જનઃ પરસ્યાભિશંસેત્

13.4.47 આપ્તભાવ ઉપગતઃ પ્રવીરપુરુષાનસ્ય ઉપઘાતયેત્

13.4.48 સન્ધિં વા કૃત્વા જનપદં એનં નિવેશયેત્

13.4.49 નિવિષ્ટં અસ્ય જનપદં અવિજ્ઞાતો હન્યાત્

13.4.50 અપકારયિત્વા દૂષ્યાટવિકેષુ વા બલ એકદેશં અતિનીય દુર્ગં અવસ્કન્દેન હારયેત્

13.4.51 દૂષ્યામિત્રાટવિકદ્વેષ્યપ્રત્યપસૃતાશ્ચ કૃતાર્થમાનસંજ્ઞાચિહ્નાઃ પરદુર્ગં અવસ્કન્દેયુઃ

13.4.52 પરદુર્ગં અવસ્કન્દ્ય સ્કન્ધાવારં વા પતિતપરાન્મુખાભિપન્નં ઉક્તકેશશસ્ત્રભયવિરૂપેભ્યશ્ચાભયં અયુધ્યમાનેભ્યશ્ચ દદ્યુઃ

13.4.53 પરદુર્ગં અવાપ્ય વિશુદ્ધશત્રુપક્ષં કૃત ઉપાંશુદણ્ડપ્રતીકારં અન્તર્બહિશ્ચ પ્રવિશેત્

13.4.54 એવં વિજિગીષુરમિત્રભૂમિં લબ્ધ્વા મધ્યમં લિપ્સેત, તત્સિદ્ધાવુદાસીનમ્

13.4.55 એષ પ્રથમો માર્ગઃ પૃથિવીં જેતુમ્

13.4.56 મધ્યમ ઉદાસીનયોરભાવે ગુણાતિશયેનારિપ્રકૃતીઃ સાધયેત્, તત ઉત્તરાઃ પ્રકૃતીઃ

13.4.57 એષ દ્વિતીયો માર્ગઃ

13.4.58 મણ્ડલસ્યાભાવે શત્રુણા મિત્રં મિત્રેણ વા શત્રું ઉભયતઃસમ્પીડનેન સાધયેત્

13.4.59 એષતૃતીયો માર્ગઃ

13.4.60 શક્યં એકં વા સામન્તં સાધયેત્, તેન દ્વિગુણો દ્વિતીયં, ત્રિગુણઃ તૃતીયમ્

13.4.61 એષ ચતુર્થો માર્ગઃ પૃથિવીં જેતુમ્

13.4.62 જિત્વા ચ પૃથિવીં વિભક્તવર્ણાશ્રમાં સ્વધર્મેણ ભુઞ્જીત

13.4.63ab ઉપજાપોઽપસર્પશ્ચ વામનં પર્યુપાસનમ્ ।

13.4.63chd અવમર્દશ્ચ પઞ્ચ એતે દુર્ગલમ્ભસ્ય હેતવઃ (ઇતિ)

Chapt . લબ્ધપ્રશમનમ્

13.5.01 દ્વિવિધં વિજિગીષોઃ સમુત્થાનં - અટવ્્।આદિકં એકગ્રામાદિકં ચ

13.5.02 ત્રિવિધશ્ચાસ્ય લમ્ભઃ - નવો, ભૂતપૂર્વઃ, પિત્ર્ય ઇતિ

13.5.03 નવં અવાપ્ય લાભં પરદોષાન્ સ્વગુણૈશ્છાદયેત્, ગુણાન્ ગુણદ્વૈગુણ્યેન

13.5.04 સ્વધર્મકર્માનુગ્રહપરિહારદાનમાનકર્મભિશ્ચ પ્રકૃતિપ્રિયહિતાન્યનુવર્તેત

13.5.05 યથાસમ્ભાષિતં ચ કૃત્યપક્ષં ઉપગ્રાહયેત્, ભૂયશ્ચ કૃતપ્રયાસમ્

13.5.06 અવિશ્વાસો હિ વિસંવાદકઃ સ્વેષાં પરેષાં ચ ભવતિ, પ્રકૃતિવિરુદ્ધાચારશ્ચ

13.5.07 તસ્માત્ સમાનશીલવેષભાષાઽઽચારતાં ઉપગછેત્

13.5.08 દેશદૈવતસમાજ ઉત્સવવિહારેષુ ચ ભક્તિં અનુવર્તેત

13.5.09 દેશગ્રામજાતિસઙ્ઘમુખ્યેષુ ચાભીક્ષ્ણં સત્ત્રિણઃ પરસ્યાપચારં દર્શયેયુઃ, માહાભાગ્યં ભક્તિં ચ તેષુ સ્વામિનઃ, સ્વામિસત્કારં ચ વિદ્યમાનમ્

13.5.10 ઉચિતૈશ્ચ એનાન્ ભોગપરિહારરક્ષાઽવેક્ષણૈર્ભુઞ્જીત

13.5.11 સર્વદેવતાઽઽશ્રમપૂજનં ચ વિદ્યાવાક્યધર્મશૂરપુરુષાણાં ચ ભૂમિદ્રવ્યદાનપરિહારાન્ કારયેત્, સર્વબન્ધનમોક્ષણં અનુગ્રહં દીનાનાથવ્યાધિતાનાં ચ

13.5.12 ચાતુર્માસ્યેષ્વર્ધમાસિકં અઘાતં, પૌર્ણમાસીષુ ચ ચાતૂરાત્રિકં રાજદેશનક્ષત્રેષ્વૈકરાત્રિકમ્

13.5.13 યોનિબાલવધં પુંસ્ત્વ ઉપઘાતં ચ પ્રતિષેધયેત્

13.5.14 યચ્ચ કોશદણ્ડ ઉપઘાતકં અધર્મિષ્ઠં વા ચરિત્રં મન્યેત તદ્ અપનીય ધર્મ્યવ્યવહારં સ્થાપયેત્

13.5.15 ચોરપ્રકૃતીનાં મ્લેચ્છજાતીનાં ચ સ્થાનવિપર્યાસં અનેકસ્થં કારયેત્, દુર્ગરાષ્ટ્રદણ્ડમુખ્યાનાં ચ

13.5.16 પરા ઉપગૃહીતાનાં ચ મન્ત્રિપુરોહિતાનાં પરસ્ય પ્રત્યન્તેષ્વનેકસ્થં વાસં કારયેત્

13.5.17 અપકારસમર્થાન્ અનુક્ષિયતો વા ભર્તૃવિનાશં ઉપાંશુદણ્ડેન પ્રશમયેત્

13.5.18 સ્વદેશીયાન્ વા પરેણ વાઽપરુદ્ધાન્ અપવાહિતસ્થાનેષુ સ્થાપયેત્

13.5.19 યશ્ચ તત્કુલીનઃ પ્રત્યાદેયં આદાતું શક્તઃ, પ્રત્યન્તાટવીસ્થો વા પ્રબાધિતું અભિજાતઃ, તસ્મૈ વિગુણાં ભૂમિં પ્રયચ્છેત્, ગુણવત્યાશ્ચતુર્ભાગં વા કોશદણ્ડદાનં અવસ્થાપ્ય, યદ્ ઉપકુર્વાણઃ પૌરજાનપદાન્ કોપયેત્

13.5.20 કુપિતૈઃ તૈરેનં ઘાતયેત્

13.5.21 પ્રકૃતિભિરુપક્રુષ્ટં અપનયેત્, ઔપઘાતિકે વા દેશે નિવેશયેત્ - ઇતિ

13.5.22 ભૂતપૂર્વે યેન દોષેણાપવૃત્તઃ તં પ્રકૃતિદોષં છાદયેત્, યેન ચ ગુણેન ઉપાવૃત્તઃ તં તીવ્રીકુર્યાત્ - ઇતિ

13.5.23 પિત્ર્યે પિતુર્દોષાંશ્છાદયેત્, ગુણાંશ્ચ પ્રકાશયેત્ - ઇતિ

13.5.24ab ચરિત્રં અકૃતં ધર્મ્યં કૃતં ચાન્યૈઃ પ્રવર્તયેત્ ।

13.5.24chd પ્રવર્તયેન્ન ચાધર્મ્યં કૃતં ચાન્યૈર્નિવર્તયેત્ (ઇતિ)

Book .

Chapt . પરબલઘાતપ્રયોગઃ

14.1.01 ચાતુર્વર્ણ્યરક્ષાઽર્થં ઔપનિષદિકં અધર્મિષ્ઠેષુ પ્રયુઞ્જીત

14.1.02 કાલકૂટાદિર્વિષવર્ગઃ શ્રદ્ધેયદેશવેષશિલ્પભાષાઽભિજનાપદેશૈઃ કુબ્જવામનકિરાતમૂકબધિરજડાન્ધચ્છદ્મભિર્મ્લેચ્છજાતી સ્ત્રીભિઃ પુમ્ભિશ્ચ પરશરીર ઉપભોગેષ્વવધાતવ્યઃ

14.1.03 રાજક્રીડાભાણ્ડનિધાનદ્રવ્ય ઉપભ્ભોગેષુ ગૂઢાઃ શસ્ત્રનિધાનં કુર્યુઃ, સત્ત્રાજીવિનશ્ચ રાત્રિચારિણોઽગ્નિજીવિનશ્ચાગ્નિનિધાન

14.1.04 ચિત્રભેકકૌણ્ડિન્યકકૃકણપઞ્ચકુષ્ઠશતપદીચૂર્ણં ઉચ્ચિદિઙ્ગકમ્બલીશતકન્દ(કર્દમ?) ઇધ્મકૃકલાસચૂર્ણં ગૃહગોલિકાન્ધાહિકક્રકણ્ટકપૂતિકીટગોમારિકાચૂર્ણં ભલ્લાતકાવલ્ગુજરસમ્યુક્તં સદ્યઃપ્રાણહરં, એતેષાં વા ધૂમઃ

14.1.05ab કીટો વાઽન્યતમઃ તપ્તઃ કૃષ્ણસર્પપ્રિયઙ્ગુભિઃ ।

14.1.05chd શોષયેદ્ એષ સમ્યોગઃ સદ્યઃપ્રાણહરો મતઃ

14.1.06 ધામાર્ગવયાતુધાનમૂલં ભલ્લાતકપુષ્પચૂર્ણયુક્તં આર્ધમાસિકઃ

14.1.07 વ્યાઘાતકમૂલં ભલ્લાતકપુષ્પચૂર્ણયુક્તં કીટયોગો માસિકઃ

14.1.08 કલામાત્રં પુરુષાણાં, દ્વિગુણં ખરાશ્વાનાં, ચતુર્ગુણં હસ્ત્યુ। ઉષ્ટ્રાણામ્

14.1.09 શતકર્દમ ઉચ્ચિદિઙ્ગકરવીરકટુતુમ્બીમત્સ્યધૂમો મદનકોદ્રવપલાલેન હસ્તિકર્ણપલાશપલાલેન વા પ્રવાતાનુવાતે પ્રણીતો યાવચ્ચરતિ તાવન્ મારયતિ

14.1.10 પૂકિકીટમસ્ત્યકટુતુમ્બીશતકર્દમ ઇધ્મ ઇન્દ્રગોપચૂર્ણં પૂતિકીટક્ષુદ્રારાલાહેમવિદારીચૂર્ણં વા બસ્તશ◌ૃઙ્ગખુરચૂર્ણયુક્તં અન્ધીકરો ધૂમઃ

14.1.11 પૂતિકરઞ્જપત્ત્રહરિતાલમનઃશિલાગુઞ્જારક્તકાર્પાસપલાલાન્યાસ્ફોટકાચગોશકૃદ્રસપિષ્ટં અન્ધીકરો ધૂમઃ

14.1.12 સર્પનિર્મોકં ગોઽશ્વપુરીષં અન્ધાહિકશિરશ્ચાન્ધીકરો ધૂમઃ

14.1.13 પારાવતપ્લવકક્રવ્યાદાનાં હસ્તિનરવરાહાણાં ચ મૂત્રપુરીષં કાસીસહિઙ્ગુયવતુષકણતણ્ડુલાઃ કાર્પાસકુટજકોશાતકીનાં ચ બીજાનિ ગોમૂત્રિકાભાણ્ડીમૂલં નિમ્બશિગ્રુફણિર્જકાક્ષીવપીલુકભઙ્ગઃ સર્પશફરીચર્મ હસ્તિનખશ◌ૃઙ્ગચૂર્ણં ઇત્યેષ ધૂમો મદનકોદ્રવપલાલેન હસ્તિકર્ણપલાશપલાલેન વા પ્રણીતઃ પ્રત્યેકશો યાવચ્ચરતિ તાવન્ મારયતિ

14.1.14 કાલીકુષ્ઠનડશતાવલીમૂલં સર્પપ્રચલાકકૃકણપઞ્ચકુષ્ઠચૂર્ણં વા ધૂમઃ પૂર્વકલ્પેનાર્દ્રશુષ્કપલાલેન વા પ્રણીતઃ સઙ્ગ્રામાવતરણાવસ્કન્દનસઙ્કુલેષુ કૃતનેજન ઉદકાક્ષિપ્રતીકારૈઃ પ્રણીતઃ સર્વપ્રાણિનાં નેત્રઘ્નઃ

14.1.15 શારિકાકપોતબકબલાકાલેણ્ડં અર્કાક્ષિપીલુકસ્નુહિક્ષીરપિષ્ટં અન્ધીકરણં અઞ્જનં ઉદકદૂષણં ચ

14.1.16 યવકશાલિમૂલમદનફલજાતીપત્ત્રનરમૂત્રયોગઃ પ્લક્ષવિદારીમૂલયુક્તો મૂક ઉદુમ્બરમદનકોદ્રવક્વાથયુક્તો હસ્તિકર્ણપલાશક્વાથયુક્તો વા મદનયોગઃ

14.1.17 શ૽ૃઙ્ગિગૌતમવૃકકણ્ટકારમયૂરપદીયોગો ગુઞ્જાલાઙ્ગલીવિષમૂલિક ઇઙ્ગુદીયોગઃ કરવીરાક્ષિપીલુકાર્કમૃગમારણીય મદ્નકોદ્રવક્વાથયુક્તો હસ્તિકર્ણપલાશક્વાથયુક્તો વા મદનયોગઃ

14.1.18 સમસ્તા વા યવસ ઇન્ધન ઉદકદૂષણાઃ

14.1.19 કૃતકણ્ડલકૃકલાસગૃહગોલિકાન્ધાહિકધૂમો નેત્રવધં ઉન્માદં ચ કરોતિ

14.1.20 કૃકલાસગૃહગોલિકાયોગઃ કુષ્ઠકરઃ

14.1.21 સ એવ ચિત્રં એકાન્ત્રમધુયુક્તઃ પ્રમેહં આપાદયતિ, મનુષ્યલોહિતયુક્તઃ શોષમ્

14.1.22 દૂષીવિષં મદનકોદ્રવચૂર્ણં અપજિહ્વિકાયોગઃ

14.1.23 માતૃવાહકાઞ્જલિકારપ્રચલાકભેકાક્ષિપીલુકયોગો વિષૂચિકાકરઃ

14.1.24 પઞ્ચકુષ્ઠકકૌણ્ડિન્યકરાજવૃક્ષપુષ્પમધુયોગો જ્વરકરઃ

14.1.25 ભાસનકુલજિહ્વાગ્રન્થિકાયોગઃ ખરીક્ષીરપિષ્ટો મૂકબધિર। કરો માસાર્ધમાસિકઃ

14.1.26 કલામાત્રં પુરુષાણાં ઇત્ સમાનં પૂર્વેણ

14.1.27 ભઙ્ગક્વાથ ઉપનયનં ઔષધાનાં, ચૂર્ણં પ્રાણભૃતાં, સર્વેષાં વા ક્વાથ ઉપનયનં, એવં વીર્યવત્તરં ભવ્તિ

14.1.28 ઇતિ યોગસમ્પત્

14.1.29 શાલ્મલી વિદારીધાન્યસિદ્ધો મૂલવત્સનાભસમ્યુક્તશ્ચુચ્છુન્દરીશોણિતપ્રલેપેન દિગ્ધો બાણો યં વિધ્યતિ સ વિદ્ધોઽન્યાન્ દશપુરુષાન્ દશતિ, તે દષ્ટા દશાન્યાન્ દશન્તિ પુરુષાન્

14.1.30 બલ્લાતકયાતુધાનાવાનુધામાર્ગવબાણાનાં પુષ્પૈરેલકાક્ષિગુગ્ગુલુહાલાહલાનાં ચ કષાયં બસ્તનરશોણિતયુક્તં દંશયોગઃ

14.1.31 તતોઽર્ધધરણિકો યોગઃ સક્તુપિણ્યાકાભ્યાં ઉદકે પ્રણીતો ધનુઃશતાયામં ઉદકાશયં દૂષયતિ

14.1.32 મત્સ્યપરમ્પરા હ્યેતેન દષ્ટાઽભિમૃષ્ટા વા વિષીભવતિ, યશ્ચ એતદ્ ઉદકં પિબતિ સ્પૃશતિ વા

14.1.33 રક્તશ્વેતસર્ષપૈર્ગોધા ત્રિપક્ષં ઉષ્ટ્રિકાયાં ભૂમૌ નિખાતાયાં નિહિતા વધ્યેન ઉદ્ધૃતા યાવત્ પશ્યતિ તાવન્ મારયતિ, કૃષ્ણસર્પો વા

14.1.34 વિદ્યુત્પ્રદગ્ધોઽઙ્ગારો જ્વાલો વા વિદ્યુત્પ્રદગ્ધૈઃ કાષ્ઠૈર્ગૃહીતશ્ચાનુવાસિતઃ કૃત્તિકાસુ ભરણીષુ વા રૌદ્રેણ કર્મણાઽભિહુતોઽગ્નિઃ પ્રણીતશ્ચ નિસ્પ્રતીકારો દહતિ

14.1.35ab કર્મારાદ્ અગ્નિં આહૃત્ય ક્ષૌદ્રેણ જુહુયાત્ પૃથક્ ।

14.1.35chd સુરયા શૌણ્ડિકાદ્ અગ્નિં માર્ગતોઽગ્નિં ધૃતેન ચ

14.1.36ab માલ્યેન ચ એકપત્ન્યઽગ્નિં પુંશ્ચલ્યઽગ્નિં ચ સર્ષપૈઃ ।

14.1.36chd દધ્ના ચ સૂતિકાસ્વગ્નિં આહિતાગ્નિં ચ તણ્ડુલૈઃ

14.1.37ab ચણ્ડાલાગ્નિં ચ માંસેન ચિતાગ્નિં માનુષેણ ચ

14.1.37chd સમસ્તાન્ બસ્તવસયા માનુષેણ ધ્રુવેણ ચ

14.1.38ab જુહુયાદ્ અગ્નિમન્ત્રેણ રાજવૃક્ષસ્ય દારુભિઃ ।

14.1.38chd એષ નિષ્પ્રતિકારોઽગ્નિર્દ્વિષતાં નેત્રમોહનઃ

14.1.39 અદિતે નમસ્તે, અનુમતે નમસ્તે, સરસ્વતિ નમસ્તે, દેવ સવિતર્નમાસ્તે

14.1.40 અગ્નયે સ્વાહા, સોમાય સ્વાહા, ભૂઃ સ્વાહા ભુવઃ સ્વાહા (ઇતિ)

Chapt . પ્રલમ્ભનં, તત્ર અદ્ભુત ઉત્પાદનમ્

14.2.01 શિરીષ ઉદુમ્બરશમીચૂર્ણં સર્પિષા સંહૃત્યાર્ધમાસિકઃ ક્ષુદ્યોગઃ

14.2.02 કશેરુક ઉત્પલકન્દેક્ષુમૂલબિસદૂર્વાક્ષીરઘૃતમણ્ડસિદ્ધો માસિકઃ

14.2.03 માષયવકુલત્થદર્ભમૂલચૂર્ણં વા ક્ષીરઘૃતાભ્યાં, વલ્લીક્ષીરઘૃતં વા સમસિદ્ધં, સાલપૃશ્નિપર્ણીમૂલકલ્કં પયસા પીત્વા, પયો વા તત્સિદ્ધં મધુઘૃતાભ્યાં અશિત્વા માસં ઉપવસતિ

14.2.04 શ્વેતબસ્તમૂત્રે સપ્તરાત્ર ઉષિતૈઃ સિદ્ધાર્થકૈઃ સિદ્ધં તૈલં કટુકાલાબૌ માસાર્ધમાસસ્થિતં ચતુષ્પદદ્વિપદાનાં વિરૂપકરણમ્

14.2.05 તક્રયવભક્ષસ્ય સપ્તરાત્રાદ્ ઊર્ધ્વં શ્વેતગર્દભસ્ય લેણ્ડયવૈઃ સિદ્ધં ગૌરસર્ષપતૈલં વિરૂપકરણમ્

14.2.06 એતયોરન્યતરસ્ય મૂત્રલેણ્ડરસસિદ્ધં સિદ્ધાર્થકતૈલં અર્કતૂલપતઙ્ગચૂર્ણપ્રતીવાપં શ્વેતીકરણમ્

14.2.07 શ્વેતકુક્કુટાજગરલેણ્ડયોગઃ શ્વેતીકરણમ્

14.2.08 શ્વેતબસ્તમૂત્રે શ્વેતસર્ષપાઃ સપ્તરાત્ર ઉષિતાસ્તક્ર(?)મર્ક।ક્ષીરલવણં ધાન્યં ચ પક્ષસ્થિતો યોગઃ શ્વેતીકરણમ્

14.2.09 કટુકાલાબૌ વલીગતે ગતંઽર્ધમાસસ્થિતં ગૌરસર્ષપપિષ્ટં રોમ્ણાં શ્વેતીકરણમ્

14.2.10ab અલોજુનેતિ યઃ કીટઃ શ્વેતા ચ ગૃહગોલિકા ।

14.2.10chd એતેન પિષ્ટેનાભ્યક્તાઃ કેશાઃ સ્યુઃ શઙ્ખપાણ્ડરાઃ

14.2.11 ગોમયેન તિન્દુકારિષ્ટકલ્કેન વા મર્દિતાઙ્ગસ્ય ભલ્લાતકરસાનુલિપ્તસ્ય માસિકઃ કુષ્ઠયોગઃ

14.2.12 કૃષ્ણસર્પમુખે ગૃહગોલિકામુખે વા સપ્તરાત્ર ઉષિતા ગુઞ્જાઃ કુષ્ઠયોગઃ

14.2.13 શુકપિત્તાણ્ડરસાભ્યઙ્ગઃ કુષ્ઠયોગઃ

14.2.14 કુષ્ઠસ્યપ્રિયાલકલ્કકષાયઃ પ્રતીકારઃ

14.2.15 કુક્કુટકોશાતકી(?)શતાવરીમૂલયુક્તં આહારયમાણો માસેન ગૌરો ભવતિ

14.2.16 વટકષાયસ્નાતઃ સહચરકલ્કદિગ્ધઃ કૃષ્ણો ભવતિ

14.2.17 શકુનકઙ્ગુતૈલયુક્તા હરિતાલમનઃશિલાઃ શ્યામીકરણમ્

14.2.18 ખદ્યોતચૂર્ણં સર્ષપતૈલયુક્તં રાત્રૌ જ્વલતિ

14.2.19 ખદ્યોતગણ્ડૂપદચૂર્ણં સમુદ્રજન્તૂનાં ભૃઙ્ગકપાલાનાં ખદિરકર્ણિકારાણાં પુષ્પચૂર્ણં વા શકુનકઙ્ગુતૈલયુક્તં તેજનચૂર્ણમ્

14.2.20 પારિભદ્રકત્વન્મષી મણ્ડૂકવસયા યુક્તા ગાત્રપ્રજ્વાલનં અગ્નિના

14.2.21 પરિભદ્રકત્વક્તિલકલ્કપ્રદિગ્ધં શરીરં અગ્નિના જ્વલતિ

14.2.22 પીલુત્વન્મષીમયઃ પિણ્ડો હસ્તે જ્વલતિ

14.2.23 મણ્ડૂકવસાદિગ્ધોઽગ્નિના જ્વલતિ

14.2.24 તેન પ્રદિગ્ધં અઙ્ગં કુશામ્રફલતૈલસિક્તં સમુદ્રમણ્ડૂકીફેનકસર્જરસચૂર્ણયુક્તં વા જ્વલતિ

14.2.25 મણ્ડૂકકુલીરાદીનાં વસયા સમભાગં તૈલં સિદ્ધં અભ્યઙ્ગં ગાત્રાણાં અગ્નિપ્રજ્વાલનમ્

14.2.26 વેણુમૂલશૈવલલિપ્તં અઙ્ગં મણ્ડૂકવસાદિગ્ધં અગ્નિના જ્વલતિ

14.2.27 પારિભદ્રકપ્પતિબલાવઞ્જુલવજ્રકદલીમૂલકલ્કેન મણ્ડૂકવસાસિદ્ધેન તૈલેનાભ્યક્તપાદોઽઙ્ગારેષુ ગચ્છતિ

14.2.28ab ઉપ ઉદકા પ્રતિબલા વઞ્જુલઃ પારિભદ્રકઃ ।

14.2.28chd એતેષાં મૂલકલ્કેન મણ્ડૂકવસયા સહ

14.2.29ab સાધયેત્ તૈલં એતેન પાદાવભ્યજ્ય નિર્મલૌ ।

14.2.29chd અઙ્ગારરાશૌ વિચરેદ્ યથા કુસુમસઞ્ચયે

14.2.30 હંસક્રૌઞ્ચમયૂરાણાં અન્યેષાં વા મહાશકુનીનાં ઉદકપ્લવાનાં પુચ્છેષુ બદ્ધા નલદીપિકા રાત્રાવુલ્કાદર્શનમ્

14.2.31 વૈદ્યુતં ભસ્માઙ્ગિશમનમ્

14.2.32 સ્ત્રીપુષ્પપાયિતા માષા વ્રજકુલીમૂલં મણ્ડૂકવસામિશ્રં ચુલ્લુયાં દીપ્તાયાં અપાચનમ્

14.2.33 ચુલ્લીશોધનં પ્રતીકારઃ

14.2.34 પીલુમયો મણિરગ્નિગર્ભઃ સુવર્ચલામૂલગ્રન્થિઃ સૂત્રગ્રન્થિર્વા પિચુપરિવેષ્ટિતો મુખ્યાદ્ અગ્નિધૂમ ઉત્સર્ગઃ

14.2.35 કુશામ્રફલતૈલસિક્તોઽગ્નિર્વર્ષપ્રવાતેષુ જ્વલતિ

14.2.36 સમુદ્રફેનકઃ તૈલયુક્તોઽમ્ભસિ પ્લવમાનો જ્વલતિ

14.2.37 પ્લવમાનાનાં અસ્થિષુ કલ્માષવેણુના નિર્મથિતોઽગ્નિર્ન ઉદકેન શામ્યતિ, ઉદકેન જ્વલતિ

14.2.38 શસ્ત્રહતસ્ય શૂલપ્રોતસ્ય વા પુરુષસ્ય વામપાર્શ્વપર્શુકાસ્થિષુ કલ્માષવેણુના નિર્મથિતોઽગ્નિઃ સ્ત્રિયાઃ પુરુષસ્ય વાઽસ્થિષુ મનુષ્યપર્શુકયા નિર્મથિતોઽગ્નિર્યત્ર ત્રિરપસવ્યં ગચ્છતિ ન ચાત્રાન્યોઽગ્નિર્જ્વલતિ

14.2.39ab ચુચ્ચુન્દરી ખઞ્જરીટઃ ખારકીટશ્ચ પિષ્યતે ।

14.2.39chd અશ્વમૂત્રેણ સંસૃષ્ટા નિગલાનાં તુ ભઞ્જનમ્

14.2.40 અયસ્કાન્તો વા પાષાણઃ કુલીરદર્દુરખારકીટવસાપ્રદેહેન દ્વિગુણઃ

14.2.41 નારકગર્ભઃ કઙ્કભાસપાર્શ્વ ઉત્પલ ઉદકપિષ્ટશ્ચતુષ્પદદ્વિપદાનાં પાદલેપઃ

14.2.42 ઉલૂકગૃધ્રવસાભ્યાં ઉષ્ટ્રચર્મ ઉપાનહાવભ્યજ્ય વટપત્ત્રૈઃ પ્રતિચ્છાદ્ય પઞ્ચાશદ્યોજનાન્યશ્રાન્તો ગચ્છતિ

14.2.43 શ્યેનકઙ્કકાકગૃધ્રહંસક્રૌઞ્ચવીચીરલ્લાનાં મજ્જાનો રેતાંસિ વા યોજનશતાય, સિંહવ્યાઘ્રદ્વીપકાક ઉલૂકાનાં મજ્જાનો રેતાંસિ વા

14.2.44 સાર્વવર્ણિકાનિ ગર્ભપતનાન્યુષ્ટ્રિકાયાં અભિષૂય શ્મશાને પ્રેતશિશૂન્ વા તત્સમુત્થિતં મેદો યોજનશતાય

14.2.45a અનિષ્ટૈરદ્ભુત ઉત્પાતૈઃ પરસ્ય ઉદ્વેગં આચરેત્ ।

14.2.45b આરાજ્યાય ઇતિ નિર્વાદઃ સમાનઃ કોપ ઉચ્યતે (ઇતિ)

Chapt . પ્રલમ્ભનં, તત્ર ભૈષજ્યમન્ત્રયોગઃ

14.3.01 માર્જાર ઉષ્ટ્રવૃકવરાહશ્વાવિદ્વાગુલીનમૃકાક ઉલૂકાનાં અન્યેષાં વા નિશાચરાણાં સત્ત્વાનાં એકસ્ય દ્વયોર્બહૂનાં વા દક્ષિણાનિ વામાનિ ચાક્ષીણિ ગૃહીત્વા દ્વિધા ચૂર્ણં કારયેત્

14.3.02 તતો દક્ષિણં વામેન વામં દક્ષિણેન સમભ્યજ્ય રાત્રૌ તમસિ ચ પશ્યતિ

14.3.03ab એકામ્લકં વરાહાક્ષિ ખદ્યોતઃ કાલશારિવા ।

14.3.03chd એતેનાભ્યક્તનયનો રાત્રૌ રૂપાણિ પશ્યતિ

14.3.04 ત્રિરાત્ર ઉપોષિતઃ પુષ્યેણ શસ્ત્રહતસ્ય શૂલપ્રોતસ્ય વા પુંસઃ શિરઃકપાલે મૃત્તિકાયાં યવાન્ આવાસ્યાવિક્ષીરેણ સેચયેત્

14.3.05 તતો યવવિરૂઢમાલાં આબધ્ય નષ્ટચ્છાયારૂપશ્ચરતિ

14.3.06 ત્રિરત્ર ઉપોષિતઃ પુષ્યેણ શ્વમાર્જાર ઉલૂકવાગુલીનાં દક્ષિણાનિ વામાનિ ચાક્ષીણિ દ્વિધા ચૂર્ણં કારયેત્

14.3.07 તતો યથાસ્વં અભ્યક્તાક્ષો નષ્ટચ્છાયારૂપશ્ચરતિ

14.3.08 ત્રિરાત્ર ઉપોષિતઃ પુષ્યેણ પુરુષઘાતિનઃ કાણ્ડકસ્ય શલાકાં અઞ્જનીં ચ કારયેત્

14.3.09 તતો અન્યતમેનાક્ષિચૂર્ણેનાભ્યક્તાક્ષો નષ્ટચ્છાયારૂપશ્ચરતિ

14.3.10 ત્રિરાત્ર ઉપોષિતઃ પુષ્યેણ કાલાયસીં અઞ્જનીં શલાકાં ચ કારયેત્

14.3.11 તતો નિશાચરાણાં સત્ત્વાનાં અન્યતમસ્ય શિરઃકપાલં અઞ્જનેન પૂરયિત્વા મૃતાયાઃ સ્ત્રિયા યોનૌ પ્રવેશ્ય દાહયેત્

14.3.12 તદ્ અઞ્જનં પુષ્યેણ ઉદ્ધૃત્ય તસ્યાં અઞ્જન્યાં નિદધ્યાત્

14.3.13 તેનાભ્યક્તાક્ષો નષ્ટછાયારૂપશ્ચરતિ

14.3.14 યત્ર બ્રાહ્મણં આહિતાગ્નિં દગ્ધં દહ્યમાનં વા પશ્યેત્ તત્ર ત્રિરાત્ર ઉપોષિતઃ પુષ્યેણ સ્વયંમૃતસ્ય વાસસા પ્રસેવં કૃત્વા ચિતાભસ્મના પૂરયિત્વા તં આબધ્ય નષ્ટચ્છાયારૂપશ્ચરતિ

14.3.15 બ્રાહ્મણસ્ય પ્રેતકાર્યે યો ગૌર્માર્યતે તસ્યાસ્થિમજ્જચૂર્ણપૂર્ણાઽહિભસ્ત્રા પશૂનાં અન્તર્ધાનમ્

14.3.16 સર્પદષ્ટસ્ય ભસ્મના પૂર્ણા પ્રચલાકભસ્ત્રા મૃગાણાં અન્તર્ધાનમ્

14.3.17 ઉલૂકવાગુલીપુચ્છપુરીષજાન્વ્ઽસ્થિચૂર્ણપૂર્ણાઽહિભસ્ત્રા પક્ષિણાં અન્તર્ધાનમ્

14.3.18 ઇત્યષ્ટાવન્તર્ધાનયોગઃ

14.3.19ab બલિં વૈરોચનં વન્દે શતમાયં ચ શમ્બરમ્ ।

14.3.19chd ભણ્ડીરપાકં નરકં નિકુમ્ભં કુમ્ભં એવ ચ

14.3.20ab દેવલં નારદં વન્દે વન્દે સાવર્ણિગાલવમ્ ।

14.3.20chd એતેષાં અનુયોગેન કૃતં તે સ્વાપનં મહત્

14.3.21ab યથા સ્વપન્ત્યજગરાઃ સ્વપન્ત્યપિ ચમૂખલાઃ ।

14.3.21chd તથા સ્વપન્તુ પુરુષા યે ચ ગ્રામે કુતૂહલાઃ

14.3.22ab ભણ્ડકાનાં સહસ્રેણ રથનેમિશતેન ચ ।

14.3.22chd ઇમં ગૃહં પ્રવેક્ષ્યામિ તૂષ્ણીં આસન્તુ ભાણ્ડકાઃ

14.3.23ab નમસ્કૃત્વા ચ મનવે બદ્ધ્વા શુનકફેલકાઃ ।

14.3.23chd યે દેવા દેવલોકેષુ માનુષેષુ ચ બ્રાહ્મણાઃ

14.3.24ab અધ્યયનપારગાઃ સિદ્ધા યે ચ કૌલાસ તાપસાઃ ।

14.3.24chd એતેભ્યઃ સર્વસિદ્ધેભ્યઃ કૃતં તે સ્વાપનં મહત્

14.3.25 અતિગચ્છન્તિ ચ મય્યપગચ્છન્તુ સંહતાઃ

14.3.26 અલિતે, વલિતે, મનવે સ્વાહા

14.3.27 એતસ્ય પ્રયોગઃ

14.3.28 ત્રિરાત્ર ઉપોષિતઃ કૃષ્ણચતુર્દશ્યાં પુષ્યયોગિન્યાં શ્વપાકીહસ્તાદ્ વિલખાવલેખનં ક્રીણીયાત્

14.3.29 તન્માષૈઃ સહ કણ્ડોલિકાયાં કૃત્વાऽસઙ્કીર્ણ આદહને નિખાનયેત્

14.3.30 દ્વિતીયસ્યાં ચતુર્દશ્યાં ઉદ્ધૃત્ય કુમાર્યા પેષયિત્વા ગુલિકાઃ કારયેત્

14.3.31 તત એકાં ગુલિકાં અભિમન્ત્રયિત્વા યત્ર એતન મન્ત્રેણ ક્ષિપતિ તત્ સર્વં પ્રસ્વાપયતિ

14.3.32 એતેન એવ કલ્પેન શ્વાવિધઃ શલ્યકં ત્રિકાલં ત્રિશ્વેતં અસઙ્કીર્ણ આદહને નિખાનયેત્

14.3.33 દ્વિતીયસ્યાં ચતુર્દશ્યાં ઉદ્ધૃત્યાદહનભસ્મના સહ યત્ર એતેન મન્ત્રેણ ક્ષિપતિ તત્ સર્વં પ્રસ્વાપયતિ

14.3.34ab સુવર્ણપુષ્પીં બ્રહ્માણીં બ્રહ્માણં ચ કુશધ્વજમ્ ।

14.3.34chd સર્વાશ્ચ દેવતા વન્દે વન્દે સર્વાંશ્ચ તાપસાન્

14.3.35ab વશં મે બ્રાહ્મણા યાન્તુ ભૂમિપાલાશ્ચ ક્ષત્રિયાઃ ।

14.3.35chd વશં વૈશ્યાશ્ચ શૂદ્રાશ્ચ વશતાં યાન્તુ મે સદા

14.3.36 સ્વાહા - અમિલે કિમિલે વયુચારે પ્રયોગે ફક્કે વયુહ્વે વિહાલે દન્તકટકે સ્વાહા

14.3.37ab સુખં સ્વપન્તુ શુનકા યે ચ ગ્રામે કુતૂહલાઃ ।

14.3.37chd શ્વાવિધઃ શલ્યકં ચ એતત્ ત્રિશ્વેતં બ્રહ્મનિર્મિતમ્

14.3.38ab પ્રસુપ્તાઃ સર્વસિદ્ધા હિ એતત્ તે સ્વાપનં કૃતમ્ ।

14.3.38chd યાવદ્ ગ્રામસ્ય સીમાન્તઃ સૂર્યસ્ય ઉદ્ગમનાદ્ ઇતિ

14.3.39 સ્વાહા

14.3.40 એતસ્ય પ્રયોગઃ

14.3.41 શ્વાવિધઃ શલ્યકાનિ ત્રિશ્વેતાનિ, સપ્તરાત્ર ઉપોષિતઃ કૃષ્ણચતુર્દશ્યાં ખાદિરાભિઃ સમિધામિર્(?) અગ્નિં એતેન મન્ત્રેણાષ્ટશતસમ્પાતં કૃત્વા મધુઘૃતાભ્યાં અભિજુહુયાત્

14.3.42 તત એકં એતેન મન્ત્રેણ ગ્રામદ્વારિ ગૃહદ્વારિ વા યત્ર નિખન્યતે તત્ સર્વં પ્રસ્વાપયતિ

14.3.43ab બલિં વૈરોચનં વન્દે શતમાયં ચ શમ્બરમ્ ।

14.3.43chd નિકુમ્ભં નરકં કુમ્ભં તન્તુકચ્છં મહાऽસુરમ્

14.3.44ab અર્માલવં પ્રમીલં ચ મણ્ડ ઉલૂકં ઘટ ઉબલમ્ ।

14.3.44chd કૃષ્ણકંસ ઉપચારં ચ પૌલોમીં ચ યશસ્વિનીમ્

14.3.45ab અભિમન્ત્રયિત્વા ગૃહ્ણામિ સિદ્ધ્ય્ऽર્થં શવશારિકામ્ ।

14.3.45chd જયતુ જયતિ ચ નમઃ શલકભૂતેભ્યઃ સ્વાહા

14.3.46ab સુખં સ્વપન્તુ શુનકા યે ચ ગ્રામે કુતૂહલાઃ ।

14.3.46chd સુખં સ્વપન્તુ સિદ્ધાર્થા યં અર્થં માર્ગયામહે ।

14.3.46ech યાવદ્ અસ્તં અયાદ્ ઉદયો યાવદ્ અર્થં ફલં મમ

14.3.47 ઇતિ સ્વાહા

14.3.48 એતસ્ય પ્રયોગઃ

14.3.49 ચતુર્ભક્ત ઉપવાસી કૃષ્ણચતુર્દશ્યાં અસઙ્કીર્ણ આદહને બલિં કૃત્વા એતેન મન્ત્રેણ શવશારિકાં ગૃહીત્વા પૌત્રીપોટ્ટલિકં બધ્નીયાત્

14.3.50 તન્મધ્યે શ્વાવિધઃ શલ્યકેન વિદ્ધ્વા યત્ર એતેન મન્ત્રેણ નિખન્યતે તત્ સર્વં પ્રસ્વાપયતિ

14.3.51ab ઉપૈમિ શરણં ચાગ્નિં દૈવતાનિ દિશો દશ ।

14.3.51chd અપયાન્તુ ચ સર્વાણિ વશતાં યાન્તુ મે સદા

14.3.52 સ્વાહા

14.3.53 એતસ્ય પ્રયોગઃ

14.3.54 ત્રિરાત્ર ઉપોસ્ષિતઃ પુષ્યેણ શર્કરા એકવિંશતિસમ્પાતં કૃત્વા મધુઘૃતાભ્યાં અભિજુહુયાત્

14.3.55 તતો ગન્ધમાલ્યેન પૂજયિત્વા નિખાનયેત્

14.3.56 દ્વિતીયેન પુષ્યેણ ઉદ્ધૃત્ય એકાં શર્કરાં અભિમન્ત્રયિત્વા કપાટં આહન્યાત્

14.3.57 અભ્યન્તરં ચતસૃણાં શર્કરાણાં દ્વારં અપાવ્રિયતે

14.3.58 ચતુર્ભક્ત ઉપવાસી કૃષ્ણચતુર્દશ્યાં ભગ્નસ્ય પુરુષસ્યાસ્થ્ના ઋષભં કારયેત્, અભિમન્ત્રયેચ્ચ એતેન

14.3.59 દ્વિગોયુક્તં ગોયાનં આહૃતં ભવતિ

14.3.60 તતઃ પરમાકાશે વિરામતિ

14.3.61 રવિસગન્ધઃ પરિઘમતિ સર્વં પૃણાતિ

14.3.62 ચણ્ડાલીકુમ્ભીતુમ્બકટુકસારોઘઃ સનારીભગોઽસિ - સ્વાહા

14.3.63 તાલ ઉદ્ઘાટનં પ્રસ્વાપનં ચ

14.3.64 ત્રિરાત્ર ઉપોષિતઃ પુષ્યેણ શસ્ત્રહતસ્ય શૂલપ્રોતસ્ય વા પુંસઃ શિરઃકપાલે મૃત્તિકાયાં તુવરીરાવાસ્ય ઉદકેન સેચયેત્

14.3.65 જાતાનાં પુષ્યેણ એવ ગૃહીત્વા રજ્જુકાં વર્તયેત્

14.3.66 તતઃ સજ્યાનાં ધનુષાં યન્ત્રાણાં ચ પુરસ્તાચ્છેદનં જ્યાચ્છેદનં કરોતિ

14.3.67 ઉદકાહિભસ્ત્રાં ઉચ્છ્વાસમૃત્તિકયા સ્ત્રિયાઃ પુરુષસ્ય વા પૂરયેત્, નાસિકાબન્ધનં મુખગ્રહશ્ચ

14.3.68 વરાહભસ્ત્રાં ઉચ્છ્વાસમૃત્તિકયા પૂરયિત્વા મર્કટસ્નાયુનાઽવબધ્નીયાત્, આનાહકારણમ્

14.3.69 કૃષ્ણચતુર્દશ્યાં શસ્ત્રહતાયા ગોઃ કપિલાયાઃ પિત્તેન રાજવૃક્ષમયીં અમિત્રપ્રતિમાં અઞ્જ્યાત્, અન્ધીકરણમ્

14.3.70 ચતુર્ભક્ત ઉપવાસી કૃષ્ણચતુર્દશ્યાં બલિં કૃત્વા શૂલપ્રોતસ્ય પુરુષસ્યાસ્થ્ના કીલકાન્ કારયેત્

14.3.71 એતેષાં એકઃ પુરીષે મૂત્રે વા નિખાત આનાહં કરોતિ, પદેઽસ્યાસને વા નિખાતઃ શોષેણ મારયતિ, આપણે ક્ષેત્રે ગૃહે વા વૃત્તિચ્છેદં કરોતિ

14.3.72 એતેન એવ કલ્પેન વિદ્યુદ્દગ્ધસ્ય વૃક્ષસ્ય કીલકા વ્યાખ્યાતાઃ

14.3.73ab પુનર્નવં અવાચીનં નિમ્બઃ કામમધુશ્ચ યઃ ।

14.3.73chd કપિરોમ મનુષ્યાસ્થિ બદ્ધ્વા મૃતકવાસસા

14.3.74ab નિખન્યતે ગૃહે યસ્ય દૃષ્ટ્વા વા યત્ પદં નયેત્ ।

14.3.74chd સપુત્રદારઃ સધનસ્ત્રીન્ પક્ષાન્નાતિવર્તતે

14.3.75ab પુનર્નવં અવાચીનં નિમ્બઃ કામમધુશ્ચ યઃ ।

14.3.75chd સ્વયઙ્ગુપ્તા મનુષ્યાસ્થિ પદે યસ્ય નિખન્યતે

14.3.76ab દ્વારે ગૃહસ્ય સેનાયા ગ્રામસ્ય નગરસ્ય વા ।

14.3.76chd સપુત્રદારઃ સધનસ્ત્રીન્ પક્ષાન્નાતિવર્તતે

14.3.77ab અજમર્કટરોમાણિ માર્જારનકુલસ્ય ચ ।

14.3.77chd બ્રાહ્મણાનાં શ્વપાકાનાં કાક ઉલૂકસ્ય ચાહરેત્ ।

14.3.77chd એતેન વિષ્ઠાડવક્ષુણ્ણા સદ્ય ઉત્સાદકારિકા

14.3.78ab પ્રેતનિર્માલિકા કિણ્વં રોમાણિ નકુલસ્ય ચ ।

14.3.78chd વૃશ્ચિકાલ્યૢ(?) અહિકૃત્તિશ્ચ પદે યસ્ય નિખન્યતે ।

14.3.78ef ભવત્યપુરુષઃ સદ્યો યાવત્ તન્નાપનીયતે

14.3.79 ત્રિરાત્ર ઉપોષિતઃ પુષ્યેણ શસ્ત્રહતસ્ય શૂલપ્રોતસ્ય વા પુંસઃ શિરઃકપાલે મૃત્તિકાયાં ગુઞ્જા આવાસ્ય ઉદકેન સેચયેત્

14.3.80 જાતાનાં અમાવાસ્યાયાં પૌર્ણમાસ્યાં વા પુષ્યયોગિન્યાં ગુઞ્જવલ્લીર્ગ્રાહયિત્વા મણ્ડલિકાનિ કારયેત્

14.3.81 તેષ્વન્નપાનભાજનાનિ ન્યસ્તાનિ ન ક્ષીયન્તે

14.3.82 રાત્રિપ્રેક્ષાયાં પ્રવૃત્તાયાં પ્રદીપાગ્નિષુ મૃતધેનોઃ સ્તનાન્ ઉત્કૃત્ય દાહયેત્

14.3.83 દગ્ધાન્ વૃષમૂત્રેણ પેષયિત્વા નવકુમ્ભં અન્તર્લેપયેત્

14.3.84 તં ગ્રામં અપસવ્યં પરિણીય યત્ તત્ર ન્યસ્તં નવનીતં એષાં તત્ સર્વં આગચ્છતિ

14.3.85 કૃષ્ણચતુર્દશ્યાં પુષ્યયોગિન્યાં શુનો લગ્નકસ્ય યોનૌ કાલાયસીં મુદ્રિકાં પ્રેષયેત્

14.3.85 તાં સ્વયં પતિતાં ગૃહ્ણીયાત્

14.3.87 તયા વૃક્ષફલાન્યાકારિતાન્યાગચ્છન્તિ

14.3.88ab મન્ત્રભૈષજ્યસમ્યુક્તા યોગા માયાકૃતાશ્ચ યે ।

14.3.88chd ઉપહન્યાદ્ અમિત્રાંઃ તૈઃ સ્વજનં ચાભિપાલયેત્ (ઇતિ)

Chapt . સ્વબલ ઉપઘાતપ્રતીકારઃ

14.4.01 સ્વપક્ષે પરપ્રયુક્તાનાં દૂષીવિષગરાણાં પ્રતીકારઃ

14.4.02 શ્લેષ્માતકકપિત્થદન્તિદન્તશઠગોજિશિરીષપાટલીબલાસ્યોનાગપુનર્નવાશ્વેતવારણક્વાથયુક્તમ્(?) ચન્દનસાલાવૃકીલોહિતયુક્તં નેજન ઉદકં રાજ ઉપભોગ્યાનાં ગુહ્યપ્રક્ષાલનં સ્ત્રીણાં, સેનાયાશ્ચ વિષપ્રતીકારઃ

14.4.03 પૃષતનકુલનીલકણ્ઠગોધાપિત્તયુક્તં મહીરાજીચૂર્ણં સિન્દુવારિતવરણવારુણીતણ્ડુલીયકશતપર્વાગ્રપિણ્ડીતકયોગો મદનદોષહરઃ

14.4.04 સૃગાલવિન્નામદનસિન્દુવારિતવરણવારણવલીમૂલકષાયાણાં અન્યતમસ્ય સમસ્તાનાં વા ક્ષીરયુક્તં પાનં મદનદોષહરમ્

14.4.05 કૈડર્યપૂતિતિલતૈલં ઉન્માદહરં નસ્તઃકર્મ

14.4.06 પ્રિયઙ્ગુનક્તમાલયોગઃ કુષ્ઠહરઃ

14.4.07 કુષ્ઠલોધ્રયોગઃ પાકશોષઘ્નઃ

14.4.08 કટફલદ્રવન્તીવિલઙ્ગચૂર્ણં નસ્તઃકર્મ શિરોરોગહરમ્

14.4.09 પ્રિયઙ્ગુમઞ્જિષ્ઠાતગરલાક્ષારસમધુકહરિદ્રાક્ષૌદ્રયોગો રજ્જુ। ઉદકવિષપ્રહારપતનનિહ્સંજ્ઞાનાં પુનઃપ્રત્યાનયનાય

14.4.10 મનુષ્યાણાં અક્ષમાત્રં, ગવાશ્વાનાં દ્વિગુણં, ચતુર્ગુણં હસ્ત્ય્। ઉષ્ટ્રાણામ્

14.4.11 રુક્મગર્ભશ્ચ એષાં મણિઃ સર્વવિષહરઃ

14.4.12 જીવન્તીશ્વેતામુષ્કકપુષ્પવન્દાકાનાં અક્ષીવે જાતસ્યાશ્વત્થસ્ય મણિઃ સર્વવિષહરઃ

14.4.13ab તૂર્યાણાં તૈઃ પ્રલિપ્તાનાં શબ્દો વિષવિનાશનઃ ।

14.4.13chd લિપ્તધ્વજં પતાકાં વા દૃષ્ટ્વા ભવતિ નિર્વિષઃ

14.4.14ab એતૈઃ કૃત્વા પ્રતીકારં સ્વસૈન્યાનાં અથાત્મનઃ ।

14.4.14chd અમિત્રેષુ પ્રયુઞ્જીત વિષધૂમામ્બુદૂષણાન્ (ઇતિ)

Book .

Chapt . તન્ત્રયુક્તયઃ

15.1.01 મનુષ્યાણાં વૃત્તિરર્થઃ, મનુષ્યવતી ભૂમિરિત્યર્થઃ

15.1.02 તસ્યાઃ પૃથિવ્યા લાભપાલન ઉપાયઃ શાસ્ત્રં અર્થશાસ્ત્રં ઇતિ

15.1.03 તદ્દ્વાત્રિંશદ્ યુક્તિયુક્તં - અધિકરણં, વિધાનં, યોગઃ, પદાર્થઃ, હેત્વ્ડર્થઃ, ઉદ્દેશઃ, નિર્દેશઃ, ઉપદેશઃ, અપદેશઃ, અતિદેશઃ, પ્રદેશઃ, ઉપમાનં, અર્થાપત્તિઃ, સંશયઃ, પ્રસઙ્ગઃ, વિપર્યયઃ, વાક્યશેષઃ, અનુમતં, વ્યાખ્યાનં, નિર્વચનં, નિદર્શનં, અપવર્ગઃ, સ્વસંજ્ઞા, પૂર્વપક્ષઃ, ઉત્તરપક્ષઃ, એકાન્તઃ, અનાગતાવેક્ષણં, અતિક્રાન્તાવેક્ષણં, નિયોગઃ, વિકલ્પઃ, સમુચ્ચયઃ ઊહ્યં ઇતિ

15.1.04 યં અર્થં અધિકૃત્ય ઉચ્યતે તદ્ અધિકરણમ્

15.1.05 પૃથિવ્યા લાભે પાલને ચ યાવન્ત્યર્થશાસ્ત્રાણિ પૂર્વાચાર્યૈઃ પ્રસ્થાપિતાનિ પ્રાયશઃ તાનિ સંહૃત્ય એકં ઇદં અર્થશાસ્ત્રં કૃતમ્ ઇતિ

15.1.06 શાસ્ત્રસ્ય પ્રકરણાનુપૂર્વી વિધાનમ્

15.1.07 વિદ્યાસમુદ્દેશઃ, વૃધ્દસમ્યોગઃ, ઇન્દ્રિયજયઃ, અમાત્ય ઉત્પત્તિઃ ઇત્યેવં। આદિકં ઇતિ

15.1.08 વાક્યયોજના યોગઃ

15.1.09 ચતુર્વર્ણાશ્રમો લોકઃ ઇતિ

15.1.10 પદાવધિકઃ પદાર્થઃ

15.1.11 મૂલહર ઇતિ પદમ્

15.1.12 યઃ પિતૃપૈતામહં અર્થં અન્યાયેન ભક્ષયતિ સ મૂલહરઃ ઇત્યર્થઃ

15.1.13 હેતુરર્થસાધકો હેત્વ્ઽર્થઃ

15.1.14 અર્થમૂલૌ હિ ધર્મકામૌ ઇતિ

15.1.15 સમાસવાક્યં ઉદ્દેશઃ

15.1.16 વિદ્યાવિનયહેતુરિન્દ્રિયજયઃ ઇતિ

15.1.17 વ્યાસવાક્યં નિર્દેશઃ

15.1.18 કર્ણત્વગ્ઽક્ષિજિહ્વાઘ્રાણ ઇન્દ્રિયાણાં શબ્દસ્પર્શરૂપરસગન્ધેષ્વવિપ્રતિપત્તિરિન્દ્રિયજયઃઇતિ

15.1.19 એવં વર્તિતવ્યં ઇત્યુપદેશઃ

15.1.20 ધર્માર્થવિરોધેન કામં સેવેત, ન નિહ્સુખઃ સ્યાત્ ઇતિ

15.1.21 એવં અસાવાહ ઇત્યપદેશઃ

15.1.22 મન્ત્રિપરિષદં દ્વાદશામાત્યાન્ કુર્વીત ઇતિ માનવાઃ - ષોડશ ઇતિ બાર્હસ્પત્યાઃ - વિંશતિં ઇત્યૌશનસાઃ - યથાસામર્થ્યં ઇતિ કૌટિલ્યઃ ઇતિ

15.1.23 ઉક્તેન સાધનં અતિદેશઃ

15.1.24 દત્તસ્યાપ્રદાનં ઋણાદાનેન વ્યાખ્યાતમ્ ઇતિ

15.1.25 વક્તવ્યેન સાધનં પ્રદેશઃ

15.1.26 સામદાનભેદદણ્ડૈર્વા, યથાઽઽપત્સુ વ્યાખ્યાસ્યામઃ ઇતિ

15.1.27 દૃષ્ટેનાદૃષ્ટસ્ય સાધનં ઉપમાનમ્

15.1.28 નિવૃત્તપરિહારાન્ પિતા ઇવાનુગૃહ્ણીયાત્ ઇતિ

15.1.29 યદ્ અનુક્તં અર્થાદ્ આપદ્યતે સાઽર્થાપત્તિઃ

15.1.30 લોકયાત્રાવિદ્ રાજાનં આત્મદ્રવ્યપ્રકૃતિસમ્પન્નં પ્રિયહિતદ્વારેણાશ્રયેત

15.1.31 નાપ્રિયહિતદ્વારેણાશ્રયેત ઇત્યર્થાદ્ આપન્નં ભવતિ ઇતિ

15.1.32 ઉભયતોહેતુમાન્ અર્થઃ સંશયઃ

15.1.33 ક્ષીણલુબ્ધપ્રકૃતિં અપચરિતપ્રકૃતિં વા ઇતિ

15.1.34 પ્રકરણાન્તરેણ સમાનોઽર્થઃ પ્રસઙ્ગઃ

15.1.35 કૃષિકર્મપ્રદિષ્ટાયાં ભૂમૌ - ઇતિ સમાનં પૂર્વેણ ઇતિ

15.1.36 પ્રતિલોમેન સાધનં વિપર્યયઃ

15.1.37 વિપરીતં અતુષ્ટસ્ય ઇતિ

15.1.38 યેન વાક્યં સમાપ્યતે સ વાક્યશેષઃ

15.1.39 છિન્નપક્ષસ્ય ઇવ રાજ્ઞશ્ચેષ્ટાનાશશ્ચ ઇતિ

15.1.40 તત્ર શકુનેઃ ઇતિ વાક્યશેષઃ

15.1.41 પરવાક્યં અપ્રતિષિદ્ધં અનુમતમ્

15.1.42 પક્ષાવુરસ્યં પ્રતિગ્રહ ઇત્યૌશનસો વ્યૂહવિભાગઃ ઇતિ

15.1.43 અતિશયવર્ણના વ્યાખ્યાનમ્

15.1.44 વિશેષતશ્ચ સઙ્ઘાનાં સઙ્ઘધર્મિણાં ચ રાજકુલાનાં દ્યૂતનિમિત્તો ભેદઃ તન્નિમિત્તો વિનાશ ઇત્યસત્પ્રગ્રહઃ પાપિષ્ઠતમો વ્યસનાનાં તન્ત્રદૌર્બલ્યાત્ ઇતિ

15.1.45 ગુણતઃ શબ્દનિષ્પત્તિર્નિર્વચનમ્

15.1.46 વ્યસ્યત્યેનં શ્રેયસ ઇતિ વ્યસનમ્ ઇતિ

15.1.47 દૃષ્ટાન્તો દૃષ્ટાન્તયુક્તો નિદર્શનમ્

15.1.48 વિગૃહીતો હિ જ્યાયસા હસ્તિના પાદયુદ્ધં ઇવાભ્યુપૈતિ ઇતિ

15.1.49 અભિપ્લુતવ્યપકર્ષણં અપવર્ગઃ

15.1.50 નિત્યં આસન્નં અરિબલં વાસયેદ્ અન્યત્રાભ્યન્તરકોપશઙ્કાયાઃ ઇતિ

15.1.51 પરૈરસમિતઃ શબ્દઃ સ્વસંજ્ઞા

15.1.52 પ્રથમા પ્રકૃતિઃ, તસ્ય ભૂમ્ય્ઽનન્તરા દ્વિતીયા, ભૂમ્ય્।એકાન્તરા તૃતીયા ઇતિ

15.1.53 પ્રતિષેદ્ધવ્યં વાક્યં પૂર્વપક્ષઃ

15.1.54 સ્વામ્ય્ઽમાત્યવ્યસનયોરમાત્યવ્યસનં ગરીયઃ ઇતિ

15.1.55 તસ્ય નિર્ણયનવાક્યં ઉત્તરપક્ષઃ

15.1.56 તદ્।આયત્તત્વાત્, તત્કૂટસ્થાનીયો હિ સ્વામી ઇતિ

15.1.57 સર્વત્રાયત્તં એકાન્તઃ

15.1.58 તસ્માદ્ ઉત્થાનં આત્મનઃ કુર્વીત ઇતિ

15.1.59 પશ્ચાદ્ એવં વિહિતં ઇત્યનાગતાવેક્ષણમ્

15.1.60 તુલાપ્રતિમાનં પૌતવાધ્યક્ષે વક્ષ્યામઃ ઇતિ

15.1.61 પુરસ્તાદ્ એવં વિહિતં ઇત્યતિક્રાન્તાવેક્ષણમ્

15.1.62 અમાત્યસમ્પદ્ ઉક્તા પુરસ્તાત્ ઇતિ

15.1.63 એવં નાન્યથા ઇતિ નિયોગઃ

15.1.64 તસ્માદ્ ધર્મ્યં અર્થ્યં ચાસ્ય ઉપદિશેત્, નાધર્મ્યં અનર્થ્યં ચ ઇતિ

15.1.65 અનેન વાઽનેન વા ઇતિ વિકલ્પઃ

15.1.66 દુહિતરો વા ધર્મિષ્ઠેષુ વિવાહેષુ જાતાઃ ઇતિ

15.1.67 અનેન ચાનેન ચ ઇતિ સમુચ્ચયઃ

15.1.68 સ્વયઞ્જાતઃ પિતુર્બન્ધૂનાં ચ દાયાદઃ ઇતિ

15.1.69 અનુક્તકરણં ઊહ્યમ્

15.1.70 યથા ચ દાતા પ્રતિગ્રહીતા ચ ન ઉપહતૌ સ્યાતાં તથાઽનુશયં કુશલાઃ કલ્પયેયુઃ ઇતિ

15.1.71ab એવં શાસ્ત્રં ઇદં યુક્તં એતાભિઃ તન્ત્રયુક્તિભિઃ ।

15.1.71chd અવાપ્તૌ પાલને ચ ઉક્તં લોકસ્યાસ્ય પરસ્ય ચ

15.1.72ab ધર્મં અર્થં ચ કામં ચ પ્રવર્તયતિ પાતિ ચ ।

15.1.72chd અધર્માનર્થવિદ્વેષાન્ ઇદં શાસ્ત્રં નિહન્તિ ચ

15.1.73ab યેન શાસ્ત્રં ચ શસ્ત્રં ચ નન્દરાજગતા ચ ભૂઃ ।

15.1.73chd અમર્ષેણ ઉદ્ધૃતાન્યાશુ તેન શાસ્ત્રં ઇદં કૃતમ્  (ઇતિ)

End of the ArthashAstra

*kauTilIya arthashAstraM*

pdf was typeset on April 5, 2025

Please send corrections to *sanskrit@cheerful.com*